INDIAN RESEARCH INSTITUTE PUBLICATIONS.

VEDIC SERIES

ṚGVEDA-SAṂHITĀ

PART I

AUGUST, 1933

Published by

SATIS CHANDRA SEAL, M.A., B.L.,
Hony. Secretary,
INDIAN RESEARCH INSTITUTE
65, UPPER CHITPORE ROAD
CALCUTTA.

[Inland Price Re. 1/8] [Foreign Price 2s. 6d.

The spiritual heritage of India obscured by neglect and enveloped by the aura of myth and misrepresentation which have slowly grown round it through uncreative centuries has again to be discovered and rescued in its pure and primal form for modern humanity. This can be done only by sober judgment, careful scholarship and a disciplined faith in the potency of truths which are not limited by time and circumstance but ever operate through the living heart of humanity. My hope is that the Indian Research Institute in undertaking to restore and reinterpret the Vedic scriptures in their completeness will be guided by this unconquerable allegiance to truth and fulfil their great responsibility in carrying on the editing and publishing work with the unsparing diligence of creative scholarly research.

Rabindranath Tagore

PUBLISHER'S NOTE.

The Indian Research Institute, which was inaugurated in July 1932, to propagate Ancient Indian Culture and Wisdom by publication of and researches into the best products of Ancient Indian Literature, is now presenting before the scholarly world and the public, its first product—a critical and scholarly edition of the Ṛg-Veda Saṁhitā, the oldest literary record of the Indo-European people, with trilingual translations and explanatory notes in English, Hindi and Bengali. The scheme given below that will be followed in this edition is undoubtedly very ambitious and I crave the patience and indulgence of our readers and subscribers to carry it out in toto. At the outset I have to answer the question put by many sympathisers to me and to the Institute that why instead of publishing so many as yet unpublished treasures of Ancient Indian Literature, we undertake the Ṛg-Veda Saṁhitā when there are already a few editions of it. I beg to state that since F. Max Muller's pioneer work, the first and second editions of the Ṛg-Veda Saṁhitā, few critical editions have appeared. Besides they contained only the Text, Padapātha and Sāyanāchārya's commentary and are nearly out of print, nor are they obtainable by the majority of the Indians. Further it is an uncontroversial truth that the Vedas are the fountainhead of India's Religious thought and culture, and for a just appreciation of the magnificent legacies of the Past India, the widest publicity of the Vedas is indispensible. But they are not given the attention they deserve partly due to their being recorded in ancient Sanskrit not easily intelligible to the non-Sanskritists of the land and partly for want of any cheap and yet dependable scholarly edition with translations and critical notes. Also the results of the untiring labours of German scholars in the arena of Vedic literature are not accessible to people ignorant of German. In order to supply those longfelt wants, the Institute has launched upon this stupendous task of bringing out a unique world-edition of the Vedas with comprehensive and up-to-date research results. To fulfil the wants of the Indian mass, the Hindi and the Bengali portions would be presented in a very lucid and popular way. That the edition may be obtainable immediately by one and all, it will be issued in fascicles and each fasciculus is expected to be published every month. It will consist of the following four portions :—

(1) The Text with accent marks, Sākalya's Padapātha, Sāyanāchārya's commentary, extracts from other ancient Indian commentators viz. Skandaswāmin, Venkatamādhava, Gunavishnu, Anāndatirtha etc. (most of which are not available in the market), explanatory and critical notes in Sanskrit. and variant readings.

(2) English translation (in the light of Sāyana's Commentary), critical notes embodying among others, different interpretations of great European and American Vedic scholars viz. Bournouf, Max Müller. Roth, Langlois, Geldner, Pischel, Hillebrandt, Oldenberg, Bergaigne, Ludwig, Rosen, Grassmann, Bloomfield etc., together with a synopsis of the results of historical, geological, archæological and philological researches of eminent Indologists.

(3) Hindi translation (in the light of Sāyana's commentary), with short explanatory notes and viewpoints of other interpreters viz. Dayānanda Saraswati etc.

(4) Bengali translation (in the light of Sāyana's commentary) with requisite explanatory notes. Besides there shall be critical and elaborate introductions in Sanskrit, English, Hindi and Bengali, embodying all the researches into the vedic literature which will be published in separate fascicles.

It is needless to say, this edition shall have the great merit of incorporating all the different standard viewpoints and every portion shall have a special feature. It is gratifying to note that we have the privilege of getting at our disposal the help of erudite Vedic scholars composing our Editorial Board, and have every reason to believe that they will carry out this noble task to the entire satisfaction of the scholars and laymen alike, and I beg to offer thanks to them, on behalf of the Institute, for their untiring labours. I also thank the members of my committee, the gentlemen who have already enrolled themselves as subscribers and the generous public, for their kind co-operation and hearty sympathy.

In conclusion, I pray that this edition of the Vedas which are regarded by the Hindus as the realisations and revelations of our ancient Rishis, as the highest authority on moral and social laws will find ready appreciation in them for a proper moulding and free growth of our moral and social progress and outlook. To the Non-Hindus too, it shall serve the useful purpose of a storehouse of knowledge and materials for varied researches into the language, history, culture and civilisation of the Aryans of the dim and distant ages and for any critical, historical and genetic survey of later philosophical and religious thoughts of India. It may also establish the inseparable bond of religious and cultural unity among the Indo-Aryan Indo-Iranian and Indo-European peoples, existing from the earliest period of humanity.

Let us now hope that the Vedas, the Book of books will open to the world the spiritual, moral and intellectual treasures handed down by our earliest forefathers and give the key to the solution of the deepest secrets and enigmas of human hearts.

"Jhulan Purnimā"
5th August, 1955
Indian Research Institute, Calcutta.

Satis Chandra Seal

FOREWORD

The unimaginably vast Vedas and the multitudinous literature springing up round them from age to age have bewildered and baffled Seekers in all times. "Impart them not to the अतपस्क (undevoted)" has been the eternal injunction which led to restrictions and circumventions that have been ill-understood and worse appreciated by those that are not devotees To keep the flame aglow and to help it in growing from more to more has been the age-long endeavour of all coming within the influence of what the Vedas seek to teach and impart.

In the inalienable interest of purity of text, to put it at the lowest, methods of promulgation and spread of Vedic truth have been most careful and at times appeared to amount almost to unhealthy secrecy when it had to be handed from father to son and from preceptor to disciple, and when the slightest change in pronunciation and intonation made all the difference to ideation and sense in a highly complex language with peculiar grammatical formation. It was this spirit that forbade the imparting of the Vedas to those with imperfect training, devotion and preparation with which olden times used to associate women and non-Brahmins. Things necessarily changed with the appearence and growth of modern methods of record, even which have not been free from sources of impurity. Even when letters, alphabets, scripts and languages came into existence—long before which,—in fact from the commencement of Eternity, if such a phrase be permissible—when the Vedas were in existence, the injunction has been meticulously careful and loyally obeyed. This injuction abiding for all times in spirit, makes it imperative and obligatory on those who venture upon the publication of anything relating to the pristine storehouse of human knowledge and inspiration from the beginning of time, to be most careful.

The Indian Research Institute in its attempt to bring out a new edition of the Rigvedas is not and can not be oblivious of the spirit of this injunction which had its origin in the natural desire that Vedic teachings should on no account be defiled or degraded by imperfect presentation or interested interpretation.

Purity of the Text has been attempted to be secured after much laborious comparison and compilation. As the Publisher's Note fully explains, the present edition will aim at incorporating Padapātha, Sāyana's commentary, comparative notes on other commentaries and will incorporate an English, a Bengali and a Hindi translation for the use of those to whom Vedic Sanskrit with all their difficulties is a sealed book.

In this connection referring only to modern endeavours one must gratefully recall to mind the labours of Swāmi Dayānanda Saraswati of the Punjab, of the scholars of Poona who edited the Vedārtha Yatna, and the editor of the Bombay publication. Bengal has had its share of labours of conservation and promulgation of Vedic learning which have unfortunately recently flagged.


Among the workers in Bengal are worthy of note the labours of Rājā Rām Mohun Roy and more recently of Maharsi Debendra Nāth Tagore, Pandit Tārānāth Tarkavāchaspaty, Pandit Satyabrata Sāmasrami (who worked with the assistance and encouragement of Principal Prasanna Kumār Sarvādhikāri of the Sanskrit College), Pandit Ramānāth Saraswati, Mr. Ramesh Chandra Dutt (who had the assistance of Pandit Iswar Chandra Vidyāsagar and Pandit Mahesh Chandra Nyāyaratna), Pandit Umesh Chandra Vidyāratna, Pandit Umesh Chandra Batabyāl, Mr. Manmatha Nāth Dutt, Pandit Durgādās Lāhiri, and the Bengali Pandits of the Vedodbodhini Sabhā of Benares. Inspite of these labours, dependable editions at moderate prices are not available which is a great drawback for those who for spiritual, educational, literary or historical purposes—as the case may be, desire to possess and consult this storehouse of learning, wisdom and spirituality.

The field is vast. But alas, the gleaners are few and are getting fewer and fewer every day. Vedic learning, research and culture have been steadily on the wane, particularly in Bengal, and workers both of the old and modern types, trained in old and modern methods, and imbued with old and modern spirit are steadily on the decrease. This has augmented the difficulty of those who have voluntarily made themselves responsible for the present edition. As President of the Committee of Management, guiding their labours, I confidently bespeak abundant co-operation, support and patience of the public—the princes and people of India—for whose assistance we earnestly appeal. Without such help and co-operation, the painstaking and ambitious standard that we have set to ourselves can not be achieved. For reasons absolutely beyond our control we have been behindhand our engagements for which complete apologies are due and are tendered.

The task is heavy, the resources are few and the workers fewer. This is our excuse for the patent imperfection of the work. Inspite of all handicap, our devoted band of workers is resolved to carry it on in a prayerful and determined spirit.

May the God of Nations bless and prosper this high and worthy emprise.

"Jhulan Purnimā"
5th August, 19[illegible]
Prasadpur,
20 Suri Lane, Calcutta.



ऋग्वेद-संहिता

श्रीसायणाचार्यकृत भाष्ययुता

श्रीस्कन्दस्वामि-वेङ्कटमाधवकृत भाष्यीयमन्त्रार्थेन सम्वलिता

सम्पादकीय

कतिचिद्विषमस्थलटिप्पणीयुता

महामहोपाध्याय-कलिकाताविश्वविद्यालयाध्यापकेन

सीतारामशास्त्रिणा

सम्पादिता

साच

"इण्डियन रिसार्च इनष्टिट्यूट" समित्याः सम्पादकेन

श्रीसतीशचन्द्र शीलेन

प्रकाशिता

संवत् १९९०, शकाब्दा १८५५ ।

भूमिका

वेदशब्दो विद्धातुतो निष्पन्न इति प्रसिद्धम्। विद्धातुस्तु विविधो ज्ञानलाभसत्तादिरूपार्थभेदात्। तत्र सत्तारूपार्थस्याकर्मकत्वेनात्राग्रहणेऽपि अवशिष्टार्थकविद्धातुविशेषग्रहणे नियामकाभावात्सर्वविधधातोरस्य

वेदपदार्थस्तल्लक्षणं च।

निष्पत्तिः। विद्यतेऽनेनेति वेद इति घञ्प्रत्ययात्। वेदशब्दस्य ग्रन्थविशेषे रूढत्वेन शब्दात्मकस्य तस्य ज्ञानादिरूपताया व्यवहारेऽभावेन तत्साधनतयाश्च शब्दस्य प्रसिद्धत्वेन करणेऽत्र घञ्। ज्ञायते लभ्यते ऽनेनेति वेदशब्दतो लाभे कर्मणोऽपेक्षणे विश्वजिन्न्यायेन सर्वापेक्षितस्य वस्तुसतः सुखस्य तत्त्वं वाच्यम्। अज्ञातस्यासतश्च सुखस्येच्छाविषयत्वाभावेन तदर्थं ज्ञानस्य सत्तायाश्च संबन्धापेक्षणे प्रथमोपस्थितत्वादभेद एव संबन्धो ग्राह्यः। प्रसिद्धो हि सत्तायाः पदार्थैः साकमभेदः। एवं ज्ञानास्यापीति ज्ञानाभिन्नमेव सुखं येन ज्ञायते लभ्यते वा येन स वेद इति निष्पद्यते। नादृशं सुखं परब्रह्मस्वरूपं वेदप्रमाणकम्, तस्य नित्यत्वे सर्वव्यापित्वेऽपि हठाद् ग्रहणासंभवेन तद्ग्रहणायापेक्षितपदार्थानामपि साक्षात्परंपरया तत्साधकानां प्रतिपादनमपि उक्तप्रतिपादनमेवेति पुरुषार्थानां पुरुषार्थसाधनानां च वेदतो ज्ञानलाभाविति प्रसिद्ध्या पुरुषार्थसाधनत्वं च प्रायेण कर्मणामिति तत्साधकानां द्रव्यदेवतारूपाणां प्रतिपादनम्। तत्रर्ग्वेदे देवतायाः प्रतिपादनं प्रायेण। सा चैकैव सती उपाधिभेदतो भेदेन युतेव गृह्यते यथालोकम्। स च समष्टिव्यष्टिभेदेन द्विविधः। तत्र व्यष्टावात्मग्रहस्यातिप्रसिद्धत्वात्तद्वशतः संपद्यमानस्याध्यात्मशब्देन व्यवहारः। व्यष्टिन्यायस्य यद्यपि समष्टौ सत्त्वं तथापि तस्य स्पष्टं हठाद्ग्रहणाभावेनानुमानिकतत्सत्तामपेक्ष्य तदुपाधिवशतः संपद्यमानस्याधिदैवभेदेन व्यवहारः। तत्रात्मग्रहस्य कदाऽप्यप्रसिद्धस्य दृष्टानुसारेणैव अनुमानप्रवृत्तेः केवलदृश्यमाननिरात्मोपाधिवशतः संपन्नं भेदमधिभूतमिति व्यवहरन्ति। एवञ्च वस्तुतोऽध्यात्माधिदैवताधिभौतिकानामेकत्वादेकस्य वचनेनापररूपताऽपि तत्रागतप्रायैव। तत्र केवलमाधिभौतिकभेदस्य पामरैरपि प्रयत्नतोऽन्वेषणादिना ग्रहीतुं शक्यत्वमिति संवादसंभवात्तद्दृष्टान्तेनापरत्रापि विश्वासदार्ढ्येन प्रवृत्तिः सुशकेति तमेव भेदं गृहीत्वाऽनेन वेदेनादित्यादिदेवताप्रतिपादनम्। तत्रापि तासां वर्णने गुणक्रिये विनाऽसंभवेन गुणक्रिययोरपि कर्त्रादिकारकादिव्यवहारं विना व्यवहर्तुमशक्यत्वाच्चेतनोचितव्यवहारवत्तद्व्यवहारस्यात्यन्तजडमार्गादिष्वपि सुघं गच्छति मार्गोऽयमित्यादिवदतिप्रसिद्ध्या शब्दस्वाभाव्याच्च तथा प्रतिपादनम्। अनयैव रीत्या देवतायाः क्रियाभेदं स्थानभेदं वोपाधितयोपादाय भिन्नत्वमिति विभिन्नशब्दादिभिर्व्यवहारः। एवं च साक्षात्परंपरया पुरुषार्थानां यतो ज्ञानादि स वेद इति निष्कृष्टतया सिध्यति।

तस्यैतस्य वेदस्य कालविषये बहुधा बहवो विप्रतिपद्यन्ते। तत्र केचन शब्दानामपभ्रंशपरम्परानुरोधेन विभिन्नदेशीयपुरातनग्रन्थगतभाषासौसादृश्यादिकल्पनया वेदस्य खीष्टाब्दीयशकप्रवृत्तितः पूर्वं सार्द्धवर्षसहस्रप्रवृत्तितः प्रवृत्तिरिति गृह्णन्ति। तत्रापभ्रंशपरम्परायाः कल्प्यमानाया अनियमेन,

वेदकालः।

तत्कल्पनेऽपि एकावस्थातोऽपरावस्थाप्राप्तिकालस्याप्यनियमेन वेदकालनियमनासंभवः। अन्यदेशीयपुरातनग्रन्थगतभाषासौसादृश्यस्य च वियोगकालाधिकपरम्पराभावादिनिबन्धनत्वेन तद्दर्शनतो वियोगकालस्य कदाचन निर्णयसंभवेऽपि न तद्वशतोऽपरस्य कालनिर्णयसंभवः। संभवति चैकस्यानेककालवर्तित्वेऽपि हेतुवशतस्ततो विभिद्यमानस्य परस्याल्पकालिकत्वमिति। किञ्च वियोगहेतोरपि ग्रणावद्ग्रहणं विना तद्गतवर्णनाभेदस्यापि न कालनिर्णायकत्वसंभवः। अनुमाने हेतोरनिर्णये साध्यानिर्णय इति प्रामाणिकत्वेनानिश्चितोक्त-

विग्रहेतुतो निश्चितकालरूपसाध्यनिर्णयस्यानुमानाभासत्वेन नाना वेदकालनिर्णयः। अपरे पुनर्ज्योतिषिकीं परिस्थितिमुपादाय तस्य कालं निर्णयन्ति। तैरपि वेदगतायास्तस्याः सामग्र्येणाविचारणादेकदेशग्रहणतः सर्वग्रहणमिति भ्रान्तया पूर्वसिद्धविपरीतग्रहवशतश्च क्रियमाणानुमानस्याभासत्वम्। अयं च तेषां निष्कर्षः- विलोमगस्य क्रान्तिवृत्ते विषुववृत्तपातबिन्दोः पूर्वपूर्ववर्तिस्थानानां मध्ये मृगशिरसि पुनर्वस्वोर्वा सविधे तत्सत्ता-बोधकस्य तद्युक्तपरिस्थितिबोधकस्य वा वेदे वचनं ततः पूर्वभाविन्याश्च तत्रानुल्लेख इति तस्याः काल एव वेदकालः। तत्सत्त्वं च सामान्यतो वर्षसहस्राष्टकतः प्रवृत्तमिति तत उत्तरकालवर्तित्वं वेदस्य। प्रत्युत ततोत्तरकालवर्तिनां कृत्तिकाभरण्यश्विनीरेवतीप्रभृतीनां पातबिन्दुस्थानानामनुल्लेखश्चोक्तं निराबाधं साधयतीति। संपातस्य सर्ववृत्तव्यापिता चेदानीन्तनज्यौतिषिकसिद्धान्तसिद्धेति न कोऽपि विरुद्धवादस्यावसर इति। तत्र पूर्णे वृत्ते पूर्वत्वपरत्वयोर्निर्णयासंभवः। पूर्वस्यापरत्वात्परस्यापि पूर्वत्वात्। वर्तमानकालमारभ्य पूर्वत्वग्रहणे हि कथं चन तद्युक्तं शक्यम्। तत्रेदानीमुपलभ्यमानस्य भाद्रपदादिनक्षत्रसंपातस्य तद्वशतः संपाद्यमानस्य फाल्गुने वसन्तप्रवर्तनस्य, तदधीनस्य च मेरुस्थले (in the Artic region) आश्विनप्रभृतिमास-चतुष्टयीयदिनशतके दीर्घरात्रप्रवृत्त्या संपन्नस्य शतशरत्त्वस्य वेदे "शतं शरदः" "शारदीः पुरः" इत्यादिभि-र्वचनमनुपद्येत। शरच्छब्दस्य वर्षपरत्वेन ग्रहणं तु "शतं जीव शरदो वर्द्धमानः शतं हेमन्ताञ्छतमु वसन्तान्" इत्यादावेकत्रैव हेमन्तवसन्तयोरपि शतव्यवहारस्य दर्शनादशक्यम्। शरद इव हेमन्त-वसन्तयोरपि शतशब्दसंबन्धवशतो वर्षपरत्वे वक्तव्ये एकवचनेनैव गतत्वात्त्रयाणामेकस्मिन्वाक्ये वचनस्या-युक्तत्वं स्यात्। तस्माच्छतशरद्वचनमुक्तरीत्या दीर्घरात्रसम्बन्धाभिप्रायमिति अकामेनापि वक्तव्यम्। तच्च शत-शरत्त्वमिदानींतनमिति वक्तुमशक्यमिति पूर्वपर्यायगतत्वं तस्य वक्तव्यं तथा सति पातबिन्दोः पूर्वस्थानानु-ल्लेखवचनं शीघ्रतामूलकमिति न तेनापि कालनिर्णयसंभवः। वेदकाल एतावज्ज्यौतिषिकपरिस्थिति-विज्ञानाभाव इति वादस्तु वेदस्य वास्तविकार्थानभिज्ञाननिबन्धनः। भवन्ति च सहस्रशो वेदे ज्यौतिषिक-परिस्थितेः सूक्ष्मसूक्ष्मतराया बोधकानि वचनानीत्यन्यत्र निरूपितम्। शतशरत्त्वमिवापराण्यपि वैदिकानि प्रमाणानि अश्विनीप्रभृतिषु संपातनिर्णायकानि अन्यत्र निरूपितानि। याज्ञिकप्रक्रियासुसाध्यानि च। एवं चोक्तपरिस्थितेरेतत्पर्यायगतत्वमित्यस्य नियमनासंभववेन वेदकालस्यानिर्णय एव। हिमपातादिवशतः संपद्यमान-प्रलयानां तद्वशानां च भौमिकावस्थान्तराणामन्यथात्वादिकस्येदमित्थमिति निर्णयाभावेन तत्रापि काल-निर्णयेऽनिश्चितहेतूपादानेन तत्कालनिर्णय एव तावद्दुःशकः। प्रलयानां कालनिर्णयेऽपि तदधीनभौतिक-परिस्थितेरन्यथात्वस्य सृष्ट्यन्तरसापेक्षत्वेनापि तत्कालनिर्णयो दुःशकः। एवं च वेदकालनिर्णयाभावेन मीमांस-कसिद्धाऽज्ञातादिकालरूपानादितैव तत्र मन्तव्या। सर्गादिसृष्टौ कालाकाशादीनां नित्यत्वेनेदानीमन्यमानानां यथा स्वकारणत उत्पाद एवं वेदस्यापि स्वकारणत उत्पादो भवेदिति दिक्।

वेदे उच्यमानानां देवतानां मध्ये विदेशीयपुरातनग्रन्थेषु कासां चनोपलम्भः कासांचनानुपलम्भस्तु न देवतानां पुरातनत्वनवीनत्वयोर्मौलिकत्वामौलिकत्वयोर्वा साधनायालम्। अभिप्रायभेदेन तद्ग्रहणसंभवात्। तथाहि

देवतानां पुरातनत्व नूतनत्व।

वेदे पूर्वोक्तरीत्या देवताः पृथिवीगोलार्द्धद्वयगतोन्नतोन्नताक्षांशस्थानद्वयपरिस्थितिवैशिष्ट्येन विभिन्नविभिन्ना विभिन्ननामभिः प्रतिपाद्यन्ते। यथैकस्यैव सत आदित्यस्य दक्षिणोत्तराक्षद्वय-परिगते विषुवक्रान्तिपातबिन्दुच्छेदवति वृत्ते विषुववृत्तस्य पार्श्वद्वये दक्षिणोत्तरायणवशतः संपद्यमानस्य विषुववृत्तात्पार्श्वद्वये विप्रकर्षस्य वशतो विष्णुत्वं विषुवक्रान्तिपातबिन्दुस्थत्वेन भगत्वं ततश्चलन-वशतः सूर्यत्वमिति विभिन्नकर्मादिवशतो विभिन्ननामभिर्व्यवहारः, एवमन्धकारस्यापि सर्वावरणाद्वृत्रत्वं प्रकाशा-

प्रदानान्नमुचित्वं गमनाद्वहित्वमित्यादिना व्यवहारः। सच परिस्थितिप्रकारश्च पार्थिवगोलार्द्धद्वयीयोन्नताक्षांशस्थले कश्चन समानः कश्चन विभिन्न इति तद्वशतः केषांचन समाननाम्ना व्यवहारः केषांचन विभिन्ननाम्ना। भवतिच दृष्टिभेदः। उत्तरगोलीयोन्नताक्षांशस्थले उद्यत उदितस्य चादित्यस्य प्रादक्षिण्येन परिभ्रमो, दक्षिणगोलीयोन्नताक्षांशवर्तिनां च तस्य उदयादिकालेऽप्रादक्षिण्येन परिभ्रम इति प्रसिद्धतरम्। तत्रापि एकगोलीयानां स्वाभिप्रायेण दिनं रात्रिः परगोलीयाभिप्रायेण रात्रिर्दिनमिति दृष्टिभेदः। तत्रोत्तरगोले दिनाभिप्रायेण तद्गतव्यवहारमनुसृत्य व्यवस्थितानां देवतानां न दक्षिणार्द्धीयतदानीन्तनपरिस्थितिपरत्वं तत्रोत्तरगोलीयरात्रिगतपरिस्थित्यभिप्रायेण व्यवस्थितस्य तदानीन्तनदक्षिणगोलार्द्धीयपरिस्थितिपरत्वं भवति। यथोत्तरगोलार्द्धसंबन्धिन इन्द्रस्य न कदापि दक्षिणगोलार्द्धसम्बन्धित्वेन व्यवहारः, एवं दक्षिणगोलार्द्धमात्रसंबन्धिनो यमस्य न कदाचिदपि उत्तरगोलार्द्धीयसंबन्धितया व्यवहारः। एवं च दक्षिणगोलार्द्धीयपरिस्थित्यभिप्रायेण प्रवृत्तपारसीकपुरातनग्रन्थेषु इन्द्रस्यावचनमात्रतो न तस्य पश्चात्कालिकत्वम्। वरुणादिष्वयमेव न्यायः। मित्रादीनां यवादीनां तु गोलार्द्धद्वये परिस्थितितौल्येन तत्र व्यवहारदर्शनतो न प्राक्कालिकत्वनिर्णयसंभवः। अवश्यं च पारसीकपुराणग्रन्था दक्षिणगोलार्द्धसंबन्धिपरिस्थित्यभिप्रायेण प्रवृत्ताः। अतएव तत्र वर्षारम्भादेशारदसंपाततः प्रवृत्तिः। उदितानामुषआदीनां पूर्वाणिमित्यादिनाऽप्रादक्षिण्यपरिभ्रमवचनादेरुपपत्तिः। अतएव देवविरोधश्चोपपद्यते। प्रसिद्धं वेदे पुराणादिष्वपि दक्षिणदिक्सम्बन्धिता पितॄणामुत्तरदिक्संबन्धिता च देवानाम्। सोमत्वमपि दक्षिणगोलार्द्धमुपारूढस्यादित्यस्यैवेति विवेचयिष्यतेऽग्रे। एवं तत्र दृश्यमानसोमवर्णनस्य ऋग्वेदे सोमवर्णनस्य च साजात्यस्योपपत्तिः। ब्राह्मणादिषु बहुषु "देवा वै यदेव यज्ञेऽकुर्वंस्तदसुरा अकुर्वन्त व्यावर्तन्त" इत्यादिनाऽयं गोलद्वयवशतः संपद्यमानभेद उपवर्ण्यते। कदाचन पूर्वतः प्रवृत्तगोलार्द्धद्वयीयवर्णनाया उत्तरगोलार्द्धविशिष्टत्ववर्णनाया वा आग्रहवशतः परित्यागेन दक्षिणगोलार्द्धमात्रगतपरिस्थितिवर्णनमात्रेण तदनुसारेणैव कर्मादिव्यवस्थापनाग्रहेण वा स्यादार्यतो वियोगः पारसीकानाम्। भवतु वा यथाकथंचित्। सर्वथा पारसीकानां दक्षिणगोलार्द्धीयपरिस्थितिसम्बन्धमात्रेण प्रवृत्तत्वं तदनुसारिणश्चापरेऽपि नेन्द्रा वर्णयन्ति नैतावता तस्य तदादीनां वाऽवरकालिकत्वनिर्णयसंभव इति। वृत्रस्तद्धन्ता चैतैर्मन्यत एव। तत्र दक्षिणभागे वृत्रहन्तृत्वस्येन्द्रेऽभावेन तन्नाम्ना व्यवहाराभावस्याप्युपपत्तिरिति। एकगोलार्द्धवर्तिनां गोलार्द्धान्तरपरिस्थितिविज्ञानमिव तद्गोलवर्तिन्या अपि परिस्थितेर्विज्ञानाय नावश्यमुन्नताक्षांशस्थल एव निवासापेक्षेति न दीर्घरात्रादिवर्णनवशतस्तन्निवासित्वनिर्णयसंभवः। अपभ्रंशप्रणाल्यपि नावश्यं कल्प्यमानहैन्दवशर्मण्यभाषाप्रभवत्वं संस्कृतवैदिकभाषादीनां, तत्प्रभवत्वं वा तदादीनामिति निर्णयायालम्। कल्प्यमाननियमानां व्यभिचारात्। अव्यभिचारेऽपिवा वैदिकभाषाप्रभवत्वसाधनायापि तेषामुपयोगसंभव इति नानेन देशादिनिर्णयस्यापि संभवः। एतेन अस्मात् स्थानादिम एवं विनिर्गता एवमत्र प्रविष्टा इति कल्पनं व्याख्यातम्। हेतूनां व्यभिचारात् विपरीतसाधनस्यापि ततः संभवात्। कदाचन युरपदेशीया इदानीं कल्प्यमानावराधरकालप्रणाल्या प्रथमत आर्यतो विभक्तास्ततः पारसीका इति परवर्तिषु सौसादृश्यदर्शनं पूर्वेषु नेत्यादिकल्पनस्याप्यवकाशात्। तस्मात् देवतादीनां न पौर्वापर्यकल्पना तोषावहेति दिक्।

तस्य च वेदस्य विभागस्त्रिधा ऋग्यजुःसामभेदात्। अथर्ववेदस्य तु ऋग्वेद एवान्तर्भाव ऋग्रूपत्वात्। अत एव त्रयीति व्यवहारः। यजुर्वेदस्यावान्तरविभागद्वैविध्य शुक्लकृष्णभेदात्।

वेदविभागः।

एवमृचोऽपि द्वैविध्यमृगथर्वभेदात्। तत्र ऋग्वेदस्याग्निसम्बन्धिनां गोलार्द्धद्वयीयां परिस्थितिमुपादायैव विशिष्य प्रवृत्तत्वम्। यजुर्वेदस्त्वन्तरिक्षपरिस्थितिमुपादायप्रवृ— । भवति चान्तरिक्षे

आदित्यसंबन्धात्तेजस्विता तदसंबन्धाच्च नक्षत्रादिवैशिष्ट्यं चेति तदिदं द्वयमुपादाय तदीयशुक्लकृष्णभेदौ। आदित्यासम्बन्धिपरिस्थितेस्तत्संबन्धिपरिस्थितिवन्न विस्पष्टत्वमिति तस्याः स्पष्टत्वाय तत्त तत्र व्याख्याना-पेक्षित्वेन यथास्थानं व्याख्यानसंनिवेशेन मिश्रितत्वादशुक्लत्वं सौरपरिस्थित्याश्च विस्पष्टतया तत्र तदनपेक्षणेन तदनुक्त्याऽमिश्रणाद् व्याख्यानेन शुक्लत्वमिति व्यवहारोऽपि पूर्वोक्तमेव द्रढयति। अतएव वाजसनेयादि-नाम्नामप्युपपत्तिः। प्रसिद्धिश्च सूर्यसकाशत एषां यजुषां लाभ इति। सामवेदश्च केवलसौरपरिस्थिति-मात्रनिबन्धनस्तस्या अनन्तत्वेनानेकशाखत्वं तस्य। यथा यजुर्वेदस्यावान्तरपरिस्थितिवशतो भेदद्वयमेवं सर्वेषु स्वस्वावान्तरपरिस्थितिभेदवशतः शाखाभेदः प्रवक्तृनामसंबन्धित्वेन व्यवह्रियते काठककौथुमतैत्तिरीयादि-शब्दैः। ते च भेदाः ऋच एकविंशतिर्यजुष एकोत्तरं शतं तत्र शुक्लस्य पञ्चदश कृष्णस्य षडशीतिः। साम-वेदस्य सहस्रं, अथर्ववेदस्य नवेति। तत्रेदानीं केचनैव भेदा नामतो विज्ञायन्ते स्वरूपतश्च केचन। परेतु विकरालकालकवलिता नामशेषत्वमप्यतिक्रान्ताः।

प्रतिवेदं च ब्राह्मणग्रन्था मन्त्रोपयोगादिप्रतिपादनपराः। तेऽपि वेदभागा एव। यथा यजुर्वेदत्वेन संहितान्तःप्रविष्टव्याख्यानविशिष्टस्य संहितात्वं तद्विशिष्टस्य यथा वेदत्वमेवं ब्राह्मणग्रन्थ-विशिष्टस्य वेदत्वं बोध्यम्। ब्राह्मणत्वमपि सोपनिषत्कारण्यकभागस्य भवति।

ब्राह्मणग्रन्थस्य वेदत्वम्।

तस्यैतस्य वेदस्य स्वरूपस्यार्थस्योपयोगस्य सम्यग्विज्ञापनाय तदुपकारीणि अतएवाङ्गानि प्रवृत्तानि व्याकरणादीनि। व्याकरणादयः शब्दा विद्यास्थाननामानि, तेषां विद्यास्थानानां यत्रयत्राभिव्यक्तिस्तत्र प्रवर्तन्ते ते शब्दाः। नैतावता तन्मात्रग्रन्थस्य तत्त्वमिति। अतएवास्य विद्यास्थानस्येदानीं व्याकरणस्य पाणिनीयादि-ग्रन्थेन, शिक्षायाः प्रातिशाख्यपाणिनिप्रभृतिशिक्षाग्रन्थेभ्यो व्यञ्जनस्वरवैशिष्ट्यज्ञानादानु-प्रदानादिधर्मस्वरूपवैशिष्ट्येनाभिव्यक्तिः, कल्पस्य श्रौतादिसूत्रतो निरुक्तस्य यास्कीयादि-ग्रन्थतः, छन्दसः पिङ्गलच्छन्दोविचित्यादितः, ज्यौतिषस्य च ऋगादिज्यौतिषादिग्रन्थतोऽभिव्यक्तिरिति तेषा-मङ्गत्वेन व्यवहारः। तत्रोक्ताङ्गाध्ययनमात्रत उपदेशं विना ध्वनिगतविशेषस्योच्चारणज्ञानासंभवेनाध्ययनत एव वेदप्राप्तिनियमः। नहि उपध्मानीयजिह्वामूलीयेतिनामत उश्च पश्च ध्मायेते अनेनेतिव्युत्पत्तितो जिह्वामूलीयस्य जिह्वामूलस्थानत्येत्यादिके शतशः कथ्यमाने पुस्तकस्थे वा दृश्यमाने तस्य यथावदुच्चारणस्य तद्विज्ञानस्य वा संभवः। नैतावताध्ययननियमतो लिपिविज्ञानाभावस्य कल्पनं समुचितम्। वेदानां विरचनपक्षेऽनेकेषां मन्त्राणामेकसूक्त-गतानां रचयितृर्षीणा विरचनावसरं विना लिप्यादिसाधनं विरचनस्यासंभवात। मन्त्रविरचनकाले तत्कालिकानामपि ऋषिसमप्रज्ञतया एकर्षिकल्पितस्यापरेणादरतो ग्रहणस्यासंभवेन तथाप्रवृत्तावपि विरचयितृर्षीणा प्रथमं येन रूपेण संपादिता मन्त्रास्तेषामुपदेशावसरे तस्या एवानुपूर्व्याः स्मृत्याद्यसंभवेनाविकलभावेन वेदस्वरूपलाभस्यैवाभावः प्राप्नोतीति नैषा कल्पना मनोरमेति, वेदे दृश्यमानज्यौतिषादिपाटवस्य त्वसंभव एव तथा सति प्राप्नुयात। अस्मत्सिद्धान्तानुसारेण दृष्टस्य परित्यागोऽयोग्य एवेति। पूर्वोक्ताङ्गषट्कग्रन्थानामिवानुक्रमणिकाग्रन्थो वेदगतं क्रमेणर्षिच्छन्दोदैवतं प्रतिपादयतीति सोऽपि वेदोपकारकः।

वेदाङ्गानि।

येदानीमृक्संहितेति ऋग्वेद इति वा व्यवह्रियते तस्या आश्वलायनीनामकशाखान्तःपातित्वम्। साच-शाकलानामेका शाखा। तस्याः संहितायाः सूक्तसंख्या तदीयानुक्रमणिकायामुच्यते—"तदेतत्सूक्तसहस्रं सप्तदशकं पादाधिकमृग्वेदे पारायणपाठे शाकल्ये" इति। तत्र मध्येवालखिल्यनाम-कानि सूक्तानि खिलरूपाणि उक्तसंख्यायामनुक्रमणिकाकारेणागणितानि एकादश चेत्समी-ल्यन्ते तर्हि संकलिता संख्या सूक्तानामष्टाविंशत्यूर्ध्वं सहस्रं भवति। तत्रापि सूक्तप्रभृतीनां खिलान्तराणां

संहितागतऋक्सूक्तसंख्या।

गणने संख्याया आधिक्यमेव भवति। तथाऽत्र सूक्तगतानामृचां गणनेऽपि ऋक्त्वेन व्यवहार्याः प्रामाणिक्य ऋचः क्वचन ऋगर्द्धत्रयेण क्वचन ऋगर्द्धमात्रेण पादद्वयात्मकेन क्वचनैकपादात्मकेन च भवन्ति। तत्र सामान्यत ऋचां त्र्यधिकाः पादा भवन्ति। पादवशतश्चर्चां व्यवहारः। यथा त्रिभिः पादैर्युता त्रिपदा चतुर्भिश्चतुष्पदेत्यादिरूपः। स्वल्पेषु स्थलेषु द्वाभ्यामपि पादाभ्यामृक् संपद्यते तादृश्यश्च द्विपदाशब्देन व्यवह्रियन्ते। एका चात्र विद्यते एकपादमात्ररूपैव। सा चैकपदेत्युच्यते। तत्रर्चां गणनेऽनेके मतविभेदाः केश्चिद् द्विपदा अपि अध्ययनानुसारेण गणनावसरेऽर्द्धर्चद्वयेनैवैकर्चत्वं संपाद्य गण्यन्ते केश्चिन्नेति। तथा अत्यष्टिप्रभृतिच्छन्दस्सु अर्द्धर्चत्रयेण यत्रैका ऋक् संपद्यते तत्रापि द्वाभ्यामेवार्द्धर्चाभ्यामेकर्चसंपादनमिति ऋचां नैकविधा मतभेदा भवन्ति। तत्रेयं प्रदीयमाना संख्या वालखिल्यसूक्तीयर्क्सहिता द्विपदानामेकपदानां पृथगृक्त्वं गृहीत्वाऽत्यष्टिप्रभृतीनामपि ऋगर्द्धत्रयेणर्क्त्वं गृहीत्वा दशसहस्राणि पञ्चाशदुत्तरा पञ्चशती चेति भवतीति विज्ञेयम्। चरणव्यूहनामके ग्रन्थेतु प्रकारान्तरेण संगण्यर्चः प्रदर्शिताः। तत्रर्चां पदसंख्याऽप्युच्यते। परन्त्वत्र तस्या अनुपयोग इति न सा विलिख्यते। उपर्युक्ताऽनुक्रमणिकागतसूक्तसंख्याऽपि सूक्तगणनप्रकारेणैवेति विज्ञेयम्। यतः सूक्तानां विषये ऋषिसूक्तं देवतासूक्तं छन्दःसूक्तमित्येवमनेके प्रकाराः। यावत्पर्यन्तमेकर्षिसम्बन्धस्तावदेकं सूक्तमिति देवतैक्यसंबन्धपर्यन्तं देवतासूक्तं छन्दोविभेदपर्यन्तं च छन्दःसूक्तमिति तदर्थः। ब्राह्मणादिगतविभागानुसारिणं विभागं गृहीत्वाऽनुक्रमणिकाकारः सूक्ततदीयर्क्संख्यादिकं प्रदर्शितवान्। तदभिप्रेतर्क्संख्या चोपरि प्रदर्शितैव।

वेङ्कटमाधव मतम्

वेङ्कटमाधवस्तु प्रकारान्तरेण संगण्य चरणव्यूहकारमतस्यायुक्तत्वमिति प्रतिपादयामास। तत्राभिप्रायभेदेनैवोभयोर्मतवैषम्यम्। एवं हि तेनोच्यते --

> शतैश्चतुर्भिरधिकमयुतं गणितं मया।
> द्वेत्र यान्यतिरिच्येते द्विपदाश्चात्र संगताः।
> पृथग्यदा तु गणनं द्विपदानां तदाऽधिका।
> चतुःशतादशीतिश्च वाक्यं च ग्रहवानयम्।
> ऋचां दश सहस्राणि ऋचां पञ्चशतानि वै।
> ऋचामशीतिः पादश्च पाठोऽयं न समञ्जसः॥ इति॥

अत्र शतादधिकोद्धृत्तसङ्ख्याया उभयोः समत्वेन सहस्रसंख्याया अपि साम्येन शतविषये कस्य चन गणनेऽनवधानमिति संभवः।

प्रतिवेदं शाखानामनेकत्वमिति पूर्वं प्रतिपादितम्। शाखाप्रवृत्तिनिदानंतु ग्रन्थेष्वेवमुपलभ्यते यत् बुद्धिमान्द्यात्सकलवेदपरिपालनस्याशक्यत्वेन तद्विस्मरणं स्यात्तन्माभूदिति शाखाभेदप्रवृत्तिः। सति चैवं विस्मरणाभावाय प्रवृत्तेन शाखाभेदेन तथा भवितव्यं यथोक्तार्थसिद्धिः स्यात्। एवं चात्र समुदितवेदभागस्यात्यन्तावश्यकस्य पृथक्कारं कृत्वा तं सामान्यरूपेण सर्वत्र योजयित्वाऽवशिष्टस्य यथासंभवं विभज्य कश्चनांश एतस्यां शाखायां कश्चनापरस्यामिति यथायथं भागयोजनायां सर्वाभिः शाखाभिर्मिलित्वा सर्ववेदपरिपालनमिति संभवः। अतएव सर्वत्र केचन समाना अंशा उपलभ्यन्ते तेषामुपपत्तिः। अतएव एकस्यां शाखायामधीतायां तत्समानकल्पशाखान्तरस्याध्ययनानपेक्षेति शिष्टप्रवाद उपपद्यते। अवश्यापेक्षितांशस्यैकशाखाध्ययनेनैव कृतत्वात्। यज्ञस्य पूर्णरूपज्ञानाय वेदान्तरस्यान्यतमशाखाध्ययनापेक्षित्वेन तदर्थं च तत्र प्रवृत्त्यैव सामान्यतोऽपेक्षितसकललाभात्। सकलवेदपरिपालनं त्वशक्यमेकेन पुरुषेणेति

शाखाभेदः।

विचारेणैव तु शाखाभेदप्रवृत्तिः। अस्यामवस्थायां यदि एकवेदीयैकाधिकशाखाध्ययने प्रवर्तेत पुरुषस्तर्हि तदध्ययनेनैव शक्तेरपचयाद्यज्ञस्य पूर्णरूपस्याप्यग्रहापत्तिः स्यात्। तावतापि च तद्वेदीयसकलशाखाध्ययनासंभवश्च। एकस्यां शाखायां पठ्यमानस्यांशस्य कदाचन तात्कालिककार्यवशतोऽपरत्रापेक्षणेन तस्य तत्र ग्रहणे खिलत्वमिति व्यवहारः। तेनैव तच्छाखासंबन्धित्वाभावस्य विज्ञानात्। नैतावता तस्यावेदीयत्वं विभिन्नकालिकत्वं वा। प्रशाखादिष्वयमेव न्यायः। अतएव बाष्कलशाखायाः शाकलतो वैशिष्ट्यप्रतिपादनाय षड्गुरुशिष्यसंवादे शिष्टसंप्रदायः "गौतमादौशिजः कुत्सः······बाष्कलाध्ययनक्रम" इति प्रदर्शितः संगच्छते। गौतमपिदृष्टसूक्ततः परस्तादौशिजकक्षीवद्दृष्टसूक्तानि ततः कुत्सस्य ऋषेरिति प्रकृतांशस्यार्थः। शाकलैस्तु गौतमसूक्तोत्तरं कुत्सकश्यपऋज्राश्वांबरीषसहदेवभयमानसुराधस्त्रितानां सूक्तानि प्रपठ्य ततः काक्षीवतानि पठ्यन्ते। सूक्तानि चोभयत्रापि तान्येव केवलमानुपूर्व्यां विभेदः। अन्ते चाश्वलायनैः खिलत्वेन पठ्यमानस्य संज्ञानसूक्तस्य बाष्कलैस्तच्छाखीयत्वेनाखिलत्वेन पाठ इत्यादिर्व्यवहार उक्तरीत्योपपद्यते। एवं चैतेन क्रमेण वेदं व्यस्य तदनुसारेण पाठकशाखानिर्द्धारणं नतु पाठकशाखाभेदतो वेदशाखाभेदकल्पना। एवं च वेदव्यासानामनेकत्वोक्तिरपि संगच्छते।

व्यसनावसरे मन्त्रसंग्रहणस्य त्वनेकानि निमित्तानि। कुत्रचन स्वरूपतो विस्मरणाभावः, कुत्रचन विभिन्नधर्मसम्बन्धित्वं, कुत्रचन ज्ञानोपयोगित्वमिति नैकविधत्वम्। यथा पाठभेदयुतत्वेनेदानीमभिप्रेयमाणा मन्त्रा वस्तुतो विभिन्ना एव। तेषां स्वरूपतस्तत्परिपालनाय कुत्रचन केचन कुत्रचन केचनेति संग्रहः।

मन्त्रसंग्रहनिमित्तभेदः।

यथा "पुरु त्वा दाश्वांवोचे" इत्येकत्र "पुरुत्वादाशिवां वोचे" इत्यपरत्र। एवमन्यत्। केचन समानरूपा वेदान्तर उपलभ्यमाना अपि वेदान्तरे पुनः पठ्यन्ते धर्मभेदसंबन्धाय यथा सहस्रशीर्षेत्ययमृक्ष्वपि पठ्यते यजुर्वेदेऽपि। तत्राद्ये यज्ञकाले उच्चैस्त्वधर्मसम्बन्धोऽन्त्ये उपांशुत्वधर्मसंबन्धो हेतुः। एवंचेदं मन्त्रद्वयमेव पूर्वतः प्रवृत्तं धर्मद्वयवैशिष्ट्येन तस्य व्यसनावसरे एकधर्मयुतस्यैकत्रापरधर्मयुतस्यापरत्रेति योजनमेव वेदभेदेन। एवं सामवेदे गीतिवशतस्तथा संग्रहः। एवं च नेमे पाठभेदा मन्त्रभेदात्। एतेन कालविप्रकर्षात्मूलप्रभ्रंशात्पाठकशाखाभेदवशतः पाठभेदप्रवृत्तिरिति वचनमविचारितरमणीयम्। ताश्च संग्रहकर्तॄनपेक्ष्य विभिन्नैर्नामभिः शाखा व्यवह्रियन्ते। एतदेवाभिप्रेत्योक्तं जैमिनिना 'आख्या प्रवचनादिति"।

यथैवैषां संहिताग्रन्थानां संग्रह एवं तस्य यज्ञ उपयोगबोधकब्राह्मणस्यापि तत्तदुपयोगानुसारेण संग्रहः। अतएव तत्र केचन समाना विभिन्नाश्च केचनांशा उपलभ्यन्ते तेषामुपपत्तिः। तत्तन्नामव्यवहारोऽप्युक्तवदेव।

ब्राह्मणसंग्रहः।

एतेन नामवशतो ब्राह्मणग्रन्थानां तत्तन्नामकपुरुषसंपादितत्वात्पौरुषेयत्वमिति वचनं परास्तम्। तस्य नामसम्बन्धस्य प्रवचनहेतुकत्वात्। एवं च प्रतिवेदशाखं संहिताब्राह्मणोभयरूपयुतता सिद्ध्यतीति तत्तच्छाखाभिप्रायेण तथा मौलिकाविभक्तवेदस्वरूपाभिप्रायेण प्रवृत्तः "मन्त्रब्राह्मणयोर्वेद नामधेयमि"ति प्रामाणिकप्रवादोऽप्युपपद्यते।

तत्रेदानीमृग्वेदे सांख्यायनी आश्वलायनीति संहिताद्वितयमुपलभ्यतेऽधीयतेऽध्येतृभिः। बाष्कलातु अव्यक्ता प्रामाणिकग्रन्थवशतस्तत्स्वरूपसंपादनस्य सुशकत्वम्। अपरास्तु माण्डूकेय्यादयः काश्चन नामत उपलभ्यन्ते तदितरास्तु न। एवमेतदीयब्राह्मणे ग्रन्थद्वयमिदानीमुपलभ्यते ऐतरेयं ब्राह्मणमाश्वलायनशाकलानां सांख्यायनं सांख्यायनानाम्। शाखान्तरीयाणि ब्राह्मणान्तराणि तु नोपलभ्यन्ते।

ऋग्ब्राह्मणम्।

तत्रैतरेयब्राह्मणं चत्वारिंशदध्याययुतम्। पञ्चानामध्यायानां सङ्घं पञ्चिकात्वेन व्यवहृत्याष्टपञ्चिकायुतम्। सांख्यायनं तु त्रिंशदध्याययुतम्। ऐतरेयब्राह्मणभाग ऐतरेयारण्यकनामको यत्र

पञ्चारण्यकानि भवन्ति यत्रैतरेयोपनिषदन्तर्भूता। यथास्य ब्राह्मणस्यारण्यकभाग एवमपरस्याप्यपेक्षणीयो नोपलभ्यते। तत्सत्तापि इदानीं प्रसिद्ध्यभावेनानिर्णेयं गता। अपरशाखानां ब्राह्मणग्रन्था एवनोपलभ्यन्त आरण्यकानां कथातु दूर एव।

यजुर्वेदस्य शाखाद्वयमध्ये शुक्लयजुर्वेदस्य पञ्चदश भेदानां मध्ये काण्वमाध्यन्दिनशाखयोरेवेदानीमुपलम्भः। तत्र संहिताद्वयं तदीयब्राह्मणद्वयं च। तयोर्ब्राह्मणं तु शतपथेत्येकनाम्नैव व्यवह्रियते। स्वल्पश्च स्वरूपे

वेदभागस्योपलम्भा-
नुपलम्भौ।

भेदस्तयोः। कृष्णयजुष एकाशीतिभेदमध्ये सत्याषाढापस्तम्बहिरण्यकेशीयानां तिस्रः शाखा इदानीमुपलभ्यन्ते। एवं बौधायन्यपि। तासां समाने एव संहिताब्राह्मणे सूत्राणि परं भिद्यन्ते। अपरासां त्वनुपलम्भः। तद्ब्राह्मणं तैत्तिरीयनाम्ना व्यवह्रियते। सामवेदस्य सहस्रभेदमध्ये कतिचनेदानीं केवलं नामतो विज्ञायन्त आसुरायणीयप्रभृतयः। तन्मध्ये कौथुमशाखैवेदानीं सर्वत्र लब्धप्रसरा। तस्याः संहितायाः पञ्च पर्वाणि आग्नेयैन्द्रपावमानारण्यशुक्रियभेदैः। ब्राह्मणानि चाष्टौ ताण्ड्यषड्विंशप्रभृतीनि। एवमथर्ववेदस्य नवभेदमध्ये शौनकानामेव भेद उपलभ्यते। एकमेव च ब्राह्मणं गोपथनामकम्। एवं वेदानामुपलभ्यमानभेदानामत्यल्पत्वेन भूयान्वेदराशिः करालकालकवलितः। एतेषां भेदानामारण्यकानि विलुप्तान्येव केवलं तद्भाग उपनिषदो विज्ञायन्ते तासां च मुक्तिकोपनिषदि वेदभेदेन भागशो व्यवस्थापनं कृतम्। तत्र काश्चनातिप्रसिद्धाश्छान्दोग्यबृहदारण्यकप्रभृतयः। एवं तत्तद्वेदीयश्रौतसूत्राणि ऋचामाश्वलायनं सांख्यायनमिति द्वे कृष्णयजुष आपस्तम्बबौधायनसत्याषाढाख्यानि शुक्लयजुर्वेदस्य कात्यायनं सामवेदस्य लाट्यायनद्राह्यायणे अथर्ववेदस्य नक्षत्रादिकल्पपञ्चकं नामत एव ज्ञायते पठनपाठनादाविदानीं प्रायेणाभाव एव। एवं गृह्यसूत्राण्यपि कानिचनैवोपलभ्यन्ते आश्वलायनसांख्यायनगोभिलप्रभृतीनि।

सर्वेषु वेदेष्विदं साधारणं वैशिष्ट्यं यत्स्वरा नाम। ते च उदात्तानुदात्तस्वरितप्रचितनामकाः। एतेषां मन्यथात्वेऽर्थान्तरं भवतीति ते विज्ञेयाः। एतद्विषये चैषाऽऽख्यायिका त्वष्टा विश्वरूपवधप्रकुपितेनेन्द्रं विना तदप-

स्वराः।

चाराय यज्ञः प्रारब्धः। इन्द्रेणानाहूतेनापि तत्रत्यः सोमो भक्षितः। तावता क्रोधपराकाष्ठामारूढस्त्वष्टा तत्रत्यमाज्यमिन्द्रशत्रुर्वर्द्धस्वेति मन्त्रेणाग्नौ हुतवान् इन्द्रस्यापचाराय। परन्तु प्रयुक्तेन्द्रशत्रुपदस्येन्द्रघातकार्थत्वाय तत्पुरुषसमासरूपेण वक्तव्ये प्रमादतो बहुव्रीहिरूपत्वेनैवोच्चारितवांस्तेनेन्द्र एव घातको वृत्रस्य संपन्नः। यद्यपि इन्द्रशत्रुपदे स्वरूपत उक्तोभयसमासप्रयुक्तं वैलक्षण्यं नास्ति तथापि स्वरे भवति विशेषः। बहुव्रीहावाद्युदात्तं भवतीदं पदं तत्पुरुषे चान्तोदात्तम्। तत्रान्तोदात्ते प्रयोक्तव्य आद्युदात्तप्रयोगेण तस्माद्धुतहविषो निष्पन्नवृत्रस्येन्द्रेण वधः कृत इति। तेषामुच्चारणं यद्यपि कण्ठेनैव भवति स्वराणां तथापि वैदिकैस्तदवसरे तत्संस्कारदार्ढ्याय शारीरभागविशेषपरिचालनं संप्रदायतोऽनुष्ठीयते। तत्र ऋग्वेदकृष्णयजुर्वेदाथर्ववेदकण्वशाखारूपयजुर्वेदाध्येतृभिश्च मस्तकपरिचालनेन ते उच्चार्यन्ते। तत्र मस्तकस्याधस्तान्नामनेनानुदात्त ऊर्ध्वीकरणेन स्वरितः प्रदर्श्यते उदात्तप्रचितोच्चारणे त्वकंप एव भवति। शुक्लयजुर्वेदिभिर्हस्तेन ते प्रदर्श्यन्ते। तत्र हस्तनामनेनानुदात्त उत्तोलनेनोदात्तस्तिर्यगाक्षेपेण स्वरितः प्रदर्श्यते। प्रचितेतु न विशेषः। सामवेदिभिस्तु अङ्गुलीभिः प्रदर्श्यन्ते यद्विषये शिक्षागतः श्लोकः—उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम्। निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकामिति। निहतोऽनुदात्तः। गानस्वराः क्रुष्टादयस्सप्ततु विभिन्नाः। तेषामपि हस्तेनैव प्रदर्शनं भवति।

तेषामुदात्तादीनां पुस्तके लेखने तु क्वचिल्लेखालेखनतस्सङ्केतः क्वचनाङ्कालेखनतः। यथा सामवेदं वर्जयित्वाऽपरेषु वेदेषु अक्षरस्याधस्तात्तिर्यग्गामिरेखाविलेखेनानुदात्तः, उपरिष्टादूर्ध्वगामिरेखया स्वरितः, केवले-

नाक्षरेण स्वरितप्रचितौ विज्ञातौ भवतः। सामवेदे पुनरक्षराणामुपर्येकद्वित्र्यङ्कैस्ते प्रदर्श्यन्ते। तत्रैकाङ्केनोदात्तो

स्वरचिह्नानि।

द्व्यङ्केन स्वरितस्त्र्यङ्केनानुदात्तोऽङ्करहितैश्च प्रचिताः प्रदर्श्यन्ते। सर्वे चैते संहितासु भवन्ति। ब्राह्मणग्रन्थेषु तु हित्वा यजुर्वेदं स्वरा नोच्चार्यन्ते न विलिख्यन्तेऽपिवा। यजुर्वेदे पुनः कृष्णयजुर्ब्राह्मणे संहितावदेव स्वरा भवन्ति उच्चारणे लेखनेऽपि। शुक्लयजुषः शतपथाख्यब्राह्मणेतु भाषिकाख्य उदात्तस्वरविशेषोऽक्षराधस्तात् अनुदात्तचिन्हवल्लिख्यते। उदात्तवच्चोच्चारणं तस्य। सचानुदात्तपूर्ववत उदात्तस्वरो भवति। क्वचन स्वरितपरस्यानुदात्तस्यापि तेन चिन्हेन लेखतोऽग्रेतनस्य स्वरितज्ञानं भवति।

स्वरिते जात्याजात्यभेदद्वयेन द्वैविध्यं तत्र जात्यस्वरितस्य प्रदर्शनाय हित्वा यजुर्वेदमन्यत्राक्षरात्स्वरितात्परत्रा-र्नुदात्तप्राप्तौ मध्ये एकद्वित्र्यङ्कविलेखस्तस्य चोपरिष्टादधस्ताच्चोदात्तानुदात्तचिह्ने विलिख्येते। अयं च प्रकारः

स्वरितः।

कंप इति व्यवह्रियते। कपानां समानमेवोच्चारणमिति केचन। प्रथमद्वितीयप्रकारयोः साम्यं तृतीये वैषम्यमिति केषांचन प्रकारः। स च प्रकारः स्वरितस्योदात्तानुदात्तत्वधर्मद्वय-प्रदर्शनाय भवति। अयमङ्कविलेखो ह्रस्वदीर्घप्लुताभिप्रायेण स्वरितस्येति केषां चन वचनं प्रामादिकम्। प्रातिशाख्ये स्थलत्रये प्लुतवचनात्तत्र चैतस्य प्रकारस्याप्राप्तेः।

वर्णानामुच्चारणे ऋक्षु स्वरमध्यस्थितो डकारो ढकारश्च ळळ्हरूपेण लिख्येते उच्चार्येते च। अनुस्वारस्य च वकारोत्तरत्वमिव चोच्चारणम्। यजुर्वेदिभिः रनुस्वारस्य यमस्वरूपोच्चारणवदुच्चारणं ह्रस्वदीर्घवैशिष्ट्येन। लेखेऽपि

वर्णसंकेतः।

सर्पफणोपरिष्ठचिन्हवत्सबिन्दुलेखो दीर्घानुस्वारस्य टकारमादृश्यमिव सबिन्दुकं ह्रस्वानुस्वारस्य चिह्नतया विलिख्यते शुक्लयजुर्वेदिभिः। कृष्णयजुर्वेदिभिस्तु केवलं चन्द्रबिन्द्वोरक्षरस्य परस्ताद् विलेखनं क्रियते। शुक्लयजुर्वेदिभिर्यकारस्य स्थलविशेषे जकारवदुच्चारणं षकारस्य खकारवत् क्रियते। द्वित्वादिकंतु वर्णविशेषस्य स्थलविशेषे। विवृत्तिध्रुवयोस्तु चिन्हाभाव इति दिक्।

मन्त्राणां यज्ञे उपयोग इति कृत्वा तत्प्रदर्शनाय श्रौतसूत्रं तत्र तत्रोपन्यस्यते ऋषयश्च विज्ञेया भवन्तीति। देवताश्चाग्रे विशिष्य प्रतिपादयिष्यन्ते काश्चन। तत्र कर्म्माणि तावत्स्मार्तश्रौतरूपेण प्रथमतो द्विविधानि।

कर्म्माणि।

स्मार्तानां यद्यपि श्रौतत्वमेव तथापि तत्प्रतिपादकवेदभागस्येदानीमनुपलम्भेन तत्स्वरूपविज्ञानस्य गृह्यसूत्रादिस्मृतिग्रन्थत एव सम्भवेन गोबलीवर्दन्यायेन पृथगुप-न्यासः। श्रौतानि चेदानीं समुपलभ्यमानश्रुतिज्ञेयानि येषां स्वरूपं श्रौतसूत्रतो विस्पष्टं गृह्यते। तेषां कर्मणां हुतप्रहुतब्रह्मणिहुतभेदेन त्रैविध्यं प्रतिज्ञाय तत्स्वरूपं गृह्यसूत्रकारेण विवृतम्-हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता इति। तत्र हुतानां पुनर्भेदो भवति नैकविधस्तेषामपि मध्ये केषांचनापरापेक्षितानां संस्थाशब्देन व्यवहारस्ताश्च संस्थास्त्रिविधा भवन्ति पाकसोमहोमभेदात्। प्रत्येकं पुनःसप्तविधत्वम् तत्रौपासनहोमो वैश्वदेवं बलिहरणं शूलगवः प्रत्यवरोहणं श्रवणाकर्माष्टकाहोम इति पाकसंस्थाः सप्त। अत्र विभिन्नेन निमित्तेन विभिन्ननामभिरपि वचनं ग्रन्थेषु। अग्न्याधेयमग्निहोत्रहोमो दर्शपूर्णमासौ चातुर्मास्यानि निरूढपशुबन्ध आग्रयणेष्टिर्दाक्षायण यज्ञ इति होमसंस्थाः सप्त। अग्निष्टोमोऽत्यग्निष्टोमउक्थ्यः षोडश्यति-रात्रोऽप्तोर्यामो वाजपेयश्चेति सप्त सोमसंस्थाः। तेषामेतेषां कर्मणां ब्राह्मणादिग्रन्थेषु प्रतिपादनरीतिमनुलक्ष्य भागद्वयेन विभागः प्रकृतिकर्म विकृतिकर्मेति। यत्रापेक्षितं पूर्वोत्तराङ्गरूपसकलेतिकर्तव्यतासहितं कर्मणां स्वरूपं कण्ठतः प्रतिपाद्यते तत्प्रकृतिकर्म। यत्र चातिदेशादिनाऽङ्गप्राप्तिस्तद्विकृति कर्म। तत्र प्रकृतिकर्मणः पञ्चधा विभजनं स्थूलमानेनेष्टिपशुसोमहोमसत्रभेदात्। तत्रेष्टिपदेन दर्शपूर्णमासौ पशुशब्देन दैक्षो वा निरूढपशुबन्धो वा, सोमशब्देनाग्निष्टोमो होमशब्देनाग्निहोत्रहोमः सत्रशब्देन गवामयनमिति गृह्यते। विकृतिकर्माणि त्वनेकानि।

तेषु कर्मसु यथायथमस्य वेदभागस्योपयोगः— तत्र ब्राह्मणभागेन तत्स्वरूपादि प्रतिपाद्यते मन्त्रैश्चानुष्ठेयरूपम्। अतएव वेदाहि यज्ञार्थमभिप्रवृत्ता इत्यादिर्याज्ञिकानां प्रवादः। तेषामेषां कर्मणामनुष्ठानोपयोगिपौर्वापर्यादि-कल्पनाद्वारेण संप्रतिपादनं श्रौतसूत्रैः।

कर्मणामेषां प्रायेणैकेनानुष्ठानासम्भव इति तदर्थं कर्तृपुरुषा अपेक्ष्यन्ते ये वेदेषु ऋत्विक्शब्देन व्यवह्रियन्ते। तेचर्त्विजः प्रायेण प्राधान्येन चतुर्विधाः कर्मसु भवन्ति अध्वर्युहोतृब्रह्मोद्गातृनामानः। तत्राध्वर्युणा स्वयं साहाय्यद्वारा वा यज्ञीयं कर्मजातं साङ्गोपाङ्गं संपाद्यते। होत्रा यज्ञेऽपेक्षितदेवतास्तवाद्यर्थं
ऋत्विजः। मन्त्रपाठः क्रियते। उद्गात्रा तत्रात्यन्तापेक्षितानि गानानि सामशब्दाभिधेयानि प्रतिपाद्यन्ते। ब्रह्मणा च सर्वं कर्मजातं यथावद्भवति नवेति कृताकृतावेक्षणं क्रियते। तदेतेषामृत्विजामेकैकस्य कर्मैकैकस्मिन्वेदे प्रतिपाद्यते अतस्तदीयनामभिस्तत्तद्वेदव्यवहारो याज्ञिकप्रसिद्धो यथा ऋग्वेदो हौत्रो वेदो यजुर्वेद आध्वर्यव इति सामवेद औद्गात्र इति आथर्वणो ब्राह्मो वेद इति। तदेतदृङ्मन्त्रेण प्रतिपाद्यते "ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्करीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः॥ इति।

तत्रर्ग्वेदेन कर्मस्वपेक्षितदेवतास्तवो मन्त्रैः प्रतिपाद्यते यजुर्वेदेन साङ्गोपाङ्गकर्मस्वरूपं सामवेदेन सामा-
वेदविषयः। ख्यानि गानानि तद्युतस्तुतिप्रतिपादनं मन्त्रैः क्रियते अथर्ववेदेन ब्राह्मं यज्ञ तत्रापेक्षितं कर्म तदतिरिक्तं चेत्यादि प्रतिपाद्यते।

तत्रर्ग्वेदीयमन्त्रसंहिताया आश्वलायन्या ऋग् वर्गोऽध्यायोऽष्टकं तत्समुदाय इति मन्त्रः सूक्तमनुवाको मण्डलं तत्समुदायश्चेति प्रकारद्वयेन विभाजनम्। तत्राद्यमध्ययनोपयोगि द्वितीयं यज्ञेऽनुष्ठानोपयोगि। तत्राष्टकानि अष्टावेतस्याः संहितायाः अध्यायाष्टकेनाष्टकं चतुर्विंशत्यवरैश्चतुष्पञ्चाशत्परैश्च
ऋत्संहिताविभागः। वर्गैर्यथायथमध्यायः। एकादिभिर्नवपराभिश्चर्ग्भिर्वर्गो मन्त्रश्च ऋगात्मक इति मन्त्रैरनेकै-र्यथायथं सूक्तानि अनेकैश्च तैरनुवाकोऽनुवाकसमुदायेन मण्डलं तानि च दशात्र संहितायामिति।

तत्र मण्डलानां दशानां सन्निवेशे द्वितीयादीनि अष्टममण्डलपर्यन्तानि एकगोत्रीयर्षिसम्बद्धानि अष्टम तु प्रायेणैकर्षिसम्बद्धं प्रथमं नवमं दशमञ्च नानागोत्रीयनानर्षिसम्बद्धानि तत्रापि प्रथम-
मण्डलानि। दशमयोर्नानादेवतासम्बन्धितापि नवमस्य तु एकदेवतामात्रसम्बन्धितेति।

तत्र मण्डलर्षयस्त्वनुक्रमणिकाकारेण तत्तन्मण्डलप्रारम्भे ऽनुक्रमदर्शनप्रसङ्गे प्रदर्शिताः— शतर्चिन आद्ये मण्डले, गृत्समदो द्वितीयं मण्डलमपश्यत्, विश्वामित्रः स तृतीयं मण्डलमपश्यत्, वामदेवो गौतमश्चतुर्थं मण्डल-मपश्यत्, पञ्चमे मण्डलेऽनुक्तगोत्रमात्रेयं विद्यात्। भरद्वाजः षष्ठं मण्डलमपश्यत्, सप्तमं
मण्डलर्षयः। मण्डलं वसिष्ठोऽपश्यत् ऋषिश्चानुक्तगोत्रः प्राङ्मत्स्यात्काण्वोऽष्टमं मण्डलम्। नवमं मण्डलं पावमानं सौम्यम्, दशमं मण्डलम् इत्येवम्। अत्राद्ये मण्डल ऋषीणां छत्रिन्यायेन शतर्चित्वं गृहीत्वा शतर्चिन ऋषय इत्युक्तम्। तत्र मधुच्छन्दस एवैकस्य शताधिकर्ग्द्रष्टृत्वं तावतैव चान्येषामपि शतर्चित्वं गृहीत्वा तथोक्तिः। द्वितीय-तृतीय-चतुर्थ-षष्ठ-सप्तमानां क्रमेण गृत्समद-विश्वामित्र-वामदेव-भरद्वाज-वसिष्ठगोत्रीया ऋषयः। अष्टम-पञ्चमयोस्तु अनेकेऽनुक्तगोत्रा ऋषयः, तत्रापि पञ्चमेऽनुक्तगोत्रस्यात्रेयत्वं मत्वा सर्वं तदत्रिगोत्रो-त्पन्नर्षिदृष्टमिति। अष्टमे कण्वदृष्टत्वं केषुचनेति तावता तत्सम्बन्धिता, सर्वेषामाङ्गिरसत्वं वेति गृहीत्वाङ्गिरसं तद्। नवमे तु देवतानुसारेणैव व्यपदेशः सौम्यमिति अर्थात् तत्राप्यनेके नानागोत्रा ऋषयः। दशमे देवतैक्यमपि नास्ति ऋष्यैक्यस्याप्यभाव इति केवलं दशमं मण्डलम् इत्येव प्रदर्शितम्। एतावता

कानिचनैकगोत्रसम्बद्धानि कानिचन नेति वैषम्योपपादनाय केचन मण्डलेषु पुराणत्वनूतनत्वे हस्तयन्ति । ब्रुवते चैकगोत्रीयाणि प्राचीनानि नानागोत्रीयाणि त्ववीकृतनानीति । भाषासारल्यमपि

मण्डलानां पुराणत्व नूतनत्वं ।

उक्तमतपरिपोषकमिति । परन्त्विदं न मनोरमम् , यत आप्रीसंज्ञकसूक्तेषु सर्वमण्डलेषु प्रोच्यमानेषु देवताक्रमस्यैक्यदर्शनतस्तस्यान्यनिमित्तकत्ववर्णनावश्यकत्वान्निमित्तपर्यालोचने यज्ञानुष्ठानातिरिक्तनिमित्तकत्वाभावेन यज्ञानुष्ठानवशत एव तस्य देवतानां तादृशः क्रमस्तदनुरोधेन च तत्तत्यर्चां तथा क्रम इति ग्रहणे तदानीं यज्ञविज्ञानं यज्ञानुष्ठानं मन्त्राणां च तत्सम्बन्धितेत्यादि विज्ञातं चासीदिति स्वीकर्तव्ये सति तत्र च यज्ञे नवत्वेन परिकल्पितमण्डलगतर्चामप्यपेक्षणेनोक्तविधमण्डलनवपुराणत्वाक्यसम्भवात् विरोधाद् यज्ञानुष्ठानवैकल्यापत्तेश्च । यज्ञसम्बन्धिताप्रतिपादकतत्तन्मण्डलीयमन्त्रार्थविरोधापत्तेश्च । किञ्चार्षेषु प्राचीतनमत्वेन भवत्कल्पितदीर्घतमोदृष्टो होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः । तेन यज्ञेन स्वरङ्कृतेन स्विष्टेन वक्षणा आपृणध्वमिति मन्त्रोऽपि उक्तमेवार्थं द्रढयति । एवञ्चोक्तरीत्योक्तविधवैषम्योपपादनं न सम्यगिति ।

न चैवं मण्डलीयसूक्तानामृषिसंपादितत्ववचनतो वेदस्यापौरुषेयत्वं व्याहन्येतेति वाच्यम् । ऋषिस्वरूपानभिज्ञानात मन्त्रदर्शनात्खलु ऋषीणामृषित्वम् । नतु तद्विरचनात् येनापौरुषयताया व्याघातः स्यात् । दर्शनञ्च तपआदिना अर्थसाक्षात्करणं तद्द्वारा मन्त्राणामपि साक्षात्क्रियमाणार्थसम्बन्धितया

ऋषयः ।

विज्ञानं दर्शनमत्राभिप्रेतम् । अतएव निरुक्ते 'यत्काम ऋषिरार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्देवताकः स मन्त्रो भवति" इति मन्त्रदेवताप्रतिपादनप्रसङ्गे उक्तं संगच्छते । ऋषिणा स्वस्यार्थपतित्वमर्थात् कस्यचन फलस्य स्वाम्यमिच्छता यदीया स्तुतिः प्रयुज्यते स तस्य मन्त्रस्य देवतेति अथवा यस्या देवताया आर्थपत्यं फलप्रदत्वेन फलस्वामित्वं मत्वा स्तुतिः प्रयुज्यते सा तस्यां स्तुतौ देवतेति । अत्र प्रयुङ्क्ते इति वचनात्प्रयोगमात्रमृषिकर्तृकं न तु मन्त्रसंपादनमिति प्रतीयते अतएवानुक्रमणिकाकारोऽपि "अर्थेप्सव ऋषयो देवताश्छन्दोभिरभ्यधावन्" त्यनेनोक्तमेवार्थं द्रढयति । अन्यथा तत्तन्मन्त्रसंपादनतः पूर्वं तन्मन्त्राभावेन तन्मन्त्रसाध्यक्रियाभावप्रसङ्गात् । तथा च तत्र तत्र तत्तदृषिसूक्तेषु उल्लिख्यमानयज्ञानुष्ठानबोधकवर्णनस्यायुक्ततापत्तिः यज्ञस्वरूपवैकल्यापत्तिश्च ।

न चैवं मन्त्रेषु दृश्यमानानां मन्त्रकर्तृत्वबोधकानां वचनानां "कण्वासो वां ब्रह्म कृण्वन्ति । ब्रह्म कृण्वन्तो गोतमासः" "ब्रह्माणि ससृजे वसिष्ठ" इत्यादीनामनुपपत्तिः । तत्र विस्पष्टमेव कण्वादिकर्तृत्वस्य प्रतिपादनात् इति वाच्यम् । तत्र भाविकण्वादिकर्तृकस्तुतिमभिप्रेत्य तथा प्रयोगात् । भाविन्याच स्तुत्या न

वेदे मन्त्रकर्तृत्वं ऋषीणाम् ।

मन्त्राणामनित्यत्वप्रसङ्गः । अतएव लोके "सोमयाज्यस्य पुत्रो भविते"ति पुत्रजन्मतः पूर्वमेव भविष्यदर्थाभिप्रायकस्य प्रयोगस्य न सोमयाजिपुत्रोत्तरकालभावित्वं तथा भविष्यत्पुत्रवाक्यत्वेनोच्यमानवाक्येषु प्रयुक्तानां क्रियासंपादनबोधकपदानां वा अभिप्रायेण तत्रत्यप्रयोगस्थभूतादिकालिकक्रियापदानां तत्पुत्रजन्मोत्तरकालिकत्वकल्पना वा भवति । अन्यथा तत्रापि सा दुर्वारा स्यात् । विशेषस्त्वसौ यत्सोमयाज्यस्येत्यादिभविष्यदर्थबोधकलौकिकवाक्यानां तथार्थत्वस्यानियतत्वं कर्तृप्रत्ययसापेक्षत्वं पुरुषाणां दोषवत्तया तदीयवाक्येष्वर्थतथात्वस्यानिश्चितत्वात् । वेदेतु नित्यनिष्कलङ्केश्वरप्रणीतत्वेनार्थतथात्वविसंवादाभाव इति । अतएवास्मदादीनां वेदोक्तार्थवदर्थसंपत्त्युत्तरकालिकानां भवति संदेहो यत्तत्र गोतमादिकर्तृत्वस्य वेदे स्पष्टं वचनाद् ग्रन्थेषु गोतमस्यर्षित्वस्मरणात् लोके गोतमगोत्रीयाणामुपलम्भाद्गोतमादिकर्तृकत्वमेव वेदस्थमन्त्राणामिति ।

यत्तु अनुक्रमण्यादिषूल्लिख्यमाना मन्त्राणामृषयस्तु न तत्तन्मन्त्रविरचयितार ऋषयः किन्त्विमे मन्त्राणां संग्रहीतार एव, विरचयितारश्च ततो भिन्ना एव । अतएवागस्त्यर्षिदृष्टे (२।४।२०।४) (१।२३।१३।४) "ओसुष्टुत

इन्द्र'' इति मन्त्रे ''ब्रह्माणि मान्यस्य कारोः'' इत्युक्तम् तथैव तद्दृष्टसूक्त एव ''येन मानासश्चितयन्त उस्रा'' इत्यादिना मान्यगोत्रोद्भवाभिप्रायेण गार्ग्यशब्दस्य गर्गा इति बहुवचनवद् मान्यस्य

उक्तिलक्ष्मानापेक्षया अन्य एवर्षयः ।

माना इत्यर्थकं वैदिकं मानास इति पदं प्रयुक्तम्, ततो विज्ञायते नात्र सूक्तेऽगस्त्यऋषिर्विरचयिता किन्तु तस्य संग्रहीता, विरचयितारतु मान्य एवेति । ततश्चर्षीणां मन्त्रद्रष्टृत्वमिति भारतीयग्रन्थोक्तः प्रवादः सङ्गच्छते । विरचयितॄणामन्यत्वात् । संग्रहीत्रभिप्रायेण च तथा प्रयोगात् । इति । तदयुक्तम् । तथारूपोभयविधर्षिसत्त्वे प्रमाणाभावात्, सर्वैश्च विवेचकैर्मन्त्रद्रष्टॄणामेव कर्तृत्वमादाय पौरुषेयत्वाक्षेपेण द्रष्टितरर्षिसत्त्वाभावस्य स्वीकृतप्रायत्वात् । मान्यस्य गर्गादिगणेऽसत्त्वाच्च । किञ्चोक्तस्थले संग्रहीतृत्वेनाभिमतागस्त्यरूपर्षिपरत्वेनापि ''मान्यस्य कारोः'' इति पदद्वयस्य व्याख्यानसंभवः । यथा मान्यस्य मानार्हस्य कारोः स्तुतिकर्तुरगस्त्यस्येति । एवं च तस्यैव मन्त्रकर्तृत्वसम्भवादप्रसिद्धमान्यगोत्रतदीयर्षिकृतत्वकल्पनस्यायुक्तत्वम् । अगस्त्यस्य कर्तृत्वविषये च पूर्वोक्तास्मदभिहितयुक्त्या अर्थद्रष्टृत्वमेव भवति न तु कर्तृत्वमिति । एवं च नर्षयो वेदस्य विरचयितार इति सिद्ध्यति । न चैवमीश्वरकर्तृकत्वेऽपि पौरुषेयता दुर्वारैव । ईश्वरस्यापि पुरुषत्वात् । किञ्चेश्वरस्य कर्तृत्वमपि न स्वयं रूपेणादेहत्वात् तस्य, किन्तु ऋष्यादिरूपग्रहणद्वारा

ईश्वरकर्तृकत्वम् ।

तेन तद्विरचनेन पौरुषेयत्वस्यैव प्राप्तेर्नैयायिकादिभिर्वर्णनादिति वाच्यम् । ईश्वरस्यापि नात्र स्वातन्त्र्येण वेदविरचयितृत्वं किन्तु सुप्तप्रतिबुद्धन्यायेन गतकल्पीयवेदोपदेष्टृत्वमेव । अतएव स्वातन्त्र्याभावेन तस्य तत्र प्रयासाधिक्याभावमभिप्रेत्य श्रुतौ प्रतिपाद्यते 'यस्य निश्वसितं वेदा'' इति निश्वसितवत्प्रयत्नाधिक्यानपेक्षणस्य तत्र रूपकेणाभिधानात्, एतेनेश्वरप्रेरितर्षिप्रणीतत्ववचनमपि परास्तम् । तेषामपि अपूर्वरचनाभावात् । अतएव युगान्तेऽन्तर्हितान्वेदान्सेतिहासान् महर्षयः । लेभिरे तपसा पूर्वं स्वयं ज्ञाताः स्वयंभुवेति प्रतिपादनमपूर्वरचनाभावमृषीणां प्रतिपादयति । अतएव मीमांसकैरविच्छिन्नसम्प्रदाय-

अनुपदेश्यकर्मभावः ।

सिद्धवेदोपदेशपरम्परायां यद्वशतो यत्प्रामाण्येन च वेदोक्तकर्मसु साधनत्वे च प्रामाण्यबुद्धिस्तादृशस्य वेदकर्तुरपि परम्परयोपदेशावश्यकत्वे तदनुपदेशपरम्परातो विज्ञायते यत् कर्त्रनुपदेशो वेदस्य कर्त्रभावनिबन्धन इति । नच सतोऽपि कर्तुर्निमित्तवशतो विस्मरणेन तदनुपदेशः । दृश्यते च हिमपातादिनोत्सन्नप्रदेशस्थगृहारामादिषु कर्तुर्विस्मरणमिति वाच्यम् । परम्परोत्सादस्थले तत्सम्भवेऽपि अविच्छिन्नपरम्परायां तथावचनस्यासम्भवात् । प्रत्युत साभिनिवेशं वेदोक्तार्थानुष्ठानेऽद्ययावत्प्रवृत्तिदर्शनेन यत्प्रामाण्यवशतश्चतुर्विधपुरुषार्थसाधनत्वविज्ञानपूर्वं तत्साधनयागादीनामनुष्ठानं तस्य विस्मरणस्य सर्वथाऽसम्भवदुक्तिकत्वात् । न चैवं सत्यनुमानेन कर्त्रभावस्य वेदे साधनम्, तथा च नैयायिकाद्युक्तरीत्या सत्प्रतिपक्षितत्वमसम्भव इति वाच्यम् । उपदेशकाले उपदिष्टस्य वेदकर्तुरुपदिष्टवेदस्मरणवदिदानीं स्मरणसम्भवेन तदनुपलब्ध्या तदभावस्य साधनात् । प्रत्यक्षा चैषाऽनुपलब्धिरनुमानादिप्रमाणान्तरतः प्रत्यक्षादिवत्प्रबला । अतएव प्रत्यक्षतोऽनुपलब्ध्या प्रबलया गृहीतस्य शशे शृङ्गाभावस्य विरोधाद् दुर्बलेन शशे शृङ्गानुमानेन तत्र शृङ्गसत्त्वासाधनम् । एवं च काठककौथुमादयः समाख्याः प्रवचनमूलाः, तत्तदृषिकत्वं च तदर्थादिदर्शनमूलमिति । अतएव जैमिनि सूत्रम्—आख्याप्रवचनादिति प्रवृत्तम् । उक्तविधाः समाख्याः प्रवचनमूला इति तदर्थः ।

एतदेव मीमांसकैर्महत्याऽऽरभटया वेदेऽपौरुषेयत्वसाधनावसरे उक्तम् । तैर्हि तत्र वेदे कर्तृप्राप्तिम्

मीमांसकरीत्या पौरुषेयत्व निर्णयः ।

वर्णविरचनेन, वर्णानां पदादिरूपानुपूर्वीसंपादनेन, शब्दस्यार्थेन सम्बन्धकरणेन, एकार्थबोधकपदसमुदायरूपवाक्य विरचनेन, स्वतन्त्रेण वैयासिकं भारतमितिवत्समाख्यानेनेति पञ्चधाऽऽशङ्क्य त एवेमे वर्णा इत्यबाधितप्रत्यभिज्ञाबलेन वर्णानां नित्यतया तत्संपादनाभावेन पुरुषव्यापारा-

नपेक्षणात्, एकार्थावच्छेदकत्वोपाधिना वर्णसमूहस्यैव पदरूपतया तत्रापि पुरुषानपेक्षणेन पदतदर्थयोः सम्बन्ध-स्यौत्पत्तिकत्वेन स्वाभाविकत्वेन नित्यतया तत्रापि पुरुषानपेक्षणेन तदर्थस्यापि जातिरूपस्य नित्यत्वेन तेन गृहीत-सम्बन्धद्वारोपस्थितैः पदार्थैरेव स्वसम्बन्धरूपवाक्यार्थप्रतिपादनेन तत्र पुरुषानपेक्षणेन समाख्यायाश्च व्याख्यान-निमित्तकत्वेन वेदे कथमपि कर्तुः सम्बन्धस्याप्राप्त्या तेषामपौरुषेयत्वमिति प्रतिपादनात्।

देवताश्चर्वेदे वर्ण्यन्तेऽग्निवाय्वादित्ययमसूर्यभगपूषमित्रावरुणेन्द्ररुद्रमरुदृभुद्यावापृथिव्युषोऽश्विवैश्वानर-प्रमुखाः। तत्रैतासु काश्चन लोकेऽतिप्रसिद्धाग्निवाय्वादित्यादिशब्दप्रतिपाद्याः प्रसिद्धा इव परन्तु कासां चना-

देवताः।

प्रसिद्धत्या तत्स्वरूपस्याज्ञानात्का इमा देवता वेदे प्रतिपाद्यन्त इति विचारे प्राचीनैर्निरुक्त-कारप्रभृतिभिरत्र एकैव देवतेत्यध्यात्मवादाः, नाना देवताः पुरुषविधा इत्यैतिहासिकवादाः, यज्ञोपयोगिमन्त्रमय्यादय इति याज्ञिकवादाः इत्यादिनैकविधपक्षोपन्यासपुरस्सरं "तिस्रो देवता इति नैरुक्ता" इति देवतात्रयवादं सिद्धान्तयित्वा तिसृणामेव तासां क्रियाद्युपाधिवशतो विभूतय इमा अपरा इति प्रति-पादितम्। अनुक्रमणिकाकारेणापि "तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थाना अग्निर्वायुः सूर्यः" इत्येवं नैरुक्तं मतं प्रदर्श्य "तत्तत्स्थाना अन्यास्तद्विभूतयः कर्मपृथक्त्वात्पृथगभिधानस्तुतयो भवन्ती"ति प्रतिपाद्य "एकैव वा महानात्मा देवता स सूर्य इत्याचक्षते स हि सर्वभूतात्मे"ति सूर्यस्यैव देवत्वं सौरपरिस्थितेरेव च वर्णनं वेद इति प्रतिपादितम्। एवं चाध्यात्मवादे एकदेवतावादे वा एकस्यैव ब्रह्मणो देवत्वेन वचने भेदकल्पनां विना तदसम्भवेनोपाधिवशतो भेदकल्पनायां सूर्यरूपमेवैकमुपाधिं गृहीत्वा तस्य स्तव इति लोकादीनुपाधित्वे नादाय देवतात्रयवादादय इति तात्पर्यम्।

एवं चैकस्या एव सूर्यरूपायाः कर्मविभेदशतो विभिन्नदेवताशब्दाभिधेयत्वे विष्णुभगमित्रवरुणसवित्र-इत्यादयस्तु सूर्यतो न विभिद्यन्ते। तथा सति अन्तारिक्षादयोऽपि लोकास्तादृशा वक्तव्या यत्र सूर्यस्यैव

सूर्यस्यैव देवत्व।

सम्बन्धः स्यात्। तथाच मध्यमस्थानसम्बन्धं पूर्वदिक्स्वामितादिकं चालक्ष्य विषुववृत्तस्य क्रान्तिवृत्तेन छेदबिन्दुं तत्समकक्षं देशमन्तरिक्षत्वेन गृहीत्वाऽऽदित्यस्य मध्यमस्थान-वासित्वेनेन्द्रादिनामभिः स्तवः। ततश्च तस्मादन्तरिक्षलोकादुत्तरस्या द्युलोकत्वं गृहीत्वा तद्वासित्वेनादित्यता, एवं दक्षिणस्य भागस्य भूत्वेन ग्रहेण तद्वासितयाग्नित्वम्, दक्षिणोत्तरायणे उपाधितया गृहीत्वा तस्यैवादित्यस्य विष्णुता, मण्डलोदयप्राक्कालिककिरणवत्तया मित्रत्वम्, क्रमशो व्यक्तिमता तेजसा तमोविनाशनेन कर्मणोषस्त्वम्। तमसाच्छन्नतयाऽसत्त्वं गतानां सार्द्रपदार्थानां प्रकाशनरूपं सवनमभिप्रेत्य सवितृत्वम् उदयनक्रियावशतो भगत्वम्, सरणात्सूर्यत्वम्, रश्मिपोषपुष्टेः पूषत्वम्, व्यक्ताव्यक्ततेजोवशतोऽश्वित्वमस्तगमनोत्तरकालिकसरश्मित्वेन क्रमशः पदार्थावरणेन वरुणत्वम्, रश्मिरूपेणभुत्वम्, तेजोमात्रत्वेनाप्त्वम्, गमनोपाधिना वायुत्वम्, प्रातःकालिकगमनो-पाधिना मरुत्त्वम्, रश्मित्वेन विश्वदेवत्वम्, एवं मण्डलस्योभयतः पार्श्वयोरुदयास्तमययोस्तिर्यक्प्रसारिक्रम-व्यायततेजोरूपेणोपाधिना शकटत्वम् अन्यतरपार्श्ववर्तितेजउपाधिनेपत्वम्। उक्तविधतेजोद्वयस्य क्रमपरिणाहाद्यु-पाधित ऊरुत्वम्, ऊरुद्वयसंयोगिमण्डलरूपोपाधिना भगत्वमुपसोऽत एव स्त्रीत्वं तस्या उषसोऽस्तमयकाल-विवर्तितयेन्द्राणीत्वम्, सूर्यमण्डलोदयसविधवर्तितया सूर्य्यत्वम्, तस्या एव गौरत्वोपाधिना गौरीत्वं भास्वरत्वेनो-पाधिना लक्ष्मीत्वम्। तस्यैवादित्यस्यैकस्मिन् लोकेऽवस्थाय तत्र लोकान्तरेच प्रदीयमाना व्यक्ताव्यक्तप्रकाशाभि-प्रायेण सवनत्वम्, तत्प्रदातृत्वेन यजमानत्वम्। एवं व्यवधानवशतः सम्पद्यमानतमस आवरणेन हेतुना वृत्रत्वं, व्यवधानचलनाभासनात्स्वतो गमनराहित्येनोपाधिना अहित्वम्, तेजस ईषच्चलनोपाधिवशतोन्धकारस्यापि ईषद्गमनेनोपाधिना वाऽहित्वम्, तेजसः प्रतिबन्धनाप्रदानोपाधिना नमुचित्वम्, उष्णकाले उष्णापेक्षया शंकरत्वेना-

वरणेन च शंबरत्वं वलनाद्वलत्वमित्यादिना तत्तेनोपाधिनैकस्यैवान्धकारस्य तत्तन्नाम्ना व्यवहारस्तद्विनाशकरत्वेन वृत्रहन्तृत्वादिकमादित्यस्य। तत्रापि तेजसो व्यापनेनाप्त्वं प्रकाशनेन शोभनरूपप्रदानेन सुरात्वम् इत्यादिकम्। सुरासम्बन्धेनार्थात् तेजःसम्बन्धेन देवाः सुरास्तद्राहित्येनापरेषां तमआदीनामसुरत्वम्। तेजसोऽसम्बन्धेन हिमसम्बन्धाद्रात्र्या हिम्यात्वं दानेनोपाधिना रात्रित्वं व्यवधायिकायाः पृथिव्याः व्यवधानेन दानुत्वं तत्सम्बन्धाद्दानवत्वं वृत्रस्येत्यादि विज्ञेयम्।

यथासम्भवं चेदमादि प्रदर्शयितुमत्र संस्करणे यथायथं प्रयासः करिष्यते। अत्र संस्करणे सायणं भाष्यं तथा स्कन्दस्वामिवेङ्कटमाधवीयमन्त्रार्थमात्रं भाष्येण सह प्रदीयते। स्वरप्रक्रियाऽपि तत्तन्मन्त्राणां संक्षेपविस्तराभ्यां तत्र तत्र टिप्पणीरूपेण योजयिष्यते। विनियोगबोधकभाष्यीयपङ्क्तीनामपि यथायथं श्रौतसूत्रादिग्रन्थानुसारेणार्थविवरणे प्रयास आस्थीयेत। अन्याश्च काश्चन टिप्पण्यः समयानुमोदितास्तत्र प्रदर्शयिष्यन्ते। अत्र बुद्धिमान्द्यादिदोषवशतः, अक्षरयोजकादीनामपि अयथावत्त्ववशतोऽपि अनेकदोषसंपत्तिसम्भावना यावच्छक्यं तन्निर्हरणे प्रयासः क्रियमाणः कियान् सफलो भवेदत्र भगवन् इच्छैव शरणमिति।

विक्रम संवत् १९९० तमे वर्षे
श्रावणशुदि पौर्णमासी

सम्पादकस्य

संकेतविवरणम्

अ = अष्टकम्, अनुवाकः, अध्यायश्च ।

आ. = आश्वलायन श्रौतसूत्रम् ।

पा = पाणिनि सूत्रादि ।

फि. = फिट् सूत्राणि ।

तै. सं. = तैत्तिरीयसंहिता ।

स्क. = स्कन्दस्वामिभाष्यम् ।

वे. मा. अथवा वे. = वेङ्कटमाधवीयं भाष्यम् ।

पू. मी. = पूर्वमीमांसा तदीयग्रन्थाः ।

जै. सू. = जैमिनीयसूत्राणि ।

छा. उ. = छान्दोग्योपनिषद् ।

या. सं. = याज्ञवल्क्यसंहिता ।

शा. भा. = शाबरभाष्यम् ।

ब्र. सू = ब्रह्मसूत्रम् ।

गो. ब्रा. = गोपथब्राह्मणम् ।

श. ब्रा. = शतपथब्राह्मणम् ।

तै. ब्रा = तैत्तिरीय ब्राह्मणम् ।

नृ. पू. ता = नृसिंहपूर्वतापिनीयोपनिषद् ।

बृ उ. = बृहदारण्यकोपनिषद् ।

वा सं. = वाजसनेयिसंहिता ।

जै. न्या = जैमिनीयन्यायमालाविस्तरः ।

आप. = आपस्तम्बसूत्रम् ।

तै. आ = तैत्तिरीयारण्यकम् ।

ता. ब्रा = ताण्ड्यब्राह्मणम् ।

सा. = सामवेदसंहिता ।

म. भा. = महाभाष्यम् ।

ऋग्वेदः

ओ३म्

श्रीगणेशाय नमः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा ।
यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते ॥ ५ ॥
एतस्मिन प्रथमोऽध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान ॥ ६ ॥

अत्र केचिदाहुः ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वाद् 'अभ्यर्हितं पूर्वम्' इति-न्यायेनाभ्यर्हितत्वात्तद्व्याख्यानमादौ युक्तम् । प्राथम्यं च पुरुषसूक्ते विस्पष्टम्—

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ (ऋ. १०।९०।९) इति ।

"सहस्रशीर्षा पुरुषः" (ऋ. १०।९०।१) इत्युक्तात्परमेश्वराद्यज्ञाद्यजनीयात् पूजनीयात्सर्वहुतः सर्वैर्हूयमानात् । यद्यपीन्द्रादयस्तत्र तत्र हूयन्ते, तथाऽपि परमेश्वरस्यैवेन्द्रादिरूपेणाव-स्थानादविरोधः । तथा च मन्त्रवर्णः (ऋ. १।१६४।४६)

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान।

एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ इति।

वाजसनेयिनश्चामनन्ति (बृ उ १।४।६) "तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः" इति। तस्मात्सर्वैरपि परमेश्वर एव हूयते। न केवलमृचां पाठप्राथम्येनाभ्यर्हितत्वं किन्तु यज्ञाङ्गदार्ढ्यहेतुत्वादपि। तथा च तैत्तिरीया आमनन्ति (तै स ६।५।१०।३) "यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् यदृचा तद् दृढम्" इति। तथा च सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय "तदेतदृचाऽभ्युक्तम्" (गो ब्रा १।१।९, श ब्रा १०।२।६।६, तै ब्रा ३।१०।९।१४, बृ उ ४।४।२३, छा उ ३।१२।५) इत्यृचमेवोदाहरन्ति। मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः। साम्नां तु सर्वेषामृगाश्रितत्वं प्रसिद्धम्। आथर्वणिकैरपि स्वकीयसंहितायामृच एव बाहुल्येनाधीयन्ते। अतोऽन्यैः सर्वैर्वेदैरादृतत्वादभ्यर्हितत्वं प्रसिद्धम्। छन्दोगास्तु प्राथम्येन सनत्कुमारं प्रति नारदवाक्यमेवमामनन्ति (छा उ ७।१।२) "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्" इति। मुण्डकोपनिषद्यप्येवमाम्नायते (१।१।५) "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः" इति। तापनीयोपनिषद्यपि मन्त्रराजपादेषु क्रमेणाध्ययनमेवमामनन्ति (नृ पू ता १।१।२) "ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति" इति। एवं सर्वत्रोदाहरणीयम्। तस्मादृग्वेदस्याभ्यर्हितस्यादौ व्याख्यानमुचितमिति।

ननु प्रत्येतदुच्यते—

अस्त्वेवं सर्ववेदाध्ययन-तत्पारायण-ब्रह्मयज्ञजपादावृग्वेदस्यैव प्राथम्यम्. अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात्तत्र तु यजुर्वेदस्यैव प्रधानत्वात्तद्व्याख्यानमेवादौ युक्तम्। तत्प्राधान्यं तु काचिदृगेवाह

"ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु।

ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः ॥ (ऋ १०।७१।११) इति।

एतस्या ऋचस्तात्पर्यं निरुक्तकारो यास्कः संक्षिप्य दर्शयति (नि १-८) "इत्यृत्विक्कर्मणां विनियोगमाचष्टे" इति। पुनरपि स एव प्रथमं पादं विवृणोति—"ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी" इति। अस्यायमर्थः—त्वशब्द एकशब्दपर्यायो होतृविशेषणम्। होतृनामक

एक ऋत्विग्यज्ञकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्वन्नास्ते। भिन्नप्रदेशेष्वाम्नातानामृचां सङ्घातमेकत्र संपाद्यैतावदिदं शस्त्रमिति क्लृप्तिं करोति। सेयं पुष्टिः। अर्चनीत्यमुमर्थमृक्शब्द आचष्टे। अर्च्यते प्रशस्यतेऽनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो वेत्यृक्शब्दव्युत्पत्तिरिति। अथ द्वितीयं पादं विवृणोति "गायत्रमेको गायति शक्वरीषूद्गाता, गायत्रं गायतेः स्तुतिकर्मणः, शक्वर्य ऋचः शक्नोतेः, तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वम् इति विज्ञायते" इति। अस्यायमर्थः उद्गातृनामक एक ऋत्विग्गायत्रशब्दाभिधेयं स्तोत्रं 'शक्वर्य' इतिशब्दाभिधेयास्वृक्षु गायति। धातूनामनेकार्थत्वेन स्तुतिक्रियावाचिनो गायतिधातोरुत्पन्नो गायत्रशब्दः। शक्वरीशब्दस्तु शक्नोतिधातोरुत्पन्नः। वृत्रं शत्रुं हन्तुं शक्नोत्याभिरृग्भिरित्येषा व्युत्पत्तिः कस्मिंश्चिद् ब्राह्मणे विज्ञायत इति। अथ तृतीयं पादं विवृणोति "ब्रह्मैको जाते जाते विद्यां वदति, ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति" इति। अस्यायमर्थः ब्रह्मनामक एक ऋत्विग् जाते जाते तदा तदोत्पन्ने यज्ञे प्रवृत्ते प्रणयनादिकर्मणि विद्यामनुज्ञां वदति — 'ब्रह्मन्नपः प्रणेष्यामि' इत्येवं सम्बोधितः सन् 'ओ३म् प्रणय' इत्यनुजानाति। स च ब्रह्मा वेदत्रयोक्तसर्वकर्माभिज्ञः। तस्माद्योग्यतां दृष्ट्वा तत्तदनुज्ञातुं सति प्रमादे समाधातुं च समर्थ इति। तच्च सामर्थ्यं छन्दोगा आमनन्ति (छा उ ४।१६।१,२) "एष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी, तयोरन्यतरां मनसा संस्करोति ब्रह्मा, वाचा होताऽध्वर्युरुद्गाता चान्यतराम्" इति। कृत्स्नो यज्ञः प्रमादराहित्याय मनसा सम्यगनुसन्धेयः। वाचा च वेदत्रयोक्तमन्त्राः पठनीयाः। तत्र होत्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञभागं संस्कुर्वन्ति। ब्रह्मा त्वेक एव मनोरूपं यज्ञभागं कृत्स्नमपि संस्करोति। तस्मादप्यस्ति सामर्थ्यमिति। अथ चतुर्थं पादं विवृणोति "यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युः, अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेता" इति। अस्यायमर्थः अध्वर्युनामक एक ऋत्विग्यज्ञस्य मात्रां स्वरूपं विमिमीते विशेषेण निष्पादयति। मीयते निर्मीयत इति मात्रा स्वरूपम्। तन्निष्पादकत्वं चाध्वर्योर्नामनिर्वचनादवगम्यते। अध्वर्युरित्यत्र छान्दस्या प्रक्रियया लुप्तमकारं पुनः प्रक्षिप्याध्वरयुरिति नाम सम्पादनीयम्। अध्वरं युनक्तीत्यवयवार्थः। अध्वरस्य नेतेति तात्पर्यार्थ इति। एतदेवाभिप्रेत्याध्वर्युवेदस्य यागनिष्पादकत्वद्योतकं निर्वचनं यास्को दर्शयति (नि. ७।३।१६) "मन्त्रा मननात्, छन्दांसि छादनात्, स्तोमः स्तवनात्, यजुर्यजतेः" इति। एवं सत्यध्वर्युसम्बन्धिना यजुर्वेदेन निष्पन्नं यज्ञशरीरमुपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपाववयवावितरेण वेदद्वयेन पूर्येते इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो

व्याख्यानं युक्तम्। तत ऊर्ध्वं साम्नामृगाश्रितत्वादुभयोर्मध्ये प्रथमत ऋग्व्याख्यानं युक्तमित्यृग्वेद इदानीं व्याख्यायते।

ननु वेद एव तावन्नास्ति. कुतस्तदवान्तरविशेष ऋग्वेदः ? तथा हि—कोऽयं वेदो नाम ? न हि तत्र लक्षणं प्रमाणं वाऽस्ति। न च तदुभयव्यतिरेकेण किञ्चिद्वस्तु प्रसिध्यति। 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः' इति न्यायविदां मतम्। "प्रत्यक्षानुमानागमेषु प्रमाणविशेषेष्वन्तिमो वेद" इति तल्लक्षणमिति चेत्। न। मन्वादिस्मृतिष्वतिव्याप्तेः। [1]समयबलेन सम्यक्परोक्षानुभवसाधनम्' इत्येतस्यागमलक्षणस्य तास्वपि सद्भावात्। 'अपौरुषेयत्वे सतीति विशेषणाददोष'इति चेत्। न। वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात्। 'शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वम्' इति चेत्। न। "सहस्रशीर्षा पुरुषः" इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्। 'कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितम्' इति चेत्। न। जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः. सामवेद आदित्यात्" (ऐ. ब्रा ५।५।७) इति श्रुतेरीश्वरस्याग्न्यादिप्रेरकत्वेन निर्मातृत्वं द्रष्टव्यम्। 'मन्त्रब्राह्मणात्मकः शब्दराशिर्वेद' इति चेत। न। ईदृशो मन्त्रः, ईदृशं ब्राह्मणमित्यनयोरद्याप्यनिर्णीतत्वात्। तस्मान्नास्ति किञ्चिद्वेदस्य लक्षणम्।

नापि तत्सद्भावे प्रमाणं पश्यामः। "ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्" (छा उ ७।१।२) इत्यादिवाक्यं प्रमाणमिति चेत्। न। तस्यापि वाक्यस्य वेदान्तःपातित्वेनात्माश्रयत्वप्रसङ्गात्। न खलु निपुणोऽपि स्वस्कन्धमारोढुं प्रभवेदिति। "वेद एव द्विजातीनां निःश्रेयसकरः परः" (या स्मृ १-४०) इत्यादिस्मृतिवाक्यं प्रमाणमिति चेत्। न। [2]तस्या अप्युक्तेः श्रुतिमूलत्वेन निराकृतत्वात्। प्रत्यक्षादिकं शङ्कितुमप्ययोग्यम्। वेदविषया लोकप्रसिद्धिः सार्वजनीनाऽपि 'नीलं नभः' इत्यादिवद् भ्रान्ता। तस्माल्लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नाङ्गीकर्तुं शक्यत इति पूर्वपक्षः।

अत्रोच्यते मन्त्रब्राह्मणात्मकत्वं तावददुष्टं लक्षणम्। अत एवापस्तम्बो यज्ञपरिभाषायामेवमाह (३१) "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति। तयोस्तु रूपमुपरिष्टान्निर्णेष्यते।

---

१ समयः सङ्केतः पदनिष्ठा शक्तिरिति यावत्।

२ अत्र "तस्याप्युक्तश्रुतौ"त्यादिपाठो मुद्रितसर्वपुस्तकेषूपलभ्यते परन्तु सोऽशुद्धः। उक्ताया "ऋग्वेद"मित्यादिश्रुतेः प्रकृतस्मृतिमूलत्वाभावात्। समानविषयकत्वं सत्येव मूलमूलिभावाश्रयणात्। प्रत्युत लिखितपुस्तकेषु "तस्या अप्युक्तेः श्रुतिमूल-" इत्यादिपाठदर्शनात् स एव योग्योऽत्र पाठोऽवस्थापितः।

अपौरुषेयवाक्यत्वमितीदमपि यादृशमस्माभिर्विवक्षितं तादृशमुत्तरत्र स्पष्टीभविष्यति। प्रमाणान्यपि यथोक्तानि श्रुति-स्मृति-लोकप्रसिद्धिरूपाणि वेदसद्भावे द्रष्टव्यानि। यथा घटपटादिद्रव्याणां स्वप्रकाशकत्वाभावेऽपि सूर्यचन्द्रादीनां स्वप्रकाशकत्वमविरुद्धम्, तथा मनुष्यादीनां स्वस्कन्धारोहासम्भवेऽप्यकुण्ठितशक्तेर्वेदस्येतरवस्तुप्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्तु। अत एव सम्प्रदायविदोऽकुण्ठितां शक्तिं वेदस्य दर्शयन्ति (शा. भा. १।१।२) "चोदना हि भूतं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयमर्थं शक्नोत्यवगमयितुम्" इति। तथा सति वेदमूलायाः स्मृतेस्तदुभयमूलाया लोकप्रसिद्धेश्च प्रामाण्यं दुर्वारम्। तस्माल्लक्षणप्रमाणसिद्धो वेदो न केनापि चार्वाकादिनाऽपोढुं शक्यत इति स्थितम्।

नन्वस्तु नाम वेदाख्यः कश्चित्पदार्थः। तथाऽपि नासौ व्याख्यानमर्हति, अप्रमाणत्वेनानुपयुक्तत्वात्। न हि वेदः प्रमाणम्। तल्लक्षणस्य तत्र दुःसम्पादत्वात्। तथा हि 'सम्यगनुभवसाधनं प्रमाणम्' इति केचिल्लक्षणमाहुः। अपरे तु 'अनधिगतार्थगन्तृ प्रमाणम्' इत्याचक्षते। न चैतदुभयं वेदे सम्भवति। मन्त्रब्राह्मणात्मको हि वेदः। तत्र मन्त्राः केचिदबोधकाः। "अम्यक् सा त इन्द्र ऋष्टिः" (ऋ. १।१६९।३) इत्येको मन्त्रः। "यादृश्मिन्धायि तमपस्यया विदत्" (ऋ. ५।४४।८) इत्यन्यः। "सृण्येव जर्भरी तुर्फरीतू" (ऋ. १०।१०६।६) इत्यपरः। "आपान्तमन्युस्तृपलप्रभर्मा" (ऋ. १०।८९।५) इत्यादय उदाहार्याः। न ह्येतैर्मन्त्रैः कश्चिदप्यर्थोऽवबुध्यते। एतेष्वनुभव एव यदा नास्ति तदा तत्सम्यक्त्वं तदीयसाधनत्वं च दूरापेतम्। "अधः स्विदासी३ दुपरि स्विदासी३त्" (ऋ. १०।१२९।५) इति मन्त्रस्य बोधकत्वेऽपि 'स्थाणुर्वा पुरुषो वा' इत्यादिवाक्यवत्सन्दिग्धार्थबोधकत्वान्नास्ति प्रामाण्यम्. "ओषधे त्रायस्वैनम्" (तै. सं. १।२।१।१) इति मन्त्रो दर्भविषयः। "स्वधिते मैनं हिंसीः" (तै. सं. १।२।१।१) इति क्षुरविषयः। "शृणोत ग्रावाणः" (तै. सं. १।३।१३।१) इति पाषाणविषयः। एतेष्वचेतनानां दर्भ-क्षुर-पाषाणानां चेतनवत्सम्बोधनं श्रूयते। ततो 'द्वौ चन्द्रमसौ' इति वाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यम्। "एक एव रुद्रोऽवतस्थे न द्वितीयः"। (तै. सं. १।८।६।१) "सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम्" (तै. सं. ४।५।११।१) इत्यनयोस्तु मन्त्रयोः 'यावज्जीवमहं मौनी' इति वाक्यवद्व्याघातबोधकत्वादप्रामाण्यम्। "आप उन्दन्तु" (तै. सं. १।२।१।१) इति मन्त्रो यजमानस्य क्षौरकाले जलेन शिरसः क्लेदनं ब्रूते। "शुभिके शिर आरोह शोभयन्ती मुखं मम" (आ. पा. २।८।९) इति मन्त्रो विवाहकाले मङ्गलाचरणार्थं पुष्पनिर्मितायाः शुभिकाया वरवध्वोः शिरस्यवस्थानं ब्रूते।

तयोश्च मन्त्रयोर्लोकप्रसिद्धार्थानुवादित्वादनधिगतार्थगन्तृत्वं नास्ति। तस्मान्मन्त्रभागो न प्रमाणम्।

अत्रोच्यते। अम्यगादिमन्त्राणामर्थो यास्केन निरुक्तग्रन्थेऽवबोधितः (६-१५)। तत्परिचयरहितानामनवबोधो न मन्त्राणां दोषमावहति। अत एवात्र लोकन्यायमुदाहरन्ति "नैष स्थाणोरपराधो यदेनमन्धो न पश्यति। पुरुषापराधः स भवति" (नि. १।१६।१०) इति। "अधः स्विदासी३द्" (ऋ. १०।१२९।५) इति मन्त्रश्च न सन्देहप्रबोधनाय प्रवृत्तः। किं तर्हि? जगत्कारणस्य परवस्तुनोऽतिगम्भीरत्वं निश्चेतुमेव प्रवृत्तः। तदर्थमेव हि गुरुशास्त्रसम्प्रदायरहितदुर्बोध्यत्वम् "अधःस्विद्" इत्यनया वचोभङ्ग्योपन्यस्यति। स एवाभिप्राय उपरितनेषु "को अद्धा वेद" (ऋ. ३।५४।५) इत्यादिमन्त्रेषु स्पष्टीकृतः। ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेन तेन नाम्ना सम्बोध्यन्ते। ताश्च देवता भगवता बादरायणेन (ब्र. सू. २।१।५) "अभिमानिव्यपदेशस्तु" इति सूत्रे सूत्रिताः। एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्त्तिस्वीकारान्नास्ति परस्परं व्याघातः। जलादिद्रव्येण शिरश्छेदनादेर्लोकसिद्धत्वेऽपि तदभिमानिदेवताऽनुग्रहस्याप्रसिद्धत्वात्तद्विषयत्वेनाज्ञातार्थज्ञापकत्वम्। ततो लक्षणसद्भावादस्ति मन्त्रभागस्य प्रामाण्यम्।

एतदेवाभिप्रेत्य भगवान् जैमिनिर्मन्त्राधिकरणे (जै. सू. १।२।४) मन्त्राणां विवक्षितार्थत्वमसूत्रयत्। तानि च सूत्राणि क्रमेणोदाहृत्य व्याख्यास्यामः।

तत्र पूर्वपक्षं सूत्रयति (जै. सू. १।२।३१)

"तदर्थशास्त्राद्" इति। १।

यस्यार्थस्याभिधाने समर्थो मन्त्रः स एवाभिधेयो यस्य शास्त्रस्य ब्राह्मणवाक्यस्य तदिदं वाक्यं तदर्थशास्त्रम्। तस्माच्छास्त्रादविवक्षितार्थो मन्त्र इत्यवगम्यते। तथा हि "उरु प्रथस्व" इति (तै. सं. १।१।८।१) मन्त्रेण पुरोडाशप्रथनमभिधीयते। "पुरोडाशं प्रथयति" इति (तै. ब्रा. ३।२।८।४) ब्राह्मणेनापि तदेवाभिधीयते। तथा सति मन्त्रेणैव प्रतीतत्वात्तदर्थबोधनाय प्रवृत्तं ब्राह्मणमनर्थकं स्यात्। मन्त्रस्याविवक्षितार्थत्वे तु विनियोगबोधनाय ब्राह्मणमुपयुक्तम्। तस्मान्मन्त्रा उच्चारणेनैवानुष्ठान उपकुर्वन्ति। १।

नन्वच्चारणार्थत्वे सत्यदृष्टं प्रयोजनं परिकल्प्येत। अर्थाभिधायकत्वे तु दृष्टं लभ्येत। तस्माद्ब्राह्मणस्यानुज्ञामभ्युपेत्यापि मन्त्रस्याभिधानार्थत्वमेवेत्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।३२) –

"वाक्यनियमात्" इति। २।

"अग्निर्मूर्धा दिवः ककुत्" (ऋ. ८।४४।१६) इत्येवमेव वाक्यं पठितव्यमिति मन्त्रे नियम उपलभ्यते। अर्थप्रत्यायनं तु मूर्धाग्निरित्येवं व्युत्क्रमपाठेऽपि भवत्येव। तस्मान्नियतपाठक्रमसाफल्यायोच्चारणमेव मन्त्रप्रयोजनम्। २।

ननु पाठक्रमनियममात्रस्यादृष्टार्थत्वेऽपि मन्त्रपाठोऽर्थबोधार्थ एवेत्याशङ्क्य तत्र दोषान्तरं सूत्रयति (जै. सू. १।२।३३)

"बुद्धशास्त्रात्" इति। ३।

"अग्नीदग्नीन्विहर" इति (तै. स. ६।३।१।२) प्रैषमन्त्रः प्रयोगकाले पठ्यते। तच्चाग्निविहरणादिकर्माग्नीध्रेणाध्ययनकाल एव स्वकर्तव्यत्वेन बुद्धम्। तस्य च बुद्धार्थस्य पुनर्मन्त्रोच्चारणेन शासनमनर्थकम्। न हि सोपानत्के पादे पुनरप्युपानहं प्रतिमुञ्चति। ३।

ननु बुद्धस्यार्थस्य प्रामादिकविस्मरणपरिहाराय मन्त्रेण स्मारणमस्त्वित्याशङ्क्य दोषान्तरं सूत्रयति (जै. सू. १।२।३४)

"अविद्यमानवचनात्" इति। ४।

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य" (ऋ. ४।५८।३) इति मन्त्र आम्नायते। न खलु चतुःशृङ्गत्वाद्युपेतं किञ्चिद्यज्ञस्य साधनं विद्यते यन्मन्त्रपाठेनानुस्मर्येत। ४।

नन्वीदृशी काचिद्देवता स्यादित्याशङ्क्यान्यं दोषं सूत्रयति (जै. सू. १।२।३५)

"अचेतनेऽर्थबन्धनात्" इति। ५।

"ओषधे त्रायस्वैनम्" (तै. स. १।२।१।१) "शृणोत ग्रावाणः" (तै. स. १।३।१३।१) इत्यादावचेतने द्रव्ये चेतनोचितरक्षणश्रवणाद्यर्थं बध्नाति स चायुक्तः। ५।

ननु "अभिमानिव्यपदेशः" इति वैयासिकशास्त्रे (ब्र. सू. २।१।५) सूत्रितत्वादोषध्याद्यभिमानिचेतनदेवताऽत्र विवक्ष्यतामित्याशङ्क्य दोषान्तरं सूत्रयति (जै. सू. १।२।३६)

"अर्थविप्रतिषेधात्" इति। ६।

"अदितिर्द्यौरदितिरन्तरिक्षम्" इति (ऋ. १।८९।१०) मन्त्र आम्नायते। यदेव द्यौस्तदेवान्तरिक्षमित्ययमर्थो विप्रतिषिद्धः। "एक एव रुद्रः" (तै. स. १।८।६।१) "सहस्राणि सहस्रशो ये रुद्राः" (तै. स. ४।५।११।५) इत्यादिकमप्युदाहर्तव्यम्। ६।

ननु "त्वमेव माता च पिता त्वमेव" इत्यादिवदन्तरिक्षादिरूपत्वेनादितिः स्तूयते। एवमेक-

स्यापि रुद्रस्य योगसामर्थ्याद्बहुमूर्तिस्वीकारोऽस्तु। ततोऽनर्थविप्रतिषेध इत्याशङ्क्य दोषान्तरं सूत्रयति (जै. सू. १।२।३७)

"स्वाध्यायवदवचनाद्" इति। ७।

पूर्णिका नाम काचिद्योषिदवघातं करोति। तत्समीपे माणवकः स्वाध्यायग्रहणार्थं कदाचिदवघातमन्त्रमधीते। न च तस्यार्थप्रकाशनविवक्षाऽस्ति। प्रतिमुशलप्रहारं तस्य मन्त्रस्यापठ्यमानत्वाद्। अक्षरग्रहणायैव तं मन्त्रमन्यांश्च मन्त्रानभ्यस्यति। तत्र स्वाध्यायकाले पठितोऽप्यवघातमन्त्रो यथा पूर्णिकां प्रति स्वार्थं न ब्रूते तथा कर्मकालेऽपि स्वार्थं न वक्ष्यति। ७।

ननु तत्र माणवकस्यार्थे विवक्षा नास्ति पूर्णिकाऽप्यवबोद्धुमक्षमा। कर्मणि त्वध्वर्योरर्थ-विवक्षा विद्यते बोधश्च सम्भवतीत्याशङ्क्य दोषान्तरं सूत्रयति (जै. सू. १।२।३८)

"अविज्ञेयाद्" इति। ८।

केषाञ्चिन्मन्त्राणामर्थो विज्ञातुं न शक्यते। तद्यथा "अम्यक् सा त इन्द्र ऋष्टिरस्मे" (ऋ. १।१६९।३) इत्येको मन्त्रः। "सृण्येव जर्भरी तुर्फरीतू" (ऋ. १०।१०६।६) इत्यपरो मन्त्रः। ८।

नन्वीदृशमन्त्रार्थबोधायैव निगम-निरुक्त-व्याकरणानि प्रवृत्तानीत्याशङ्क्य दोषान्तरं सूत्रयति (जै. सू. १।२।३९)

"अनित्यसंयोगान्मन्त्रानर्थक्यम्" इति। ९।

"किं ते कृण्वन्ति कीकटेषु" (ऋ. ३।५३।१४) इति मन्त्रे कीकटो नाम जनपद आम्नातः, तथा नैचाशाखं नाम नगरम्, प्रमगन्दो नाम राजेत्येतेऽर्था अनित्या आम्नाताः। तथा च सति प्राक् प्रमगन्दादनायं मन्त्रो भूतपूर्व इति गम्यते। ९।

तदेवमेतस्तदर्थशास्त्रादिभिर्हेतुभिर्मन्त्राणामर्थप्रत्यायनार्थत्वं नास्ति किंतूच्चारणादृष्टार्था एवेति पूर्वपक्षः।

तत्र सिद्धान्तं सूत्रयति (जै. सू. १।२।४०)

"अविशिष्टस्तु वाक्यार्थ" इति। १०।

तुशब्देन मन्त्राणामदृष्टार्थमुच्चारणमात्रं वारयति। क्रियाकारकसम्बन्धेन प्रतीयमानो वाक्यार्थो लोकवेदयोरविशिष्टः। तथा सति यथा लोकेऽर्थप्रत्यायनायैव वाक्यमुच्चार्यते तथा वैदिकयागप्रयोगेऽपि द्रष्टव्यम्। मन्त्रेण प्रकाशितस्त्वर्थोऽनुष्ठातुं शक्यते न त्वप्रकाशितः, तस्मान्मन्त्रोच्चारणस्यार्थप्रकाशनरूपं दृष्टमेव प्रयोजनम्। १०।

ननु "अभ्रिरसि नार्यसि" (वा. सं. ११।१०) इत्यारभ्य "त्रैष्टुभेन त्वा छन्दसाऽऽददे"

इति मन्त्र आम्नातः। तेनैव मन्त्रेण प्रतीतेऽभ्यादाने पुनर्ब्राह्मणे "तां चतुर्भिरभ्रिमादत्ते" (श. ब्रा. ६।३।१।३९) इति विधीयते। तदेतद्विधानं त्वत्पक्षे व्यर्थं स्यादित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।४१) –

"गुणार्थेन पुनःश्रुतिः" इति। ११।

मन्त्रेण प्रतीतस्यैवार्थस्य ब्राह्मणे यत्पुनःश्रवणं तदेतच्चतुःसंख्यालक्षणगुणविधानार्थत्वेनोपयुज्यते। एतस्य विधानस्याभावे चतुर्णां मन्त्राणां मध्ये येन केनाप्येकेनाभ्रिरादीयेत। ११।

ननु "इमामगृभ्णन्रशनामृतस्य" "इत्यश्वाभिधानीमादत्ते" (श. ब्रा. १३।१।२।१) इत्यत्र मन्त्र—(वा. सं. २२।१) सामर्थ्यादेव प्राप्तस्य रशनादानस्य पुनर्ब्राह्मणवाक्यं विनियोजकमाम्नायते, तदेतत्त्वन्मते व्यर्थमित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।४२)

"परिसंख्या" इति। १२।

"गर्दभाभिधानीम् नादत्ते" इति निषेधः परिसंख्या। तदर्थमिदं ब्राह्मणवाक्यम्। ननु परिसंख्यायां त्रयो दोषाः प्राप्नुयुः—आदत्ते इति रशनाऽऽदानलक्षणं स्वार्थं जह्यात् निषेधलक्षणः परार्थोऽस्य शब्दस्य कल्प्येत, रशनात्वसामान्येन च प्राप्तं गर्दभरशनाया आदानं बाध्येतेति त्रयो दोषाः। मैवम्। गर्दभरशनाया अप्राप्तत्वात्। तथा हि। त्वत्पक्षे प्रकरणपाठान्यथानुपपत्त्या मन्त्रेणादानं कुर्यादिति वाक्यं परिकल्प्यते। तेन च वाक्येन मन्त्रादानयोः सम्बन्धे सति पश्चात्किंविषयकमादानमिति वीक्षायां लिङ्गाद्रशनामात्रस्यादानमुपेत्य गर्दभरशनायाः प्राप्तिर्वक्तव्या। सा च विलम्ब्यत इत्यश्वाभिधानीमिति प्रत्यक्षेण वाक्येन मन्त्रादानयोः सम्बन्धे सति लिङ्गाद्रशनामात्रे प्राप्तमादानम् "अश्वाभिधानीम्" इति श्रुत्या विशेषे व्यवस्थाप्यते। ततो मन्त्रस्य निराकाङ्क्षत्वाद्गर्दभरशनाया अप्राप्तत्वान्नास्ति प्राप्तबाधः। अत एव निषेधार्थो न कल्प्यते, विध्यर्थश्च न त्यज्यते, तत्र कुतो दोषत्रयम्? ईदृशमप्राप्तिरूपमेव गर्दभरशनाया निवारणमभिप्रेत्य "परिसंख्या" इति सूत्रितम्। १२।

ननु "उरु प्रथस्वेति प्रथयति" (तै. ब्रा. ३।२।८।४) इति ब्राह्मणस्य वैयर्थ्यं तदवस्थमेवेत्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।४३)—

"अर्थवादो वा" इति। १३।

वाशब्दो वैयर्थ्यं वारयति। अस्त्यत्रार्थवादः—"यज्ञपतिमेव तत्प्रथयति" (तै. ब्रा. ३।२।८।४) इति। तेनार्थवादेन संबन्धाय ब्राह्मणे विधिः पठ्यते। १३।

ननु "प्रथयती"त्यनेनैव विधिशब्देन प्रथनमनूद्य "यज्ञपतिमेव" इत्यादिनाऽर्थवादेन स्तोतव्यम्। तदेव तु प्रथनं कुतः प्राप्तमित्याशङ्क्योत्तरं सूत्रयति (शा. भा. १।२।४३)—

"मन्त्राभिधानाद्" इति। १४।

अध्वर्यूः पुरोडाशमुद्दिश्य मन्त्रे प्रथस्वेत्येवमभिधत्ते। तस्मादभिधानादध्वर्युकर्तृकं प्रथनं प्राप्तम्। यथा लोके यः कुर्विति ब्रूते स कारयत्येव, तथाऽत्रापि यः प्रथस्वेति ब्रूते स प्रथयत्येव। १४।

यदुक्तं "अग्निर्मूर्धा दिवः" (ऋ. ८।४४।१६) इति पाठक्रमनियमाददृष्टार्थो मन्त्र इति तत्रोत्तरं सूत्रयति (जै. सू. १।२।४४) -

"अविरुद्धं परम्" इति। १५।

परं द्वितीयमूत्रोक्तमस्मत्पक्षेऽप्यविरुद्धम्। न हि वयं पाठक्रमनियमाददृष्टं निवारयामः। किं तर्हि? मन्त्रोच्चारणेन जायमानमर्थप्रत्यायनं दृष्टप्रयोजनत्वान्नोपेक्षितव्यमित्येतावदेव ब्रूमः। १५।

ननु "प्रोक्षणीरासादय" (वा. स. १।२८) इति। मन्त्रबुद्धमेवार्थं शास्ति, तदयुक्तम्। सोपानत्कस्योपानदन्तरासंभवादित्युक्तमिति चेत्, तस्य परिहारं सूत्रयति (जै. सू. १।२।४५)—

"संप्रैषकर्मणो गर्हानुपलम्भः संस्कारत्वाद्" इति। १६।

संप्रैषकर्मणो गर्हा त्वदुक्तदोषो नोपलभ्यते। बुद्धस्याप्यर्थस्य मन्त्रेणैवानुस्मरणे सति नियमाददृष्टलक्षणस्य संस्कारस्य सद्भावात्। १६।

यच्चोक्तम्—"चत्वारि शृङ्गा" (ऋ ४।५८।३) इति मन्त्रोऽसन्तमेवार्थमभिधत्त इति तस्योत्तरं सूत्रयति (जै. सू. १।२।४६)—

"अभिधानेऽर्थवाद" इति। १७।

असतोऽर्थस्याभिधाने वाक्ये गौणस्यार्थस्योक्तिर्द्रष्टव्या। तद्यथा चत्वारो होत्रध्वर्यूद्गातृब्रह्माणोऽस्य कर्मणः शृङ्गाणि। प्रातःसवनादयस्त्रयः पादाः। पत्नीयजमानौ द्वे शीर्षे। गायत्र्यादीनि सप्त छन्दांसि हस्ताः। ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधा बन्धनम्। कामान्वर्षतीति वृषभः। रोरवीति स्तोत्रशस्त्रादिशब्दान पुनः पुनः करोति। महो देवः सोऽयं प्रौढो यज्ञरूपो देवो मर्त्यानाविवेशेति मनुष्या एवात्राधिकारिणः। लोकेऽप्येवं गौणप्रयोगा दृश्यन्ते—'चक्रवाकस्तनी हंसदन्तावली काशवस्त्रा शैवलकेशिनी' (शा भा. १।२।४६) इत्येवं नद्याः स्तूयमानत्वात्। एवम् "ओषधे त्रायस्व" (तै. स. १।२।१।१)"शृणोत ग्रावाण" (तै. स. १।३।१३।१)

इत्याद्यचेतनसम्बोधनानि स्तुतिपरत्वेन योजनीयानि। यस्मिन्वपन ओषधिरपि त्रायते तत्र वपनकर्ता त्रायत इति किमु वक्तव्यम्। तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वन्ति किमुत विद्वांसो ब्राह्मणा इत्यामन्त्रणाभिप्रायः। १७।

योऽपि "अदितिर्द्यौरदितिरन्तरिक्षम्" (ऋ. १।८९।१०) इति विप्रतिषेध उक्तस्तस्योत्तरं सूत्रयति (जै. सू. १।२।४७)—

"गुणादविप्रतिषेधः स्याद्" इति। १८।

यथा "त्वमेव पिता त्वमेव माता" इत्यत्र गौणप्रयोगादविरोधस्तद्वत्। एवमेकरुद्रदेवत्ये कर्मण्येको रुद्रः, शतरुद्रदेवत्ये शतं रुद्रा इत्यविरोधः। १८।

यदप्युक्तं स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवहतिं न प्रकाशयितुमिच्छतीति, तत्रोत्तरं सूत्रयति (जै. सू. १।२।४८)—

"विद्यावचनमसंयोगाद्" इति। १९।

वेदविद्याग्रहणकालेऽर्थस्य यदवचनं तदयज्ञसंयोगादुपपद्यते। न हि पूर्णिकाया अवधातो यज्ञसंयुक्तः। नापि माणवको यज्ञमनुतिष्ठति। अतो यज्ञानुपकारान्न तत्रार्थविवक्षा। १९।

यदप्युक्तं "अम्यक्सा त इन्द्र" (ऋ. १।१६९।३) "सृण्येव जर्भरी तुर्फरीतू" (ऋ. १०।१०६।६) इत्यादावर्थस्य ज्ञातुमशक्यत्वान्नास्त्येवार्थ इति। तत्रोत्तरं सूत्रयति (जै. सू. १।२।४९)—

"सतः परमविज्ञानम्" इति। २०।

विद्यमान एवार्थः प्रमादालस्यादिभिर्न ज्ञायते। तेषां निगम-निरुक्त-व्याकरणवशेन धातुतोऽर्थः परिकल्पयितव्यः। तद्यथा 'जर्भरी' 'तुर्फरीतू' इत्येवमादीन्यश्विनोरभिधानानि। तेषु हि द्विवचनान्तत्वं लक्ष्यते। आश्विनं चेदं सूक्तम् "अश्विनोः काममप्राः" (ऋ. १०।१०६।११) इति दर्शनात्। एतदेवाभिप्रेत्य निरुक्तकारो व्याचष्ट "जर्भरी भर्तारावि-त्यर्थस्तुर्फरीतू हन्तारावित्यर्थः" (नि. १३।५) इति। एवम् "अम्यक्सा त" (ऋ. १।१६९।३) इत्यादावप्युन्नेयम्। २०।

यदप्युक्तं प्रमगंदाद्यनित्यार्थसंयोगान्मन्त्रस्यानादित्वं न स्यादिति तत्रोत्तरं सूत्रयति (जै. सू. १।२।५०)—

"उक्तश्चानित्यसंयोग" इति। २१।

प्रथमपादस्यान्तिमाधिकरणे सोऽयमनित्यसंयोगदोष उक्तः परिहृतः। तथा हि तत्र पूर्वपक्षे वेदानां पौरुषेयत्वं वक्तुं काठकं कालापकमित्यादिपुरुषसम्बन्धाभिधानं हेतूकृत्य

"अनित्यदर्शनाच्च" (जै. सू. १।१।२८) इति हेत्वन्तरं सूत्रितम्। "बबरः प्रावाहणिरकामयत" (तै. स. ७।१।१०।२) इत्यनित्यानां बबरादीनामर्थानां दर्शनात्ततः पूर्वमसत्त्वात्पौरुषेयो वेद इति तस्योत्तरं सूत्रितम् (जै. सू. १।१।३१)—

"परन्तु श्रुतिसामान्यमात्रम्" इति।

तस्यायमर्थः— यत्काठकादिसमाख्यानं तत् प्रवचननिमित्तम्। यत्तु परं बबराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रम्। न तु तत्रानित्यो बबराख्यः कश्चित् पुरुषो विवक्षितः, किन्तु बबर इति शब्दानुकृतिः। तथा सति बबरेति शब्दं कुर्वन्वायुरभिधीयते। स च प्रावाहणिः। प्रकर्षेण वहनशीलः। एवमन्यत्राप्यूहनीयम्। तदेवं कस्यचिदपि दोषस्यासम्भवाद्विवक्षितार्था मन्त्राः स्वार्थप्रकाशनायैव प्रयोक्तव्याः। २१।

नन्वर्थप्रकाशनार्थत्वे सति दृष्टं प्रयोजनं लभ्यत इति, युक्तिमात्रमिदमुच्यते। न त्वेतदुपोद्बलकं किंचिच्छ्रौतं लिङ्गं पश्याम इत्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।५१)—

"लिङ्गोपदेशश्च तदर्थवद्" इति। २२।

"आग्नेय्याऽग्नीध्रमुपतिष्ठते" इति श्रूयते। तस्यायमर्थः अग्निर्देवता यस्या ऋचः सेयमाग्नेयी तयाऽग्नीध्रस्थानमुपतिष्ठेतेति। अत्र ह्युपस्थानमुपदिशद्ब्राह्मणम् "अग्ने नय" (ऋ. १।१८९।१) इत्यनयोपतिष्ठेतेति मन्त्रप्रतीकं पठित्वा नोपदिशति किन्तु आग्नेयीत्वलिङ्गेन उपदिशति यदा तस्यामृच्यग्निः प्राधान्येन प्रतिपाद्यते तदा तस्या ऋचोऽग्निर्देवता भवति। तथा सत्याग्नेय्येति देवतावाचितद्धितान्तनिर्देश उपपद्यते। तस्मादयमुपदेशस्तन्मन्त्रवाक्यमर्थवदिति बोधयति। अतो विवक्षितार्थत्वादर्थप्रत्यायनार्थं प्रयोगकाले मन्त्रोच्चारणम्। २२।

तस्मिन्नेव विवक्षितार्थत्वे लिङ्गान्तरं सूत्रयति (जै. सू. १।२।५२)—

"ऊहः" इति। २३।

प्रकृतावाम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठ ऊहः। तद्यथा "अन्वेनं माता मन्यतामनु पिताऽनु भ्राता" इति प्राकृतः पशुविषयो मन्त्रपाठः (तै. स. ४।१।३।४)। तस्य च मन्त्रस्य विकृतौ पशुद्वये सति—"अन्वेनौ मातामन्यताम्" इत्यूहः। पशुबहुत्वे सति "अन्वेनान् माता मन्यताम्" इत्यूहः कर्तव्यः। एतन्मन्त्रव्याख्यानरूपं ब्राह्मणमेवमाम्नायते—"न माता वर्धते न पिता" इति। तत्रेदं चिन्तनीयम्—किमत्र शरीरवृद्धिर्निषिध्यते आहोस्विच्छब्दवृद्धिरिति। एकवचनान्तस्य मातृशब्दस्य मातराविति द्विवचनान्तत्वेन वा मातर इति बहुवचनान्तत्वेन वा प्रयोगः शब्दवृद्धिः। तत्र न

तावच्छरीरवृद्धिनिषेद्धुं शक्यते बाल्य-कौमार-यौवनादिवयोऽनुसारेण तद्वृद्धेः प्रत्यक्षत्वात्। अतः शब्दवृद्धिनिषेध एव परिशिष्यते। मातृशब्दपितृशब्दयोर्विशेषाकारेण वृद्धि-निषेधादितरस्यैनमिति शब्दस्यार्थानुसारिणी वृद्धिः सूचिता भवति। तत्र यद्यर्थो न विवक्ष्येत तदा पशुद्वित्वे द्विवचनं पशुबहुत्वे बहुवचनं च कथमूह्येत? तस्माद्विव-क्षितार्था मन्त्राः। २३।

तस्मिन्नेवार्थे लिङ्गान्तरं सूत्रयति (जै. सू. १।२।५३)—

"विधिशब्दाच्च" इति। २४।

मन्त्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते। स चैवमाम्नायते "शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाह" (श. ब्रा. २।३।४।२१) इति। तत्र "शतं हिमा" इत्येतद्व्याख्येयमन्त्रस्य प्रतीकम्। अवशिष्टं तु तस्य तात्पर्यव्याख्यानम्। मन्त्रस्या-विवक्षितार्थत्वे तु किं नाम तात्पर्यं मन्त्रे व्याख्यायेत। तस्माद्विवक्षितार्था मन्त्राः प्रयोगकाले स्वार्थप्रकाशनायैवोच्चारयितव्याः। २४।

तत्र संग्रहश्लोकौ (जै. न्या. १।२।४)—

मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः।
यागेपूत पुरोडाशप्रथनादेश्च भासकाः॥ १॥
ब्राह्मणेनापि तद्भानान मन्त्राः पुण्यैकहेतवः।
न तद्भानस्य दृष्टत्वाद्दृष्टं वरमदृष्टतः॥ इति॥ २॥

नन्वस्तु मन्त्रभागस्य प्रामाण्यम्। ब्राह्मणभागस्य तु न तद्युज्यते। तथा हि—द्विविधं ब्राह्मणम् विधिरर्थवादश्चेति। तथा चापस्तम्बः "कर्मचोदना ब्राह्मणानि। ब्राह्मणशेषोऽर्थवाद" (आप. ३२।३३) इति। विधिरपि द्विविधः अप्रवृत्तप्रवर्तनमज्ञात-ज्ञापनं चेति। "आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयायाम्" (ए. ब्रा. १।१।१) इत्याद्याः कर्मकाण्डगतविधयोऽप्रवृत्तप्रवर्तकाः। "आत्मा वा इदमेक एवाग्र आसीद्" (ए. आ. २।४।१) इत्यादयो ब्रह्मकाण्डगता अज्ञातज्ञापकाः। तत्र कर्मकाण्डगतानां "जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा" (तै. स. ५।४।३।२) इत्यादिविधीनां नास्ति प्रामाण्यम्, आहुत्ययोग्यद्रव्यविधानेन सम्यगनुभवसाधनत्वाभावात्। अयोग्यत्वं च वाक्यशेषे समाम्नातम्—"अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च" (तै. स. ५।४।२।१०) इति। तत्र ह्यारण्यतिलानामारण्यगोधूमानां चाहुतिद्रव्यत्वं निषिद्धम्। तस्माद्बाधितो जर्तिलादि-

विधिरप्रमाणम्। एवमैतरेय-तैत्तिरीयादिब्राह्मणेषु "तत्तन्नादृत्यं, तत्तथा न कार्यम्" इति वाक्याभ्यां बहवो विधयो निषिद्धाः। अपि चैतरेयब्राह्मणेऽनुदितहोमं बहुधा निन्दित्वा "तस्मादुदिते होतव्यम्" (ऐ. ब्रा. ५।५।५) इत्यसकृन्निगदितम्। तैत्तिरीयाश्च तथैवामनन्ति—"यदनुदिते सूर्ये प्रातर्जुहुयादुभयमेवाग्नेयं स्यात्। उदिते सूर्ये प्रातर्जुहोति" (तै. ब्रा. २।१।२।३) इति। पुनरपि त एवोदितहोमे दोषमामनन्ति "यदुदिते सूर्ये प्रातर्जुहुयाद्यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति तादृगेव तद्" (तै. ब्रा. २।१।२।१२) इति। तथैव "अतिरात्रे षोडशिनं गृह्णाति" इति विधिः, "नातिरात्रे षोडशिनं गृह्णाति" इति निषेधेन बाध्यते। ज्योतिष्टोमादिष्वप्यनुष्ठानानन्तरमेव च स्वर्गादिफलं नोपलभ्यते। नहि भोजनानन्तरं तृप्तेरनुपलम्भोऽस्ति। तस्मात्कर्मविधिषु प्रामाण्यं दुःसम्पादम्।

अज्ञातज्ञापकेषु ब्रह्मविधिष्वपि परस्परविरोधान्नास्ति प्रामाण्यम्। "आत्मा वा इदमेक एवाग्र आसीद्" (ऐ. आ. २।४।१) इत्यैतरेयिण आमनन्ति "असद्वा इदमग्र आसीद्" (तै. आ. ८।७) इति तैत्तिरीयकाः। सोऽयं विरोधः। तस्माद्वेदे विधिभागः सर्वोऽप्यप्रमाणमिति प्राप्ते ब्रूमः—

अस्त्वेव जर्तिलादिविधेरप्रामाण्यं तदर्थस्याननुष्ठेयत्वात्। अनुष्ठेयस्त्वर्थ उपरितने "अजाक्षीरेण जुहोति" (तै. सं. ५।४।३।२) इति वाक्ये विधीयते। तत्प्रशंसार्थमत्र जर्तिलादिकमनूद्य निन्द्यते। यथा गवामश्वानां च प्रशंसार्थम् "अपशवो वा अन्ये गवाश्वेभ्य" (तै. ब्रा. ३।९।१०।२) इति वाक्येनार्थवादरूपेणाजादीनां पशुत्वं निन्द्यते तद्वत्। एवं तर्ह्यजादेर्यथा वस्तुतः पशुत्वमस्ति तथा जर्तिलादिविधिरत्र निन्द्यमानोऽपि क्वचिच्छाखान्तरे भवेदिति चेत्। भवतु नाम, प्रामाण्यमपि तच्छाखाध्यायिनं प्रति भविष्यति। यथा गृहस्थाश्रमे निषिद्धमपि परान्नभोजनमाश्रमान्तरेषु प्रामाणिकं तद्वत्। अनेन न्यायेन सर्वत्र परस्परविरुद्धौ विधिनिषेधौ पुरुषभेदेन व्यवस्थापनीयौ, यथा मन्त्रेषु पाठभेदः। शाखाभेदेन व्यवस्थितत्वात्। तैत्तिरीया "वायवस्थोपायवस्थ" (तै. सं. १।१।१) इति मन्त्रमामनन्ति। वाजसनेयिनस्तु "उपायवस्थ" (वा. सं. १।१) इत्येतं भागं नामनन्ति। प्रत्युत शतपथब्राह्मणे (१।७।१।३) स भागोऽनूद्य निराकृतः। तथा सूक्तवाकमन्त्रे शाखान्तरपाठं निराकृत्य पाठान्तरं तैत्तिरीया आमनन्ति "यद् ब्रूयात्सूपावसाना च स्वध्यवसानाच इति प्रमायुको यजमानः स्याद्" (तै. सं. २।६।९।६) इति निराकरणम्। "सूपचरणा च

स्वधिचरणा च" इत्येव ब्रूयादिति पाठान्तरोपदेशः। तत्रानुष्ठातृपुरुषभेदेन व्यवस्था। तद्वद्विधिषु द्रष्टव्यम्। षोडशिग्रहणादिदूषणं त्वश्रुतमीमांसावृत्तान्तस्य तत्रैव शोभते। पूर्वमीमांसायां दशमाध्यायस्याष्टमपादे षोडशिनो ग्रहणाग्रहणविकल्पो निर्णीतः। द्वितीयाध्यायस्य प्रथमपादे कालान्तरभाविफलसिद्ध्यर्थमपूर्वं निर्णीतम्। तदुत्तरमीमांसायां प्रथमाध्यायस्य चतुर्थपादे "कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः" (ब्र. सू. १।४।१४) इत्यस्मिन्सूत्रे जगत्कारणे परमात्मनि श्रुतेर्विप्रतिपत्तिर्निराकृता। द्वितीयस्याध्यायस्य प्रथमपादारम्भाधिकरणे "असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" (ब्र. सू. २।१।१३) इति सूत्रे तैत्तिरीयवाक्यगतस्यासच्छब्दस्य न शून्यपरत्वं किंत्वव्यक्तावस्थापरत्वमिति निर्णीतम्। तथा जैमिनिश्चोदनासूत्रे (१।१।२) विधिवाक्यं धर्मे प्रमाणमिति प्रतिज्ञायौत्पत्तिकसूत्रे (जै. सू. १।१।५) तत्प्रामाण्यं समर्थयामास। व्यासोऽपि शास्त्रयोनित्वसूत्रे (ब्र. सू. १।१।३) वेदान्तानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय "तत्तु समन्वयात्" (ब्र. सू. १।१।४) इत्यादिसूत्रैः समर्थयामास। तस्मादमीमांसकस्य तव पूर्वोक्तस्थाण्वन्धन्यायो दुष्परिहरः। अतो विधिभागस्य प्रामाण्यं सुस्थितम्।

अर्थवादभागस्य प्रामाण्यं महता प्रयत्नेन जैमिनिः समर्थयामास तत्सूत्राणि व्याख्यास्यन्ते। तत्र पूर्वपक्षं सूत्रयति (जै. सू. १।२।१) –

"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" इति। १।

आम्नायस्य सर्वस्य क्रियाप्रतिपादनाय प्रवृत्तत्वादक्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चिद्विवक्षितः स्वार्थः। ते चार्थवादा एवमाम्नायन्ते "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" (तै. सं. १।५।१।१)। "स आत्मनो वपामुदखिदत्" (तै. सं. २।१।१।४)। "देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्" (तै. सं ६।१।५।१) इति। यस्मादीदृशस्य वाक्यस्य विवक्षितार्थः कश्चिदपि नास्ति, तस्मादिदं वाक्यमनित्यमुच्यते। यद्यप्यनादित्वात् स्वरूपेणानित्यत्वं नास्ति, तथाऽपि धर्मावबोधनलक्षणस्य नित्यकार्यस्याभावादनित्यः काव्यालापैः समानत्वादप्रमाणमित्यर्थः। १।

ननूदाहृतानामर्थवादानामनुष्ठेये धर्मे प्रामाण्याभावेऽपि स्वार्थप्रामाण्यमस्तु तत्प्रत्यायकत्वेन स्वतःप्रामाण्यस्यापवदितुमशक्यत्वादित्याशङ्क्यान्येषु केषुचिदर्थवादेषु मानान्तरविरोधदर्शनादप्रामाण्ये सति तद्दृष्टान्तेन सर्वेषामप्यर्थवादानामप्रामाण्यमित्यभिप्रेत्य सूत्रयति (जै. सू. १।२।२)—

"शास्त्रदृष्टविरोधाच्च" इति । २ ।

शास्त्रविरोधो, दृष्टविरोधः, शास्त्रदृष्टविरोध इति त्रिविधोऽर्थवादेषूपलभ्यते । तथा हि —"स्तेनं मनोऽनृतवादिनी वाग्" इत्यत्र श्रूयमाणं मानसं चौर्यं वाचिकमनृतवदनं च प्रतिषेधशास्त्रेण विरुद्धम् । "तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूम" (तै. ब्रा २।१।२।९, १०) इत्यत्र दृष्टविरोधः । तथा "न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वा" (तै. स. १।४।११) इत्यत्रापि प्रत्यक्षविरोधः । "को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वा" (तै. स. ६।१।१।१) इत्यत्र शास्त्रदृष्टविरोधः । "स्वर्गकामो यजेत" इत्यादिशास्त्रे ह्यामुष्मिकं फलं दृश्यते । तस्माद्विरोधादर्थवादानामप्रामाण्यम् । २ ।

ननू "सोऽरोदीद्" (तै. स २।१।१।४) इत्यादीनां निष्प्रयोजनकत्वात् "स्तेनं मन" (तै. स. २।१।१।४) इत्यादीनां च विरोधादप्रामाण्येऽपि फलप्रतिपादकानामर्थवादानां तदुभयवैलक्षण्यादस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूत्रयति—(जै. सू १।२।३)

"तथा फलाभावाद्" इति । ३ ।

यथा मानान्तरविरुद्धमर्थवादैरुक्तं तथा फलमप्यविद्यमानमेव तैरुच्यते । तथा हि गर्गत्रिरात्रं प्रकृत्य श्रूयते "शोभतेऽस्य मुखं य एवं वेद" (ता ब्रा २०।१६।६) इति । दर्शपूर्णमासयोर्वेदाभिमर्शनं प्रकृत्य श्रूयते—"आऽस्य प्रजायां वाजी जायते य एवं वेद" इति । न च वयं वेदितॄणां तत् फलमुपलभामहे । ३ ।

नन्वैहिकफलवाक्यानां विसंवादादप्रामाण्येऽप्यामुष्मिकफलवाक्यानामस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।४) –

"अन्यानर्थक्याद्" इति । ४ ।

एवं हि श्रूयते "पूर्णाहुत्या सर्वान् कामानवाप्नोति" (तै. ब्रा ३।८।१०।५) । "पशुबन्धयाजी सर्वांल्लोकानभिजयति" । "तरति मृत्युं, तरति पाप्मानं, तरति ब्रह्महत्याम्, योऽश्वमेधेन यजते । य उ चैनमेवं वेद" (तै. स ५।३।१२।२) इति । तत्राग्न्याधेयगतया पूर्णाहुत्या सर्वकामप्राप्तेरन्यान्यग्निहोत्रादीन्युत्तरकालीनान्यनर्थकानि स्युः । तथा निरूढपशुबन्धानुष्ठानेन सर्वलोकाभिजयाज्ज्योतिष्टोमादीनामानर्थक्यम् । अध्ययनकालीने नैवाश्वमेधवेदनेन ब्रह्महत्यादितरणात्तदनुष्ठानं च व्यर्थं स्यात् । तस्मादामुष्मिकफलवाक्यानामप्यप्रामाण्यम् । ४ ।

ननु मा भूत् फलवाक्यानां प्रामाण्यम्, तथाऽपि निषेधवाक्येषु विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।५) –

"अभागिप्रतिषेधाद्" इति ।५।

"न पृथिव्यामग्निश्चेतव्यो, नान्तरिक्षे, न दिवि" (तै. स. ५।२।७।१) इत्यत्रान्तरिक्षस्य च दिवश्च प्रतिषेधभागित्वं नास्ति तत्र चयनप्रसङ्गस्यैवाभावात् ।५।

मा भूत्तर्हि निषेधानां प्रामाण्यम् ।। "बबरः प्रावाहणिरकामयत" इत्यादीनां पूर्वपुरुषवृत्तान्ताभिधायिनां विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।६) –

"अनित्यसंयोगाद्"इति ।६।

बबरादिरूपेणानित्येनार्थेन संयोगे सत्यस्य वाक्यस्य ततः पूर्वाभावात्कालिदासादिवाक्यवत्पौरुषेयत्वं प्रसज्ज्येत ।६। किं बहुना। सर्वथाऽपि नास्त्येवार्थवादानां प्रामाण्यमिति पूर्वः पक्षः ।

सिद्धान्तं सूत्रयति (जै. सू. १।२।७) –

"विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति ।७।

तुशब्दोऽर्थवादानामप्रामाण्यं वारयति। "वायुर्वै क्षेपिष्ठा" (तै. स. २।१।१।१) इत्येवमादीनामर्थवादानां "वायव्यं श्वेतमालभेत" इत्यादिना विधिना सहैकवाक्यत्वादस्ति धर्मे प्रामाण्यम्। न च विधिवाक्यस्यार्थवादनैरपेक्ष्येण पदान्वयसंपूर्तस्तत्रार्थवादानां नास्त्युपयोग इति शङ्कनीयम्। ते ह्यर्थवादाः पुरुषप्रवृत्तिमाकाङ्क्षतां विधीनां स्तुत्यर्थत्वेनोपयुक्ताः स्युः। स्तुत्या च प्रलोभितः पुरुषस्तत्र प्रवर्त्तते ।७।

नन्वर्थवादानां प्रमादपठितत्वेनोपेक्षणीयत्वात्किमनेनैकवाक्यताप्रयासेनेत्याशङ्क्याह (जै. सू. १।२।८) -

"तुल्यं च सांप्रदायिकम्" इति ।८।

अनध्यायवर्जनादिनियमपुरःसरं गुरुसंप्रदायादध्ययनं यत्तत्सांप्रदायिकम्। तच्च विधीनामर्थवादानां समानम्। तस्माद्विधिवदेतेषामपि प्रमादपाठो न भवति ।८।

ननु "शास्त्रदृष्टविरोधाच्च" इत्येवमर्थवादेष्वनुपपत्तिरुक्तेत्याशङ्क्याह (जै. सू. १।२।९) -

"अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्यते" इति ।९।

तन्त्रवार्त्तिके त्वेतत्सूत्रमध्याहृत्य त्रिधा व्याख्यातम् -अप्राप्तां चानुपपत्तिम्, अप्राप्ता चानुपपत्तिः, अप्राप्तं चानुपपत्तिमिति। "स्तेनं मन" इत्यादौ शास्त्रविरोधादनुपपत्तिरप्राप्ता प्रयोगस्यानुक्तत्वात्। प्रयोगे हि स्तेयादीनामुच्यमाने शास्त्रविरोधः स्यात्। न चात्र स्तेयं कर्तव्यमिति प्रयोग उच्यते, किंतु स्तेयशब्दार्थ एवोच्यते। न च शब्दार्थः प्रयोगभूतः। तस्माच्छब्दार्थवचनमात्रेण शास्त्रविरोधाभावादयमर्थवाद उपपन्न एव।

ननु "स्तुत्यर्थेन विधीनां स्युः" इति यदुक्तं, तदसद्, वैयधिकरण्यात्। "वेतसशाखया चावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः" (तै. स. ५।४।४।३) इत्यत्र वेतसावके विधीयेते आपश्च स्तूयन्त इति वैयधिकरण्यमित्याशङ्क्याह (जै. सू. १।२।१०)

"गुणवादस्तु" इति।१०।

तुशब्दो वैयधिकरण्यदोषं वारयति। गुणवादो ह्यत्र विवक्षितः। यथा लोके कश्मीराभिजनो देवदत्तः कश्मीरदेशेषु स्तूयमानेषु स्तुतमात्मानं मन्यते, एवमत्राप्यद्भ्यो जाते वेतसावके अप्सु स्तुतासु स्तुते एव भवतः। शान्ताभ्योऽद्भ्यो जातत्वाद्वेतसावके स्वयमपि शान्ते सत्यौ यजमानस्यानिष्टं शमयत इत्येतादृशस्य गुणस्य वादोऽत्राभिप्रेतः। "सोऽरोदीद्" इत्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहेऽपि रोदनप्रसङ्गाद् "बर्हिषि रजतं न देयम्" (तै. स. १।५।१।२) इति तन्निषेधेन विधेयेनार्थवादस्यैकवाक्यत्वम्। तत्र रजतदानाभावे रोदनाभावरूपो गुणोऽत्र विवक्षितः। तेन च गुणेन रजतदाननिवारणरूपो विधिः स्तूयते। यद्यपि रजतस्याश्रुप्रभवत्वमत्यन्तमसत्, तथाऽपि यथोक्तनीत्या विधेः स्तुतिः सम्पद्यते। "यः प्रजाकामः पशुकामः स्यात्स एनं प्राजापत्यमजं तूपरमालभेत" (तै. स. २।१।१।४) इत्ययं विधिः प्रजापतिवपोत्खेदेन स्तूयते। यस्मात्प्रजापतिः स्ववपामप्युत्खिद्याग्नौ प्रहृत्य ततो जातं तूपरमजमात्मार्थमालभ्य प्रजाः पशूंश्च लब्धवांस्तस्मात्प्रजादिसंपादकोऽयं तूपर इति तूपरगुणस्य वादोऽत्र विवक्षितः। "आदित्यः प्रायणीयश्चरुः" (तै. स. ६।१।५।१) इत्येष विधिः "दिशो न प्राजानन्" इत्यनेन दिङ्मोहेन स्तूयते। यथेयमदितिर्देवता दिङ्मोहमपि अपनीय दिग्विशेषं ज्ञापयति, तथा बहुविधकर्मसमुदायरूपे सोमयागेऽनुष्ठानविषयं भ्रममपनयतीति किमु वक्तव्यमित्येवमदितिदेवतागतस्य गुणस्य वादोऽत्र विवक्षितः। स्वकीयवपोत्खेदो देवयजनाध्यवसानमात्रेण दिङ्मोहश्चेत्युभयमस्तु वा मा वा। सर्वथाऽपि स्तुतिपरत्वमभ्युपगच्छतामस्माकं न किंचिद्धीयते। 'शिखा ते वर्धते वत्स गुडूचीं श्रद्धया पिब' इत्यादावविद्यमानेनाप्यर्थेन लोके स्तुतिदर्शनात्।१०।

अथ पूर्वपक्षिणा शास्त्रविरोधं दर्शयितुम् यदुदाहृतं "स्तेनं मनोऽनृतवादिनी वाग्" इति, तत्रोत्तरं सूत्रयति (जै. सू. १।२।११)

"रूपात्प्रायाद्" इति ।११।

"हिरण्यं हस्ते भवत्यथ गृभ्णाति" (तै. स. ४।८।२।३) इत्येतं विधिं स्तोतुमर्थवाद उच्यते। यथा लोके 'किमृषिणा देवदत्त एव पूजयितव्य' इत्यत्र देवदत्तपूजां स्तोतुमेवौदासीन्यमृषावुपन्यस्यते न तु पूज्यत्वमृषेर्वारयितुम्। एवमत्रापि हस्ते हिरण्यग्रहणं प्रशंसितुं मनसः स्तेनरूपत्वं वाचोऽनृतवादिनीत्वं चोपन्यस्यते। तत्र गुणवादेन शब्दार्थौ योजनीयः। यथा स्तेनाः प्रच्छन्नरूपा एवं मनोऽपीति प्रच्छन्नरूपत्वमत्र गुणः। प्रायेण वागनृतं वक्तीति प्रायिकत्वं तत्र गुणः। हस्तस्तु न प्रच्छन्नो नाप्यनृतबहुलः। अतो हस्ते हिरण्यधारणं प्रशस्तमिति स्तूयते ।११।

यदपि दृष्टविरोधाय "धूम एवाग्नेर्दिवा ददृश" इत्यादिकमुदाहृतम्, तत्रोत्तरं सूत्रयति (जै. सू. १।२।१२)

"दूरभूयस्त्वाद्" इति ।१२।

"अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः" (ऐ. ब्रा. ५।५।६) इत्येतौ विधी स्तोतुं सोऽर्थवादः। यस्मादर्चिर्दिवा न दृश्यते तस्मात्सूर्यमन्त्रः एव प्रातः प्रयोक्तव्य। यस्माद्रात्रावर्चिरेव दृश्यते तस्मादग्निमन्त्रो रात्रौ प्रयोक्तव्यः सूर्यमन्त्रश्च दिवेत्येवं तयोर्मन्त्रयोः स्तुतिः। धूमार्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः। भूयसि हि दूरे पर्वताग्रे वृक्षादयोऽपि न विस्पष्टं दृश्यन्ते, किंतु तृणसादृश्येन तेषां दर्शनाभास एव, तद्वदत्रापि ।१२। यदप्यन्यदृष्टविरोधायैवोदाहृतम् "न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वा" इति, तत्रोत्तरं सूत्रयति (जै. सू. १।२।१३)

"स्त्र्यपराधात् कर्तुश्च पुत्रदर्शनात्" इति ।१३।

"प्रवरे प्रव्रियमाणे ब्रूयाद्देवाः पितरः" (तै. स. १।४।११) इत्यस्य विधेस्तावकोऽयमर्थवादः। यदि यजमानो "देवाः पितरः" इत्यादिमन्त्रेण प्रवरमनुमन्त्रयेत्तदानीमब्राह्मणोऽपि ब्राह्मणो भवेदित्यनुमन्त्रणस्य स्तुतिः। "न चैतद्विद्म" इत्येतदज्ञानवचनं दुर्ज्ञानत्वगुणेन तत्र प्रयुज्यते। यत्र स्त्रियोऽपराधो भवति तत्र कर्तुरुत्पादयितुर्जारस्यापि पुत्रो दृश्यते। अतः पत्युपपत्योरुभयोः पुत्रदर्शनात् स्वकीयजन्म कीदृशमिति दुर्ज्ञानम्। अनेनाभिप्रायेण प्रयुक्तत्वान्नास्ति तत्र दृष्टविरोधः। नहि तत्र दृश्यमानं स्वब्राह्मण्यमपवदितुं "न चैतद्विद्म" इत्युपन्यस्तम् ।१३।

यदपि शास्त्रीयदर्शनविरोधायोदाहृतम् "को हि तद्वेद यद्यमुष्मिल्लोकेऽस्ति वा न वा" इति, तत्रोत्तरं सूत्रयति (जै. सू. १।२।१४)—

"आकालिकेप्सा" इति ।१४।

"दिक्ष्वतीकाशान्करोति" (तै. स. ६।१।१।१) इति प्राचीनवंशस्य द्वारविधिः। तस्य शेषोऽयम् "को हि तद्वेद" इति धूमाद्युपद्रवपरिहारेण प्रत्यक्षेण फलेन द्वारविधिः स्तूयते। स्वर्गप्राप्तिरूपं तु फलमाकालिकम्। अकाले भवमाकालिकं विप्रकृष्टकालीनम्, न त्विदानींतनमित्यर्थः। तस्येप्सा तस्यं प्राप्तुमिच्छा। सा च "को हि तद्वेद"इत्यनिश्चयोपन्यासे कारणम्। यथा भाविकालीनपौत्रप्रपौत्रादिवृत्तान्तो निश्चेतुं न शक्यते, तद्वत् स्वर्गप्राप्तिर्भाविकालीनेति गुणयोगादनिश्चयोपन्यासः। धूमादिपरिहारस्तु प्रत्यक्षत्वान्निश्चित इत्यभिप्रायः ।१४।

यदप्यन्यदृष्टविरोधायोदाहृतम् "शोभतेऽस्य मुखं य एवं वेद" (ता ब्रा २०।१६।६) इति, तत्रोत्तरं सूत्रयति (जै. सू. १।२।१५)—

"विद्याप्रशंसा" इति ।१५।

सोऽयं गर्गत्रिरात्रविधेः शेषः। तद्विषयं वेदनमपि मुखशोभाहेतुः किमुतानुष्ठानमिति स्तूयते। यथा कर्णाभरणादिना मुखं शोभितं भवत्येवं वेदितुरुत्साहेनैव विकसितं वदनं शोभितमिव शिष्यैरुद्वीक्ष्यते। अतः शोभासादृश्यगुणयोगात् शोभत इत्युच्यते। यदप्यन्यद्विरोधायोदाहृतम् "आस्य प्रजायां वाजी जायते य एवं वेद" इति सोऽपि वेदानुमन्त्रणविधेः शेषः। अत्रापि कैमुतिकन्यायेन स्तुतिः पूर्ववद्योजनीया। वेदितुः पुत्रः पितृशिक्षया स्वयमपि विद्वान भवति, ततः प्रतिग्रहेणान्नं प्राप्नोति। तस्मादीदृशं गुणमभिप्रेत्य "वाजी जायते" इत्युक्तम् ।१५।

यदप्यन्यदानर्थक्यायोदाहृतम् "पूर्णाहुत्या सर्वान् कामानवाप्नोति" इति, तत्रोत्तरं सूत्रयति (जैः सूः १।२।१६) –

"सर्वत्वमाधिकारिकम् इति ।१६।

"पूर्णाहुतिं जुहुयाद्" इत्यस्य विधेः शेषोऽयम्। सर्वकामावाप्तिहेतुत्वात्प्रशस्तेयमाहुतिरिति स्तूयते। यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वत्वं स्वगृहागतब्राह्मणविषयम्, एवं पूर्णाहुत्या कर्मसाङ्गत्वे यत् फलं तस्मिन्नधिकारे प्रस्तावे संभावितं तद्विषयमेव सर्वत्वं द्रष्टव्यम्। पुर्णाहुतेरभावे सत्याधानरूपं कर्माङ्गविकलं भवति। तच्च वैकल्यं पूर्णाहुत्या

समाधीयत इत्येकः कामः। तस्मिन्समाहिते सत्याहवनीयाद्यग्नयोऽग्निहोत्रादिकर्मसु योग्या भवन्तीत्यन्यः कामः। तैश्च कर्मभिस्तत् फलं प्राप्यत इति कामान्तरम्। ईदृशी सर्वकामावाप्तिराहुत्यन्तरेष्वपि विद्यत इति चेत्। विद्यतां नाम। किं नश्छिन्नम्। न खल्वेतावता पूर्णाहुतिस्तुतेः काचिद्धानिरस्ति ।१६।

ननु पूर्णाहुतेरङ्गभावत्वात्तदीयफलश्रुतेरर्थवादत्वेन स्तावकत्वं भवतु। "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः" (जै. सू. ४।३।१) इति सूत्रेण निर्णीतत्वात्। पशुबन्धवाक्यस्य तु कर्मविधायकत्वात्सर्वलोकाभिजयस्य मुख्यफलत्वादन्यानर्थक्यं दुर्वारमित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।२।१७)—

"फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः सागतो वा फलविशेषः स्यात्" इति ।१७।

पृथिव्यन्तरिक्षद्युलोकेष्वन्यतमलोकाभिजयरूपं फलं पशुबन्धकर्मणा निष्पाद्यते। तेषां च पृथिव्यादीनां फलानां कर्मान्तरेण परिमाणाधिक्यं सारत्वं वा संपाद्यते। ततः फलविशेषः स्यादिति नास्त्यानर्थक्यम्। लोकवदित्युक्तार्थे दृष्टान्तः। यथा लोके निष्केण खारीपरिमितान् व्रीहीन्विक्रीय निष्कान्तरेण पुनः क्रये सति परिमाणाधिक्यं भवति। यथा वा निष्केण वस्त्रमात्रं लभ्यते निष्कद्वयेन तु सारभूतं दुकूलम्। तथा भोगाधिक्यं भोगसारत्वं वा कर्मान्तरेण द्रष्टव्यम्। ब्रह्महत्याया अपि मानस्याः स्वल्पाया वेदनमात्रेण तरणम्, कायिक्यास्तु महत्या अश्वमेधेनेति नास्त्यन्यानर्थक्यम् ।१७।

योऽपि "नान्तरिक्षे न दिवि" इत्यप्रसक्तप्रतिषेध उदाहृतः तथा "बबरः प्रावाहणिः" इत्यनित्यसंयोग उदाहृतस्तत्रोभयोत्तरं सूत्रयति (जै. सू. १।२।१८)—

"अन्त्ययोर्यथोक्तम्" इति। १८।

अन्त्ययोरुदाहरणयोरुत्तरं पूर्वोक्तमेव द्रष्टव्यम्। अन्तरिक्षादौ चयननिन्दारूपोऽर्थवादो "हिरण्यं निधाय चेतव्यम्" (तै. सं. ५।२।७।१) इत्यस्य विधेः शेषः। अतोऽत्र "स्तुत्यर्थेन विधीनां स्युः" इत्युक्तमेवोत्तरम्। अन्तरिक्षे चयनप्रसक्त्यभावात्तन्निन्दा नित्यानुवादोऽस्तु। तेनापि विधिः स्तोतुं शक्यते। नित्यसिद्धार्थानुवादिना वायोः क्षेपिष्ठत्वेन पशुविधेः स्तुतत्वात्। "बबरः प्रावाहणिरकामयत" इत्यत्रापि बबरनामकः कश्चिदनित्यः पुरुषो मनुष्यो न विवक्षितः। किंतु बबरध्वनियुक्तः प्रकर्षेण वहनशीलो वायुर्व्यवहारदशायां नित्य एवार्थो विवक्षित इत्येतदुत्तरं प्रथमपादस्यान्तिमाधिकरणे प्रोक्तम्। तस्मात्संभावितदोषाणां परिहृतत्वादर्थवादानामस्ति प्रामाण्यम्।

तत्र संग्रहश्लोकाः (जै. न्या. १।२।३।)—

वायुर्वा इत्येवमादेरर्थवादस्य मानता ।
न विधेयेऽस्ति धर्मे किं किं वाऽसौ तत्र विद्यते ॥ १ ॥
विध्यर्थवादशब्दानां मिथोऽपेक्षापरिक्षयात् ।
नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः ॥ २ ॥
विध्यर्थवादौ साकाङ्क्षौ प्राशस्त्यपुरुषार्थयोः ।
तेनैकवाक्यता तस्माद्वादानां धर्ममानता ॥ ३ ॥

तदेवं वेदे विद्यमानानां त्रयाणां मन्त्रविध्यर्थवादभागानामप्रामाण्यकारणाभावाद्बोधकानां तेषां प्रामाण्यस्य स्वतस्त्वाङ्गीकारात्कृत्स्नस्यापि वेदस्य प्रामाण्यं सिद्धम् ।१८।

नन्वेवमपि वेदस्य पौरुषेयत्वेन विप्रलम्भकवाक्यवदप्रामाण्यं स्यात् । पौरुषेयत्वं च प्रथमपादे पूर्वपक्षत्वेन जैमिनिः सूत्रयामास (जै. सू. १।१।२७)—

"वेदांश्चैके संनिकर्षं पुरुषाख्याः" इति ।१।

एके वादिनो वेदान् प्रति सन्निकर्षं मन्यन्ते । कालिदासादिभिर्निर्मितानां रघुवंशादिग्रन्थानां समुच्चयार्थश्चकारः । ते ह्यत्र दृष्टान्ततया समुच्चीयन्ते । यथा रघुवंशादय इदानीन्तनास्तथा वेदा अपि । न तु वेदा अनादयः । अत एव वेदकर्तृत्वेन पुरुषा आख्यायन्ते । वैयासिकं भारतं वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायन्ते, तथा काठकं कौथुमं तैत्तिरीयमित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनामाख्यातत्वाद्वेदाः पौरुषेयाः ।१।

ननु नित्यानामेव सतां वेदानामुपाध्यायवत्सम्प्रदायप्रवर्तकत्वेन काठकादिसमाख्या स्यादित्याशङ्क्य युक्त्यन्तरं सूत्रयति (जै. सू. १।१।२८)—

"अनित्यदर्शनाच्च" इति ।२।

अनित्या जननमरणवन्तो ववरादयो वेदार्थे श्रूयन्ते—"ववरः प्रावाहणिरकामयत" (तै. स. ७।१।१०।२) । "कुसुरुविन्द औद्दालकिरकामयत" (तै. स. ७।२।२।१) इति । तथा सति ववरादिभ्यः पूर्वमभावादनित्या वेदाः । विमतं वेदवाक्यं पौरुषेयं, वाक्यत्वात्कालिदासादिवाक्यवदित्यनुमानसमुच्चयार्थश्चकारः ।२।

सिद्धान्तं सूत्रयति (जै. सू. १।१।२९)—

"उक्तं तु शब्दपूर्वत्वम्" इति ।३।

'तु'शब्दो वेदानामनित्यत्वं वारयति। शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्व-मनादित्वं प्राचीनैश्च सूत्रैरुक्तम्। "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" (जै. सू. १।१।५) इत्यस्मिन्सूत्र औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसम्बन्धानां च नित्यत्वं प्रतिज्ञायोत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितत्वात्।

का तर्हि काठकाद्याख्यायिकाया गतिरित्याशङ्क्य सम्प्रदायप्रवर्तनात्सेयमुपपद्यत इत्युत्तरं सूत्रयति (जै. सू. १।१।३०)

"आख्याप्रवचनात्" इति।४।

अस्त्वियमाख्यायिकाया गतिः। ततः परं बबराद्यनित्यदर्शनं यदुक्तं तस्य किमुत्तर-मित्याशङ्क्योत्तरं सूत्रयति (जै. सू. १।१।३१)

"परं तु श्रुतिसामान्यमात्रम्" इति।५।

यत् परं बबरादिकं तत्तच्छब्दसामान्यमेव न तु मनुष्यो बबरनामकोऽत्र विवक्षितः। बबरध्वनियुक्तस्य प्रवाहणस्वभावस्य वायोरत्र वक्तुं शक्यत्वात्।

ननु वेदे क्वचिदेवं श्रूयते "वनस्पतयः सत्रमासत"; "सर्पाः सत्रमासत" इति। तत्र वनस्पतीनामचेतनत्वात्सर्पाणां चेतनत्वेऽपि विद्यारहितत्वान्न तदनुष्ठानं सम्भवति। अतो "जरद्गवो गायति मद्रकाणि" इत्याद्युन्मत्तबालवाक्यसदृशत्वात्केनचित्कृतो वेद इत्या-शङ्क्योत्तरं सूत्रयति (जै. सू. १।१।३२)

"कृते चाविनियोगः स्यात्कर्मणः सम्बन्धात्" इति।६।

यदि ज्योतिष्टोमादिवाक्यं केनचित्पुरुषेण क्रियेत तदानीं कृते तस्मिन्वाक्ये स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात्, साध्यसाधनभावस्य पुरुषेण ज्ञातुमशक्यत्वात्। श्रूयते तु विनियोगः। "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति। न चैतदुन्मत्तवाक्यसदृशं लौकिकविधिवाक्यवद्भाव्यकरणेतिकर्तव्यतारूपैस्त्रिभिरंशैरुपेताया भावनाया अवगमात्। लोके हि ब्राह्मणान् भोजयेदिति विधौ, किं केन कथमित्या-काङ्क्षायां तृप्तिमुद्दिश्यौदनेन द्रव्येण शाकसूपादिपरिवेषणप्रकारेणेति यथोच्यते,तथा ज्योतिष्टो-मविधावपि स्वर्गमुद्दिश्य सोमेन द्रव्येण दीक्षणीयाद्यङ्गोपकारप्रकारेणेत्युक्ते कथमुन्मत्त-वाक्यसदृशं भवेदिति। वनस्पत्यादिसत्रवाक्यमपि न तत्सदृशम्, तस्य सत्रकर्मणो ज्योतिष्टो-मादिना समत्वात्। 'यत्परो हि शब्दः स शब्दार्थः' इति न्यायविद आहुः। ज्योतिष्टो-मादिवाक्यस्य विधायकत्वादनुष्ठाने तात्पर्यं वनस्पत्यादिसत्रवाक्यस्यार्थवादत्वात्प्रशंसायां

तात्पर्यम्। सा चाविद्यमानेनापि कर्तुं शक्यते। अचेतना अविद्वांसोऽपि सत्रमनुष्ठितवन्तः। किं पुनश्चेतना विद्वांसो ब्राह्मणा इति सत्रस्तुतिः। चकारः पूर्वपक्षोक्तस्य वाक्यत्वहेतोः कर्त्रनुपलम्भेन पराहतिं समुच्चिनोति। तस्मान्नास्ति वेदस्य पौरुषेयत्वम्।

अत्रैतौ संग्रहश्लोकौ (जै. न्या. १।१।८)—

पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।
काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत्॥ १॥
समाख्यानं प्रवचनाद्वाक्यत्वं तु पराहतम्।
तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता॥ २॥

ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूत्रितम्—"शास्त्रयोनित्वात्" (ब्र. सू. १।१।३) इति ऋग्वेदादिशास्त्रकारणत्वाद्ब्रह्म सर्वज्ञमिति सूत्रार्थः। बाढम्। नैतावता पौरुषेयत्वं भवति। मनुष्यनिर्मितत्वाभावात्। ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूत्रितम्। "अत एव च नित्यत्वम्" (ब्र सू १।३।२९) इति श्रुतिस्मृती चात्र भवतः। "वाचा विरूपनित्यया" (ऋ. वे. ८।७५।६) इति श्रुतिः। अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेति स्मृतिः। तस्मात्कर्तृदोषशङ्काया अनुदयान्मन्त्रब्राह्मणात्मकस्य वेदस्य निर्विघ्नं प्रामाण्यं सिद्धम्।

ननु मन्त्रब्राह्मणात्मकत्वं वेदस्य न युक्तम्, तयोः स्वरूपस्य निर्णेतुमशक्यत्वात्। मैवम्, द्वितीयाध्यायस्य प्रथमपादे सप्तमाष्टमयोरधिकरणयोर्निर्णीतत्वात्। सप्तमाधिकरणमारचयति (जै न्या. २।१।७)—

अहे बुध्निय मन्त्रं म इति मन्त्रस्य लक्षणम्।
नास्त्यस्ति वाऽस्य नास्त्येतदव्याप्त्यादेरवारणात्॥ १॥
याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्।
तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते॥ २॥

आधाने इदमाम्नायते—"अहे बुध्निय मन्त्रं मे गोपाय" (तै. ब्रा. १।२।१।२६) इति। तत्र मन्त्रस्य लक्षणं नास्ति। अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात्। 'विहितार्थाभिधायको मन्त्र' इत्युक्ते "वसन्ताय कपिञ्जलानालभते" (वा. स. २४।२०) इत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः। 'मननहेतुर्मन्त्र' इत्युक्ते ब्राह्मणेऽतिव्याप्तिः। एवम् 'असिपदान्तो मन्त्रः', 'उत्तमपुरुषान्तो मन्त्रः' इत्यादिलक्षणानां परस्परमव्याप्तिरिति चेत्? मैवम्।

याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात्। तच्च समाख्यानमनुष्ठानस्मारकादीनां मन्त्रत्वं गमयति। "उरु प्रथस्व' (तै. सं. ६।२।७।३) इत्यादयोऽनुष्ठानस्मारकाः। "अग्निमीळे पुरोहितम्" (ऋः १।१।१।१) इत्यादयः स्तुतिरूपाः। "इषे त्वा" (वा सं. १।१) इत्यादयस्त्वान्ताः। "अग्न आ याहि वीतये (साः १।०) इत्यादय आमन्त्रणोपेताः। "अग्नीदग्नीन्विहर" (तै सं. ६।३।१।२) इत्यादयः प्रैषरूपाः। "अधः स्विदासी३दुपरि स्विदासी३द्"(ऋ. १०।१२९।५) इत्यादयो विचाररूपाः। "अम्बे अम्बाल्ये अम्बिके न मानयति कश्चन" (तै. सं ७।४।१९।१) इत्यादयः परिदेवनरूपाः। "पृच्छामि त्वा परमन्तं पृथिव्याः" (तै सं. ७।४।१८।२) इत्यादयः प्रश्नरूपाः। "वेदिमाहुः परमन्तं पृथिव्याः" (तै. सं ६।३।१।२) इत्यादय उत्तररूपाः। एवमन्यदप्युदाहार्यम्। ईदृशेष्वत्यन्तविजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदनुगतो धर्मोऽस्ति यस्य लक्षणत्वमुच्येत। लक्षणस्य चोपयोगः पूर्वाचार्यैर्दर्शितः—

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः॥ इति।
तस्मादभियुक्तानां मन्त्रोऽयमिति समाख्यानं लक्षणम्॥

अष्टमाधिकरणमारचयति (जै न्या. २।१।८)—

नास्त्येतद्ब्राह्मण[१]णेत्यत्र लक्षणं विद्यतेऽथवा।
नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः॥ १॥
मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः।
अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम्॥ २॥

चातुर्मास्येष्विदमाम्नायते "एतद्ब्राह्मणान्येव पञ्च हवींषि" (तै. सं. १।७।१।१) इति। तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः। वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्। पूर्वोक्तमन्त्रभाग एकः, भागान्तराणि च कानिचित्पूर्वैरुदाहर्तुं संगृहीतानि—

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥ इति।

"तेन ह्यन्नं क्रियते" (श ब्रा २।५।२।२३) इति हेतुः। "तद्दध्नो दधित्वम्" (तै. सं. २।५।३।४) इति निर्वचनम्। "अमेध्या वै माषाः" (तै. सं. ५।२।८।१) इति निन्दा। "वायुर्वै क्षेपिष्ठा"

१ ब्राह्मणशेऽस्यवर्वेति क्वचित्पाठः।

(तै. सं. ३।४।३।२) इति प्रशंसा। "तद्व्यचिकित्सज्जुहवानि३मा हौष३म्" (तै. सं. ६।५।९।१) इति संशयः। "यजमानेन संमितौदुम्बरी भवति" (तै. सं. ६।२।१०।३) इति विधिः। "मापानेव मह्यं पचन्ति" इति परकृतिः। "पुरा ब्राह्मणा अभैषुः" (तै. सं. १।५।७।५) इति पुराकल्पः। "यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेद्" (तै. सं. २।३।१२।१) इति विशेषावधारणकल्पना। एवमन्यदप्युदाहार्यम्। न च "हेत्वादीनामन्यतमं ब्राह्मणम्" इति लक्षणम्। मन्त्रेष्वपि हेत्वादिसद्भावात्। "इन्दवो वामुशन्ति हि" (ऋ. १।२।४) इति हेतुः। "उदानिषुर्महीरिति तस्मादुदकमुच्यते" (अ. ३।१३।४) इति निर्वचनम्। "मोघमन्नं विन्दते अप्रचेताः" (ऋ. १०।११७।६) इति निन्दा। "अग्निर्मूर्द्धा दिवः ककुत्" (ऋ. ८।४४।१६) इति प्रशंसा। "अधः स्विदासी३दुपरि स्विदासी३त्" (ऋ. १०।१२९।५) इति संशयः। "वसन्ताय कपिञ्जलानालभेत" (वा. स. २४।२०) इति विधिः। "सहस्रमयुता ददत्" (ऋ. ८।२१।१८) इति परकृतिः। "यज्ञेन यज्ञमयजन्त देवाः" (ऋ. १।१६४।५०) इति पुराकल्पः। 'इतिकरणबहुलं ब्राह्मणम्' इति चेत्। न। "इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत्" इत्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः। "इत्याह" इत्यनेन वाक्येनोपनिबद्धं ब्राह्मणम्" इति चेत्। न। "राजा चित्रं भगं भक्षीत्याह" (ऋ. ७।४१।२)।" "यो मा यातु यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह" (ऋ. ७।१०४।१६) इत्यनयोर्मन्त्रयोरतिव्याप्तेः। "आख्यायिकारूपं ब्राह्मणम्" इति चेत्। न। यमयमीसंवादसूक्तादावतिव्याप्तेः। तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः। मन्त्रब्राह्मणरूपौ द्वावेव वेदभागावित्यङ्गीकारान्मन्त्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणद्वयं जैमिनिः सूत्रयामास "तच्चोदकेषु मन्त्राख्या", "शेषे ब्राह्मणशब्दः" (जै. सू. २।१।३२) इति। तच्चोदकेषु तदभिधायकेषु वाक्येषु मन्त्र इति समाख्या सम्प्रदायविद्भिर्व्यवह्रियते 'मन्त्रानधीमहे' इति। मन्त्रव्यतिरिक्तभागे तु ब्राह्मणशब्दस्तैर्व्यवहृत इत्यर्थः।

ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते—"यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीः" (तै. आ. २।९) इति। नैवम्। विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात्। "देवासुराः संयत्ता आसन्" (तै. स. ५।३।११।१) इत्यादय इतिहासाः। "इदं वा अग्रे नैव किंचिदासीद्" (तै. ब्रा. २।२।९।१) इत्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्। कल्पस्त्वारुणकेतुकचयनप्रकरणे समाम्नायते "इति मन्त्राः कल्पोऽत

ऊर्ध्वं यदि बलिं हरेत्" (तै. आ. १।३।१२) इति। अग्निचयने "सामगाथाभिः परिगायति" (तै. सं. ५।१८।२) इति विहिता मन्त्रविशेषा गाथाः। मनुष्यवृत्तान्तप्रतिपादिका ऋचो नाराशंस्यः। तस्मान्मन्त्रब्राह्मणव्यतिरिक्तभागाभावान्मन्त्रब्राह्मणस्वरूपस्य लक्षितत्वात्तदुभयात्मकत्वं वेदस्य सुस्थितम्।

मन्त्रावान्तरविशेषश्च तस्मिन्नेव पाद इत्थं विचारितः (जै. न्या. २।१।१) —

नर्क्सामयजुषां लक्ष्म सांकर्यादिति शङ्क्यते।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्यसंकरः॥

इदमाम्नायते "अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि' इति। त्रीन्वेदान्विदन्तीति त्रिविदः। त्रिविदां संबन्धिनोऽध्येतारस्त्रैविदाः। ते च यं मन्त्रभागमृगादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना। तत्र त्रिविधानामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति। कुतः? सांकर्यस्य दुष्परिहरत्वात्। अध्यापकप्रसिद्धेष्वृग्वेदादिषु पठितो मन्त्र इति हि लक्षणं वक्तव्यम्। तच्च संकीर्णम्. "देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः" (तै. सं. १।१।५।१, १।१।१०।३) इत्ययं मन्त्रो यजुर्वेदे संप्रतिपन्नयजुषां मध्ये पठितः। न च तस्य यजुष्ट्वमस्ति, तद्ब्राह्मणे "सावित्रयर्चा" (तै. ब्रा. ३।२।५।३, ३।३।४।६) इत्यृक्त्वेन व्यवहृतत्वात्। "एतत्साम गायन्नास्ते" (तै. आ. ९।१०।५) इति प्रतिज्ञाय किंचित्साम यजुर्वेदे गीतम्। "अक्षितमस्यच्युतमसि प्राणसंशितमसि" (छा. उ. ३।१७।६) इति त्रीणि यजूंषि सामवेदे समाम्नातानि। तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायन्ते। तस्मान्नास्ति लक्षणमिति चेत्। न। पादादीनामसंकीर्णलक्षणत्वात्। पादेनार्धर्चेनोपेता वृत्तबद्धमन्त्रा ऋचः। गीतिरूपा मन्त्राः सामानि। वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषीत्युक्ते न क्वापि संकरः। तदेतत् त्रैविध्यं जैमिनिना सूत्रत्रयेण लक्षितम् "तेषामृग्यत्रार्थवशेन पादव्यवस्था।" (जै. सू. २।१।३५) "गीतिषु सामाख्या" (जै. सू. २।१।३६)। "शेषे यजुःशब्दः" (जै. सू. २।१।३७) इति। एतमेव मन्त्रावान्तरविशेषमुपजीव्य वेदानामृग्वेदो यजुर्वेदः सामवेद इति त्रैविध्यं संपन्नम्।

तेषां च वेदानां सर्वेषामन्यतमस्य वा स्वप्रज्ञानुसारेणाध्ययनमुपनीतेन कर्तव्यम्। तथा च याज्ञवल्क्यः स्मरति "वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्" (म. स. ३।२) इति। एकवेदपक्षे पितृपितामहादिपरंपराप्राप्त एव वेदोऽध्येतव्य इत्यभिप्रेत्य "स्वाध्यायोऽध्येतव्य"

(तै. आ. २।१५) इति स्वशब्द आम्नातः। तच्चाध्ययनं न काम्यं किन्तु नित्यम्। अत एव पुरुषार्थानुशासने सूत्रितम्—

"वेदस्याध्ययनं नित्यमनध्ययने पाताद्" इति।

पातित्यं चैवमाम्नायते "अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत् तं योऽनुसृजत्यभागो वाचि भवत्यभागो नाके" (तै. आ. २।१५)। तदेषाऽभ्युक्ता—

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।

यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् (ऋ. १०।७१।६)इति॥

"तस्मात् स्वाध्यायोऽध्येतव्य" (तै. आ. २।१५) इति। अध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिवत्पालयतीति सखिविद्वेदः। बहुद्रव्यप्रयाससाध्यक्रतुफलस्याध्ययनमात्रेण सम्पादनं तत्पालनम्। तदप्याम्नायते "यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति" (तै आ २।१५) इति। यद्यप्येतद्ब्रह्मयज्ञस्वाध्यायफलं तथाऽपि ग्रहणार्थाध्ययनमन्तरेण ब्रह्मयज्ञासम्भवात् तदीयफलमपि सम्पद्यते। ईदृशं सखिविदं वेदरूपं सखायं यः पुमानध्ययनमकृत्वा परित्यजति। तस्य वाच्यपि भाग्यं नास्ति। फले भाग्यं नास्तीति किमु वक्तव्यम्। सकलदेवतानां धर्मस्य परब्रह्मतत्त्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिन्दानृतकलहहेतुं लौकिकीं वार्तां सर्वत्रोच्चारयतः स्पष्ट एव वाचि भाग्याभावः। अत एवाम्नायते "नानुध्यायाद् बहून् शब्दान्वाचो विग्लापनं हि तत्" इति। (श. ब्रा. १४।७।२।२३)। यद्यप्यसौ काव्यनाटकं शृणोति तथाऽपि निरर्थकमेव तच्छ्रवणम्। तेन सुकृतमार्गज्ञानाभावादित्यर्थः। स्मृतिरपि—

योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ (म. स. २।१६८) इति।

एवमन्यान्यपि बहूनि वचनान्यत्रोदाहर्तव्यानि॥

नन्वधीते वेदे पश्चादध्ययनविध्यर्थं ज्ञानम्, ज्ञाने सति पश्चादध्ययनप्रवृत्तिरित्यन्योन्याश्रय इति चेत्। बाढम्। अत एव गुरुमतानुसारिण आचार्यकर्तृकाध्यापनप्रवृत्तिं माणवकाध्ययनस्य महता प्रयासेन संपादयन्ति। मतान्तरानुसारिणस्तु प्रकाशात्मादयोऽध्ययनात्प्रागेव सन्ध्यावन्दनादिविधिज्ञानवत्पित्रादिभ्योऽध्ययनविधिज्ञानं वर्णयन्ति। यद्यध्यापनविधिप्रयुक्तिः, यदि वा स्वविधिप्रयुक्तिः, सर्वथाऽप्युपनीतैरध्येतव्य एव वेदः।

१ अत्र मूले सचिविदमिति पाठः, सचिशब्दस्य सखिपरतामाश्रित्य भाष्यकारेण सखिविदमिति प्रतिपाद्यते।

तस्य चाध्ययनस्य दृष्टार्थत्वमक्षरग्रहणान्तत्वं च पुरुषार्थानुशासने सूत्रितम्। तानि सूत्राणि तद्वृत्तिं चोदाहरामः। अध्ययनस्य दृष्टार्थत्वं साधयितुं पूर्वपक्षयति—

"अदृष्टार्था त्वधीतिर्विहितत्वाद्" इति। १।

दृष्टफलसाधने भोजनादौ विध्यदर्शनाद्विहितमध्ययनमदृष्टार्थमवगन्तव्यम्।

अदृष्टविशेषो न श्रुत इति चेत्तत्राह—

"घृतकुल्याद्यतिदेशः स्वर्गकल्पनं वा" इति। २।

ब्रह्मयज्ञजपाध्ययनार्थवादं (तै. आ. २।१०) नित्याध्ययनेऽतिदिश्य तत्रत्यं घृतकुल्यादिकं रात्रिसत्रन्यायेन (जै. न्या. ४।३।५, ६, ७,) फलत्वेन कल्पनीयम्। ये त्वर्थवादातिदेशं नेच्छन्ति तैर्विश्वजिन्न्यायेन (जै. न्या. ४।३।८) स्वर्गः कल्पनीयः।

दृष्टफलयोः संस्कारप्राप्त्योः संभवे कथमदृष्टकल्पनेत्यत आह—

"अयुक्ते संस्कारप्राप्ती" इति। ३।

संस्कृतस्वाध्यायस्य क्वचित्क्रतौ विनियोगादर्शनात्प्राप्तिः स्वयमपुरुषार्थत्वाच्चेत्यर्थः।

स्वाध्यायप्राप्तिरर्थप्रतिपत्तिहेतुतया पुरुषार्थ इत्याशङ्क्य विषनिर्हरणादिकार्यविनियुक्त-मन्त्रवदध्ययनाङ्गतया विनियुक्तानां ज्योतिष्टोमादिवाक्यानां न स्वार्थे प्रामाण्यमित्याह—

"अन्याङ्गं नार्थप्रमापकम्" इति। ४।

अध्ययनविधायकं तु वाक्यं स्वविहिताध्ययनस्यैवाङ्गमिति कृत्वा स्वार्थे प्रमाणमित्याह—

"अध्ययनवाक्यमनन्याङ्गम्" इति। ५।

नन्वेवमदृष्टार्थत्वे कर्मकारकभूतस्वाध्यायगतफलाभावादध्येतव्य इति कर्मवाची तव्य-प्रत्ययो विरुध्येतेत्यत आह—

"सक्तुवत्करणपरिणामः" इति। ६।

"सक्तूञ्जुहोति" इत्यत्र कर्मत्वेन प्रधानभूतान्सक्तूनुद्दिश्य होमसंस्कारविधाने प्रतीय-मानेऽपि होमसंस्कृतानां भस्मीभूतानां सक्तूनामन्यत्र विनियोगाभावात्कर्मप्राधान्यं हित्वा "सक्तुभिर्जुहोति" इति करणपरिणामः कृतः। एवमत्रापि कर्मगतयोः संस्कारप्राप्त्योर-संभवात् स्वाध्यायेनाधीयीतेति वाक्यविपरिणामः कर्तव्यः।

इदानीं दृष्टफले सत्यदृष्टं फलं न कल्प्यमिति सिद्धान्तयति—

"दृष्टे तु नादृष्टम्" इति। ७।

किं तद्दृष्टफलमिति तदाह—

"दृष्टौ प्राप्तिसंस्कारौ" इति। ८।

अक्षरप्राप्तेः परम्परया पुरुषार्थत्वमाह—

"प्राप्तयाऽर्थबोधः" इति। ९।

जायत इति शेषः।

न च भोजनादिवदन्वयव्यतिरेकसिद्धत्वाद्विधिवैयर्थ्यमिति शङ्कनीयम्, अवघातादिवन्नियमादृष्टाय विध्युपपत्तेरित्याह—

"विधिनिष्पत्त्या" इति। १०।

यत्तूक्तम्—संस्कृतस्य स्वाध्यायस्य विनियोगादर्शनान्न संस्कार. इति तत्राह—

"संस्कारसिद्धिः क्रत्वध्ययनविधिद्वयोपादानाद्" इति। ११।

क्रतुविधयो विषयावबोधमपेक्षमाणास्तदवबोधे स्वाध्यायं विनियुञ्जते। अध्ययनविधिश्च लिखितपाठादिव्यावृत्त्याध्ययनसंस्कृतत्वं स्वाध्यायस्य गमयति. अत उभयोपादानात्तत्सिद्धिः।

ननु संस्कारो नामादृष्टातिशयः। स च न स्वाध्यायगतः। तव्यप्रत्ययेन स्वपदोपात्तप्रकृत्यर्थभूताध्ययनोपरक्ताया भावनाया अपूर्वाभिधानात्। ततः कथं स्वाध्यायस्य संस्कृतत्वमिति ? तत्राह—

"तव्यः कर्मगादृष्टवाची" इति। १२।

अत्र तव्यप्रत्ययस्य कर्माभिधायितया कर्मकारकस्य स्वाध्यायस्य तव्यप्रत्ययं प्रति प्रकृत्यर्थादध्ययनादपि प्रत्यासन्नत्वात् स्वाध्यायगतमेवापूर्वं तव्यप्रत्ययो वक्ति। अपूर्वस्य धात्वर्थजन्यत्वनियमेऽपि तदुपरक्तत्वानियमादिति भावः।

यच्चोक्तमन्याङ्गं नार्थप्रमापकमिति। तदसत्। यतो मन्त्राणां स्वतन्त्रादृष्टशेषाणां तथात्वं युज्यते। इह तु स्वाध्यायाश्रितमदृष्टम्। तस्य च स्वाध्यायगताक्षरसामर्थ्यसिद्धार्थावबोधे फले सति फलान्तरकल्पनायोगात्प्रामाण्यस्योपबृंहकमेवादृष्टं न तु प्रतिबाधकमित्याह—

"स्वतन्त्रादृष्टशेषत्वान्न स्वार्थप्रमा प्रतिबध्यते" इति। १३।

सक्तुन्यायेन कर्मकारकप्राधान्ये परित्यक्ते स्वतन्त्रादृष्टमेवात्रापि स्यादित्यत्राह—

"यथाश्रुतोपपत्तेर्न सक्तुन्यायः" इति। १४।

सक्तुषु गत्यभावाच्छ्रुतं परित्यज्याश्रुतं कल्प्यतां नाम। नेह तद्युक्तं प्रदर्शितत्वादित्यर्थः।

इत्थमध्ययनविधेर्दृष्टार्थत्वं प्रसाध्यार्थावबोधपर्यन्तत्वं निराकर्तुं पूर्वपक्षयति—

"वैधमर्थनिर्णयं भट्टगुरू विधेः पुमर्थावसानाद्" इति। १।

सर्वत्र विधेः पुरुषार्थपर्यवसायित्वनियमादत्रापि पुरुषार्थभूतं फलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगुरू मन्येते।

ननु सकृदध्ययनादावृत्तिसहिताद्वाऽर्थनिश्चयो नोपलभ्यत इत्याशङ्क्य तथा सति तत्सिद्धये सोऽध्ययनविधिरर्थनिश्चयहेतुं विचारं कल्पयिष्यतीत्याह—

"स विचारमाक्षिपेद्" इति। २।

ननु स्वविधेयतदुपकारिणोरेव विधिः प्रयोजक इति सर्वत्र नियमः। तथा सत्यतादृशं कथमत्राध्ययनविधिराक्षेप्स्यतीत्यत आह—

"अविधेयानुपकार्याक्षेपोऽवघातावृत्तिवद्" इति। ३।

"व्रीहीनवहन्ति" इत्यत्रावघातमात्रं विधेयं न तु तदावृत्तिः। तस्या अश्रावत्वात्। नापि सा विधेयोपकारिणी। अन्तरेणावृत्तिं सकृन्मुसलघातादवघातसिद्धेः। तथाऽपि तण्डुलनिष्पत्तिफलसिद्धये स विधिरावृत्तिं यद्वदाक्षिपेत तद्वत्प्रकृतेऽप्यवगन्तव्यम्।

ननु वेदमात्राध्यायिनोऽर्थावबोधानुदयेऽपि व्याकरणाद्यङ्गसहितवेदाध्यायिनस्तदुदयसद्भावात्तं प्रति व्यर्थं विचारं विधिर्न कल्पयेदित्याशङ्क्यार्थगतविरोधपरिहारायापेक्षित एव विचार इत्याह—

"साङ्गाध्ययनात्तद्भावे विचारो विरोधापनुद्" इति। ४।

सिद्धान्तयति—

"प्राप्तेस्तु गवादिवत्पुमर्थत्वाद्विधिस्तदन्तः" इति। ५।

यथा फलभूतस्य क्षीरादेर्हेतवो गवादयोऽपि पुरुषैरर्थ्यन्ते, तथा फलवदर्थावबोधहेतोरक्षरप्राप्तेरपि पुरुषार्थत्वादध्ययनविधिरक्षरप्राप्त्यवसानोऽवगन्तव्यः।

नन्वक्षरप्राप्तेः पुरुषार्थत्वं फलवदर्थावबोधप्रयुक्तं चेत्तर्हि तद्बोधस्य मुख्यपुरुषार्थत्वाद्बोधान्त एव विधिः किं न स्यादित्यत आह—

"फलवद्बोधान्तत्वेऽध्ययनाकात्स्न्र्यम्" इति। ६।

बोधस्य हि फलं कर्मानुष्ठानम्, तथा सति यस्य ब्राह्मणादेर्यस्मिन् बृहस्पतिसवादावधि-

कारस्तस्य (तै. ब्रा. २।७।१) तद्वाक्यमात्राध्ययनं स्यात्। न तु राजसूयादिवाक्याध्ययनम्। तत्र प्रवृत्त्यादिफलाभावात्।

स्वपक्षे तु नायं दोष इत्याह—

"कृत्स्नप्राप्तिर्जपार्था" इति। ७।

न चाबोधकत्वेऽर्थावबोध एव न सिध्येदिति शङ्कनीयम्। प्रमाणस्य प्रमेयबोधकत्व-स्वाभाव्यात्।

लौकिकाप्तवाक्यानामन्तरेणैव विधिं बोधकत्वदर्शनादित्याह—

"लोकवन्नैजो बोधः" इति। ८।

ननु बोधस्य विधिफलत्वे बोधकाममुद्दिश्य विधातुं शक्यत्वात्सुलभोऽधिकारी स्यादित्याशङ्क्य प्राप्तिपक्षेऽपि प्राप्तिकाम उपनीताष्टवर्षब्राह्मणो वाऽधिकारी सुलभ एवेति परिहारं स्पष्टत्वादुपेक्ष्य बोधस्य काम्यत्वं दूषयति—

"सोऽकाम्यः प्राग्बोध्यभानाभानयोः" इति। ९।

बोधस्याग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात्प्राक् सन्ध्योपासनादिवत्पित्राद्युपदेशत एव भाने सिद्धत्वादेव सोऽर्थबोधो न काम्यः। अभाने कामयितुमशक्यः। ज्ञात एव विषये कामनानियमात्।

ननु सामान्यतो ज्ञाते विशेषतो बुभुत्सा संभवति। यद्वा विशेषतोऽपि पित्राद्युपदेशा-दवगते सत्यौपदेशिकज्ञानस्य प्रामाण्यनिर्णयाय पुनर्बोधकामना युक्तैवेत्याशङ्क्यैवमप्यर्था-वबोधमुद्दिश्याध्ययनविधानं न संभवतीत्याह—

"उद्देशायोगाद्" इति। १०।

अग्निहोत्रादिविशेषज्ञानानां न तावदेकबुद्ध्या विशेषाकारेणोद्देशः संभवति। अनन्त-त्वात्, सामान्याकारेणोद्देशे सामान्यमेव विधिफलं स्यान्न तु ज्ञानविशेषः। ततो नोद्देशो युक्तः।

नन्वर्थावबोधमुद्दिश्योच्चारणाभावे वेदस्य स्वार्थे तात्पर्यं न स्यादित्याशङ्क्योपक्रमादि-लिङ्गगम्यं तात्पर्यं शब्दबलादेव सिध्यतीत्याह—

"तात्पर्यं शब्दाद्" इति। ११।

तर्ह्यर्थज्ञानमुद्दिश्य शब्दोच्चारणं लोके व्यर्थं स्यादिति चेत्। न। पुरुषसंबन्धकृतदोषाख्य-प्रतिबन्धपरिहारार्थत्वादित्याह—

"उद्दिश्योच्चारणं दोषघ्नं लोके" इति। १२।

नन्वध्ययनविधेर्बोधान्तत्वाभावे विचारशास्त्रं न प्रवर्तेत प्रयोजकाभावादित्याशङ्क्याह—

"विचार उत्तरविधिप्रयुक्त उपपद्यते" इति । १३ ।

क्रतुबोधविषयः साङ्गवेदाध्ययनादापातप्रतिपन्नाः । विरोधपरिहारेण प्रतिष्ठितं निर्णयज्ञानमन्तरेणानुष्ठापयितुमशक्नुवन्तस्तन्निर्णयाय क्रतुविचारं प्रयोजयन्ति । श्रवणविधिस्तु (बृ आ २।४।५) साक्षादेव ब्रह्मविचारं विधत्ते । एवं सति श्रवणविधेः स्वविधेयप्रयोजकत्वं क्रतुविधीनां च विधेयोपकारिप्रयोजकत्वमित्युपपद्यतेतराम् । अध्ययनविधिप्रयुक्तिपक्षे तु तद्विधेः क्रतुद्वारा स्वर्गसिद्धिपर्यन्तत्वात्क्रत्वनुष्ठानस्यापि तत्प्रयुक्तौ क्रतुविधिवैयर्थ्यमापद्येत ।

नन्वध्ययनविधेस्त्रैवर्णिकमात्रं प्रति नित्यत्वात्तत्प्रयुक्तो विचारस्यापि तल्लभ्येत नान्यथेति चेत् । क्रतुविचारस्य त्रैवर्णिकमात्रेऽपि नित्यत्वसिद्धिः ? किं वा ब्रह्मविचारस्य ? तत्राद्योऽस्मन्मतेऽपि सम इत्याह

"अतो नित्यः क्रतुविचारस्त्रैवर्णिकमात्रस्य" इति । १४ ।

यतोऽकरणे प्रत्यवायश्रवणात क्रतवस्त्रैवर्णिकानां नित्या अत इत्यर्थः ।

द्वितीयोऽनिष्ट इत्याह

"ब्रह्मविचारः पुनः परमहंसस्यैव" इति । १५ ।

नित्य इत्यनुषङ्ग इति ।

ननूक्तनीत्याऽध्ययनस्याक्षरग्रहणान्तत्वेऽर्थज्ञानमविहितं स्यात । मैवम् । वाक्यान्तरेण तद्विधानात् । "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति (पा. भा १-१।१) तद्विधिः । तत्र निष्कारणशब्देनाध्ययनज्ञानयोः काम्यत्वं निवार्यते । अर्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं शाखान्तरगतं निरुक्तकारो यास्क एवमुदाजहार "अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्राविव शुष्कैधो न तज्ज्वलति कर्हिचित्" ॥ इति ॥ (नि. १।१८)

अस्मिन्मन्त्रद्वये "योऽर्थज्ञ" इत्यनेनैवार्द्धेन वेदार्थज्ञानं प्रशस्यते । इतरेणार्द्धत्रयेण ज्ञानराहित्यं निन्द्यते । यो वेदार्थं जानाति सोऽयमिह लोके सकलं श्रेयः प्राप्नोति । तथा तेन ज्ञानेन पापक्षये सति मृतः स्वर्गं प्राप्नोति । तदेतदैहिकामुष्मिकं च ज्ञानफलं

तैत्तिरीया मन्त्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः "तदेषाऽभ्युक्ता। ये अर्वाङुत वा पुराणं वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति। सर्वेऽग्निं द्वितीयं तृतीयं च हंसम्" ॥ इति। "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति। तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति" इति (तै आ २।१५)।

वेदं विद्वानर्थाभिज्ञः पुरुषः। स च द्विविधः। अर्वाचीनकाले समुत्पन्नश्चतुर्दश विद्यास्थानकुशलः कश्चिदुपाध्यायः पुरातनकाले समुत्पन्नो व्यासादिश्च। तमेतमुभयविधं विद्वांसं विद्यामदधनमदकुलमदोपेताः पण्डितंमन्या ये पुरुषा अभितो विद्यादिषु दूषयन्ति, ते सर्वेऽप्यादित्यमेव प्रथमं दूषयन्ति। आदित्यापेक्षया द्वितीयमग्निं दूषयन्ति। तदुभयापेक्षया तृतीयं हंसं दूषयन्ति। हन्ति सदा गच्छतीति हंसो वायुः। अग्न्यादिरूपत्वं च वेदविद आम्नातम् – "अग्नेर्वायोरादित्यस्य सायुज्यं गच्छति" इति (तै. आ २।१५)। न केवलमेत-द्देवतात्रयं किन्तु सर्वा अपि देवता वेदविदि वसन्ति। तस्माद् ब्राह्मणान्वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यान्न तु तस्मिन्विद्यमानमपि दोषं कीर्तयेत्। एवं सति तत्र मन्त्रार्थभूताः सर्वा अपि देवता वेदार्थविदा स्मर्यमाणतया तदीयहृदयेऽवस्थिता अयं नमस्कर्ता तोषयति। न चैतदध्ययनस्यैव फलमिति शङ्कनीयम्। विद्वांसमित्याम्नातत्वात्। अन्यथा वेदमधी-यानमित्याम्नायेत। तस्मात्सर्वदेवताबुद्ध्या प्राणिभिः पूज्यस्य वेदार्थविदो लोकद्वयेऽपि श्रेयःप्राप्तिरुपपद्यते। यस्तु वेदमधीत्यार्थं न विजानाति सोऽयं पुमान्भारमेव हरति धारयति। स्थाणुरिति दृष्टान्तः। छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देनोच्यते। स च यथेन्धनार्थमेवोपयुज्यते न तु पुष्पफलार्थम्। तथा केवलपाठकस्य ब्राह्मणत्वं न भवती-त्येतावदेव, न ह्यनुष्ठानं स्वर्गादिफलसिद्धिर्वाऽस्ति। किलेत्यनेन लोकप्रसिद्धिर्द्योत्यते। लोकेऽपि पाठकस्य यावती धनादिपूजा ततोऽप्यधिका विदुषि दृश्यते। किञ्च यद्वेदवाक्य-माचार्याद् गृहीतमर्थज्ञानरहितं पाठरूपेणैव पुनः पुनरुच्चार्यते। तत् कदाचिदपि न ज्वलति स्वार्थं न प्रकाशयति। यथाऽग्निरहितप्रदेशे प्रक्षिप्तं शुष्ककाष्ठं न ज्वलति तद्वत्। तथा सति तस्य वाक्यस्य वेदत्वमेव मुख्यं न स्यात्। अलौकिकं पुरुषार्थोपायं वेत्त्यनेनेति वेद-शब्दनिर्वचनम्। तथा चोक्तम् –

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ इति।

अतो मुख्यवेदत्वसिद्धये ज्ञातव्य एव तदर्थः। किञ्चात्र यास्केन काचिदन्याऽप्यृगुदाहृता (नि. १।१९)।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः॥ इति।

तत्र पूर्वार्द्धस्य तात्पर्यं स एवं दर्शयति "अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्द्धम्" इति। अस्यायमर्थः यः पुमानर्थं न वेत्ति तं प्रति पूर्वार्द्धेन मन्त्रो ब्रूते। एकः पुरुषः पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि न सम्यक् पश्यति। एकवचनबहुवचनादिविवेकाभावे पाठशुद्धेरपि कर्तुमशक्यत्वात्। "वायुमेव स्वेन भागधेयेनोपधावति। स एवैनं भूतिं गमयति" (तै. सं. २।१।१।१)। "आदित्यानेव स्वेन भागधेयेनोपधावति। त एवैनं भूतिं गमयन्ति" इत्यादावव्युत्पन्नः कथं पाठं निश्चिनुयात्। अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति। "यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेद्" (तै. सं. २।३।१२।१) इति। अत्र व्याकरणमात्रेण प्रतिग्रहीतुरिष्टिः प्रतीयते। मीमांसायां तु न्यायेन दातुरिति निर्णीतम् (जै. सू. ३।४।३०)। तस्मादुभयविधमप्यविद्वांसं प्रत्येवमाहेति॥ तृतीयपादतात्पर्यं दर्शयति "अप्येकस्मै तन्वं विसस्रे स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचा" इति। अस्यायमर्थः अपिशब्दपर्याय उतोशब्दः स च पूर्वोक्तानभिज्ञवैलक्षण्यायात्र प्रयुक्तो निपातानामनेकार्थत्वात्। यः पुमान् व्याकरणाद्यङ्गैः स्वशब्दार्थं मीमांसया तात्पर्यं च शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयां तनुं विसस्रे। स्वमित्यादिकं पदव्याख्यानम्। ज्ञानमित्यादिकं तात्पर्यव्याख्यानम्। वेदार्थप्रकाशनं सम्यग्ज्ञानमनया तृतीयपादरूपया वाचा मन्त्र आहेति। चतुर्थपादतात्पर्यं दर्शयति "उपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा" इति। अस्यायमर्थः—उत्तमया चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमोच्यते। उशतीत्येतस्य व्याख्यानं कामयमानेति। यद्यप्यह्नि गृहकृत्यवेलायां मलिनवासास्तथाऽपि संभोगकालेषु कल्याणवासा भवति। तत्र हेतुः कामयमाना ऋतुकालेष्विति। यथा स पतिरेनां जायां साकल्येनादरयुक्तः पश्यति किञ्च तयोक्तार्थं हितबुद्ध्या शृणोति, तथाऽयं

चतुर्दशविद्यास्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति, वेदोक्तं च धर्मब्रह्मरूपमर्थं हितबुद्ध्या स्वीकरोति। सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति।

पुनरप्यृगन्तरं यास्क उदाजहार। तस्योत्तरा भूयसे निर्वचनाय।

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु।

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्॥ इति (नि. १।२०)।

अयमर्थः पूर्वोदाहृतायाः "उत त्वः पश्यन्" इत्यादिकाया ऋचोऽनन्तरमेषाऽऽम्नाता तस्य पूर्वोक्तमन्त्रार्थस्य भूयसे निर्वचनाय संपद्यते। तमर्थमतिशयेन प्रतिपादयितुं प्रभवति। कथमिति चेत् तदुच्यते। अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः। अभिज्ञाः कथयन्ति। "सखिविदं सख्यायम्" इति मन्त्रे वेदस्य सखित्वमुदाहृतम्। यद्वा स्वर्गलोके देवानां सख्ये स्थित्वाऽतिशयेन पीतामृतमाहुः। वाचामिना ईश्वराः सभासु प्रगल्भा वा वाजिनाः। तेषु मध्येऽप्येनं वेदार्थकुशलं चोदयितुं न हिन्वन्ति। न केऽपि प्राप्नुवन्ति। तेन सह विवदितुमसमर्थत्वात्। यस्त्वन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान् भवति। पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पम्। उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं फलम्। यथा लोके पुष्पं फलस्योत्पादकं तथा वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" (बृ. उ. ४।४।२२) इति श्रुतेः। यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः। "यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति" (प. उ. ४) इति श्रुतेः। तादृशपुष्पफलरहितवेदपाठकः स एष पुमानधेन्वा मायया सह चरति। नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते। पाठमात्रपरं प्रति वेदरूपा वाग्धर्मब्रह्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः। अत एवासौ माया कपटरूपा। ऐन्द्रजालिकनिर्मितगोसदृशगोरूपत्वात्। तया मायया सह चरन्नयं परमपुरुषार्थं न लभत इत्यर्थः। इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिन्दोदाहरणस्य प्रपञ्चितत्वाद् 'यच्च स्तूयते तद्विधीयते' इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरुपगन्तव्यः।

किञ्च नक्षत्रेष्टिकाण्डे प्रतीष्टि फलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते "यथा ह वा अग्निर्देवानामन्नादः, एवं ह वा एष मनुष्याणां भवति। य एतेन हविषा यजते

य उ चैतदेवं वेद" (तै. ब्रा ३।१।४।१) इति। अतो यागवत् फलाय स्ववेदनमपि विधीयते। अनेन न्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविधयो द्रष्टव्याः। ननु "विद्याप्रशंसा" (जै. सू. १।२।१५) इति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूत्रितमिति चेन्न। अस्तु नाम। विद्यमानेनापि फलेन प्रशंसितुं शक्यत्वात्। दर्शयागस्य पूर्णमासयागस्य चातिपाते सति प्रायश्चित्तरूपां वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः क्रियते "सुवर्गाय लोकाय दर्शपूर्णमासाविज्येते" (तै. सं. २।२।५।४) इति। एतच्चाचार्य-ब्रह्मज्ञानफलवाक्यस्य स्वार्थेऽपि तात्पर्यं दर्शयितुमुदाहृतम्।

इच्छाम्येवार्थवादत्वं वचसोऽन्यपरत्वतः।
यथावस्त्वभिधायित्वान्न त्वभूतार्थवादता।
इज्येते स्वर्गलोकाय दर्शादर्शौ यथा तथा।
न त्वभूतार्थवादत्वं पापश्लोका श्रुतिर्यथेति॥

न च वेदनमात्रेण फलसिद्धावनुष्ठानवैयर्थ्यमिति शङ्कनीयम्। फलभूयस्त्वेन परिहृतत्वात्। उदाहृतं चात्र जैमिनिसूत्रम्— "फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषः स्यात्" (जै. सू. १।२।१७) इति। एतच्चास्माभिः "तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेद" इत्युदाहरणेन व्याख्यातम्। छन्दोगाश्च केवलादनुष्ठानाद्विद्यासहितेऽनुष्ठाने फलातिशयमामनन्ति — "तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" (छा उ. १।१।१०) इति। यद्यप्यङ्गावबद्धोपास्तिरत्र विद्याशब्देन विवक्षिता। तथाऽपि न्यायः सर्वास्वपि विद्यासु समानः।

कुतस्त्वैतावती वेदने भक्तिरिति चेत्? कुतो वा तवैषोऽत्र द्वेषः। प्रशंसाऽस्माभिर्भूयसी दर्शिता। निन्दां तु न काप्युपलभामहे। किन्तु कर्मजन्यमपूर्वं यथा मरणादूर्ध्वं जीवेन सह गच्छति। तथा विद्याजन्यमप्यपूर्वं गच्छति। तथा च वाजसनेयिन आमनन्ति "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" (श ब्रा १४।७।२।३), (बृ उ ४।४।२) इति। तस्मादध्ययनवदर्थज्ञानस्यापि विहितत्वादर्थज्ञानाय वेदो व्याख्यातव्यः।

विषयप्रयोजनसम्बन्धाधिकारिज्ञानमन्तरेण श्रोतृप्रवृत्त्यभावाद्विषयादयो निरूप्यन्ते। व्याख्यानस्य व्याख्येयो वेदो विषयः। तदर्थज्ञानं प्रयोजनम्। व्याख्यानव्याख्येयभावः सम्बन्धः। ज्ञानार्थी चाधिकारी। यद्यप्येतावत्प्रसिद्धं तथाऽपि वेदस्य विषयाद्यभावे

व्याख्यानस्यापि परमविषयादिकं न स्यात्। अतो वेदस्य चतुष्टयमुच्यते। वेदे पूर्वोत्तरकाण्डयोः क्रमेण धर्मब्रह्मणी विषयः। तयोरनन्यलभ्यत्वात्। तथा च पुरुषार्थानुशासने सूत्रितम् "धर्मब्रह्मणी वेदैकवेद्ये" इति। जैमिनीये च द्वितीयसूत्रे "चोदनैव धर्मे प्रमाणं, चोदना प्रमाणमेव" इति नियमद्वयं सम्प्रदायविद्भिरभिहितम्। 'चोदनैव' इत्यमुमर्थमुपपादयितुं चतुर्थसूत्रे प्रत्यक्षविषयत्वं धर्मस्य निराकृतम् "प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वाद्" (जै सू १।१।४) इति। अनुष्ठानादूर्ध्वमुत्पत्स्यमानस्य धर्मस्य पूर्वमविद्यमानत्वान्न प्रत्यक्षयोग्यताऽस्ति। उत्तरकालेऽपि रूपादिराहित्यान्नेन्द्रियैरवगम्यते। अत एवादृष्टमिति सर्वैरभिधीयते। लिङ्गराहित्यान्नानुमानविषयत्वमप्यस्ति। सुखदुःखे धर्माधर्मयोर्लिङ्गमिति चेत्। बाढम्। अयमपि लिङ्गलिङ्गिभावो वेदेनैव गम्यते। ततश्चोदनैव धर्मे प्रमाणम्। वैयासिकस्य तृतीयसूत्रस्य द्वितीयवर्णके ब्रह्मणः सिद्धवस्तुनोऽपि शास्त्रैकविषयत्वं भाष्यकृद्भिर्व्याख्यातम्—"शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः" इति। श्रुतिश्च भवति—"नावेदविन्मनुते तं बृहन्तम्" (तै ब्रा ३।१२।९।७) इति। तत्रोपपत्तिः पूर्वाचार्यैरेवमुदीरिता 'रूपलिङ्गादिराहित्यान्न मानान्तरयोग्यता' इति। तस्मादनन्यलभ्यत्वादस्ति धर्मब्रह्मणोर्वेदविषयत्वम्। तदुभयज्ञानं वेदस्य साक्षात्प्रयोजनम्। न च तस्य ज्ञानस्य 'सप्तद्वीपा वसुमती' 'राजाऽसौ गच्छति' इत्यादिज्ञानवदपुरुषार्थपर्यवसायित्वं शङ्कनीयम्। धर्मप्रयुक्तस्य पुरुषार्थस्य स्तूयमानत्वात्। "धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितम्। तस्माद्धर्मं परमं वदन्ति" (तै आ १०।६३।७) इति। उद्दण्डस्य राज्ञो नियामकत्वाद्विवदमानयोः पुरुषयोर्मध्याद् दुर्बलस्यापि राजसाहाय्यवज्जयहेतुत्वाच्च धर्मः पुरुषार्थः। तथा च वाजसनेयिनः सृष्टिप्रकरणे समामनन्ति—"तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत् क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथोऽबलीयान्बलीयांसमाशंसते धर्मेण यथैव राज्ञैवम्" (श ब्रा १४।४।२।२६), (बृ उ १।४।१४) इति। "ब्रह्मविदाप्नोति परम्" (तै आ ८।१) "ब्रह्म वेद ब्रह्मैव भवति" (मु उ ३।२।९) "तरति शोकमात्मविद्" (छा उ ७।१।३) इत्यादिश्रुतिषु ब्रह्मज्ञानप्रयुक्तपुरुषार्थः प्रसिद्धः। तदुभयज्ञानार्थी वेदेऽधिकारी। स च त्रैवर्णिकः पुरुषः। स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावेनाध्ययनराहित्याद्वेदेऽधिकारः प्रतिबद्धः। धर्मब्रह्मज्ञानं तु पुराणादिमुखेनोत्पाद्यते। तस्मात् त्रैवर्णिकपुरुषाणां वेदमुखेनार्थज्ञानेऽधिकारः। सम्बन्धस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः, तदीयज्ञानेन सह

जन्यजनकभावः। त्रैवर्णिकपुरुषैः सहोपकार्योपकारकभावः। तदेवं विषयाद्यनुबन्धचतुष्टयमवगत्य समाहितधियः श्रोतारो वेदव्याख्याने प्रवर्तन्ताम्।

अतिगम्भीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि। अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषद्याथर्वणिका आमनन्ति "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति। परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते" (मु ३ १।१।४) इति। साधनभूतधर्मज्ञानहेतुत्वात् षडङ्गसहितानां कर्मकाण्डानामपरविद्यात्वम्। परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां परविद्यात्वम्।

वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा। तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति "शीक्षां व्याख्यास्यामः—वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शीक्षाध्यायः" (तै आ ७।२) इति। वर्णोऽकारादिः। स चाङ्गभूतशिक्षाग्रन्थे स्पष्टमुदीरितः —

"त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।

प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा" ॥ (पा शि ३) इत्यादिना।

स्वर उदात्तादिः। सोऽपि तत्रोक्तः—

"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" (पा शि १२) इति।

मात्रा ह्रस्वादिः। साऽपि तत्रोक्ता —

"ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि" ॥ इति (पा. शि. ११)।

बलं स्थानप्रयत्नौ। तत्र "अष्टौ स्थानानि वर्णानाम्" (पा. शि. १३) इत्यादिना स्थानमुक्तम्। "अचोऽस्पृष्टा यणस्त्वीषद्" (पा शि ३८) इत्यादिना प्रयत्न उक्तः। सामशब्देन साम्यमुक्तम्। अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यम्। "गीती शीघ्री शिरःकम्पी" (पा शि ३२) इत्यादिना. "उपांशु दष्टं त्वरितम्" (पा. शि. ३५) इत्यादिना च दोषा उक्ताः। "माधुर्यमक्षरव्यक्तिः" (पा शि ३३) इत्यादिना गुणा उक्ताः। सन्तानः संहिता। "वायवायाहि" इत्यत्रावादेशः। "इन्द्राग्नी आ गतम्" इत्यत्र प्रकृतिभावः। एतच्च व्याकरणेऽभिहितत्वाच्छिक्षायामुपेक्षितम्। शिक्ष्यमाणवर्णादिवैकल्ये बाधस्तत्रोदाहृतः —

"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" ॥ इति (पा. शि. ५२)।

"इन्द्रशत्रुर्वर्धस्व" (तै. सं. २।४।१२।१) इत्यस्मिन्मन्त्रे इन्द्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षितेऽर्थे तत्पुरुषसमासः। "समासस्य" (पा ६।१।२२३) इतिसूत्रेण तत्पुरुषत्वादन्तोदात्तेन भवितव्यम्। आद्युदात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वादिन्द्रो घातको यस्येत्यर्थः सम्पन्नः। तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः ॥

कल्पस्त्वाश्वलायनापस्तम्ब-बौधायनादिसूत्रम्। कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः। नन्वाश्वलायनः किं मन्त्रकाण्डमनुसृत्य प्रवृत्तः? किं वा ब्राह्मणमनुसृत्य? नाद्यः। "दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः" (आ सू १।१।३) इत्येवं तेनोपक्रान्तत्वात्। न हि "अग्निमीळे" इत्यादयो मन्त्रा दर्शपूर्णमासयोः क्वचिद्विनियुक्ताः। न द्वितीयः। "आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपन्ति दीक्षणीयायाम्" (ऐ. ब्रा. १।१) इत्येवं दीक्षणीयेष्टेर्ब्राह्मणे प्रक्रान्तत्वात्। अत्रोच्यते। मन्त्रकाण्डो ब्रह्मयज्ञादिजपक्रमेण प्रवृत्तो न तु यागानुष्ठानक्रमेण। ब्रह्मयज्ञश्चैवं विहितः—"यत् स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः" (तै. आ २।१०।६) इति। सोऽयं ब्रह्मयज्ञजपः "अग्निमीळे" इत्याम्नायक्रमेणैवानुष्ठेयः। तथा सर्वा ऋचः, सर्वाणि यजूंषि सर्वाणि, सामानि वाचः स्तोमे "पारिप्लवं शंसति" इति विधीयन्ते। तथाऽऽश्विने शस्यमाने "सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयात्" (आप सू १४।१।२) इति विधीयते। तथा "रिच्यत इव वा एष प्रेव रिच्यते। यो याजयति यो वा प्रतिगृह्णाति याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिः स्वाध्यायं वेदमधीयीत" इति (तै आ २।१६) प्रायश्चित्तरूपं वेदपारायणं विहितम्। इत्यादिषु कृत्स्नमन्त्रकाण्डविनियोगेषु सम्प्रदायपारम्पर्यागत एव क्रम आदरणीयः। विशेषविनियोगस्तु मन्त्रविशेषाणां श्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्याश्वलायनो दर्शयति। अतो मन्त्रकाण्डक्रमाभावेऽपि न कश्चिद्विरोधः। "इषे त्वा" इत्यादिमन्त्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता इत्यापस्तंबादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः। आम्नातत्वादेव जपादिष्वपि स एव क्रमः। यद्यपि ब्राह्मणे दीक्षणीयेष्टिरुपक्रान्ता तथाऽपि तस्या इष्टेर्दर्शपूर्णमासविकृतित्वेन तदपेक्षत्वादाश्वलायनस्यादौ तद्व्याख्यानं युक्तम्। अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्योपकरोति। तर्हि "प्र वो वाजा" इत्यादीनां सामिधेनीनामृचामेव विनियोगमाश्वलायनो ब्रवीतु। "नमः प्रवक्त्रे" इत्यादयस्त्वनाम्नाताः (आ. सू. १।२) कुतो विनियुज्यन्त इति चेत्? नायं दोषः। शाखान्तरसमाम्नातानां

ब्राह्मणान्तरसिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनात्र वक्तव्यत्वात्। सर्वशाखा-प्रत्ययमेकं कर्मेति न्यायविदः। तस्माच्छिक्षेव कल्पोऽप्यपेक्षितः।

व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते। तथा चैन्द्रवायवग्रहब्राह्मणे समाम्नायते—"वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति। सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते" (तै सं. ६।४।७।३) इति। "अग्निमीळे पुरोहितम्" इत्यादिवाक् पूर्वस्मिन काले पराची समुद्रादिध्वनिवदेकात्मिका सती,अव्याकृता-प्रकृतिः, प्रत्ययः, पदम्, वाक्यमित्यादि-विभागकारिग्रन्थरहिताऽऽसीत्। तदानीं देवैः प्रार्थित इन्द्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसस्य ग्रहणरूपेण वरेण तुष्टस्तामखण्डां वाचं मध्ये विच्छिद्य प्रकृति-प्रत्ययादिविभागं सर्वत्राकरोत्। तस्मादियं वागिदानीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः। तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः - "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"इति। एतानि रक्षादिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि (म भा १।१।१) "रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान परिपालयिष्यति, वेदार्थं चाध्यवस्यति"॥ "ऊहः खल्वपि"। "न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्, तस्मादध्येयं व्याकरणम्"॥ "आगमः खल्वपि"। "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान भवति"॥ "लघ्वर्थं चाध्येयं व्याकरणम्। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्र-मध्ययनकालः, अन्तं च न जगाम। अद्य तु पुनर्यदि परमायुर्भवति स वर्षशतं जीवति। तत्र कुतः प्रतिपदपाठेन सकलपदावगमः? कुतस्तरां प्रयोगेण? "असन्देहार्थं चाध्येयं व्याकरणम्"। याज्ञिकाः पठन्ति "स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इति। तत्र न ज्ञायते किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती, किं वा स्थूला चासौ पृषती च स्थूल-पृषतीति। तान्नावैयाकरणः स्वरतोऽध्यवस्यति। यदि समासान्तोदात्तत्वं तदा कर्मधारयः, अथ पूर्वपदप्रकृतिस्वरत्वम्, ततो बहुव्रीहिरिति"। "इमानि च भूयः शब्दानुशासनस्य

६

प्रयोजनानि" इति—"तेऽसुराः", "दुष्टः शब्दः", "यदधीतम्", "यस्तु प्रयुङ्क्ते"। "अविद्वांसः", "विभक्तिं कुर्वन्ति", "यो वा इमाम्", "चत्वारि", "उत त्वः", "सक्तुमिव", "सारस्वतीम्", "दशम्यां पुत्रस्य", "सुदेवो असि वरुण" इति॥ "तेऽसुराः"। "तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः, तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः, म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्"। "दुष्टः शब्दः"।

"दुष्टः[१] शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ इति।
दुष्टांश्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्"। "यदधीतम्"।
"यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् (नि॰ १।६।१)।
अविज्ञातमनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्"। "यस्तु प्रयुङ्क्ते।"
"यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः।

कः? वाग्योगविदेव। कुत एतद्? यो हि शब्दाञ्जानाति, अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्म्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दा इति। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्येतस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयः। अथ योऽवाग्योगविद्? अज्ञानं तस्य शरणम्। विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोऽपि मन्ये पतितः स्यात्। एवं तर्हि, कः? अवाग्योगविदेव। अथ यो वाग्योगविज् विज्ञानं तस्य शरणम्"॥ "अविद्वांसः"।

"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेद्॥ इति।

स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम्"। "विभक्तिं कुर्वन्ति"। "याज्ञिकाः पठन्ति—"प्रयाजाः सविभक्तिकाः कर्तव्या" इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। तस्मादध्येयं व्याकरणम्"। "यो वा इमाम्"। "यो वा इमां पदशः

---

१ शिक्षायां पाणिनीयायां "मन्त्रो हीनः" इति पाठो भाष्यकृता तं विहाय दुष्टः शब्द इति पठितम्।

स्वरशोऽक्षरशो वर्णशो वाचं विदधाति स आन्विजीनो भवति। आन्विजीनाः स्यामेत्यध्येयं व्याकरणम्"। "चत्वारि"।

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश" (ऋ. ४।५८।३, नि. १३।७)।

चत्वारि शृङ्गा। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः। त्रयः कालाः। द्वे शीर्षे। सुपस्तिङश्च। सप्त हस्तासो अस्य। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि। वृषभो वर्षणात्सर्वकामानाम्। रोरवीति। रौतिः शब्दकर्मा। महो देवो मर्त्यां आविवेश। महता देवेन नस्तादात्म्यं यथा स्यादित्यध्येयं व्याकरणम्"॥ अथवा "चत्वारि"।

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ (ऋ.१।१६४।४५, नि १३।९)

चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणो मनस ईषिणः। गुहायां त्रीणि निहितानि नेङ्गयन्ति। न चेष्टन्ते न निमिषन्ति। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते॥ "उत त्वः"।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।

उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः॥(ऋ. १०।७१।४. नि. १।१९)।

अपि खल्वेकः पश्यन्नपि न पश्यति। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम्। अविद्वांसमाहार्धम्। उतो त्वस्मै अन्यस्मै तन्वं विसस्रे। तनुं विवृणुते। जायेव पत्य उशती सुवासाः। यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते। एवं वाग्वाग्विदे स्वमात्मानं विवृणुते। वाग्मे विवृणुयादात्मानमित्यध्येयं व्याकरणम्"॥ "सक्तुमिव"।

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

अत्रासखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधि वाचि॥(ऋ १०।७१।२ नि ४।१०)।

सक्तुः सचतेर्दुर्धावो भवति। कसतेर्वा स्याद्विपरीतस्य विकसितो भवति। तितउ परिपवनं भवति। ततवद्वा तुन्नवद्वा। धीराः प्रज्ञानवन्तो ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत। वाचमकृषत। अत्रासखायः सख्यानि जानते। सायुज्यानि जानते। क ?

एष दुर्गमो मार्ग एकगम्योऽवाग्विषयः। के पुनस्ते ? वैयाकरणाः। कुत एतत् ? भद्रैषां लक्ष्मीर्निहिताऽधि वाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति"॥

"सारस्वतीम्"। "याज्ञिकाः पठन्ति—"आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्" इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्"॥ "दशम्यां पुत्रस्य"। "दशम्यां पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं त्र्यक्षरं चतुरक्षरं वा कृतं नाम कुर्याद् न तद्धितम्" इति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्, तस्मादध्येयं व्याकरणम्"॥ "सुदेवो असि"।

"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥ (ऋ ८।६९।१२)।

सप्त सिन्धवः सप्त विभक्तयः। काकुर्जिह्वा। साऽस्मिन उद्यत इति काकुदं तालु। सूर्मिः स्थूला लोहप्रतिमेति"॥ एवं "सिद्धे शब्दार्थसम्बन्ध" इत्यादिवार्त्तिकोक्तान्यत्रापि प्रयोजनान्यनुसन्धेयानि॥

अथ निरुक्तप्रयोजनमुच्यते—अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्। "गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षमा" इत्यारभ्य "वसवः, वाजिनः, देवपत्न्यो, देवपत्न्यः" इत्यन्तो यः पदानां समाम्नायः समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते। एतावन्ति पृथिवीनामान्येतावन्ति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्टमभिहितत्वात्। तदेतन्निरुक्तं त्रिकाण्डम्। तच्चानुक्रमणिकाभाष्ये दर्शितम्—

"आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्थितः॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम्।
जहाद्युल्बमृबीसान्तं नैगमं संप्रचक्षते॥
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते।
अग्न्यादिदेवीऊर्जाहुत्यन्तः क्षितिगतो गणः॥
वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति॥
गवादिदेवपत्न्यन्तं समाम्नायमधीयते" इति।

एकार्थवाचिनां पर्यायशब्दानां संघो यत्र प्रायेणोपदिश्यते, तत्र निघण्टुशब्दः प्रसिद्धः। तादृशेष्वमरसिंहवैजयन्तीहलायुधादिषु 'दश निघण्टवः' इति व्यवहारात्। एवमत्रापि पर्यायशब्दसंघोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम्, तस्मिन् काण्डे त्रयोऽध्यायाः। तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि। द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि, तृतीये तदुभयद्रव्यगततनुत्वबहुत्वह्रस्वत्वादिधर्मविषयाणि। निगमशब्दो वेदवाची। यास्केन तत्र तत्र "अपि निगमो भवति" इत्येवं वेदवाक्यानामवतारितत्वात्। तस्मिन्निगम एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्। पञ्चमाध्यायरूपस्य तृतीयकाण्डस्य दैवत्वं विस्पष्टम्। पञ्चाध्यायरूपकाण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षतया पदजातस्योक्तत्वात्तस्य ग्रन्थस्य निरुक्तत्वम्। तद्व्याख्यानं च "समाम्नायः समाम्नातः" इत्यारभ्य "तस्यास्तस्यास्ताद्भाव्यमनुभवन्त्यनुभवति" इत्यन्तैर्द्वादशभिरध्यायैर्यास्को निममे। तदपि निरुक्तमित्युच्यते। एकैकस्य पदस्य सम्भाविता अवयवार्थास्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः। तत्र हि "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च" इति प्रतिज्ञाय "उच्चावचेष्वर्थेषु निपतन्ति" इति निपातस्वरूपं निरुच्यैवमुदाहृतम्, "नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायन्नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः" इति। "दुर्मदासो न सुरायामित्युपमार्थीय इति" च (नि. १।४)। तच्च लोके केवलप्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधोपमालक्षणमर्थोदाहरणमस्मिन् ग्रन्थेऽवगम्यते। एवं ग्रन्थकारेणोक्तास्तत्तत्पदनिर्वचनविशेषास्तत्तन्मन्त्रव्याख्यानावसर एवास्माभिरुदाहरिष्यन्ते। न च निर्वचनानां निर्मूलत्वं शङ्कनीयम्। एतद्व्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात्। "तदाहुतीनामाहुतित्वम्" इति (ऐ. ब्रा. १।२।३)। "तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते" (ऐ. आ. २।४।३) इति। "यदप्रथयत्तत्पृथिव्याः पृथिवीत्वम्" इति (तै. ब्रा. १।१।३।६-७) च। ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति। केषांचिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति। अत एव ग्रन्थकार आह—"तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च" (नि. १।१५) इति। तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तम्।

तथा छन्दोग्रन्थोऽप्युपयुज्यते। छन्दोविशेषाणां तत्र तत्र विहितत्वात्। "तस्मात्सप्त चतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते" (तै. ब्रा. १।५।१२) इति ह्याम्नातम्। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त छन्दांसि। चतुर्विंशत्यक्षरा गायत्री।

ततोऽपि चतुर्भिरक्षरैरधिकाऽष्टाविंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः। तथाऽन्यत्रापि श्रूयते—"गायत्रीभिर्ब्राह्मणस्यादध्यात्। त्रिष्टुभ्भी राजन्यस्य जगतीभिर्वैश्यस्य" इति (तै. ब्रा १।१।९।६।७)। तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किञ्च "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति वा याजयति वाऽधीते वाऽध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पत्यते प्र वा मीयते पापीयान्भवति" (का. अ. १।१). तस्मादेतानि "मन्त्रे मन्त्रे विद्याद्" इति श्रूयते। तस्मात्तद्वेदनाय छन्दोग्रन्थ उपयुज्यते।

ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रन्थेऽभिहितम्—"यज्ञकालार्थसिद्धये" इति। कालविशेषविधयश्च श्रूयन्ते—"संवत्सरमेतद्व्रतं चरेत्" (तै. ब्रा. १।५।३।४), "संवत्सरमुख्यं भृत्वा" इत्येवमादयः संवत्सरविधयः। "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीत" (तै. ब्रा १।१।२।६,७) इत्याद्या ऋतुविधयः। "मासि मासि पृष्ठान्युपयन्ति". "मासि मास्यतिग्राह्या गृह्यन्ते" (ता. ब्रा. ७।५।१।६) इति मासविधयः। "यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे याजयेद्" (ता. ब्रा. २।२।३।१) इत्याद्याः पक्षविधयः। "एकाष्टकायां दीक्षेरन", "फल्गुनीपूर्णमासे दीक्षेरन्" (ता. ब्रा. ५।९।१,७) इत्याद्यास्तिथिविधयः। "प्रातर्जुहोति" "सायं जुहोति" (तै. ब्रा. २।१।२।७) इत्याद्याः प्रातःकालादिविधयः। "कृत्तिकास्वग्निमादधीत" (तै. ब्रा १।१।२।१) इत्याद्या नक्षत्रविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते।

एतेषां वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षायामेवमुदीरितम्—

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥" (शि. ४१,४२) इति।

षडङ्गवत्पुराणादीनामपि वेदार्थज्ञानोपयोगो याज्ञवल्क्येन स्मर्यते—

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥" (या. सं. १।३) इति।
"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेद् इति॥" (म. भा. १।१।२६७) इत्यन्यत्रापि स्मर्यते।

ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानि हरिश्चन्द्रनचिकेतआद्युपाख्यानानि धर्मब्रह्मावबोधोपयुक्तानि तेषु तेष्वितिहासग्रन्थेषु स्पष्टीकृतानि। उपनिषदुक्ताः सृष्टिस्थितिप्रलयादयो ब्राह्मपाद्मवैष्णवादिपुराणेषु स्पष्टीकृताः।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥ (वि. पु. ३।६।२५) इति।

सृष्ट्यादेः पुराणप्रतिपाद्यत्वावगमात्। न्यायशास्त्रे प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तादीनां षोडशपदार्थानां निरूपणात्तदनुसारेणेदं वाक्यमस्मिन्नर्थे प्रमाणं भवति नेतरदिति निर्णयः कर्तुं शक्यते। पूर्वोत्तरमीमांसयोर्वेदार्थोपयोगोऽतिस्पष्ट एव। मन्वत्रिविष्णुहारीतादिप्रोक्तासु स्मृतिषु वेदोक्तसन्ध्यावन्दनादिविधयः प्रपञ्चिताः। "तद् ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति" (तै. आ. २।२।२) इत्यादिकः सन्ध्यावन्दनविधिः। "पञ्च वा एते महायज्ञाः सततं प्रतायन्ते" (तै. आ. २।१०) इत्यादिको महायज्ञविधिः। एवं विध्यन्तराणि द्रष्टव्यानि। उक्तप्रकारेण पुराणादीनां वेदार्थज्ञानोपयोगाद्विद्यास्थानत्वं युक्तम्। एतैः पुराणादिभिश्चतुर्दशभिर्विद्यास्थानैरुपबृंहिताया विद्याया ग्रहणेऽधिकारिविशेषः शाखान्तरगतैश्चतुर्भिर्मन्त्रैरुपदर्शितः। तांश्च मन्त्रान्यास्क उदाजहार।

तत्रायं प्रथमो मन्त्रः—

"विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।

असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्"॥ इति। (नि. २।१)

विद्याऽभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमाजगाम। आगत्य चैवं प्रार्थयामास— 'हे ब्राह्मण मामनधिकारिणेऽनुपदिश्य पालय, तवाहं निधिवत्पुरुषार्थहेतुरस्मि, तादृश्यां मयि तदुपदेष्टरि त्वयि च योऽसूयां करोति, यश्चार्जवेन विद्यां नाभ्यस्यति, योऽपि स्नानाचमनाद्याचारनियतो न भवति तादृशेभ्यः शिष्याभासेभ्यो मां न ब्रूयाः, तथा सति त्वद्धृदये स्थित्वा फलप्रदा भवेयम्'।

अथ द्वितीयो मन्त्रः—

"य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन्।

तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह"॥ (नि. २।१) इति।

पूर्वस्मिन्मन्त्र आचार्यस्य नियममभिधायास्मिन्मन्त्रे शिष्यस्य नियमोऽभिधीयते।

वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यम्। तद्विपरीतं सत्यं वेदवाक्यमवितथम्। तादृशेन वाक्येन य आचार्यः शिष्यस्य कर्णावातृणत्ति। सर्वतस्तर्दनं पूरणं करोति। उपसर्गवशादौचित्याच्च तृणत्तिधातोरर्थान्तरे वृत्तिः। सर्वदा वेदं यः श्रावयतीत्यर्थः। किं कुर्वन्? न दुःखं कुर्वन्। मन्दप्रज्ञस्य माणवकस्यादावर्द्धर्चमृचं वा ग्रहीतुमशक्तस्य यथा दुःखं न भवति तथा पादं पादैकदेशं वा ग्राहयन्। किञ्च। अमृतं सम्प्रयच्छन्। अमृतत्वस्य देवजन्मनो मोक्षस्य वा प्रापकत्वादमृतं वेदार्थः। तस्य प्रदानं कुर्वन्। तं तादृशमाचार्यं सच्छिष्यो मुख्यमातापितृरूपं मन्येत। पूर्वसिद्धौ तु मातापितरावधमस्य मनुष्यस्य शरीरस्य प्रदानादमुख्यौ। तस्मै मुख्यमातापितृरूपायाचार्यायैकमपि द्रोहं न कुर्यात्।

अथ तृतीयो मन्त्रः—

"अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।

यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तद्" ॥ (नि. २।१) इति।

ये त्वधमा विप्रा गुरुणाऽध्यापिताः सन्तो विनयोक्त्या, तदीयहितचिन्तनेन, शुश्रूषया वा गुरुं नाद्रियन्ते। आदररहितास्ते शिष्याभासा गुरोर्न भोजनीयाः। अनुभवयोग्या न भवन्ति। न हि तेषु गुरुः कृपां करोति। यथैव गुरुणा ते न पालनीयास्तथैव तानधमान् शिष्यांस्तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति। फलप्रदं न भवतीत्यर्थः॥

अथ चतुर्थो मन्त्रः—

"यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।

यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्" ॥ (नि. २।१) इति।

हे आचार्य! यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः। किञ्च यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत्। तस्मै तु मुख्यशिष्याय त्वदीयनिधिपालकाय ब्रह्मन् वेदरूपां मां विद्यां ब्रूयाः। इत्थं विद्यादेवतया प्रार्थितत्वादाचार्येण मुख्यशिष्याय वेदविद्योपदेष्टव्या। तदर्थमृग्वेदोऽस्माभिः षडङ्गानुसारेण व्याख्यायते। मन्त्रब्राह्मणात्मके वेदे ब्राह्मणस्य मन्त्रव्याख्यानोपयोगित्वादादौ ब्राह्मणमारण्यकाण्डसहितं व्याख्यातम्। अथ तत्र तत्र ब्राह्मणोदाहरणेन मन्त्रात्मकः संहिताग्रन्थो व्याख्यातव्यः।

---

¹स च "अग्निमीळे" इत्यारभ्य "यथा वः सुसहाऽसति" इत्यन्तोऽष्टकाख्यैर्दशमण्डलै-श्चतुःषष्ट्यध्यायैरीषदधिकसहस्रसूक्तैरीषदधिकद्विसहस्रवर्गैरीषदधिकाभिर्दशसहस्रसंख्याभि-

---

(१) प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ॥ एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ इति-वचनाज्ज्ञानार्थाद्विद्धातोः करणे घञ्प्रत्ययेन साक्षात्परम्परया पुरुषार्थसाधनज्ञानसाधनं वेद इत्यर्थो भवति। स च वेद ऋग्यजुःसामाथर्वभेदैश्चतुर्विधः। प्रतिवेदं चानेकाः शाखा भवन्ति। ताश्च पुराणादिषु सङ्क्षिप्यैवं दर्शिताः—ऋग्वेदस्यैकविंशतिर्भेदा यजुर्वेदस्यैकशतं भेदाः, तत्रापि शुक्लकृष्णभेदेन द्विधा विभक्तयजुषः पञ्चदश शुक्लस्य, षडशीतिः कृष्णस्येत्येकशतभेदाः, सामवेदस्य सहस्रभेदा आसन्परन्तु कालक्रमेण विनष्टाः केचनावशिष्टाः, अथर्ववेदस्य नव भेदा इति। एतेष्वपि भेदेष्विदानीं सर्वेषामनुपलम्भः किन्तु केचनैवोपलभ्यन्ते। तत्र प्रति-भेदं मन्त्रब्राह्मणरूपेण द्वैविध्यम्। अतएवापस्तम्ब आह—"मन्त्रब्राह्मणयोर्वेदनामधेयमि"ति। तत्रर्ग्वेदस्य पञ्च शाखा भवन्त्याश्वलायनी साङ्ख्यायनी शाकला बाष्कला माण्डूकेयीति। तत्राश्वलायन्याः शाखाया येयं मन्त्रसंहिता तामिदानीमृग्वेदत्वेनोपादाय तस्या व्याख्यानं सायणेन कृतं तदेतदत्र प्रारभ्यते मुद्रापयितुम्। अस्याः संहितायाश्च प्रकारद्वयेन विभागः-- यथा मण्डलानि, अनुवाकाः, सूक्तानि, ऋचश्चेति; अष्टकानि, अध्यायाः, वर्गाः, मन्त्रा इति। आद्यो विभागोऽनुष्ठानोपयोगी द्वितीयस्तु अध्ययनोपयोगी। तदस्मिन्नृग्वेदे कर्मोपयोगिन्यो देवताः स्तूयन्ते। ताश्च देवता अग्निवाय्विन्द्रमित्रवरुणोषोभगविष्णुप्रभृतयस्त्वनेकाः। तासां स्तवश्च तदीयगुणक्रियादिवर्णनद्वारेण क्रियते। तत्रर्क्संहितायाः प्रथमेऽष्टके प्रथमाध्यायस्य प्रथमवर्गीयप्रथममन्त्रेऽग्निरूपा देवता स्तूयते "अग्निमीळे" इत्यत्र। एतदादि च सूक्तमिदमाग्नेयम्। ऋग्वेदे ऋषिच्छन्दोदेवतादि विज्ञेयं भवति। सूक्तादीनां तत्रर्ष्यादिकमनुक्रमणिकाख्यग्रन्थे क्रमेण प्रतिपादितं भाष्यकारेण सूक्तव्याख्यान-प्रारम्भे प्रतिपाद्यते। मन्त्राणां कर्मसूपयोगलक्षणो विनियोगश्च श्रौतसूत्रादिषु प्रतिपादितोऽप्यत्र दर्श्यते समूलम्। तत्रर्ष्यादीनां सामान्यतो लक्षणं प्रतिपादितमनुक्रमणिकायाम्—"यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवता यदक्षरपरिमाणं तच्छन्दः" इति। तत्र छन्दांसि दैवासुरादिभेदेन नैकविधान्यपि वर्गत्रयेण विभक्तानि। प्रथमे वर्गे गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीरूपेण सप्त भवन्ति। अस्मिन् वर्गे दैवादयः सर्वे भेदा भवन्ति। केवलं प्रतिभेदं छन्दसामक्षरपरिमाणं परं भिद्यते, यथा एकद्वित्रिचतुष्पञ्च-षट्सप्तभिरक्षरैः क्रमेण दैवो गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीरूपच्छन्दोगणो भवति। आसुरस्तु क्रमेण पञ्चदशचतुर्दशत्रयोदशद्वादशैकादशदशनवभिरक्षरैर्गायत्र्यादिर्भवति। एवमष्टौ द्वादश षोडश विंशतिश्चतुर्विंशति-रष्टाविंशतिर्द्वात्रिंशदित्यक्षरैर्यथाक्रमं प्राजापत्यानि गायत्र्यादीनि छन्दांसि। एवं चतुर्विंशतिः सप्तविंशतिस्त्रि-शत्त्रयस्त्रिंशत् षट्त्रिंशदेकोनचत्वारिंशद् द्वाचत्वारिंशदित्यक्षरैराचीनि गायत्र्यादीनि यथाक्रमं सप्त छन्दांसि। तथा षोडशाष्टादश विंशतिर्द्वाविंशतिश्चतुर्विंशतिष्षड्विंशतिरष्टाविंशतिरित्येवमक्षरैः क्रमेण सामानि गायत्र्यादीनि सप्त। षट् सप्ताष्टौ नव दशैकादशद्वादशेति क्रमेणाक्षरैर्याजुषाणि गायत्र्यादीनि छन्दांसि सप्त। एवं षट्चत्वारिंशद्द्वापञ्चा-शदष्टपञ्चाशच्चतुःषष्टिः सप्ततिः षट्सप्ततिरशीतिरित्येवं ब्राह्माणि यथाक्रमं गायत्र्यादिसप्तच्छन्दसामक्षराणि। एवं चतुर्विंशतिरष्टाविंशतिर्द्वात्रिंशत्षट्त्रिंशच्चत्वारिंशच्चतुश्चत्वारिंशदष्टाचत्वारिंशदित्येवं क्रमेणाक्षरैरार्षाणि गाय-त्र्यादीनि पूर्वोक्तानि सप्त छन्दांसि भवन्ति। एभिरेवार्षैः प्रायेण छन्दांसि श्लोकाश्च भवन्ति। एवमष्टविधत्वं प्रथमे वर्गे भवति। द्वितीयतृतीयवर्गौ तु केवलमार्षावेव भवतः। तत्र द्वितीयवर्गे-अतिजगती, शक्वरी, अतिशक्वरी, अष्टिः, अत्यष्टिः, धृतिः अतिधृतिरित्येवं सप्त छन्दांसि भवन्ति। तेषां क्रमेण द्वापञ्चाशत्षट्पञ्चाशत्षष्टिश्चतुःषष्टि-

ऋग्भिश्चोपेतः। [1]तस्य च ग्रन्थस्य कृत्स्नस्याप्याम्नानक्रमेणैव सामान्यविनियोगो ब्रह्मयज्ञजपादौ पूर्वमेवाभिहितः। [2]विशेषविनियोगस्तु तत्तत्क्रतौ सूत्रकारेण प्रदर्शितः। स च त्रिविधः—सूक्तविनियोगः, तृचादिविनियोगः, एकैकस्या ऋचो विनियोगश्चेति। [3]तत्र "अग्निमीळे" इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्। स विनियोग आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशे खण्डे सूत्रितः "अग्ना नो अग्न इति षड्ग्निमीळेऽग्निं दूतम्" इति।

रष्टषष्टिर्द्विसप्ततिः षट्सप्ततिरित्येवमक्षराणि भवन्ति। तृतीये वर्गे तु कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिनामकानि सप्त छन्दांसि भवन्ति। तेषां क्रमेण-अशीतिश्चतुरशीतिरष्टाशीतिर्द्विनवतिः षण्णवतिः शतं चतुरुत्तरं शतमित्यक्षराणि भवन्ति। तदत्र प्रथमे सूक्ते गायत्रमार्षं छन्दो भवति। गायत्र्याश्चावान्तरं नैकविधत्वं भवति। तत्र प्रथमतो द्वैविध्यं पादवशतो भवति षडक्षराश्चत्वारः पादा अष्टाक्षरास्त्रय इति वा। तत्र द्वितीय एव प्रकारोऽत्र सूक्ते गायत्र्याः। अत एवात्र प्रथमे मन्त्रेऽपि पादानां त्रयमेव भवति। तदेतत्सर्वमभिप्रेत्य भाष्यकारः सचेत्यनेन प्रदर्शयति। अत्र सचेत्यनेन संहिताग्रन्थो गृह्यते। संहिताया आदिमा ऋग् "अग्निमीळे" इत्यादिस्तस्याः प्रथमं प्रतीकम् "अग्निमीळे" इति गृहीत्वाऽन्तिमायाः "समानीव आकूतिः" इत्यस्या अन्तिमं पादं "यथा वः सुसहाऽसति" इति प्रदर्श्य तेन कृत्स्नां संहितामभिप्रेत्य तदीयविभागप्रदर्शनगर्भं व्याचष्टे भाष्यकारः। काण्डानि अष्टकानि। सूक्त-वर्ग-मन्त्र-संख्या अस्याः संहिताया अनेकविधेनाभिप्राये नैकविधाः प्रदर्श्यन्ते, यथा काश्चन द्विपदा ऋचो भवन्ति तास्तु कैश्चन द्वाभ्यां द्वाभ्यां पादाभ्यामेकैकेति संगण्यन्ते ऽपरैस्तत्रापि चतुर्भिरेव पादैरेकैकेति गण्यन्ते। एवं बहुपादास्वत्यष्टिप्रभृतिच्छन्दःसु कैश्चन षड्भिः पादैरेकैका ऋग्गण्यतेऽपरैस्तत्रापि पादचतुष्टयेनैवैका ऋगिति गण्यते फलतः संख्याविषये वैमत्यं भवति। सूक्तसंख्यायामपि खिलसूक्तानां गणनं क्रियते कैश्चनापरैर्नेति वैषम्यं भवति। एवं वर्गसंख्यायामपि। तावताऽपि क्रमेणैकद्विदशसहस्रसंख्यास्वविवादस्तदधिकत्व एव विवाद इति सर्वसङ्ग्रहाय भाष्यकारोऽत्र सामान्यशब्देन "ईषदधिके"त्यनेन तत्प्रदर्शयति।

(१) विनियोगो नाम कर्मभिः सम्बन्धः। सचाविशेषेण विशेषेणेति द्विविधः। तत्र कृत्स्नसंहितागतमन्त्राणां संहितात्वेनर्ग्वेदत्वेन वा सामान्यरूपेण विनियोगो ब्रह्मयज्ञे भवति। तत्र यथायथं सर्वेषां मन्त्राणां पठितव्यत्वात्। प्रत्यहं ब्राह्मणेनानुष्ठातव्यानां ब्रह्मपितृदेवपित्रतिथियज्ञानां मध्ये प्रथमो वेदाध्ययनरूपो ब्रह्मयज्ञः। तत्रोपांश्वेव मन्त्राणां प्रयोगाज्जप इति व्यवहारः। अथवा तां तां देवतां साक्षात्कर्तुं तदीयमन्त्रजपात्मकेऽनुष्ठाने देवतानुसारेणाविशेषेण कृत्स्ना संहितोपादेया भवतीति वाऽभिप्रेत्य जपपदप्रयोगः। आदिशब्देन वाचस्तोमः सत्रेष्वाश्विनसूक्तादि ग्रहीतव्यम्। तत्राप्यविशेषेणैव विनियोगात्।

(२) सूक्ततृचर्ग्रूपेण विशेषविनियोगस्त्रिविधः सूत्राद्युल्लेखपुरस्सरं तत्र तत्र स्वयमेव प्रदर्शयिष्यति व्याख्यानवेलायां भाष्यकारः।

(३) सोमयागे सुत्यादिनात्पूर्ववर्तिन्यां रात्रौ मध्यरात्रत ऊर्ध्वं पक्षिणामारावतः पूर्वं यथा समाप्तः स्यादेवंकालेऽग्निरुषा अश्विनौ चेति तिसृणां देवतानां गायत्र्यादिसप्तच्छन्दोयुतैर्मन्त्रैः स्तवः क्रियते स प्रातःकालसमीपवर्तिन्युषसः कालेऽनूच्यमानः प्रातरनुवाकः। तत्र प्रतिदेवतं स्तवः क्रतुशब्देनोच्यतेऽतोऽत्र आग्नेय उषस्य आश्विन इति त्रयः क्रतवो भवन्ति। तत्राग्नेये क्रतावेतत्सूक्तं विनियुज्यते।

[1]तत्र हीनपादग्रहणात्सूक्तनिश्चयः। "सूक्तं सूक्तादौ हीने पादे" (आ० १।१) इति परिभाषितत्वात्। [2]तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः। स च द्वितीयाध्यायस्य प्रथमखण्डे सूत्रितः—"साह्वान्विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये" इति। [3]तत्र कृत्स्नपादग्रहणादृगित्यवगम्यते। "ऋचं पादग्रहणे" (आ० १।१) इति परिभाषितत्वात्। तथा "संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्" (आ० २।१) इति परिभाषितत्वात्स्विष्टकृत्सम्बन्धनिश्चयः। तत्रापि द्वितीयमन्त्रत्वेनोदाहृतत्वाद्याज्यात्वम्। यद्यपि "साह्वान्" इत्यनया पुरोऽनुवाक्ययैव देवताया अनुस्मरणरूपसंस्कारः सिद्धः, तथाऽपि याज्यानुवाक्ययोः समुच्चयो द्वादशेऽध्याये चतुर्थपादे मीमांसितः—

[4]पुरोऽनुवाक्यया याज्या विकल्प्या वा समुच्चिता।
विकल्प्याऽन्यतरेणैव देवतायाः प्रकाशनात्॥
पुरेवाद्यः समाख्यानाद्वचनाच्च समुच्चयः। (मी० न्या० १२।४)

---

(१) आश्वलायनश्रौतसूत्रे "अग्निमीळे" इत्येवं प्रथममन्त्रप्रतीकोपादानमात्रेण कथमयं सूक्तविनियोग इत्याशयेन आश्वलायनसूत्रगतां परिभाषां प्रदर्श्य सूक्तविनियोगं साधयति। परिभाषायास्त्वयमर्थः—अत्र श्रौतसूत्रे यत्र क्वापि सूक्ताद्याया ऋचः प्रथमपादापेक्षया न्यूनस्य प्रतीकस्योपादानं तत्र तेन प्रतीकेन सूक्तं ग्रहीतव्यमिति। एवं चात्र सूक्ताद्याया 'अग्निमीळे" इत्यृचः प्रथमपादापेक्षया न्यूनस्य "अग्निमीळे" इत्यंशस्योपादानेनात्रैव सूक्तविनियोग एवेत्यर्थः।

(२) अग्नीनां श्रौतकर्मसु उपयोगार्थं मन्थनेन सम्पादनमाधानम्। तस्य पूर्णाहुत्यन्तता होमान्तता इष्ट्यन्ततेतिविकल्पत्रयम्। तत्र तृतीये कल्पे तिस्र इष्टयोऽनुष्ठीयन्ते ताः पवमानेष्टिशब्देनोच्यन्ते। तत्र प्रथमायाम् अग्निः, अग्निः पवमान इति प्रधानदेवते, द्वितीयायाम् अग्निः पावकः, अग्निः शुचिरिति प्रधानदेवते, तृतीयायाम् अग्नीषोमौ, इन्द्राग्नी, विष्णुरिति तिसृणामन्यतमा अदितिश्चेति देवते। तत्र द्वितीयेष्टौ स्विष्टकृद्धोमेऽत्रत्यसूक्तगता प्रथमा याज्यात्वेन विनियुज्यते। होमे हविषः प्रदानकाले पठ्यमाना ऋग् याज्या।

(३) अत्र श्रौतसूत्रे "अग्निमीळे" इत्यस्या ऋचः प्रथमस्य पूर्णस्य पादस्य ग्रहणादृचोऽत्र ग्रहणम्, यत आश्वलायनेन "ऋचं पादग्रहणे" इति परिभाषणं कृतम्। यत्र क्वापि अत्र सूत्रे ऋचः पूर्णः पादो गृह्यते तर्हि तत्र केवला सा ऋग् ग्रहीतव्येति तदर्थः। तत्रैवाश्वलायनेन "संयाज्ये" इति वचनात् संयाज्येशब्दस्य सौविष्टकृतयाज्यानुवाक्याबोधकत्वस्य "संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयाद्" इति तेन परिभाषया वचनात् स्विष्टकृत्सम्बन्धः। तत्र च मन्त्रद्वयग्रहणेनानुष्ठानक्रमानुरोधेन प्रथमाया अनुवाक्यात्वं द्वितीयाया याज्यात्वमिति निर्णीय तथा विनियोग उक्त इति प्रतिपादयति।

(४) मन्त्राणां यागेऽनुष्ठानसम्बन्ध्यर्थस्मारकत्वस्य मीमांसकैः सिद्धान्तितत्वादेकस्मिन्नेव यागे एकस्मिन्नेवाङ्गकर्मणि समानदेवताकमन्त्रद्वयस्य वचनेन तेनैकैव देवता स्मारणीया। तत्र स्मारणरूपस्य कार्य्यस्य

देवताप्रकाशनकार्यस्यैकत्वाद् युग्मयोर्यथा विकल्पस्तथैवैकयुग्मगतयोरेतयोरिति चेत्। मैवम्, पुरोऽनुवाक्येति समाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः। किञ्च "पुरोऽनुवाक्यामनूच्य याज्यया जुहोति" इति प्रत्यक्षवचनेन देवतोपलक्षणहविःप्रदानकार्ये भेदोक्तिपुरःसरं साहित्यं विधीयते, तस्मात्समुच्चय इति।

एतच्च "अग्निम्" इत्यादिसूक्तं नवर्चम्, "अग्निं नव मधुच्छन्दा वैश्वामित्रः" इत्यनुक्रमणिकायामुक्तत्वात् (अनु १४)। विश्वामित्रपुत्रो मधुच्छन्दोनामकस्तस्य सूक्तस्य द्रष्टृत्वात्तदीय ऋषिः। "ऋष गतौ" इति धातुः। "सर्वधातुभ्य इन्" (उ. ४।११९)। इगुपधात्कित् (उ. ४।१२१)। वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयंभूर्वेदपुरुषः प्राप्नोत्। तथा च श्रूयते —"अजान्ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत्तदृषयोऽभवन्" इति (तै. आ. २।९)। तथाऽतीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनादृषित्वमित्यभिप्रेत्य स्मर्यते—

"युगान्तेऽन्तर्हितान्वेदानत्सेतिहासान्महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा" ॥ इति।

ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्यते—

[1]"अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वाऽपि पापीयाञ्जायते तु सः॥
ऋषिच्छन्दोदेवतानि ब्राह्मणार्थं स्वराद्यपि।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते" ॥ इति।

वेदनविधिश्च स्मर्यते—

"स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थ एव च।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ इति।

"अग्निम्" इत्यादिसूक्तस्य छन्दोऽनुक्रमणिकायां यद्यप्यत्र नोक्तम्, तथाऽपि परिभाषायामेवमुक्तम् -"आदौ गायत्रं प्राग्घिरण्यस्तूपाद्" इति (अनु. १२।१४)। हिरण्यस्तूप

प्रथमपठितेनानुवाक्यासञ्ज्ञकेन मन्त्रेण सिद्धत्वाद् द्वितीयस्य तत्र कर्त्तव्यकार्याभावेन प्रयोगान्तरे द्वितीयस्याः प्रयोगेण तद्देवतास्मारणं कर्तव्यमिति तथाचैककार्यकरत्वेन विकल्पितत्वं स्यादित्याशङ्क्य समुच्चयस्य मीमांसायां सिद्धान्तितत्वेन उभयोरेकस्मिन्नेव प्रयोगे वचनमिति समुच्चय इति प्रदर्शयति।

(१) अत्र योगशब्देन विनियोगस्य ग्रहणम्। अतएवाग्रेतनश्लोकद्वये तद्बोधनाभिप्रायेण "ब्राह्मणार्थम्" "विनियोग" इतिप्रोक्तं संगच्छते।

ऋषिर्येषां मन्त्राणां वक्ष्यते ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्रं छन्द इत्यर्थः। [1]पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। तच्चारण्यकाण्डे समाम्नायते "छादयन्ति ह वा एनं छन्दांसि पापात्कर्मणः" इति। अथ वा चीयमानाग्निसन्तापस्याच्छादकत्वाच्छन्दः। तच्च तैत्तिरीया आमनन्ति—"प्रजापतिरग्निमचिनुत। स क्षुरपविर्भूत्वाऽतिष्ठत्। तं देवा बिभ्यतो नोपायन। ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसां छन्दस्त्वम्" इति (तै. सं. ५।६।६।१)। यद्वाऽपमृत्युं वारयितुमाच्छादयतीति छन्दः। तदपि छान्दोग्योपनिषद्याम्नातम्—"देवा वै मृत्योर्बिभ्युः। त्रयीं विद्यां प्राविशन। ते छन्दोभिरात्मानमाच्छादयन। यदेभिराच्छादयंस्तच्छन्दसां छन्दस्त्वम्" इति (छा. उ. १।४।२)॥ तथा द्योतनार्थदीव्यतिधातुनिमित्तो देवशब्द इत्येतदाम्नायते "दिवा वै नोऽभूदिति तद्देवानां देवत्वम्" इति (तै. ब्रा. २।२।९।९)। अतो दीव्यतीति देवः। मन्त्रेण द्योत्यत इत्यर्थः। अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः। तथा चानुक्रमणिकायामुक्तम्—"मण्डलादिष्वाग्नेयमैन्द्राद्" इति (अनु. १२।१२)। तस्य सूक्तस्य प्रथमामृचं भगवान् वेदपुरुष आह—

ॐ३म् अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।
होता॑रं रत्न॒धात॑मम् ॥१॥

अ॒ग्निम्। ई॒ळे॒। पु॒रःऽहि॑तम्। य॒ज्ञस्य॑। दे॒वम्। ऋ॒त्विज॑म्।
होता॑रम्। र॒त्न॒ऽधात॑मम् ॥१॥

अग्निनामकं देवमीळे=स्तौमि। "ईड स्तुतौ" (धा २।९) इति धातुः। डकारस्य ळकारो बह्वृचाध्येतृसंप्रदायप्राप्तः। तथा च पठ्यते—

अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः।
अज्मध्यस्थढकारस्य ळ्हकारं वै यथाक्रमम्"॥ इति।

मन्त्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमि—इति लभ्यते। कीदृशमग्निम्? यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति, तथाऽग्निरपि यज्ञस्यापेक्षितं होमं

(१) छन्दःशब्दस्य ब्राह्मणानुसारेणानेकधा व्युत्पादनं प्रदर्शयति। तत्र "चन्देरादेश्च छः" इति औणादिकसूत्रवशतोऽपि चन्दनमाल्हादनं कुर्वन्तीत्यर्थिकाऽपिः व्युत्पत्तिः सम्भाविनी।

सम्पादयति। यद्वा यज्ञस्य सम्बन्धिनि पूर्वभाग आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? देवम्=दानादिगुणयुक्तम्। पुनः कीदृशम्? होतारमृत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथा च श्रूयते—"अग्निर्वै देवानां होता" इति। पुनरपि कीदृशम्? रत्नधातमम्=यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा।

(1)अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति (नि. ७।१४) (2)"अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामः—अग्निः कस्मात्? अग्रणीर्भवति,

(१) प्रयुक्तशब्दानामवयवकल्पनारूपव्युत्पादनप्रदर्शनमनेकैरनेकधा क्रियते। तत्र केचन शब्दस्य पदान्तरसान्निध्य-वर्णनादिवशतोऽर्थं प्रथमतो निर्णीय तत्र विद्यमानसम्भविव्यवहारानपेक्ष्य पदेष्ववयवकल्पनम्। यथा अग्निशब्दस्य लौकिकवह्निपरत्वं प्रमाणान्तरेण निर्णीय तस्मिन् वह्नौ देवसेनानयनकर्तृत्व-यज्ञेप्रणीयमानत्व-संयुक्तपदार्थात्मसात्कर्तृत्वानि विद्यन्ते इति तैरेव निमित्तैर्यथायथमग्निशब्देऽवयवकल्पनात्मकं व्युत्पादनम्। तादृशाश्च व्यवहारा अनेके भवन्तीति तावद्भिर्निर्वचनै निर्वचनेयत्ता न स्यादव्यवस्थितत्वं च स्यादिति लाघवात्तत्रार्थेऽसाधारणं कर्म पर्यालोच्य तदभिप्रायेणैव तत्पदनिर्वचनं कर्तव्यमिति स्थौलाष्ठीविनाऽऽचार्येण मन्यते, यथा अग्नौ काष्ठादिदाहनात्मकरूक्षणकर्तृत्वस्यासाधारणस्य कर्मणो विद्यमानत्वेन तदनुसारेणैतन्निर्वचनमिति। शाकपूणिस्तु अर्थगतान्व्यवहारान्दृष्ट्वा तत्प्रतिपादकलौकिकप्रयुक्तशब्दगतवर्णसाम्येन शब्दनिर्वचनम्, यथा अग्नौ पदार्थं गत्वा सम्बध्य तस्यात्मसान्नयनरूपदाहकरणं दृष्ट्वा तद्व्यवहारप्रतिपादकशब्दमध्ये अयनाक्तदग्धनीतशब्दगतवर्णसाम्येन ततस्तस्य निर्वचनमिति ब्रवीति। तत्र प्रकारेऽपि गौरवेण लाघवाद्धातुगतवर्णसाम्यं ततः प्रत्ययस्य च कल्पनपूर्वं शब्दनिर्वचनमिति पाणिनीयाः। यथा तत्रैव अग् धातुगतवर्णसारूप्यं दृश्यत इति तस्मादेव धातोर्निप्रत्ययकल्पनेन तस्य सिद्धिरिति। अतएव सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे॥ कार्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिष्वित्यभियुक्तोक्तिः। अपरेऽर्थास्तु प्रयोगोपाधय एव। अतएव तदर्थबोधकपदान्तरप्रयोगे वाक्ये तस्माच्छब्दात्तदर्थप्रतीतिरिति।

(२) तत्र वेदेऽनेका देवता विभिन्ननामभिः प्रतिपाद्यमाना विभिन्ना वा नवेति प्रसङ्गे निरुक्तकारेणानेकान् पक्षानुक्त्वा एकदेवतापक्षं प्रदर्श्य देवतात्रितयपक्षो निरुक्ताभिमतत्वेन प्रतिपादितः। तत्रैकदेवतावादोऽध्यात्ममिति प्रतिपादनेन वेदान्त्यभिमतम् अद्वितीयात्मतत्त्वरूपं परमं ब्रह्मैवैका देवतेति प्रतीयते। तस्याश्च लौकिकैर्व्यवहारैर्लौकिकात्मशरीरादिरूपानुपाधीन् विभिन्नानि कर्माणि चादाय विभिन्ननामभिर्व्यवहारोऽग्न्यादिभिः। देवतात्रयवादे च सृष्टौ कल्पितलोकत्रयमुपाधित्वेनादायैकैकलोकस्थानैकैका देवतेतिभेदं गृहीत्वा देवतात्रयप्रतिपादनम्। तत्र पृथिवी अन्तरिक्षं द्यौश्चेति त्रयो लोकास्तेषां सम्बन्धिन्यश्च क्रमेण अग्निः, वायुरिन्द्रो वा, आदित्य इति तिस्रो देवताः। ता एव च वेदे स्तूयन्ते। मित्रवरुणाश्व्यादीनि देवतान्तराणि प्रतिपाद्यमानानि वस्तुत एषामेव कर्मवशतो रूपान्तराणि नातिरिक्तास्ता देवता इति। अनुक्रमणिकाकारेणेमौ पक्षौ प्रदर्श्य देवतात्रयवादमिममेवोररीकृत्य प्रदर्श्यैकदेवतावादकथनावसरे उक्तम् "एकैव देवता महानात्मा स सूर्य्य इत्याचक्षते" इत्युक्तम्। तथा च वेदे सूर्य्यस्यैव विभिन्नविभिन्नोपाधिवशतो विभिन्ननामभिर्वचनमिति पर्यवस्यति। तत्र देवतात्रयपक्षेऽग्निः पृथिवीस्थान इत्यभिप्रायेण निरुक्ते प्रदर्श्यते "अग्निः पृथिवीस्थानः" इत्यादिना।

अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति संनममानः, अक्रोपनो भवतीति स्थौलाष्ठीविः—न क्रोपयति न स्नेहयति, त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः इतादक्ताद्दग्धाद्वा नीतात्, स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परः। तस्यैषा भवति— इति। अग्निमीळे" इति।

अस्यायमर्थः—सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितमतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात्प्रवृत्तिनिमित्तादग्निशब्देन देवताऽभिधीयत इति प्रश्नस्याग्रणीरित्या-कमुत्तरम्। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्—"अग्निर्वै देवानां सेनानीः" इति। एतदेवाभिप्रेत्य बह्वृचा मन्त्र-ब्राह्मणे आमनन्ति—"अग्निर्मुखं प्रथमो देवतानाम्" इति मन्त्रः (ऐ. ब्रा. १।४)। "अग्निर्वै देवानामवमः" इति ब्राह्मणम् (ऐ. ब्रा. १।१।१)। तथा तैत्तिरीयाश्चामनन्ति "अग्निरग्रे प्रथमो देवतानाम्" इति मन्त्रः (तै. ब्रा. २।४।३।३)। "अग्निरवमो देवतानाम्" इति च। वाजसनेयिनस्त्वेवमामनन्ति—"स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम" इति। यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात्प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम्। संनममानः सम्यक् स्वयमेव प्रह्वीभवन्नङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम्। स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिद् अक्रोपन इत्यग्निशब्दं निर्वक्ति। तत्र न क्रोपयतीत्युक्ते न स्नेहयति, किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते। 'इतः' "इण् गतौ" (धा ७. २२) इति धातुः। 'अक्तः' "अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु" (धा० ७२. १) इति धातुः। 'दग्धः' दह भस्मीकरणे" (धा० २. ३५.) इति धातुः। 'नीतः' णीञ् प्रापणे (धा १।२५) इति धातुः। अग्निशब्दो ह्यकारगकारनिशब्दानपेक्षमाण एतिधातोरुत्पन्नादयनशब्दादकारमादत्ते, अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते, यद्वा दहतिधातुजन्याद्दग्धशब्दाद्गकारमादत्ते, नीरिति नयतिधातुः, स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाऽग्निशब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविःपाके च प्रेरयतीति समु-दायार्थः। तस्याग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिदर्शनायैषा "अग्निमीळे" इत्यृग्भवतीति।

तामेतामृचं यास्क एवं व्याख्यातवान्—'अग्निमीळेऽग्निं याचामि, इळिरध्येषणाकर्मा, पूजाकर्मा वा, पुरोहितो व्याख्यातो, यज्ञस्य देवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो भवतीति वा, यो देवः सा देवता, होतारं ह्वातारम्, जुहोतेर्होतेत्यौर्णवाभो, रत्नधातमं रमणीयानां धनानां दातृतमम्' (नि० ७. १४)। इति।

अस्यायमर्थः—ईडतिधातोः स्तुत्यर्थत्वं प्रसिद्धम्। धातूनामनेकार्थत्वमिति न्याय-माश्रित्य याच्ञाध्येषणापूजा अप्यत्रोचितत्वात्तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीये ऽध्याये (नि० २ १२) "यद्देवापिः शंतनवे पुरोहितः" (ऋ ८।५।१३) इत्येतामृचमुदाहृत्य "पुर एनं दधाति" इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्द्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन "पुर एनं दधते" इत्यामनन्ति। देवशब्दो दानदीपनद्योतनानामन्यतममर्थमा-चष्टे। यज्ञस्य दाता दीपयिता द्योतयिताऽयमग्निरित्युक्तं भवति। दीपनद्योतनयोरेकार्थत्वे-ऽप्यस्ति धातुभेदः। यद्यप्यग्निः पृथिवीस्थानस्तथाऽपि देवान् प्रति हविर्वहनाद् द्युस्थानो भवति। देवशब्ददेवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वे-षणीया। होतृशब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिर्जुहोतिधातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्नशब्दो द्वितीयाध्याये "मघम्" इत्यादिष्वष्टाविंशतिधननामसु पठितः। रमणीयत्वा-द्रत्नत्वम्। दधातिधातुरत्र दानार्थवाचीति। तदिदं निरुक्तकारस्य यास्कस्य मन्त्र-व्याख्यानम्।

[१]अथ व्याकरणप्रक्रियोच्यते। अगिधातोर्गत्यर्थाद् (धा ११४१) "अङ्गेर्नलोपश्च" इत्यौ-णादिकसूत्रेण (उ ४।५१) निप्रत्ययः। इदित्त्वान्नुमागमेन प्राप्तस्य नकारस्य (पा ७।१।४१) लोपश्च भवति। अङ्गति स्वर्गं गच्छति हविर्नेतुमित्यग्निः। तत्र "धातोः" (पा ६।१।१६२) इत्यकार उदात्तः। "आद्युदात्तश्च" (पा ३।१।३) इति प्रत्ययगत इकारोऽप्युदात्तः। "अनुदात्तं पदमेकवर्जम्" (पा ६।१।१४८) इति द्वयोरन्यतरमुदात्तमवशिष्येतरस्यानुदात्तत्वं

(१) शब्देषु प्रथमतः प्रकृतिप्रत्ययकल्पनं, तद्वशतः सम्पद्यमाना विशेषाः, ततः सम्पन्नशब्दस्य पदान्तरयोगवशतो जायमाना वार्णा विकाराः, तत उदात्तादयः स्वरास्तद्गता विशेषाश्च क्रमेण विज्ञेया भवन्तीति प्रथमतः पाणिनीयानुसारेण वैयाकरणी प्रकृतिप्रत्ययादिरूपा प्रक्रिया, ततः स्वरप्रक्रियेत्यभिप्रायेणोक्तं "अथ व्याकरणे"त्यादि। अतएव वेङ्कटमाधवेनोक्तम् - निरुक्तमग्रतः कुर्याद्यावत्प्राणं तथा स्वरम्। पदानि पूर्वं जानीयात् पदस्वरमनन्तरमिति।

प्राप्तम्, तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते "सति शिष्टस्वरो बलीयान" (पा ६।१।१५८।९) इति हि न्यायः। ततोऽन्तोदात्तमग्निप्रातिपदिकम्। "अनुदात्तौ सुप्पितौ" (पा ३।१।४) इत्यमित्येतद् द्वितीयैकवचनमनुदात्तम्। तस्य "अमि पूर्वः" (पा ६।१।१०७) इति यत्पूर्वरूपं तदुदात्तम्। "एकादेश उदात्तेनोदात्तः (पा ८।२।५) इति सूत्रितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं सर्वाऽपि प्रक्रिया द्रष्टव्या। मतद्वयं यास्केन प्रदर्शितम् "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणानां चैके" (नि. १।१२) इति। गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् "फिषोऽन्त उदात्तः" (फि १।१) इत्यन्तोदात्तत्वम्।

पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया। एतदेवाभिप्रेत्य यास्क आह—"अथ निर्वचनम्, तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयाद्, अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येन, अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात् (नि. २।१) इति"।

अस्यायमर्थः—तत्तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्याताम्, स्वर उदात्तादिः, संस्कारो निप्रत्ययादिः। किं च तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्याताम्, शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः। तत्र भवो गुणो गतिरूपोऽर्थः। तेनान्वितौ। तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात्। तच्च निर्वचनमस्माभिः प्रदर्शितम्। अथ पूर्वोक्तवैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थो नान्वितस्तस्मिञ्शब्देऽनुगतो न भवेत्। तस्यैव व्याख्यानम् "अप्रादेशिके विकारे" इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः। स च प्रदेशेनाग्निशब्दैकदेशेनात्र नाभिधीयत इत्यप्रादेशिकः। एवं सति यः पुमानर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्। ब्राह्मणानुसारेण वा देवतान्तरविशेषणत्वेन योजयितुं वा सनिर्बन्धः। तदानीं स पुमान् केनचिद्वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत। तस्मिन् शब्दे योजयेत्। वृत्तिः क्रिया। तद्रूपेण सामान्यं सादृश्यम्। अस्माभिश्चाग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्याग्रणीत्वाद्यर्थो योजितः। तदिदं यास्काभिमतं निर्वचनम्। स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति—अक्नोपनशब्दस्यादौ निषेधार्थमकाररूपमक्षरं विद्यते,

अग्निशब्दस्याप्यादावकारोऽस्ति तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते—दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यम्। सर्वथापि निर्वचनं न त्याज्यमिति।

"इळे" इत्येतत्पदं कृत्स्नमप्यनुदात्तम्। "तिङ्ङतिङः" (पा० ८, १, २८,) इत्यतिङन्तादग्निशब्दात्परस्येळ इत्यस्य तिङन्तस्य निघातविधानात्। पदद्वयसंहिताकाले ळीकारस्य धातुगतस्य "उदात्तादनुदात्तस्य स्वरितः"(पा० ८, ४, ६६) इति स्वरितत्वम्। तस्मादूर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य "स्वरितात्संहितायामनुदात्तानाम्" (पा १।२।३९) इत्यैकश्रुत्यं प्रचयनामकं भवति। पुरःशब्दोऽन्तोदात्तः। "अयं पुरो भवः" (तै सं ४।३।२।१) इत्यत्र तथैवाम्नातत्वात्। "पूर्वाधरावराणामसि पुरधवश्चैषाम्" (पा ५।३।३९) इति पूर्वशब्दादस्प्रत्ययः पुरादेशश्च। ततोऽत्र प्रत्ययस्वरः (पा ३।१।३)। धाञो निष्ठायां "दधातेर्हिः" (पा ७।४।४२) इति ह्यादेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः। तत्र समासान्तोदात्तत्वे प्राप्ते (पा ६।१।२२३) तदपवादत्वेन "तत्पुरुषे तुल्यार्थ" इत्यादिना (पा ६।२।२) अव्ययपूर्वपदप्रकृतिस्वरत्वम्। यद्वा "पुरोऽव्ययम्" (पा १।४।६७) इति गतिसंज्ञायाम् "गतिरनन्तरः" (पा ६।२।४९) इति पूर्वपदप्रकृतिस्वरत्वम्। तत्र ओकार उदात्तः। अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववद्द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयप्राप्तौ (पा १।२।३९) "उदात्तस्वरितपरस्य सन्नतरः (पा १।२।४०)। इत्यतिनीचोऽनुदात्तः। यद्यपि पदकाले हितशब्दान्तर्गतस्येकारस्य स्वरितत्वं दुर्लभमुदात्तपरत्वाभावात्। "मात्रा ह्रस्वस्तावदवग्रहान्तरम्" इति (प्रा १।३।१) प्रातिशाख्येऽवसानविधानात्। तैत्तिरीया अनुदात्तमेवाधीयते। तथाऽपि,—

यथा सन्धीयमानानामनेकीभवतां स्वरः।

उपदिष्टस्तथा विद्यादक्षराणामवग्रहे (प्रा ३।३।५) इति प्रातिशाख्ये ऽतिदेशादिष्टसिद्धिः। "यजयाच" इत्यादिना (पा ३।३।९०) यजतेर्नङ्प्रत्यये सत्यन्तोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति (पा ३।१।४) पश्चात् स्वरितत्वम् (पा ८।१।६६)। देवशब्दः पचाद्यजन्तः (पा ३।१।१३४)। स च फिट्स्वरेण (फि १।१), प्रत्ययस्वरेण (पा ३।१।३), चित्स्वरेण (पा ६।१।१६३) वाऽन्तोदात्तः। ऋत्विक्शब्द ऋतौ यजतीति विग्रहे सति "ऋत्विग्दधृक्" (पा ३।२।५९) इति निपातितः। "गतिकारकोपपदात्कृत्" (पा ६।२।१३९) इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृशब्दस्तृन्प्रत्ययान्तः (पा ३।३।१३५) नित्स्वरेणाद्युदात्तः (पा ६।१।१९७)। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो "नञ्विषयस्या-

निसन्तस्य" (फि० २।३) इत्याद्युदात्तः। तथा चाम्नायते "रत्नं धाता" इति। रत्नानि दधातीति विग्रहः। समासत्वादन्तोदात्तो रत्नधाशब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। (पा० ६।२।१३९)। तमप्प्रत्ययस्य (पा० ५।३।५५) पित्स्वरेणानुदात्ते सति (पा० ३।१।४)। स्वरितप्रचितौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य सन्नतरत्वमिति।

वेदावतार आद्याया ऋचोऽर्थश्च प्रपञ्चितः।
विज्ञातं वेदगाम्भीर्यमथ संक्षिप्य वर्ण्यते ॥ १ ॥

स्कन्दस्वामिभाष्यीयमन्त्रार्थमात्रम्—

अग्निमीळे अग्निमहं स्तौमि। कीदृशम्? पुरोहितम्। शान्तिकपौष्टिकैः कर्मभिर्यो राजानमापद्भ्यस्त्रायते स पुरोहित इत्युच्यते। तत्स्थानीयम्। यज्ञस्य यज्ञाधिकृतस्य। "यज्ञो वै यजमानः" इति श्रुतेः। आपदामपहर्तारमित्यर्थः। देवम्। दीव्यतिर्दानार्थे दीप्त्यर्थे वा। दातारं दीप्तं वा। अथवा पुरोहितशब्दः क्रियाशब्दः। पूर्वस्यां दिशि निहितमाहवनीयात्मना स्थापितम्। यज्ञस्येत्येतत्तु देवशब्देन साकं सम्बध्यते। यज्ञस्य दातारं दीपयितारं वा। यज्ञं हि देवेभ्यो मनुष्येभ्यश्चाग्निर्ददाति। तदायत्तत्वाद्दीपयति च। न च यज्ञस्य देवमेव केवलं, किं तर्हि? ऋत्विजम्। कतमम्? होतारम्। "अग्निर्वै देवानां होता" इति श्रुतेः। अग्निर्दैव्यो होता तदधिकृतस्तु मानुषो होता हौत्रं कर्म करोति। अथवा ऋत्विग्घोतृशब्दावपि क्रियाशब्दावेव। ऋतावृतौ यष्टारमृत्विजम्। यो यो यागकालस्तत्र तत्र यष्टारमित्यर्थः। होतारं ह्वातारम्। कस्य? सामर्थ्याद् देवानाम्। रत्नधातममिति। रत्नमितिधननाम। दधातिर्दानार्थः। धनानामतिशयेन दातारम् ॥ १ ॥

वेङ्कटमाधवीयभाष्यीयं मन्त्रार्थमात्रम्—

अग्निं स्तौमि पुरोनिहितमुत्तरवेद्यां यज्ञस्य द्युस्थानं स्वे स्वे काले देवानां यष्टारं ह्वातारं देवानां रमणीयानां धनानां दातृतमम् ॥ १ ॥

आग्नेयसूक्तस्य द्वितीयामृचमाह—

अ॒ग्निः पूर्वे॑भि॒रृषि॑भि॒रीड्यो॒ नूत॑नैरु॒त।
स दे॒वाँ एह व॑क्षति ॥२॥

अ॒ग्निः। पूर्वे॑भिः। ऋषि॑ऽभिः। ईड्यः॑। नूत॑नैः। उ॒त।
सः। दे॒वान्। आ। इ॒ह। व॒क्ष॒ति॒ ॥२॥

अयम् अग्निः पूर्वेभिः = पुरातनैर्भृग्वङ्गिरःप्रभृतिभिर्ऋषिभिरीड्यः = स्तुत्यो नूतनैरीदानीं-

तनैरस्माभिरपि स्तुत्यः। सोऽग्निःस्तुतः सन् इह यज्ञे देवान्=हविर्भुज आवक्षति। वह प्रापण इति धातुः। आवहत्वित्यर्थः।[१]

पूर्वेभिरित्यत्र "बहुलं छन्दसि" (पा १।७।१०) इति भिस ऐसादेशाभावः। "पुव पत्र मर्व पूरणे" इति धातुः। पूर्वतिधातोरनप्रत्यय औणादिकः। इनप्रत्ययान्त ऋषिशब्द "ऋष्यन्धक" इति निपातनात् (पा ४।१।११४) लघूपधगुणाभावः। कित्प्रत्ययो वाऽत्र ज्ञेयः (उ. ४।१२१)। तौ शब्दौ नित्स्वरेणाद्युदात्तौ। ईड्यशब्दस्य ण्यत्प्रत्ययान्तत्वात् "तित् स्वरितम्" (पा ६।१।१८५) इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन" ईडवन्द"

---

(१) अत्र केचित् मन्त्रेऽस्मिन् पूर्वैर्नूतनैश्चर्षिभिरग्नेः स्तुत्यत्ववचनेनास्य मन्त्रस्य कश्चन विरचनकालो भवति यदपेक्षया पूर्वकालवर्तिनां पूर्वशब्देन, उत्तरकालवर्तिनां च नूतनशब्देन ग्रहणं मन्त्रोक्तं सङ्गच्छते। विरचनकालाभावेन नित्यत्वे च सर्वेषामृषीणामित उत्तरकालिकत्वेन नवीनत्वमेव स्यान्न पूर्वत्वमिति तथा विभाग उच्यमानः सङ्गतो न भवेत्। एवञ्चात्र मन्त्रद्रष्ट्रा ऋषिणा स्वकालाभिप्रायेण पूर्वत्वनूतनत्वविभागकरणमिति विरचितत्वमेवास्य मन्त्रस्य, एतद्दृष्टान्तेन चापरेषां सर्वेषां मन्त्राणां विरचितत्वमेवेति पौरुषेयत्वमेव वेदस्य नापौरुषेयत्वमिति ब्रुवते। अन्ये त्वाहुः अत्र मन्त्रे स्तोतुर्भावः प्रतिपाद्यते, एवं च सति तत्तत्कालिकेन स्तोत्राऽग्नेरुत्कर्षबोधनाभिप्रायेण स्वापेक्षया पूर्वेषामपि स्तुत्यत्वं नवीनैरस्मदादिभिरपि स्तुत्यत्वमग्नेरतोऽयं सर्वस्तुत्यो वरिष्ठ इत्यग्निस्तुतौ स्तोतुर्भावमनुकुर्वन्मन्त्रो न स्वस्य विरचनकालबोधनक्षम इति नोक्तप्रणाड्या वेदस्य पौरुषेयत्वसम्भवः। भाविनां पुरुषाणां भावाभिप्रायेण पूर्वमपि तदनुगुणशब्दप्रयोगस्य लोकेऽपि प्रसिद्धत्वात्। यथा 'सोमयाज्यस्य पुत्रो भविता, स पूर्वेषां नूतनानां-चोद्धारयिताऽहमिति मन्ता चे'ति। नह्यत्र सोमयाजिपुत्रेण स्वीये भावे पूर्वत्वनूतनत्वेनाभिप्रेयमाणानां तदुत्पत्तेः पूर्वं विरचितवाक्ये वाक्यकालापेक्षया तद्विरचयितृकालापेक्षया वा पूर्वत्वनूतनत्वे गृह्येते तद्वद् इति दिगिति।

अस्यामृचि अत्र सूक्ते च अग्निर्देवता। तत्र को नामाग्निरिति सन्देहे निरुक्तकारो देवताविषयेऽनेकान् पक्षानुदाजहार एका देवता वेदे स्तूयत इत्यध्यात्मवादः, अनेकदेवतावाद ऐतिहासिकयाज्ञिकानाम्, निरुक्ताभिमतस्तु देवतात्रयवादः। तत्र ऐतिहासिकैरग्न्यादिशब्दैः कर्मदेवा विनिर्दिश्यन्त इत्युच्यते। याज्ञिकैस्तु कर्मसूपयोगिनामाहवनीयाग्निप्रभृतीनामेवाग्न्यादिभिः स्तवः। किञ्च मीमांसकैः कर्मसु प्रयुज्यमानमन्त्ररूपत्वमेव देवताया इति मन्यते। नैरुक्तैस्तु जगतो भूरन्तरिक्षं स्वर्गो लोक इति लोकरूपेण विभागं प्रकल्प्य प्रतिविभागमेकैकं देवतातत्त्वं तत्तत्स्वामित्वेन प्रकल्पितम् अग्निवाय्वादित्यनामभिः क्रमेण। अधिदैवतं सूर्यरूपत्वमेव विभिन्नोपाधिवशतः। तत्र सर्वत्रैकदेवतावादे निरुक्तपक्षेऽपि च उपाधिवशतो माहात्म्याद्वा देवताया विभिन्ननामादिभिः स्तवः। बहुदेवतपक्षे तु यावद्वचनं पार्थक्यमेव देवताया इति।

अग्निशब्दः परमात्मानं परब्रह्मरूपिणं भौमिकं वा अग्न्यादिशब्दैरभिलप्यमानं वक्तीति दयानन्दमतम्। भगवन्तमशेषगुणनिलयं जनार्दनं विष्णुं प्रतिपादयतीति आनन्दतीर्थमतम्।

उभावपि स्वाभिमतपरिपोषाय शब्दानां विश्वतोमुखत्वेन निरुक्त्यादिनियमानां साधारण्येन अध्याहारादिना च स्वोहितानामर्थानां प्राचीनाभिमतत्वसंप्रदर्शनेन मन्त्रार्थान् व्याचक्षाते।

इत्यादिना (पा ६।१।२१४) आद्युदात्तत्वम्। "नवस्य नू त्नप्तनप्खाश्च (पा ५।४।३०।२)। इति वार्त्तिकेन नवशब्दस्य नू इत्यादेशः। तनन् प्रत्ययश्च महावार्तिके विहितः। ततो नित्स्वरेणाद्युदात्तः। अवशिष्टस्वरा अग्न्यादिषु नूतनान्तेषु पूर्ववदुन्नेयाः। उतशब्दो यद्यपि विकल्पार्थे प्रसिद्धस्तथाऽपि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः। "उच्चावचेष्वर्थेषु निपतन्ति" इति (नि १।१।१) निपातत्वम्। तर्हि "निपाता आद्युदात्ताः" (फि ४।१२) इत्युकारस्योदात्तः प्राप्त इति चेत्। न। प्रातःशब्दवदन्तोदात्तत्वात्। यथा प्रातःशब्दोऽन्तोदात्तत्वेन स्वरादिषु पठितः। एवमुतशब्दस्यापि पाठो द्रष्टव्यः। स्वरादेराकृतिगणत्वात्। यद्वा। 'एवादीनामन्तः' (फि ४।१३) इत्यन्तोदात्तः। स इत्यत्र फिट्स्वरः। देवशब्दः पूर्ववत्। देवानित्यस्य नकारस्य संहितायाम् "दीर्घादटि" (पा ८।३।९) इति रुत्वम्। "अत्रानुनासिक" (पा ८।३।२) इत्यनुवृत्तौ "आतोऽटि नित्यम्" (पा ८।३।३) इत्याकारः सानुनासिकः। "भोभगो" (पा ८।३।१७) इति रोर्यकारः। स च "लोपः शाकल्यस्य" (पा ८।३।१९) इति लुप्यते। तस्यासिद्धत्वात् (पा ८।२।१) न पुनः सन्धिकार्यम्। आङो निपातत्वादाद्युदात्तत्वम्। इदमो हप्रत्यये सति निष्पन्नत्वात् (पा ५।३।११) इहशब्दे प्रत्ययस्वरः। वहतिधातोर्लोडर्थे छान्दसो लृट्। तस्य प्रत्ययगतस्य यकारस्य लोपोऽपि छान्दसः। यद्वा लेटि "सिब्बहुलम्" (पा ३।१।३४) इति सिप्प्रत्ययः। "लेटोऽडाटौ" (पा ३।४।९४) इत्यडागमश्च। ततो वक्षतीति सम्पद्यते। तस्य तिङन्तत्वान्निघातः। संहितास्वराः पूर्ववत् ॥ २ ॥*

---

* अत्रेयं स्वरप्रक्रिया :—

अग्निशब्दोऽव्युत्पन्नं प्रातिपादिकमिति मते "फिषोऽन्त उदात्त" इत्यनेनान्तोदात्तः। अग्धातोर्निप्रत्यय इति व्युत्पत्तिमते "आद्युदात्तश्चे"ति प्रत्ययाद्युदात्तः। प्रकृत्यकारश्च "अनुदात्तं पदमेकवर्जम्" इति सूत्रेण "सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य" इति परिभाषासहितेनानुदात्तः। पूर्वशब्दे पुर्वधातोः "धातोः" इति प्राप्तान्तोदात्तत्वस्यानः प्रत्ययस्याद्युदात्तत्वेन बाधे प्राप्तेऽनः प्रत्ययस्य नित्त्वात् "ञ्नित्यादिर्नित्यम्" इति नित्त्वादपवादसूत्रेण प्रत्ययाद्युदात्तत्वस्य बाधे निदन्तपूर्वशब्दस्यादेरुदात्तत्वे शेषस्य वकाराकारस्यानुदात्तत्वम्। ततः पूर्वशब्द आद्युदात्तः। ततो भिसः प्रत्ययस्य सुप्त्वादनुदात्तत्वेन वकाराकारस्थाने सञ्जातस्य "बहुवचने झल्ये"त्येकारस्य "स्थानिवदादेश" इति अनुदात्तत्वे पूर्वेभिःशब्दे आदिरुदात्तः परावनुदात्तौ भवतः। ततः पदावयवसंहितायाम् "उदात्तादनुदात्तस्य स्वरितः" इति वकारैकारस्य स्वरितत्वम्। पदावस्थायां भिस इकारस्य स्वरितात्परत्वात् "स्वरितात्संहितायामनुदात्तानामि"तिप्रचयः स्वरः। ततः पदसंहितायामृषिपदस्थर्कारस्योदात्तस्य परत्वे भिस इकारस्य पुनरनुदात्ततरत्वम् "उदात्तस्वरितपरस्य सन्नतर" इति सूत्रेण। ऋषिभिः। ऋषिशब्द ऋषधातोः

स्क०--किं कारणम्? यस्मात् पूर्वेभिर्ऋषिभिः, पूर्वैरस्मत्तः पूर्वकालैर्भृग्वङ्गिरःप्रभृतिभिः। ईड्यः स्तुत्यः। नूतनैरुत। नूतनमिति नवनाम। उतशब्दोऽप्यर्थे समुच्चये। नवैश्चेत्यर्थः। यावान् कश्चिदविस्तेन सर्वेण यतः स्तोतव्यः। अतोऽहं स्तौमीत्यर्थः। स प्रकृतोऽग्निर्देवानेह वक्षति।

सञ्जातेनप्रत्ययस्य नित्त्वेन "ञ्नित्यादिर्नित्यमि"ति आद्युदात्तः। इकारस्त्वनुदात्तोऽ"नुदात्तं पदमि"त्यनेन। ततो भिसः प्रत्ययस्य सुप्त्वेनानुदात्तत्वादनुदात्तेकारद्वयमकार उदात्तः। तत्र पदावयवसंहितायां षीकारेकारस्यो- "दात्तादनुदात्तस्ये"तिस्वरितः। भिस इकारस्य पददशायां "स्वरितात्संहितायामि"ति प्रचयः। पदसंहिता- दशायांतु ईड्यशब्देकारस्योदात्तस्य परत्वेन पुनरनुदात्ततरत्वम् "उदात्तस्वरितपरस्ये"त्यनेन। ईड्यशब्द ईड्धातोरन्तोदात्तत्वस्य ण्यत्प्रत्ययाद्युदात्तत्वेन बाधे प्राप्ते तं बाधित्वा "तित्स्वरितमि"ति यकाराकारस्य स्वरितत्वे प्राप्ते "ईडवन्दवृशंसदुहां ण्यत" इत्यनेनापवादेन स्वरितत्वं बाधित्वा ईड्यशब्दस्याद्युदात्तता। यकाराकारश्च शेषानुदात्तः। ततः सोः प्रत्ययस्य रुत्वे तस्योत्त्वे उकारस्य रेफस्थानिकतया रेफस्य 'व्यञ्जनमनुदात्तमित्यनु- दात्तत्वेन स्थानिवत्त्वादनुदात्तत्वेन यकाराकारोकारयोरनुदात्तयोः स्थाने सञ्जातस्यौकारैकादेशस्यापि स्थानिवत्त्वे- नानुदात्तत्वम्। तस्य पदतादशायामीकारादुदात्तात् परत्वेन "उदात्तादनुदात्तस्ये"ति स्वरितत्वम्। संहिता- दशायांतु नूतनशब्दीयनूकारस्योदात्तस्य परत्वाद् "उदात्तस्वरिते"त्यनेनानुदात्ततरत्वम्। नूतनशब्दे नवशब्दात्त- नप्प्रत्यये नवस्य नू आदेशः। तत्र नवशब्दः 'णूस्तुतावि'ति धातो"ऋदोरबि"त्यपा प्रत्ययेन निष्पन्न इति धातोर्णूकारोकारस्योदात्तत्वं प्रत्ययस्य च पित्त्वादनुदात्तता। ततः प्रत्ययनिमित्तगुणस्यौकारस्य तत्स्थानिकस्या- वादेशस्य च "स्थानिवदादेश" इति उदात्तत्वेन नवशब्द आद्युदात्तः। तस्य स्थाने सञ्जातस्य नू आदेशस्यापि स्थानिवत्त्वेनाद्युदात्तत्वे तनपः प्रत्ययस्य पित्त्वादनुदात्तत्वे पदतादशायां तनेत्यत्रत्यतकाराकारस्यो"दात्तादनु- दात्तस्ये"ति स्वरितः। नूतनशब्दात् भिसः प्रत्ययस्य सुप्त्वादनुदात्तत्वात्तस्य स्थाने सञ्जातस्य "अतो भिस ऐस्"इत्यैसादेशस्यापि स्थानिवत्त्वादनुदात्तत्वे ततो नूतनशब्दीयस्यानुदात्तस्य नकाराकारस्यानुदात्तस्य चैसादेशी- यैकारस्य स्थाने जातस्य वृद्धैकारस्य स्थानिवत्त्वेनानुदात्तत्वम्। तस्य पदतादशायां "स्वरितात्संहितायामि"ति प्रचितत्वम्। संहितायामपि उतेत्यस्योकारस्यानुदात्तस्य परत्वेनोदात्तपरत्वाभावेन तत्प्रचितत्वं तथैवावतिष्ठते। अत्रैवं रीत्या सिद्धावपि भाष्यकृता ततनप्प्रत्यय उक्तस्तथा सति नित्त्वात्तस्य "ञ्नित्यादि"रिति नूतनशब्द आद्युदात्तः। अवशिष्टा प्रक्रिया पूर्ववत्। उतशब्दस्य निपातत्वेऽपि "निपाताश्चाभिवर्जमि"ति प्राप्तस्याद्युदात्तत्वस्य स्वरादिगणे प्रातःशब्दस्यैवंपदेशिकान्तोदात्तत्वेन पाठवशतोऽन्तोदात्तता। अथवा "एवादीनामन्त" इति गणे उत- शब्दपाठवशतोऽन्तोदात्तता। तत उकारस्य शेषनिघातेनानुदात्तत्वम्। सः। तच्छब्दस्य "फिषोऽन्त"इत्यन्तो- दात्तस्य त्यदाद्यत्वं तकारस्थाने इति दकारस्य व्यञ्जनत्वेनानुदात्तत्वात्स्थानिवद्भावेनाकारोऽनुदात्तः। ततः, "अतो गुणे" इति पररूपैकादेशस्य "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वं सकाराकारस्य। देवान्। देवशब्दस्याच्- प्रत्ययान्तत्वेन चितोऽन्त उदात्त इति वकाराकारस्योदात्तत्वे दकारैकारस्य शेषानुदात्तत्वम्। ततः शसि द्वितीया- बहुवचने शसः सुप्त्वादनुदात्तत्वेन "प्रथमयोरि"ति सञ्जातपूर्वसवर्णदीर्घैकादेशस्य उदात्तवकाराकारानुदात्तश- सकारस्थानिकत्वे"नैकादेश उदात्तेनोदात्त" इति आकार उदात्तः। ततः शसो नकारस्य "दीर्घादटी"ति संहितायां रुत्वेऽ"आनुनासिक" इति वाकाराकारस्यानुनासिकाकारादेशस्य स्थानिवत्त्वेनोदात्तत्वम्। 'आ' इत्ययं निपात आद्युदात्तः, "निपाता आद्युदात्ता"इत्यनेन। तस्येहेति इकारेण संहितायामेकादेश उदात्तेनोदात्त इत्युदात्तत्व- मेकारैकादेशस्य। इह। इदंशब्दात् हप्रत्ययः। तत्रेदंशब्दस्य फिषोऽन्तइत्यन्तोदात्तत्वे ततः प्रत्ययहकारस्याद्यु-

इहेति कृत्स्ने जगति। स एव देवानावहति यज्ञेषु नान्यः कश्चिदित्यर्थः। अथवा यः पूर्वैर्नवैश्च स्तुत्योऽग्निः स देवानिह जगत्यावर्त्तत्यावहति। अथवा इह कर्मणि देवानावहत्विति ॥ २ ॥

वे० मा०—अग्निः पूर्वैर्ऋषिभिः स्तोतव्योऽस्माभिश्च नवतरैः। स देवानिहावहति ॥ २ ॥

[1]आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या सूक्तगता तृतीया। तां तृतीयामृचमाह—

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम् ॥३॥

अग्निना। रयिम्। अश्नवत्। पोषम्। एव। दिवेऽदिवे।
यशसम्। वीरवत्ऽतमम् ॥३॥

योऽयं होत्रा स्तुत्योऽग्निस्तेन अग्निना निमित्तभूतेन यजमानो रयिम्—धनम् अश्नवत्

दात्तत्वेन शेषानुदात्तत्वे प्राप्ते ततः पूर्वमिशादेशे स्थानिवत्त्वेन तस्यान्तोदात्तत्वेन तत ऊडिदमित्यनेन हकारस्य प्रत्ययस्योदात्तत्ववशात इदंशब्दस्य स्थाने सञ्जातस्येशादेशेकारस्यापि अनुदात्तत्वेनेहशब्दोऽन्तोदात्तः। वक्षति। वह धातोर्लृटि वा लेटि वा रूपम्। तत्राद्ये वहधातोर्लृटस्तिपि मध्ये स्यविकरणे वह स्य ति इत्यत्र धातो"र्धातोरि"त्यन्तोदात्तत्वं, तिपः पित्त्वादनुदात्तत्वं, स्यस्य च प्रत्ययाद्युदात्तता। तत्रान्यत्रविकरणेभ्य इत्युक्त्या स्यस्य विकरणत्वेन ततः पूर्ववर्तिधातुस्वरस्यावशेषे शेषानुदात्तत्वेन स्याकारस्यानुदात्तत्वे पदावयवसंहितादशायां धातोर्वकाराकारस्योदात्तत्वेन ततः परस्य स्याकारस्य स्वरितत्व"मुदात्तादनुदात्तस्य स्वरित" इत्यनेन तिकारेकारस्य च स्वरितात्परत्वेन प्रचितत्वम्। तत आद्युदात्तं रूपं प्राप्तम्। लेट्प्रत्ययदशायांतु धातोः स्वरः पूर्ववत्। तिपोऽपि पूर्ववदेव। मध्ये सिपि विकरणे अडागमे च वह् स् अ ति इत्यत्राडागमाकारस्य "आगमा अनुदात्ता" इत्यनुदात्तत्वे धातोः स्वर एव शिष्यत इति पूर्ववदाद्युदात्तं पदं प्राप्तम्। तस्य पदसंहितादशायां "तिङ्ङतिङ" इति सर्वानुदात्तत्वे ततः पूर्ववर्तिन इहपदस्थहकाराकारस्योदात्ततया ततः परत्वाद् वक्षतिशब्दस्थवकाराकारस्य स्वरितत्वम्, ततः परयोर्द्वयोरचोरनुदात्तयोः स्वरितात्परत्वात्प्रचितत्वम्। वेदे पदपाठे स्वरविषये तिङ आमन्त्रितस्य च सर्वानुदात्तत्वे वाक्यधर्मस्याऽपि तस्य पदतादशायां निमित्तपरित्यागेऽपि परित्यागाभावस्य सर्वसिद्धतया वक्षतिपदं पदपाठेऽपि सर्वानुदात्तम्। विशेषः परमेतावानेव यत्संहितादशायामुदात्तात्परत्वेन स्वरितत्वमाद्यस्य स्वरस्य परयोः प्रचितत्वमासीत्, पदपाठे पूर्ववत्त्युदात्तसंबन्धाभावेन स्वरितत्वव्यपगमे तन्निमित्ते प्रचितत्वे चापसृते त्रयोऽपि स्वरा अनुदात्ता इति। सर्वा चैषा पाणिनीयसूत्रोल्लेखिनी स्वरप्रक्रिया प्रदर्शिता सङ्क्षेपेण। प्रातिशाख्यसूत्रोल्लेखपुरस्सरा केवलं पदानां स्वरसंहितानुसारिणी प्रक्रियाऽपि प्रदर्शयितुं शक्या। परन्तु ग्रन्थविस्तरभिया परित्यक्ता।

(१) वैदिकानां यागादीनां कर्मणामग्न्यपेक्षणेनापेक्षिताश्चाग्नयो न लौकिकास्तत्र गृह्यन्ते, किन्तु वेदोक्तप्रक्रिययाऽरणी निर्मथ्याग्नयो निष्पाद्यन्ते तदग्निनिष्पादनं मन्थनेनाधानशब्दवाच्यम्। तस्य चाधानस्यापेक्षितपवमानसञ्ज्ञकेष्टित्रयमध्ये तृतीयेष्टौ वह्निस्थानसंस्कारायापेक्षिताज्यभागनामकहोमरूपकर्मद्वये प्रथमे कर्मणि होमार्थं हविषो ग्रहणावसरे पठ्यमानमन्त्ररूपानुवाक्यात्वेन "अग्निने"ति मन्त्रस्य विनियोग इत्यर्थः।

= प्राप्नोति। कीदृशं रयिम्? दिवेदिवे पोषमेव = प्रतिदिनं पुष्यमाणतया वर्द्धमानमेव, न तु कदाचिदपि क्षीयमाणम्। यशसम् = दानादिना यशोयुक्तम्। वीरवत्तमम् = अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम्। सति हि धने पुरुषाः सम्पद्यन्ते॥

रयिशब्दो मघमित्यादिधननामसु पठितः। तत्र फिट्स्वरः (फि. ११)। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। "इतश्च लोपः" (पा ३।४।९७) इतीकारलोपः। "लेटोऽडाटौ" (पा ३।४।९४) इत्यडागमः। ततोऽश्नवदिति भवति। तस्य निघातः। घञन्तत्वात् (पा ७।१।१९७)। पोषशब्द आद्युदात्तः। एवशब्दस्य निपातत्वेऽपि "एवादीनामन्तः" इत्यन्तोदात्तत्वम्। वकारान्ताद्दिव्शब्दात्परस्याः सप्तम्याः "सुपां सुलुग्" (पा ७।१।३९) इत्यादिना शेभावे सति "सावेकाच" इत्यादिना (पा ६ ११६८) "ऊडिदंपदादि" इत्यादिना वा। (पा ६ १. १७१) तस्योदात्तत्वम्। "नित्यवीप्सयोः" (पा ८ १ ४.)। इति द्विर्भावे सत्युत्तरभागस्य "अनुदात्तं च" (पा ८. १. ३) इत्यनुदात्तत्वम्। यशोऽस्यास्तीति विग्रहे सति "अर्श-आदिभ्योऽच्" (पा ५. २. १२७) इत्यच्प्रत्ययः। चित्स्वरं व्यत्ययेन बाधित्वा मध्योदात्तत्वम्। फिट्स्वरेणान्तोदात्ताद्वीरशब्दादुत्तरयोर्मतुप्तमपोः पित्त्वादनुदात्तत्वम्। "ह्रस्वनुड्भ्याम्" (पा ६. १. १७६) इति तु न। सावर्णान्तत्वात्। "न गोश्वन्" (पा ६ १. १८२) इति प्रतिषेधः॥ ३॥

स्क०—अग्निना दत्तम्, अग्नेर्वा सकाशात्। रयिं धनम्। अश्नवत् अश्नुते प्राप्नोति। कः? सामर्थ्यात्स्तोता। न केवलं धनम्, किं तर्हि? पोषमेव पुष्टिं च। कदा? दिवे दिवे अहन्यहनि। सर्वकालमित्यर्थः। यशसम्, यशः कीर्तिं चेत्यर्थः। कीदृशं यशः? उच्यते, वीरवत्तमम्। वीराः पुत्रास्ते यस्मिन्सन्ति तद्वीरवत्, अतिशयेन वीरवत् वीरवत्तमम्। बहुभिः पुत्रैः सहितमित्यर्थः॥ ३॥

वे० मा०—अग्निना स्तुतेन पशून् प्रजाश्च प्राप्नोति, पोषं च प्रजानां पशूनां चान्वहम्। यशश्चातिशयेन वीरपुरुषयुक्तम्॥ ३॥

अग्निना। अग्निशब्दस्य पूर्ववदव्युत्पन्नप्रातिपदिकत्वेन फिषोऽन्त इति सूत्रेणान्तोदात्तत्वम्। अग्-धातोर्निप्रत्यय इति पक्षे प्रत्ययाद्युदात्तत्वेन निप्रत्ययस्येकारस्योदात्तत्वे धातोः शेषनिघातेनानुदात्तत्वे अग्निशब्देऽन्तोदात्तत्वमेव। ततस्तृतीयैकवचनटाप्रत्ययस्य सुप्त्वादनुदात्तत्वात्तत्स्थाने सञ्जातस्य नादेशस्यापि स्थानिवद्भावेनानुदात्तत्वम्। तस्य च निशब्देकारादुदात्तात्परत्वेन "उदात्तादनुदात्ते"ति स्वरितः पदावस्थायां, संहितायांमपि स एवावतिष्ठते। परस्माद्रयिशब्दस्थरकाराकारस्यानुदात्तस्य परत्वात्। रयिम्। रयिशब्दस्य प्रातिपदिकत्वेन फिषोऽन्त इत्यनेनान्तस्योदात्तत्वे शेषनिघातेन रकाराकारस्यानुदात्तत्वम्। ततो द्वितीयैकवचनेऽमि

¹अभिप्लवषडहस्य मध्यवर्त्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य "अग्ने यं यज्ञम्" इत्यादिको वैकल्पिकोऽनुरूपस्तृचः। एतच्च सप्तमाध्याये "एह्यू षु" इत्यादिखण्डे सूत्रितम्—

तस्य सुप्त्वादनुदात्तत्वेन रयि+अमित्यत्रामोऽमि पूर्व इत्यनेन सञ्जातपूर्वरूपैकादेशस्य उदात्तयिशब्देकारानुदात्तामकारस्थानिकतया एकादेश उदात्तेनोदात्त इत्युदात्तत्वम्। अश्नवत्। अश्नोतेर्धातोर्लेटि तत्स्थाने व्यत्ययेन सञ्जाततिपः पित्त्वादनुदात्तत्वेन मध्ये सञ्जातश्नुप्रत्ययस्य प्रत्ययाद्युदात्ततया धातोः स्वरस्य शेषानुदात्तत्वेन धात्वकारोऽनुदात्तः, श्नूकार उदात्तः, तिप्प्रत्ययश्चानुदात्त इति स्थिते तिपं निमित्तीकृत्य सञ्जातगुणस्यौकारस्य लेटोऽडाटाविति सञ्जातस्याडादेशस्य परत्वात्सञ्जातावादेशस्यापि स्थानिवत्त्वेन उदात्तत्वेऽडागमस्यागमत्वादनुदात्तत्वे अश्नवत् इत्यत्र मध्योदात्तता प्राप्ता आसीत् पदावस्थायां तस्य संहितादशायां तिङ्ङतिङ इति सर्वानुदात्तत्वेन पदपाठेऽपि सर्वानुदात्तं पदमिदम्। संहितादशायां रयिशब्देकारादुदात्तात्परत्वेन उदात्तादनुदात्तस्येति अश्नवच्छब्दाकारस्य स्वरितत्वम्, श्नशब्दाकारस्य स्वरितात्परत्वात्प्रचितत्वम्, वशब्दाकारस्य पोषशब्दावयवौकारस्योदात्तस्य परत्वेन उदात्तस्वरितपरस्य सन्नतर इति अनुदात्ततरत्वम्। पदपाठे तु अतिङन्तरूपनिमित्तव्यपगमेऽपि तन्निमित्तसर्वानुदात्तत्वस्याव्यपगमेन सर्वानुदात्तत्वम्, केवलमुदात्तरूपनिमित्ताभावात्स्वरितत्वाभाव इति। पोषम्। पोषशब्दस्य घञन्तत्वेन ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वे शेषानुदात्तत्वेनान्तस्यानुदात्तत्वम्, तस्य पदावयवस्वरसंहितादशायामुदात्तात्परत्वात्स्वरितत्वम्। अमः प्रत्ययस्य तेन सहपूर्वरूपैकादेशस्य चानुदात्तत्वेन पोषंशब्देऽपि अन्त्यस्य पूर्ववदेव स्वरितत्वम्। एव। एवशब्दस्य निपातत्वेऽप्येवादीनामन्त इत्यन्तोदात्तत्वे शेषनिघातेनाद्यनुदात्तत्वम्। दिवेदिवे। दिव्शब्दस्य क्विबन्तत्वात्क्विपः सर्वापहारेण धातुमात्रावेशाद्धातोरित्यन्तोदात्तत्वे ततः सप्तम्या एकवचनस्थाने शेआदेशे तस्यापि स्थानिवत्त्वेन सुप्त्वेन अनुदात्तत्वे प्राप्ते सावेकाच इति विभक्तेरुदात्तत्वम्, तदादेशशेशब्दस्य ऊडिदमिति सूत्रेण वोदात्तत्वम्। ततो दिवेशब्दस्य द्वित्वे द्वित्वनिष्पन्नपरस्याम्रेडितसञ्ज्ञकस्य अनुदात्तंचेत्यनुदात्तत्वे तदादिदकारोत्तरवर्तीकारभागस्य उदात्तादिति स्वरितत्वम् वेशब्दस्य स्वरितात्परस्य प्रचितत्वम्। यशसम्। यशश्शब्दस्यासुन्नन्तत्वेन नित्वात् ञ्नित्यादिरित्याद्युदात्तत्वेन ततः परस्तादर्शआद्यचि अचश्चित्त्वात्प्रत्ययस्य स्वरं बाधित्वा चित इति अन्तस्योदात्तत्वे प्राप्ते व्यत्ययेन मध्योदात्तत्वम्। अमिप्रत्यये पूर्वरूपादौ च पूर्ववदेव रूपम्। वीरवत्तमम्। वीरशब्दः फिषोऽन्त उदात्त इत्यन्तोदात्तः। शेषनिघातेन वकारोत्तरवर्तीकारोऽनुदात्तः। ततो मतुप्प्रत्ययस्तस्य पित्त्वादनुदात्तौ सुप्पिताविति अनुदात्तत्वम्, ततस्तमपि तस्यापि पित्त्वेनानुदात्तत्वेन वीरशब्दस्य रेफाकारस्यैवोदात्तत्वमवशिष्टाः सर्वेऽनुदात्ताः वीकारस्यानुदात्तस्य राकार उदात्तः पर इति अनुदात्तत्वमेव। वकाराकारस्य तूदात्तात्परत्वेन उदात्तादनुदात्तस्य स्वरित इति स्वरितत्वम्। तकारमकाराकारयोस्तु स्वरितात्परत्वात्प्रचितत्वम्। वीरवत्तमशब्दात् सञ्जातामोऽपि सुप्त्वेनानुदात्तत्वान्मकाराकारेणानुदात्तेन पूर्वरूपैकादेशे एकादेशनिष्पन्नस्याप्यकारस्य स्थानिवत्त्वेनानुदात्तत्वात्तस्यापि तकाराकारवत् स्वरितात्परत्वेन प्रचितत्वमेव।

(१) सोमयागस्य विकृतिभूतोऽभिप्लवषडहनामकः कश्चन षड्भिर्दिनैरनुष्ठीयमानो यागविशेषः। तत्र प्रथमे एवं षष्ठे दिवसेऽग्निष्टोमानुष्ठानम्, मध्यमेषु चतुर्ष्वहःसु उक्थ्यनामकसोमसंस्थानुष्ठानं भवति। अत एवैतस्य षड्हयागस्योभयतोज्योतिःशब्देन "उभयतोज्योतिषा षड्हेन यन्ती"त्यादिना व्यवहारः श्रौतसूत्रे। तत्र मध्यवर्त्युक्थ्यनामकसोमयागे तृतीयसवने मैत्रावरुणनामकेनर्त्विजा स्वीयशस्त्रशंसनावसरे शस्त्रप्रारम्भीयस्तोत्रियनामकतृचं शस्त्वा तत्सदृशस्यातएवानुरूपनामकस्य तृचस्य शंसनावसरे श्रौतसूत्र प्रतिपादिततृचद्वयस्य

"अग्निं वो वृधन्तमग्ने यं यज्ञमध्वरम्" (आ. ७. ८) इति। तस्मिंस्तृचे या प्रथमा सा सूक्ते चतुर्थी। तामेतां चतुर्थीमृचमाह—

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑। स इद्दे॒वेषु॑ गच्छति ॥४॥

अग्ने॑। यम्। य॒ज्ञम्। अ॒ध्व॒रम्। वि॒श्वतः॑। प॒रि॒ऽभूः। असि॑।
सः। इत्। दे॒वेषु॑। ग॒च्छ॒ति ॥४॥

हे अग्ने त्वं यं यज्ञं विश्वतः=सर्वासु दिक्षु परिभूः=परितः प्राप्तवान् असि स इत्=स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गं गच्छति। प्राच्यादिचतुर्दिगन्तेष्वाहवनीयमार्जालीय-गार्हपत्याग्नीध्रीयस्थानेष्वग्निरस्ति। परिशब्देन होत्रियादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञम्? [२]अध्वरम्=हिंसारहितम्। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति।

विकल्पेन अनुष्ठानाद्विकल्पतः प्राप्तत्वाद्वैकल्पिकोऽयम् "अग्ने यम्" इत्यादिस्तृचो विनियुक्तः। तदेव भाष्यकृतोक्तमत्र। सोमयागेच त्रिः सोमरसनिष्कासनं क्रियते तच्च रसनिष्कासनं सवनशब्देनोच्यते। प्रतिसवनं चानेकानि शस्त्राणि स्तोत्राणि चोच्यन्ते। तत्र ज्योतिष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणि भवन्ति। तत्र उद्गातृप्रभृतिभिर्गायकैर्ऋत्विग्भिः प्रातःसवने बहिष्पवमाननामकं स्तोत्रमेकम् आज्यसञ्ज्ञकं स्तोत्रचतुष्टयम्, माध्यन्दिने माध्यन्दिनपवमाननामकं स्तोत्रमेकं पृष्ठनामकं स्तोत्रचतुष्टयम्, तृतीयसवने आर्भवपवमाननामकं स्तोत्रमेकं यज्ञायज्ञीयं स्तोत्रमेकमिति द्वादश स्तोत्राणि स्तूयन्ते। होत्रा एवं तद्गणस्थैश्चर्त्विग्भिरपि द्वादश शस्त्राणि शस्यन्ते। तत्र होत्रा प्रातःसवने आज्यं प्रउगमिति शस्त्रद्वयम्, मध्यन्दिने निष्केवल्यं मरुत्वतीयं चेति शस्त्रद्वयम्, तृतीये सवने वैश्वदेवमाग्निमारुतमितिशस्त्रद्वयं शस्यते। तद्गणस्थैरपरैश्च मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकनामकैर्ऋत्विग्भिः प्रातः सवने एवं तृतीयसवने एकैकं शस्त्रं शस्यते। उक्थ्यनामके सोमयागे चोक्तद्वादश शस्त्राणि शस्त्वा तत ऊर्ध्वं त्रीणि अधिकानि शस्त्राणि शंस्यानि भवन्ति। अतएवास्योक्थ्यनामकशब्दव्यवहार्यता। तत्र मैत्रावरुणेन तृतीयसवने शस्त्रशंसनावसरं एष तृचोऽपेक्ष्यते इति प्रतिपादितमुपरिष्टात्।

(२) अध्वरशब्दो यज्ञनाम। तदर्थश्च हिंसारहित इति। तत्र यज्ञे पशूनां हिंस्यमानत्वेन हिंसाराहित्यस्यासम्भवं मत्वा भाष्यकारो यज्ञस्यैवाग्निपालितत्वेन रक्षःकर्तृहिंसाराहित्यादध्वरत्वमिति प्रतिपादयति।

वस्तुतस्तु सुखासम्बधिनोऽनपेक्षितस्य दुःखस्य प्रदानमेव हिंसा न प्राणवियोगमात्रम्। तस्यापि सुखासम्बन्धित्वेनानपेक्षितदुःखस्य जनकत्वादेव हिंसात्वम्। एवंच प्राणवियोगस्यापि बलवत्तरसुखजनकत्वसम्भावनायां दुःखजनकत्वेऽपि न हिंसात्वम्। अतएव यज्ञे प्राणैर्वियोज्यमानैः पश्वादिभिस्तत्र जन्मनि असम्भावितोत्कृष्टसुखरूपस्वर्गस्य लाभाय प्रयत्नासम्भवेऽपि प्राणवियोगमात्रतस्तल्लाभान्न सा प्राणवियोजनकृतिर्हिंसा

अग्निशब्दस्य पाष्ठिकम् (पा. ६. १. १९८) आमन्त्रिताद्युदात्तत्वम्। न विद्यते ध्वरोऽस्येति बहुव्रीहौ "नञ्सुभ्याम्" (पा ६. ३. १७२) इत्यन्तोदात्तत्वम्। विश्वत इत्यत्र तसिलः प्रत्ययस्वरं बाधित्वा पूर्ववर्णस्य "लिति" (पा. ६. १. १९३.) इत्युदात्तत्वम्। परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते (पा. ६. २. २.) तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वम् (पा. ६. २. १३९.)। असीति तिङन्तस्य "यद्वृत्तान्नित्यम्" (पा. ८. १. ६६) इति निघाताभावः ॥ ४ ॥*

भवितुमर्हति इति तद्दृशतो यज्ञस्य न हिंसावत्त्वमिति तस्याध्वरनामोपपन्नमिति। एतदेवाभिप्रेत्य स्कन्दस्वामी ऋग्भाष्ये उवाच "यज्ञे हि सर्वस्यानुग्रहः, न हिंसा, येऽपि हि तत्र पश्वादयो हिंस्यन्ते तेषामप्यनुग्रहमेव शिष्टाः स्मरन्ति—

ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥ इति।

तस्मादुपपन्नं हिंसावर्जितत्वमिति।

* अग्ने। अग्निशब्दः पूर्ववदव्युत्पन्नत्वेन फिषोऽन्त इत्यन्तोदात्तः, अगेर्धातोर्निप्रत्यये प्रत्ययस्वरेण वान्तोदात्तः शेषानिघातेनाकारः उदात्तः। ततः सम्बुद्ध्येकवचने तन्निमित्तके गुणादेशैकारे तस्य स्थानिवत्त्वेनोदात्तत्वे ततः सम्बुद्धिलोपे प्रत्ययलक्षणेन प्रथमान्ततया आमन्त्रितसंज्ञायाम् आमन्त्रितस्य चेति पाष्ठिकेन तस्याद्युदात्तत्वं शेषनिघातेनैकारस्यानुदात्तत्वम्। तस्य पदावस्थायामुदात्ताकारात्परत्वेनोदात्तादनुदात्तस्य स्वरित इति स्वरितः। संहितायां तत उदात्तयंशब्दाकारस्य परत्वाद् उदात्तस्वरितपरस्य सन्नतर इत्यनुदात्ततरत्वम्। यम्। यच्छब्दः फिषोऽन्त इत्यन्तोदात्तस्ततस्यदाद्यत्वेऽत्वस्य दकारस्थानिकतया दकारस्य व्यञ्जनत्वेन व्यञ्जनमनुदात्तमिति अनुदात्तत्वेन स्थानिवत्त्वेनानुदात्तत्वम्। ततोऽतोगुण इति पररूपैकादेशाकारस्यापि यकाराकारदकारस्थानिकाकारस्थानिकतया तयोश्च यकाराकारस्योदात्तत्वेन दकाराकारस्यानुदात्तत्वेन एकादेश उदात्तेनोदात्त इत्युदात्तत्वम्। ततोऽमि प्रत्ययेऽमः सुप्त्वादनुदात्तत्वेन तस्य यकाराकारेणामिपूर्व इति पूर्वरूपैकादेशे पुनःसम्पन्नात्वस्य पूर्ववदुदात्तानुदात्तोभयस्थानिकतया पूर्ववदेकादेश उदात्तेनोदात्त इत्युदात्तः। यज्ञम्। यज्ञशब्दस्य यजधातोर्नङ्प्रत्ययेन निष्पन्नत्वाद् यज्धातोरन्तोदात्तस्य नङः प्रत्ययस्य स्वरेणानुदात्तत्वे यज्ञशब्दोऽन्तोदात्तः, अव्युत्पन्नत्वपक्षेच प्रातिपदिकस्वरेणान्तोदात्तः। ततोऽमि पूर्वरूपे पूर्ववदेकादेशस्योदात्तत्वमकारस्यान्तिमस्य। अध्वरम्। अध्वरशब्दस्याव्युत्पन्नत्वे प्रातिपदिकस्वरेणान्तोदात्तत्वं शेषानिघातेनाद्ययोः स्वरयोरनुदात्तत्वम्। ध्वरधातोरचि प्रत्यये चित्वादन्तोदात्तत्वम्, ततो नञा समासे नञ्सुभ्यामित्युत्तरपदस्यान्तोदात्तत्वे शेषनिघातेनाद्ययोःस्वरयोरनुदात्तता। ततोऽमि पूर्ववदेव स्वरः। विश्वतः। विशेर्धातोः "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्" इति क्वनि प्रत्यये नित्त्वान्ञ्नित्यादिर्नित्यमित्याद्युदात्तो विश्वशब्दः शेषनिघातेनान्तानुदात्तः। ततस्तसिलः प्रत्ययस्य आद्युदात्तत्वे प्राप्ते तद् बाधित्वा लितीत्यनेन तसः प्रत्ययात्पूर्वस्य विश्वशब्दान्तस्योदात्तत्वम्। अवशिष्टयोः शेषनिघातेनानुदात्तत्वम्। तत्र तसस्तकाराकारस्योदात्तात्परत्वेनोदात्तादनुदात्तस्येति स्वरितः पदतादशायाम्, संहितायां स एवावशिष्यते। परिभूः। परिशब्दोपपदात् भुवः क्विप्। तत्र-

स्क०—हे अग्ने यं यज्ञमध्वरम् । ध्वरणं ध्वरो हिंसा यस्मिन्नास्ति सोऽध्वरः । अथवा अविद्यमानो ध्वरो यस्य सोऽध्वरस्तम् । रक्षोभिरहिंसितत्वगुणमित्यर्थः । यस्य यज्ञस्य हिंसावर्जितस्य विश्वतः सर्वतः परिभूः परिग्रही भवसि । स इत् स एव देवेषु गच्छति । देवास्तमेव परिगृह्णन्ति नान्यमित्यर्थः ॥ ४ ॥

वे० मा०—अग्ने यं यज्ञं हिंसारहितमहिंसितं त्वत्सन्निधानादसुरैः सर्वतः परिभवसि गार्हपत्यादिव्यूहेनारानिव नेमिः स एव देवेषु गच्छति ॥ ४ ॥

पञ्चमीमृचमाह—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरागमत् ॥५॥

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः ।
देवः । देवेभिः । आ । गमत् ॥५॥

परिशब्दस्य निपातत्वेन निपाता आद्युदात्ता इति आद्युदात्तत्वे शेषनिघातेनान्तानुदात्तस्य रीकारेकारस्योदात्तात्परत्वेन स्वरितत्वम् । ततः क्विबन्तभूशब्दस्य धातोरित्यन्तोदात्तस्य परिशब्देन समासे समासस्येत्यन्तोदात्तता प्राप्ता, तां बाधित्वाऽव्ययपूर्वपदप्रकृतिस्वरत्वं तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इति प्राप्तं तद् बाधित्वा गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरत्वेन भूधातोरूकारस्योदात्तत्वमेवावशिष्टम्, अवशिष्टयोः शेषनिघातेनानुदात्तता पदतादशायाम्, संहितादशायांतु तःशब्दात्स्वरितात्परत्वेन पकाराकारस्य प्रचितत्वं रिकारेकारस्य तु उदात्तस्वरिनपरस्येत्यनुदात्ततरत्वम् । असि । अस्धातोः सिपि धातोरकारस्योदात्तत्वं सिपः पित्त्वादनुदात्तत्वं तस्योदात्तात्परत्वादुदात्तादनुदात्तस्येति स्वरितत्वं पदावस्थायां भवति, परन्त्वत्रासिशब्दस्यातिङन्तपरिभूःपदात्परत्वेन तिङ्ङतिङ इति सर्वनिघातः प्राप्तः । स च यद्वृत्तान्नित्यमिति निषिद्धस्तत आद्युदात्तमसिपदम् । सः । तच्छब्दः फिषोऽन्त इत्यनेनान्तोदात्तः । सौ प्रत्यये त्यदाद्यत्वस्य दकारस्थानिकस्यानुदात्तत्वं स्थानिवत्त्वात् । दकारस्य व्यञ्जनत्वेनानुदात्तत्वात् । ततोऽतोगुण इत्येकादेशस्योदात्तानुदात्तस्थानिकतयोदात्तता एकादेश उदात्तेनोदात्त इत्यनेन । इत् । इदित्ययं निपातो निपात्वादाद्युदात्तः । देवेषु । देवशब्दः पचाद्यजन्तश्चित्स्वरेणान्तोदात्तः शेषनिघातेन देकारैकारस्यानुदात्तत्वम् । ततः सप्तमीबहुवचनसुप्रत्ययस्य सुप्त्वेनानुदात्तत्वात्तस्य पदतादशायामुदात्तवकाराकारात्परत्वेन स्वरितत्वम् । सुनिमित्तकस्य बहुवचने झल्येदित्येत्वस्य स्थानिवत्त्वेनोदात्तत्वम् । गच्छति । गमधातोर्लटि तिपि शपि छत्वे गच्छतीत्यत्र शपस्तिपश्च पित्त्वाद् धातुस्वरोऽवशिष्टस्ततः संहितादशायां तिङ्ङतिङ इति अतिङन्तदेवेषुपदात्परत्वेन सर्वानुदात्तता । वाक्यधर्मस्यापि तस्य वेदे पदपाठेऽनुसरणात्सर्वानुदात्तत्वम् । संहितापाठेतु देवेषुशब्दीयषुकारोकारात्स्वरितात्परत्वेन स्वरितात्संहितायामनुदात्तानामिति प्रचितत्वम् ।

अयम् अग्निर्देवोऽन्यैर्देवैर्हविर्भोजिभिः सहागमत् = अस्मिन्यज्ञे समागच्छतु। कीदृशोऽग्निः ? होता = होमनिष्पादकः। कविक्रतुः। कविशब्दोऽत्र क्रान्तवचनो न तु मेधाविनाम। क्रतुः प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा। सत्यः = अनृतरहितः। फलमवश्यं प्रयच्छतीत्यर्थः। चित्रश्रवस्तमः। श्रूयत इति श्रवः कीर्तिः। अतिशयेन विविधकीर्तियुक्तः॥

कविक्रतुश्चित्रश्रवस्तम इत्यत्रोभयत्र बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम्। सत्सु साधुः सत्यः। "सत्यादशपथे" (पा. ५. ४. ६६) इत्यत्रान्तोदात्तो हरदत्तेन निपातितः। लोडन्तस्य गच्छत्विति शब्दस्य छत्वाभावः। उकारलोपश्छान्दसः। ततो रूपं गमदिति भवति। स्पष्टमन्यत्॥ ५॥*

॥ इत्यृक्संहितायां वेदार्थप्रकाशे प्रथमाष्टकस्य प्रथमाध्याये प्रथमो वर्गः॥

* अग्निः। अग्निशब्दः पूर्ववदन्तोदात्तः। होता। हुधातोस्तृनि प्रत्यये धातोः स्वरस्य प्रत्ययस्वरेण प्रत्ययस्वरस्य च नित्स्वरेण बाधादत्र नित्त्वाद् ञ्नित्यादिरिति हुधातोरन्तोदात्तता। ततस्तृप्रत्ययनिमित्तकस्य गुणस्यौकारस्योदात्तोकारस्थानिकत्वेन स्थानिवत्त्वेनोदात्तत्वे होकारौकार उदात्तः, शेषनिघातेन तृशब्दस्यर्कारस्यानुदात्तत्वम्। ततः प्रथमैकवचने सुप्रत्यये तन्निमित्तकस्यानङोऽकारस्यानुदात्तर्कारस्थानिकत्वेनानुदात्तत्वं तत्स्थानिकस्योपधादीर्घस्याकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। तस्यानुदात्तस्याकारस्य पदतादशायामुदात्ताद् होकारौकारात्परत्वेनोदात्तादनुदात्तस्येति स्वरितत्वम्। संहितायामपि तथैवावशिष्यते। कविशब्दस्याव्युत्पन्नत्वे प्रातिपदिकस्वरेणान्तोदात्तत्वम्। कुधातोः सार्वधातुके इनि औणादिके धातुस्वरं बाधित्वा प्राप्तस्य प्रत्ययस्वरस्यापि नित्स्वरेण बाधे आद्युदात्तत्वं प्राप्तं तस्यापि घृतादित्वादन्तोदात्तन बाधः। एवं च कविशब्दोऽन्तोदात्तः शेषनिघातेनादेरनुदात्तत्वम्। क्रतुशब्दः कृञ अतुजित्यतुचा प्रत्ययेन निष्पन्नत्वाद्धातुस्वरबाधकप्रत्ययस्वरस्यापि अत्र चित्स्वरेण बाधादन्तोदात्तः शेषनिघातेनादेः स्वरस्यानुदात्तत्वम्। तत उभयोः कविक्रतुशब्दयोर्बहुव्रीहिसमासे समासत्वात्प्राप्तस्यान्तोदात्तत्वस्य बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वस्य कविशब्दस्यैव स्वरोऽवशिष्यते समासे। ततः कविक्रतुशब्दे वकारोत्तरवर्तीकारस्योदात्तत्वम्, अवशिष्टानां स्वराणां शेषनिघातेनानुदात्तत्वम्। तत्र ककाराकारस्योदात्तपरत्वेनानुदात्तत्वमेवावशिष्यते। क्रतुशब्दीयाद्याकारस्तु उदात्तात्परत्वेनोदात्तादनुदात्तस्येति स्वरितः। ततः परस्य तुकारोकारस्य पदतादशायां स्वरितात्परत्वात्स्वरितात्संहितायामनुदात्तानाम् इति प्रचयः। संहितायामपि स तथैवावशिष्यते। सत्यशब्दीयानुदात्तसकाराकारस्य परत्वात्। सत्यः। सत्यशब्दस्य सच्छब्दाद्यत्प्रत्ययान्तत्वम्। तत्रास्धातोः शतृप्रत्यये धातोरकारस्य लोपेन शतृप्रत्ययस्याकारस्य प्रत्ययादित्वेनोदात्तत्वम्। यति च प्रत्यये शत्राकारस्योदात्तत्वस्य सतिशिष्टेन यत्प्रत्ययाद्युदात्तत्वेन बाधे तस्यापि तित्स्वरितमिति स्वरितेन बाधे प्राप्ते तदपवादेन यतोऽनाव इत्यनेन यदन्तादेरुदात्तेन बाधे सति आद्युदात्तस्सत्यशब्दः प्राप्नोति, अतो हरदत्तेन 'सत्यादशपथे' इति सूत्रेऽन्तोदात्तो निपातित इति निपातनस्वरेण आदेरुदात्तत्वस्य बाधाद् अन्तोदात्तः सत्यशब्दः, शेषनिघातेनादेरनुदात्तत्वम्। चित्रश्रवस्तमः। चित्रशब्दस्य

स्क०—अग्निर्होता देवानाम् । कविक्रतुः । क्रान्तं गतं सर्वत्राप्रतिहतं प्रज्ञानं कर्म वा यस्य स कविक्रतुः । सत्यः अभिसंपादकः । यथाभिलषितफलप्रद इत्यर्थः । चित्रश्रवस्तमः । अतिशयेन पूज्यं विचित्रं वा अन्नधनकीर्तीनामन्यतमं यस्य स चित्रश्रवस्तमः । देवो दानादिगुणयुक्तः । देवेभिः देवैः सह आगमत् आगच्छतु ॥ ५ ॥

॥ प्रथमाष्टके प्रथमाध्याये प्रथमो वर्गः ॥

वे० मा०—अग्निर्होता क्रान्तप्रज्ञः सत्यकर्माऽतिशयेनाश्चर्यश्रवणो देवो देवैः सहागच्छतु ॥ ५ ॥

॥ प्रथमस्य प्रथमे प्रथमो वर्गः ॥

आग्नेयसूक्ते षष्ठीमृचमाह—

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥६॥

यत् । अङ्ग । दाशुषे । त्वम् । अग्ने । भद्रम् । करिष्यसि ।
तव । इत् । तत् । सत्यम् । अङ्गिरः ॥६॥

अङ्गेत्यभिमुखीकरणार्थो निपातः । अङ्गाग्ने = हे अग्ने त्वं दाशुषे = हविर्दत्तवते यजमानाय, तत्प्रीत्यर्थं यद्भद्रम् = वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद् = भद्रं तवेत् = तवैव, सुखहेतुरिति शेषः । हे अङ्गिरोऽग्ने । एतच्च सत्यं न तत्र विसंवादोऽस्ति । यजमानस्य वित्तादिसंपत्तौ सत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरेव सुखं भवति । भद्रशब्दार्थं शाट्यायनिनः समामनन्ति—"यद्वै पुरुषस्य वित्तं तद्भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रम्" इति ॥

अङ्गशब्दस्य निपातत्वेऽपि (फि. ४. १२) अभ्यादित्वादन्तोदात्तत्वम् । "दाश्वान् साह्वान्" (पा. ६. १. १२) इति सूत्रेण "दाशृ दाने" इति धातोः क्वसुप्रत्ययो निपातितः । तत्र प्रत्ययस्वरः । आमन्त्रितस्याग्निशब्दस्य पदात्परत्वेनाष्टमिकानुदात्तत्वं (पा. ८. १. १९) न शङ्क-

प्रातिपदिकस्वरेणान्तोदात्तत्वम् । श्रवःशब्दे श्रुधातोरसुन्प्रत्ययस्तत्र धातोः स्वरस्य प्रत्ययस्वरेण तस्यापि नित्स्वरेण बाधादाद्युदात्तोऽयं श्रवःशब्दः । ततस्तस्य चित्रशब्देन बहुव्रीहिसमासे समासान्तस्वरं बाधित्वा बहुव्रीहौ प्रकृत्या पूर्वपदमिति चित्रशब्दस्य स्वरोऽवशिष्यतेऽपरे शेषनिघातेनानुदात्ता भवन्ति । ततश्चित्रश्रवःशब्दात्तमपि तमपः पित्त्वात्स एव बहुव्रीहिस्वरोऽवशिष्यते । देवः । प्रातिपदिकस्वरेणान्तोदात्तः । देवेभिः । अत्रापि प्रातिपदिकस्वर एव । भिसः सुप्त्वेनानुदात्तत्वम् । आ । निपाता आद्युदात्ता इत्याकार उदात्तः । गमत् । अत्र तिङ्ङतिङ इत्यनुदात्तत्वम् । संहितायां गकारस्य उदात्तात्परत्वात् स्वरितत्वम् परस्य प्रचयः ।

नीयम्। "अपादादौ" (पा. ८. १. १८.) इति पर्युदस्तत्वात्। ततः पाष्ठिकम् (पा. ६. १. १९८.) आद्युदात्तत्वमेव। भद्रशब्दस्य नब्विषयत्वेन (फि. २१३) आद्युदात्तत्वप्रसक्तावपि "भदि कल्याणे" इति धातोरुपरि रक्प्रत्ययेन निपातनाद् (उ. २।१।२९) अन्तोदात्तत्वम्। अस्मिन्वाक्ये यच्छब्दप्रयोगाद् "निपातैर्यद्यदिहन्त" (पा. ८।१।३०) इतिनिघाते प्रतिषिद्धे स्यप्रत्ययस्वरेण (पा. ३।१।३) सतिशिष्टेन करिष्यसिशब्द उपान्त्योदात्तः। तवेत्यत्र "युष्मदस्मदोर्ङसि" (पा. ६।१।२११) इत्याद्युदात्तत्वम्। "अङ्गिरा अङ्गारा" इति यास्कः (नि. ३।१७)। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानोपाख्याने [३]समामनन्ति—"येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्" (ए. ब्रा ३।३४) इति। तस्मादङ्गिरोनामकमुनिकारणत्वादङ्गाररूपस्याग्नेरङ्गिरस्त्वम्। अत्र पदात्परत्वेनाष्टमिकानुदात्तत्वम् ॥ ६ ॥*

---

(३) प्रजापतिदुहितृभिध्यानोपाख्यानमैतरेय एवं प्रतिपादितम्—

प्रजापतिः स्वां दुहितरमुषोरूपां द्योरूपां वा ऽसदभिप्रायेण ध्यातवान्। तद्देवैर्विज्ञायासत्कार्यकरणेन प्रजापतेः शास्तिं त ऐच्छन्। तत ऊर्ध्वं सम्भूय विचारे स्वेषु तच्छास्तिसामर्थ्याभावं पश्यन्तस्ते स्वीया घोरतमास्तनूः संभृत्य तेन सम्भरणेन उत्पन्नदेवं रुद्रमादिष्टवन्तः—अयं प्रजापतिरकृतमकरिमं विध्येति। ततो भीतः प्रजापतिर्मृगरूपं धृत्वोदपतत्। यश्चोत्पतितः प्रजापतिः सोऽयं नक्षत्रेषु दृश्यमानो मृग इति तारकासङ्घो रोहिणीनक्षत्रमेव रोहिणीरूपधारिणी प्रजापतेर्दुहिता मृगनक्षत्रपश्चाद्वर्तमानार्द्रानक्षत्ररूप एव स रुद्रो मृगनक्षत्रान्तरेकपङ्क्तिनिविष्टतारकात्रयमेव रुद्रेण प्रजापतेरुपरि प्रक्षिप्तो बाण इति। तस्य प्रजापतेरेतश्चस्कन्द तन्मादुषदिति देवैरुक्तमिति तस्य नामैव मादुषं सञ्जातं परन्तु परोक्षप्रियत्वाद् देवानां तस्य मानुषमिति तैर्व्यवहारः कृतः। तच्च प्रजापतेरेतः स्कन्नं मरुतोऽभून्वंस्ततः प्रथममादित्यो द्वितीयो भृगुर्वारुणिस्सञ्जातः तत्राङ्गारवशतोऽङ्गिरसामुत्पत्तिरिति वर्तते।

* यद्। यच्छब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वम्। अङ्गशब्दस्य निपातत्वेऽपि अभ्यादित्वादन्तोदात्तत्वे शेषनिघातेनादेरकारस्यानुदात्तता। दाश्वधातुतः क्वसुप्रत्यये प्रत्ययस्वरेण दाश्वस्शब्दोऽन्तोदात्तः, शेषनिघातेन धातोः स्वरस्यानुदात्तत्वम्। ततश्चतुर्थ्येकवचनस्य वशतः संप्रसारणपूर्वत्वयोरुदात्तत्वं स्थानिवत्त्वेन, विभक्तेरनुदात्तत्वम्, तस्योदात्तादनुदात्तस्येति स्वरितः पदे। संहितायामुदात्तस्वरितेति सन्नतरत्वम्। त्वम्। प्रातिपदिकस्वरेणान्तोदात्तत्वम्। अग्नेशब्दस्य स्वराः पूर्ववत्। अत्र पादादित्वेनाष्टमिकनिघाताभावे पाष्ठिकमाद्युदात्तत्वमन्त्यस्य शेषनिघातेनानुदात्तत्वे उदात्तादनुदात्तस्येति स्वरितः। भद्रम्। भद्रशब्दस्य नब्विषयस्येत्याद्युदात्तत्वस्य प्राप्तौ भदिधातोरक्प्रत्ययस्योदात्तत्वेन निपातनादन्तोदात्तता। करिष्यसि। कृधातोः सिपि तस्य पित्त्वादनुदात्तत्वे स्यविकरणस्य प्रत्ययस्वरे इडागमस्यागमत्वेनानुदात्तत्वे धातोः स्वरस्य विकरणस्वरेण निवृत्तौ करिष्यसीति मध्योदात्तं पदम्। तवेत्यत्र युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्। इतो निपातत्वादाद्युदात्तत्वम्। तच्छब्दस्य प्रातिपदिकस्वरः। सत्यशब्दस्वरः पूर्ववत्। अङ्गिर इत्यत्र आमन्त्रितस्येति आष्टमिको निघातः। तस्योदात्तात्परत्वे संहितायामाद्यस्य स्वरितत्वं परयोः प्रचयः।

स्क०—यत् क्षिप्रं दाशुषे दाश्वान् यजमानो हविषां दातृत्वात् तस्मै त्वं हे अग्ने भद्रं भजनीयं स्तुत्यमुत्कृष्टम्। इष्टमित्यर्थः। किं पुनस्तद्? धनमन्नं वा। करिष्यसि। दास्यसीत्यर्थः। तवेत्तत्। तवैव तद्। यज्ञान्तरे हविः कृत्वा तुभ्यमेव प्रदास्यत इत्यर्थः। सत्यमविसंवाद्येवैतन्नैतदनृतं मयोच्यत इत्यर्थः। अथवा यद्यजमानाय भद्रं धनमन्नं वा चिकीर्षसि तवैव तत्सत्यं नान्यस्य कस्य चित्॥ यथाचिकीर्षितदानसमर्थो नान्यः कश्चिदित्यर्थः। हे अङ्गिरः। अङ्गिरा ऋषिस्तस्योत्पत्तिकारणमग्ने! अथवा हे अङ्गिरः! शरीरस्थितिहेतोरशितपीतरसस्य कर्तरित्यर्थः॥ ६॥

वे० मा०—यत्त्वं क्षिप्रमग्ने! हविः प्रयच्छतेऽनन्तरमेव कल्याणं करिष्यसि तवैव तत्सत्यमङ्गिरस्त्वमेकः। अन्यस्तु कृतं विस्मरत्यपि॥ ६॥

अग्नीषोमप्रणयने "उप त्वाऽग्ने" इत्यादिकोऽनुवचनीयस्तृचः। एतच्च ब्राह्मणे समाम्नातम् "उप त्वाग्ने दिवेदिव उप प्रियं पनिप्नतम् इति तिस्रश्चैकां चान्वाह" [ऐ॰ ब्रा॰ १।३०] इति। तस्मिंस्तृचे या प्रथमा सा सूक्ते सप्तमी। तामेतां सप्तमीमृचमाह—

उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्।
नमो॒ भर॑न्त॒ एम॑सि ॥७॥

उप॑। त्वा॒। अ॒ग्ने॒। दि॒वेऽदि॑वे। दोषा॑ऽवस्तः। धि॒या। व॒यम्।
नमः॑। भर॑न्तः। आ। इ॒म॒सि॒ ॥७॥

हे अग्ने वयम्=अनुष्ठातारो दिवेदिवे प्रतिदिनं दोषावस्तः=रात्रावहनि [४]च धिया बुद्ध्या नमो भरन्तः=नमस्कारं सम्पादयन्त उप समीपे त्वेमसि=त्वामागच्छामः॥

---

(४) दोषावस्तः। अत्र स्कन्दस्वामी दोषावस्ता रात्रौ स्वेन तेजसा तमसामाच्छादयितरित्यग्निविशेषणमिमं शब्दमाह। अग्नेस्तमःसम्बन्धस्य रात्रिसम्बन्धस्य वेद आग्नेयसूक्तादिषूच्यमानत्वात्। वेङ्कटमाधवस्तु दिवेदिवे धिया कर्मणाऽग्नेर्नमो भरणमग्निहोत्राख्ये कर्मणि प्रसिद्धं तत्सम्बन्धात्तदपेक्षितस्याहोरात्ररूपस्यानुष्ठानकालस्य बोधनाभिप्रायेणेदं पदं कालबोधकमभिप्रेत्याहोरात्रमित्यर्थमाह। सायणस्तु सन्देहस्थले संयोगादीनां निर्णायकत्वस्य लोके प्रसिद्ध्या "अञ्जलिना जुहोति" "अञ्जलिना सूर्यमुपतिष्ठते" इत्यादिषु सामर्थ्यरूपनिर्णायकवशतः करद्वयसम्पुटनिश्छिद्रकरद्वयसंयोगाभिप्रायेणाञ्जलिशब्दस्य तादृशार्थकत्वस्य, "हस्तेनावद्यति" "स्रुवेणावद्यति" "स्वधितिनावद्यती"त्यादौ सामान्यतोऽवदानार्थस्यावद्यतेरवदानविशेषपरतायाः सामर्थ्येन शुष्कपुरोडाशादिकर्मकावदान-घृतादिद्रवद्रव्यकर्मकावदान—घनसंश्लिष्टमांसादिकर्मकावदानपरत्वस्य वेदे निर्णयेन संयोगा-

उपशब्दस्य निपातस्वरः (फि. ४।१२) "त्वामौ द्वितीयायाः" (पा. ८।१।२३) इति युष्मच्छब्दस्यानुदात्तत्वादेशः। दोषाशब्दो रात्रिवाची। वस्त इत्यहर्वाची। द्वन्द्वसमासे कार्तकौजपादित्वाद् (पा. ६।२।३९) आद्युदात्तः। "सावेकाचः" (पा. ६।१।१६८) इति धियो विभक्तिरुदात्ता। नम इति निपातः। भरन्त इत्यत्र शपः पित्त्वाल्लसार्व-धातुकत्वाच्चानुदात्तत्वे सति (पा. ६।१।८६) धातुस्वरः (पा. ६।१।१८६) शिष्यते। इमसीत्यत्र "इदन्तो मसिः" (पा. ७।१।४६) इत्यादेशो निघातश्च ॥ ७ ॥*

स्क०—हे अग्ने ! दिवे दिवे अहन्यहनि। दोषावस्तः। दोषेति रात्रिनाम। रात्रौ स्वेन ज्योतिषा तमसामाच्छादयितः ! धिया यादृश्यस्माकं प्रज्ञा तादृश्या वयं नमः स्तुतिं भरन्तः त्वा त्वाम् उपेमसि उपागच्छामः ॥ ७ ॥

वे० मा०—उपगच्छामस्त्वामग्ने वयमन्वहं सायं प्रातश्चाग्निहोत्रकर्मणा नमो भरन्तः ॥ ७ ॥

अष्टमीमृचमाह

राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे ॥८॥

राजन्तम्। अध्वराणाम्। गोपाम्। ऋतस्य। दीदिविम्।

वर्धमानम्। स्वे। दमे ॥८॥

पूर्वमन्त्रे त्वामुपेम इत्यग्निमुद्दिश्योक्तम्। कीदृशं त्वाम्? <u>राजन्तम्</u>=दीप्यमानम्। <u>अध्वराणां</u> राक्षसकृतहिंसारहितानां यज्ञानां <u>गोपाम्</u>=रक्षकम्। <u>ऋतस्य</u>=सत्यस्यावश्यं-

दीनां यथासंभवं वेदेऽपि सन्दिग्धस्थलेऽर्थनिर्णायकत्वेनोपादानस्य शिष्टैरादरणेनोक्तदोषावस्तःशब्देऽपि प्रसिद्धार्थ-दोषाशब्दसाहित्याद् रामार्जुनावित्यत्रेव विरोधसम्बन्धेन वस्तःशब्दस्य दिनपरत्वमाश्रित्याहोरात्रमिति व्याख्यातवान्। माधवोक्तकर्मप्रसिद्धिरप्यत्रानुकूला। आच्छादनार्थकस्य वसधातोर्दिने प्रयोगस्य वासरवस्तोःशब्दादिषु प्रसिद्ध्याऽत्रापि तस्य दिनपरत्वमिति। वस्तर्दिनमहोरात्रमिति प्रकृतमन्त्रस्य व्याख्यानं कुर्वन्नानन्दतीर्थोऽपि वस्तःशब्स्य दिनपरत्वमभिप्रैति। दयानन्दोऽपि रात्रेः प्रसङ्गाद्वस्तःशब्दो दिनमाहेति दिनपरत्वमाह।

[उपत्वा]

* उप। उपशब्दो निपातत्वादाद्युदात्तः शेषनिघातेनान्तस्यानुदात्तत्वे उदात्तादिति स्वरितः। त्वेत्यत्र त्वामावितिसर्वानुदात्तः। अग्ने इत्यत्राष्टमिको निघातः। दिवेदिवे। अस्य स्वरः पूर्ववत्। दोषावस्तः। द्वन्द्वे कार्तकौजपादित्वात्समासस्वरं बाधित्वाद्युदात्तता। धिया। सावेकाच इति विभक्तेरुदात्तता। वयम्। प्रातिपदिकस्वरः। नमः। निपातत्वादाद्युदात्तता। भरन्तः। शपः पित्त्वाल्लसार्वधातुकत्वाच्चानुदात्तत्वे धातुस्वरः शिष्यते। आ। निपातत्वादाद्युदात्तता। इमसि। तिङ्ङतिङ इति निघातः॥

भाविनः कर्मफलस्य दीदिविम् = पौनःपुन्येन भृशं वा द्योतकम्। आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते। स्वे दमे = स्वकीयगृहे यज्ञशालायां हविर्भिर्वर्द्धमानम्।

राजन्तं वर्द्धमानमित्यत्रोभयत्र पूर्ववद्धातुस्वरः शिष्यते। दीदिविशब्दस्य "अभ्यस्तानामादिः" (पा० ६।१।१८९) इत्याद्युदात्तत्वम्। दमशब्दो वृषादित्वाद् (पा० ६।१।२०३)। आद्युदात्तः ॥ ८ ॥*

स्क०—कीदृशं त्वाम्? राजन्तम् = ईशानम्। कस्य अध्वराणां यज्ञानां गोपां रक्षितारं च ऋतस्य यज्ञस्यैव दीदिविम् अत्यर्थदीप्तं वर्द्धमानं स्व आत्मीये दमे यज्ञगृहे ॥ ८ ॥

वे० मा०—राजन्तमध्वराणां दीप्यमानं यज्ञानां स्वे दम आहवनीये समिध्यमानमुपेमो गोपायितारं सत्यस्य दीप्तम् ॥ ८ ॥

नवमीमृचमाह—

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व। सच॑स्वा नः स्व॒स्तये॑ ॥९॥

सः। नः॒। पि॒ताऽइ॑व। सू॒नवे॑। अग्ने॑। सु॒ऽउ॒पा॒य॒नः। भ॒व।

सच॑स्व। नः॒। स्व॒स्तये॑ ॥९॥

हे अग्ने स त्वं नः = अस्मदर्थं सूपायनः = शोभनप्राप्तियुक्तो भव। तथा नः = अस्माकं स्वस्तये = विनाशराहित्यार्थं सचस्व = समवेतो भव। तत्रोभयत्र दृष्टान्तः। यथा सूनवे = पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत् ॥

अस्मच्छब्दादेशस्य न इत्येतस्य "अनुदात्तं सर्वम्" (पा० ८।१।१८) इत्यनुदात्तत्वम्। "चादयोऽनुदात्ताः" (फि० ४।१५) इतीवशब्दोऽनुदात्तः। "इवेन नित्यसमासः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" (पा० २।१।४।२) इति समस्तः पितेवेतिशब्दो मध्योदात्तः। शोभनमुपायनं यस्येति बहुव्रीहौ "नञ्सुभ्याम्" (पा० ६।२।१७२) इत्यन्तोदात्तत्वम्।

[राजन्तमध्वराणाम्]

* राजन्तम् वर्द्धमानम् इत्यत्र भरन्तः शब्दवद्धातुस्वरशेषः, अवशिष्टानामनुदात्तत्वादिकम्। अध्वरशब्दस्य पूर्ववत्स्वरः। गोपाशब्दस्य कृदुत्तरप्रकृतिस्वरकता। ऋतशब्देऽपि फिट्स्वरः। दीदिविशब्देऽभ्यस्तानामादिरित्याद्युदात्तत्वम्। स्वे दमे इत्यत्र प्रातिपदिकस्वरः।

सचस्वेत्यत्र पदात् परत्वं नास्तीति न निघातः। लसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः ॥ ९ ॥*

॥ इति प्रथमं सूक्तम् ॥

॥ इति प्रथमस्य प्रथमे द्वितीयो वर्गः ॥

स्क०—यं त्वामस्तोष्महि स त्वं नः अस्माकं पितेव सूनवे यथा पिता पुत्रस्य एवं हे अग्ने सूपायनः सूपगमः सुखोपसर्पो भव। सचस्व सेवस्व च नः अस्मान् स्वस्तये अविनाशाय। रक्षितुमस्मानस्मत्समीपे नित्यं भवेत्यर्थः ॥ ६ ॥

॥ प्रथमाष्टके प्रथमाध्याये द्वितीयो वर्गः ॥

वे० मा०—स त्वमस्मभ्यं यथा पिता पुत्राय सूपचर एवं सूपचरो भव सेवस्व चास्मान-विनाशाय ॥ ६ ॥

॥ प्रथमस्य प्रथमे द्वितीयो वर्गः ॥

"अग्निमीळे" इत्यादिसूक्तमग्निष्टोमस्य प्रातरनुवाके यथा विनियुक्तं तथा "वायवायाहि" इत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः। तत्रेदं चिन्त्यते—शस्त्रं किं 'देवतास्मरणरूपं संस्कारकर्म? किंवाऽदृष्टफलं प्रधानकर्म' इति। तत्र पूर्वपक्षं जैमिनिः सूत्रयामास (पू. मी. २।१।१३-२९)—

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वादिति ॥ १ ॥ (जै. २।१।१३)

"आज्यैः स्तुवते" "पृष्ठैः स्तुवते" "प्रउगं शंसति" "निष्केवल्यं शंसति" इति श्रूयते। तत्र स्तुतिः शंसनं च गुणिनिष्ठगुणाभिधानम्। "इन्द्रस्य नु वीर्याणि प्रवोचम्" (ऋ. १।३२।१) इत्यत्र दृष्टत्वात्। एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्युपेयम्। याज्यायास्तद्रूपत्वं दशमाध्यायस्य चतुर्थपादे दृष्टार्थलाभेन निर्णीतम् (पू. मी. १०।४।३९-४१)। तद्वदत्रापि। तुशब्दः प्रधानकर्मत्वं व्यावर्तयति ॥ १ ॥

[सनः]

* सः। प्रातिपदिकस्वरः। नः। अनुदात्तं सर्वमपादादाविति अस्मदादेशस्य नसोऽनुदात्तत्वम्। पितेव। पितृशब्दस्यान्तोदात्तता चिदन्तत्त्वात् फिषोऽन्त इति वा। इवेन समासे तस्यानुदात्तत्वे पूर्वपदप्रकृतिस्वरत्वम्। समासो मध्योदात्तः। सूनवे सूनुशब्दे प्रातिपदिकस्वरः। अग्नेशब्दस्य षाष्ठिकमाद्युदात्तत्वम्। सूपायनः। बहुव्रीहौ नञ्सुभ्यामित्यन्तोदात्तता। सचस्व। धातुस्वरावशेषः। नः इत्यस्य स्वरः पूर्ववत्। स्वस्तये। अत्रापि प्रातिपदिकस्वरशेषः।

सिद्धान्ती तं पक्षं दूषयति—

अर्थेन त्वपकृष्येत देवतानाम्नश्चोदनार्थस्य गुणभूतत्वादिति ॥ २ ॥ (जै. २।१।१४)

तुशब्देन संस्कारत्वं वारयति। संस्कारपक्षे प्रयोजनवशेन मन्त्रः स्वस्थानादपकृष्येत। कुतः ? मन्त्रगतं देवतावाचकं यदिन्द्रादि नामास्ति तच्चोदनया मन्त्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतम्। तस्माद्यत्र प्रधानभूतदेवताऽस्ति तत्र गुणभूतो मन्त्रो नेतव्यः। तद्यथा—माहेन्द्रग्रहसंनिधौ "अभि त्वा शूर" (ऋ. ७।३२।२२) इत्ययं प्रगाथ आम्नातः। स चेन्द्रं प्रकाशयति न तु महेन्द्रम्। ततो यत्रैन्द्रं कर्म तत्रायं प्रगाथोऽपकर्षणीयः। तथा सति क्रमसंनिधी बाध्येयाताम् ॥ २ ॥

तदेतत्सिद्धान्तिनाऽभिहितं दूषणं पूर्वपक्षी समाधत्ते

वशावद्वा गुणार्थं स्यादिति ॥ ३ ॥ (जै. २।१।१५)

वाशब्दः प्रगाथस्यान्यत्रनयनं वारयति। मन्त्रे यदेतदिन्द्रशब्दाभिधानं तदेतन्महत्व-गुणोपलक्षणार्थं स्यात्। यथा "सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत" (तै. सं. ३।४।३।१२) इत्यत्राजावशाशब्देन चोदिते कर्मणि छागशब्देन केवलेन युक्ता निगमा वशात्वगुणमप्युपलक्षयन्ति तद्वत्। तस्मान्महत्वगुणयुक्ते चोदिते कर्मणि निर्गुणेनेन्द्रशब्दे-नाभिधानमविरुद्धम्। लोकेऽपि महाराजे केवलराजशब्दप्रयोगमपि पश्यामः ॥ ३ ॥

तदेतत्समाधानं सिद्धान्ती दूषयति—

न श्रुतिसमवायित्वादिति ॥ ४ ॥ (जै. २।१।१६)

यदुक्तं वशान्यायेन राजन्यायेन वाऽस्य ग्रहस्येन्द्रो देवता युज्यत इति। तन्न। देवता-त्वस्य तद्धितश्रुतिसमवायित्वात्। माहेन्द्रग्रह इत्यत्र "साऽस्य देवता" (पा. ४।२।२४) इत्य-स्मिन्नर्थे "महेन्द्राद् घाणौ च" (पा. ४. २. २९.) इति महेन्द्रशब्दादण्प्रत्ययो विहितः। तस्मान्महेन्द्र एव देवता न त्विन्द्रः ॥ ४ ॥

विपक्षे बाधमाह—

गुणश्चानर्थक इति ॥ ५ ॥ (जै. २।१।१८)

यदीन्द्रो देवता स्यात्तदानीमैन्द्रग्रह इत्येतावतैवार्थावगतौ माहेन्द्र इति महत्वगुणोऽनर्थकः स्यात्। चकारः पूर्वहेतुना समुच्चयार्थः ॥ ५ ॥

हेत्वन्तरमाह—

तथा याज्यापुरोरुचोरिति ॥ ६ ॥ (जै. २।१।१९)

इन्द्रमहेन्द्रयोर्देवतयोर्भेदे यथा महत्त्वगुणः सार्थकस्तथा याज्यापुरोनुवाक्ययोर्भेदोऽप्यस्मिन्नेव पक्ष उपपद्यते। "एन्द्र सानसिम्" (ऋ. १।१।१५) इत्यादिके इन्द्रस्य याज्यापुरोनुवाक्ये। "महाँ इन्द्रो य ओजसा" (ऋ. ८।९।१) इत्यादिके महेन्द्रस्य ॥ ६ ॥

पूर्वपक्षिणोक्ते वशादृष्टान्ते वैषम्यमाह—

वशायामर्थसमवायादिति ॥ ७ ॥ (जै. २।१।२०)

या वशा विधिवाक्ये श्रुता तस्या एव निगमेषु छागशब्देन व्यवहारो न विरुद्धः। छागत्वलक्षणस्यार्थस्य वशायां समवेतत्वात्। तच्च प्रत्यक्षेणोपलभ्यते। इन्द्रमहेन्द्रयोस्तु भेद उपपादितः। तस्माद्विषमो दृष्टान्तः। एवं संस्कारपक्षे प्रगाथस्यैन्द्रकर्मण्यपकर्षप्रसङ्गात्तद्वारयितुं स्तोत्रशस्त्रयोः प्रधानकर्मत्वमिति सिद्धान्तिनो मतम् ॥ ७ ॥

पुनरपि पूर्वपक्षी तदेतन्मतं निराचष्टे—

यत्रेति वार्थवत्त्वात् स्यादिति ॥ ८ ॥ (जै. २।१।२१)

वाशब्दः सिद्धान्तिमतव्यावृत्त्यर्थः। यत्रैन्द्रं कर्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात्। कुतः ? अर्थवत्त्वात्। ऐन्द्रो मन्त्र इन्द्रं प्रकाशयितुं समर्थ इत्यर्थवान् स्यात्। महेन्द्रं तु प्रकाशयितुमसमर्थत्वादानर्थक्यं प्रगाथस्य प्रसज्येत। तस्माद्देवताप्रकाशनरूपसंस्कारकर्मत्वमेव स्तोत्रशस्त्रयोर्युक्तमिति स्थितः पूर्वपक्षः ॥ ८ ॥

अथ सिद्धान्तमाह—

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्यातामिति ॥ ९ ॥
(जै. २।१।२४)

अपि वेत्यनेन संस्कारकर्मत्वं व्यावर्त्यते। स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपि स्वप्रकरण एव कस्याश्चित्प्रधानक्रियाया उत्पत्तिं विदध्याताम्। कुतः। श्रुतिसंयोगात्। तयोर्धात्वोर्वाच्योऽर्थः श्रुतिरित्युच्यते। तत्संयोगः प्रधानकर्मत्वे सिध्यति। तथा हि गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः। 'यो देवदत्तः स चतुर्वेदाभिज्ञः' इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति। गुणस्योपसर्जनत्वे तु न स्तुतिः प्रतीयते—'यश्चतुर्वेदाभिज्ञस्तमाकारय' इत्युक्ते स्तुतिं न मन्यन्ते किन्त्वाह्वानप्राधान्यमेव बुध्यन्ते। एवं मन्त्रेष्वपि या देवता सेयमीदृशैर्गुणैरुपेतेति गुणप्राधान्यविवक्षायां मुख्यः स्तौतिधात्वर्थो विधीयते। त्वत्पक्षे तु येयमीदृग्गुणयुक्ता सेयं देवतेति देवतास्मरणस्य प्राधान्यादियं स्तुतिर्न स्यात्। ततः श्रुतिवशादेते प्रधानकर्मणी। तथा सति देवता-

प्रकाशने तात्पर्याभावादैन्द्रोऽपि प्रगाथः स्वप्रकरणगते महेन्द्रकर्मण्येवावतिष्ठते। यदि देवता-स्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमस्तु॥ ९॥

प्रधानकर्मत्वे हेत्वन्तरमाह—

शब्दपृथक्त्वाच्चेति॥ १०॥ (जै. २।१।२५)

"द्वादशाग्निष्टोमस्य स्तोत्राणि द्वादश शस्त्राणि" इत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्व-मवगम्यते। देवताप्रकाशनपक्षे सर्वैरपि मन्त्रसङ्घैः कृतस्य प्रकाशनस्यैकत्वेन द्वादशसंख्या न स्यात्। प्रधानकर्मणां त्वाज्यस्तोत्रपृष्ठ्यस्तोत्रादिनामकानां भिन्नत्वाद्द्वादशत्वसंख्योप-पद्यते। एवं शस्त्रवाक्येऽपि योज्यम्॥ १०॥

विपक्षे बाधमाह—

अनर्थकं च तद्वचनमिति॥ ११॥ (जै. २।१।२६)

अग्निष्टुति श्रूयते—"आग्नेया ग्रहा भवन्ति" इति। तत्रैव पुनरप्यन्यदुच्यते—"आग्ने-यीषु स्तुवते" "आग्नेयीः शंसति" इति। त्वत्पक्षे तद्वचनमनर्थकं स्यात्। चोदकप्राप्तेषु स्तोत्रशस्त्रमन्त्रेष्वाग्नेयग्रहानुसारेण देवतापदस्योहे सत्याग्नेयत्वसिद्धेः। प्रधानकर्मपक्षे तु देवताप्रकाशनरूपत्वाभावेनोहाभावादाग्नेयमन्त्रान्तरविधिवचनमर्थवद्भवति॥ ११॥

पुनरपि हेत्वन्तरमाह—

अन्यार्थः प्रतीयत इति॥ १२॥ (जै. २।१।२७)

"संबद्धे वै स्तोत्रशस्त्रे" इति ह्याम्नातम्। सम्बन्धश्च द्वयोर्भवति न त्वेकस्य। तस्मात् स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते। स च संस्कारपक्षे न सम्भवति। देवताप्रकाशनरूप-स्यार्थस्यैकत्वात्। प्रधानकर्मपक्षे तु स्तोत्रकर्म शस्त्रकर्म चेत्यर्थभेद उपपद्यते। यद्यपि "ष्टुञ् स्तुतौ" "शंसु स्तुतौ" इत्येकार्थौ तथाऽपि प्रगीतमन्त्रसाध्यं स्तोत्रम्, अप्रगीतमन्त्र-साध्यं शस्त्रमिति तयोर्विवेकः॥ १२॥

हेत्वन्तरमाह

अभिधानं च कर्मवदिति॥ १३॥ (जै. २।१।२८)

यथा प्रधानकर्म "अग्निहोत्रं जुहोति" इति द्वितीयासंयोगेनाभिहितम्, तथा "प्रउगं शंसति" इत्यभिधीयते। अतस्तत्सादृश्यात्प्रधानकर्मत्वम्॥ १३॥

हेत्वन्तरमाह—

फलनिर्वृत्तिश्चेति॥ १४॥ (जै. २।१।२९)

"स्तुतस्य स्तुतमसि" इति स्तोत्रानुमन्त्रणमाम्नाय वाक्यशेषे स्तोत्रफलमेवमाम्नातम्— "इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्" इति। न तु देवताप्रयुक्तं फलमाम्नातम्। अतो न देवतासंस्कारः किन्तु प्रधानकर्मेति स्थितम्। अनेन तु निर्णयेन प्रयोजनं विकृतिषूहाभावः। संस्कारपक्षे तु यस्यां विकृतौ देवतान्तरं तत्र तद्वाचकं पदमूहनीयं स्यात्, तन्मा भूदिति प्रधानकर्मत्वमुक्तम्॥ १४॥

एतच्च दशमाध्याये सूत्रितम्—"ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्याद्" (पू. मी. १०।४।४९) इति।

अत्र संग्रहश्लोकौ—

[1]प्रउगं शंसतीत्यादौ गुणतोत प्रधानता।
दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥
स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनम्।
तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम्॥ इति।

---

(१) यज्ञे गानरहितकेवलमन्त्रपाठेन क्रियमाणा देवतास्तुतिः शस्त्रशब्देनोच्यते। गानयुक्तमन्त्रेण च क्रियमाणा स्तुतिः स्तोत्रशब्देनोच्यते। तद्विषये मीमांसायां विचारितं किमत्र स्तोत्रशस्त्रशब्दाभ्यां स्तुतिः प्रतिपाद्यते किंवा तद्गुणवद्देवतास्मृतिरिति। सन्देहबीजं स्तुशंसुधात्वोर्धातुपाठे पाणिनिना स्तुत्यर्थतयोक्तिः मीमांसायां मन्त्राणामनुष्ठानसम्बन्धिपदार्थस्मारकत्वसिद्धान्तनं च। तत्र स्तुतिर्नाम गुणिनिष्ठगुणाभिधानम्। तस्यां स्वीकृतायां किमर्था स्तुतिरिति विचारे दृष्टं किमपि फलं न लभ्यत इति अदृष्टं फलं कल्पनीयम्। अन्यथा स्तुतेरानर्थक्यं स्यात्। तथा सति स्तुतेः कर्मणः साक्षात्फलार्थत्वेन प्राधान्यं भवति। स्मृतिश्च पूर्वं ज्ञातस्य पुनर्ज्ञानं सम्बन्धिपदार्थान्तरज्ञानवशतः। तस्यां स्मृतौ सत्यां तत्र ज्ञाताया देवतायाः कर्मणि उपयोगः कर्तुं शक्यत इति कर्मानुष्ठानार्थदेवतायाः स्मृतिर्ज्ञातत्वसंपादिका। तया च तथा देवतायां ज्ञातत्वरूपविशेषसंपादनाद् देवताया धर्मिभूतायाः प्राधान्यं तद्धर्मज्ञातत्वरूपविशेषाख्यगुणसंपादकत्वात् स्मृतेरप्राधान्यम्। तदुक्तं जैमिनिना "तानि द्वैधा गुणकर्माणि प्रधानकर्माणि च", "यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत" "यैस्तु द्रव्यं न चिकीर्ष्येत क्रिया तत्र प्रतीयेते"ति। एवं च स्तोत्रशस्त्रयोः स्तुतिपरत्वे धात्वर्थविधानेन प्राधान्यं स्यात् श्रुतार्थविधानं च। स्मृतिपरत्वे तस्या धातुतः शक्त्या लाभाभावेन तत्र धातोर्लक्षणा वक्तव्येति लक्ष्यार्थविधानं स्मृत्या देवतागतविशेषसंपादनेनाप्राधान्यरूपं गुणत्वं च। तत्र स्तुतिपरत्वे धातुरूपा श्रुतिर्विनियोजिका कर्मणः प्राधान्यमिति श्रुतिप्रमाणकर्मप्राधान्यरूपगुणद्वयं फलेऽदृष्टत्वमित्येको दोषः। स्मृतिपरत्वे फले दृष्टत्वमिति गुणः, कर्मणोऽप्राधान्यं श्रुतिप्रमाणपरित्याग इति दोषद्वयम्। एवं कल्पद्वये दृष्टं लभ्यत इति दृष्टपदार्थलाभमोहेन दोषद्वयं स्वीकृत्य स्मृतिकल्पाश्रयणं पूर्वपक्षे श्रुतिप्रमाणस्य सर्वतो वरिष्ठत्वेन फलेऽदृष्टत्वरूपदोषं स्वीकृत्यापि स्तुतिकल्पाश्रयणं सिद्धान्ते। तदेतन्मीमांसायामनेकैः सूत्रैर्विचारितं विभिन्नविभिन्नोदाहरणप्रदानपुरस्सरम्। तानि सूत्राणि भाष्यकृताप्यत्र क्रमेण व्याख्यातानि। अन्ते च स्वकृतमीमांसान्यायविस्तरगतेनोक्तसूत्रगणविचारसङ्ग्रहरूपाधिकरणश्लोकद्वयेन तत्प्रदर्शनं च।

अग्निष्टोमे [1]सुत्यादिने सूर्योदयात्पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात्। एतच्चैतरेयब्राह्मणे प्रपञ्चितम्—"देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युः" इत्यादिब्राह्मणे (ऐ. ब्रा. २।१५)। तस्मिंश्च प्रातरनुवाके "अग्निमीळे" इत्यादिसूक्तमन्तर्भूतम्। तच्च व्याख्यातम्। प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं [2]प्रउगशस्त्रं होत्रा शंसनीयम्। तच्च शस्त्रम्—"वायवायाहि" इत्यादिसप्ततृचात्मकम्। एतच्च ब्राह्मणे "ग्रहोक्थम्" इत्यादिखण्डे (ऐ. ब्रा. ३।१) प्रपञ्चितम्। तथा पञ्चमाध्याये (आ० ५, १०,) "स्तोत्रमग्रे शस्त्राद्" इत्यादिखण्डे सूत्रितं च। अत्रेयमनुक्रमणिका—"वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाः, "अश्विना" द्वादशाश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः, सप्तैताः प्रउगदेवताः" इति। अस्यायमर्थः—"वायवायाहि" इत्यादिकं नवर्चं सूक्तम्। "अग्निं नव" इत्यतो नवशब्दस्यानुवृत्तेः। तत्राद्यस्तृचो वायुदेवताकः, द्वितीय इन्द्रवायुदेवताकः, तृतीयो मित्रावरुणदेवताकः। "अश्विना" इत्यादिकं द्वादशर्चं सूक्तम्। तत्राद्यस्तृच आश्विनः, द्वितीय ऐन्द्रः, तृतीयो वैश्वदेवः, चतुर्थः सारस्वतः। तेषु तृचेषु प्रतिपाद्या वाय्वादयः सरस्वत्यन्ताः सप्तसंख्याकाः प्रउगशस्त्रस्य देवता इति। मधुच्छन्दसोऽनुवर्त्तनात्स एवर्षिः। तथैवानुवृत्त्या गायत्रं छन्दः। वायव्ये तृचे प्रथमा ग्रहस्यैन्द्रवायवस्यैका [3]पुरोऽनुवाक्या। एतच्च ब्राह्मणे

---

(१) यस्मिन्दिने सोमवल्ल्या रसं निष्कास्य तेन हवनं क्रियते तद् दिनं सुत्यायाः सवनस्य दिनमित्यभिप्रायेण सुत्यादिनशब्देन व्यवह्रियते।

(२) अग्निष्टोमे होतुः शस्त्रषट्के प्रातस्सवनगतशस्त्रद्वय इदं द्वितीयशस्त्रं प्रउगनामकम्। अत्र वाय्विन्द्रवायुमित्रावरुणाश्वीन्द्रविश्वदेवसरस्वत्याख्याः सप्त देवताः स्तूयन्ते तत्र प्रतिदेवतमृक्त्रयमुच्यते तद्देवताकग्रहपात्रस्थितसोमहोमात्मकग्रहानुष्ठानं च भवति। सरस्वत्यास्तु ग्रहो नास्ति। तदुक्तं ब्राह्मणे "न सारस्वतो ग्रहोऽस्ति" इति। ते चोक्तदेवतार्थाः सप्त तृचा इदमादिसूक्तद्वयेनोच्यन्ते।

(३) यद्यपि प्रतियागमेका पुरोऽनुवाक्या याज्या चैकेति मन्त्रद्वयमेव भवति तथाऽप्यत्रैन्द्रवायवग्रहे पुरोऽनुवाक्याद्वयं भवति। अतएव ब्राह्मणे "वायव्या पूर्वा पुरोऽनुवाक्यैन्द्रवायव्युत्तरे"ति प्रतिपादितम्। तद्बीजं तु तत्र ग्रहे वायोरधिकभागसम्बन्धप्रदर्शनम्। तस्य कारणं तत्र ब्राह्मण एवमुक्तम्—पुरा कदाचित्सोमस्य प्रथमपानविषये तत्र देवतानां ममैव प्रथमं पानं भवतु इति प्रतिस्वं कामनया वैमत्यमासीत्, तदानीं तैराजिजयननिर्णयं स्वीकृत्याजिधावनं कृतम्। समयबन्धपुरस्सरा धावनरूपा गतिराजिः। तत्राजिधावनाय गार्हपत्यनामकमग्निमारभ्यादित्यपर्यन्तो देशो निर्धारितः। तदुक्तं ब्राह्मणे "तेऽग्नेर्गृहपतेराद्त्यिं काष्ठामकुर्वत" इति। अग्निमित्रावरुणाश्वीन्द्रवायुप्रमुखानामाजिधावतां देवानां वायुर्वेगवशतः सर्वाग्रेधावन्नाजिजयी भवेदिति सम्भावित आसीत्। तत्र वायोराजिजयं सम्भाव्येन्द्रो वायुमब्रवीदर्द्धं तवार्द्धं मम भवत्वावाभ्यामाजिर्जेष्यत इति, वायुना तस्मिन्प्रत्याख्याते इन्द्रेण तृतीयभागग्रहणं स्वस्य वायोर्भागद्वयमित्युक्तावपि वायुनाऽगृहीतायामिन्द्रेण स्वस्य चतुर्थो भागो भागत्रयं वायोरित्युक्ते संप्रतिपद्य वायुरिन्द्रेण सहाजिं जितवान्। तस्मादैन्द्रवायवे भागत्रयं वायोरेको

समाम्नातम्—"वायव्या पूर्वा पुरोनुवाक्यैन्द्रवायव्युत्तरा" (ऐ. ब्रा. २।२६) इति। तथा सूत्रितं च—"वायवा याहि दर्शतेन्द्रवायू इमे सुता इत्यनुवाक्ये" (आ. ५।५) इति।

वायव्यतृचे प्रथमामृचमाह—

वाय॒वा या॑हि दर्शते॒मे सोमा॒ अरं॑कृताः।
तेषां॑ पाहि श्रु॒धी हव॑म्॥१॥

वायो॒ इति॑। आ। या॒हि॒। द॒र्श॒त॒। इ॒मे। सोमाः॑। अरं॑ऽकृताः।
तेषा॑म्। पा॒हि॒। श्रु॒धि। हव॑म्॥१॥

हे दर्शत दर्शनीय वायो कर्मण्येतस्मिन् आयाहि=आगच्छ। त्वदर्थम् इमे सोमाः अरंकृताः। अभिषवादिसंस्कारोऽलङ्कारः। तेषाम्=तान्सोमान्। यद्वा तेषामेकदेशमित्यध्याहारः। पाहि=स्वकीयं भागं पिबेत्यर्थः। तत्पानार्थं हवम्=अस्मदीयम् आह्वानं श्रुधि=शृणु।

अत्र यास्कः—"वायवायाहि दर्शनीयेमे सोमा अरंकृता अलङ्कृतास्तेषां पिब शृणु नो ह्वानम्। (नि० १०।२) इति।

दर्शतेत्यत्र "भृमृदृशि" इत्यादिसूत्रेण (उ० ३, ११०) अतच्प्रत्यय औणादिकः। चित्त्वादन्तोदात्तस्यामन्त्रितानुदात्तत्वम्। "अर्तिस्तु" इत्यादिना (उ० १. २३८) मनप्रत्ययान्तस्य सोमशब्दस्य नित्स्वरः। अलमित्यत्र छान्दसो रेफादेशः। अरंकृतशब्दे समासान्तोदात्तत्वं (पा० ६, १, २२३) बाधित्वाऽव्ययपूर्वपदप्रकृतिस्वरप्राप्तौ (पा० ६, २. २) "भूषणेऽलम्" (पा० १, ४, ६४) इत्यलंशब्दस्य गतिसंज्ञायां "गतिकारक" इत्यादिना—(पा० ६, २, १३९) कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन "गतिरनन्तरः" (पा० ६, २, ४९,) इति पूर्वपदप्रकृतिस्वरत्वम्। निपातत्वादलंशब्द आद्युदात्तः। पाहीत्यत्र पिबादेशाभावश्छान्दसः। श्रुधीत्यत्र "श्रुशृणु" इत्यादिना (पा० ६, ४, १०२) हेर्धिभावः। तिङन्तादुत्तरस्य निघातो नास्ति। "सेह्यपिच्च" (पा० ३, ४, ८७) इति पित्त्वनिषेधादनुदात्ते निवारिते प्रत्ययस्वरः।

भाग इन्द्रस्येति प्रतिपादनायैव पुरोऽनुवाक्याद्वयमुच्यते। तत्र पूर्वा केवला वायव्योत्तरस्या[illegible] वायोः सम्बन्धेन वायोर्भागाधिक्यं भवतीति।

हवमित्यत्र ह्वयतिधातोः "बहुलं छन्दसि"— (पा० ६, १, ३४)इति संप्रसारणे सत्युकारान्ताद् ऋदोरप्" । (पा० ३, ३, ५७) इत्यप्प्रत्ययः । तस्य पित्त्वादनुदात्ते सति धातुस्वरः शिष्यते । संहितायां श्रुधीत्यस्य "अन्येषामपि दृश्यते" (पा० ६, ३, १३७) इति दीर्घः ॥ १ ॥*

---

* वायवायाहि ।

वायो । वाधातोरुण्प्रत्ययेन निष्पन्नो वायुशब्दो व्युत्पत्तिपक्षे तदा धातोरुदात्तस्य उणः प्रत्ययस्य स्वरेण बाधेऽन्तोदात्तो वायुशब्दः । अव्युत्पत्तिपक्षे तु फिषोऽन्त इत्यन्तोदात्तः । ततः संबुद्धौ गुणे सुलोपे वायो इतिरूपस्य ओकारस्य स्थानिवत्त्वेनोदात्ततयाऽन्तोदात्तत्वे प्राप्ते वायोपदस्य संबोधनप्रथमान्तत्वेन आमन्त्रितत्वाद् आमन्त्रितस्येति षाष्ठिकेन सूत्रेणाद्युदात्तत्वम् । आकारे परतस्तस्यौकारस्यावादेशे ऽकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम् तस्योदात्तपरत्वादनुदात्ततरत्वं संहितायाम् । पदपाठे तु आकारस्य परस्माद्वर्तिनो व्यपगमेऽपि तस्य वायो इतिपदस्य आमन्त्रितत्वेन ओकारान्तत्वेन ओदिति प्रगृह्यत्वात्प्रगृह्यत्वबोधनाभिप्रायेण पदपाठे प्रगृह्यसञ्ज्ञकात्परस्मादितिशब्दयोगस्य सर्वत्रादरणादितिशब्दे परत इतिशब्देकारस्योदात्तस्य परत्वेन वायोशब्दौकारस्यानुदात्ततरत्वम् । आ । अयं निपातत्वादाद्युदात्तः । याहि । याधातोरन्तोदात्तस्य हिप्रत्ययस्वरेण निरासे याहीति अन्तोदात्ते पदे प्राप्ते संहितायां तस्यातिङन्तात्पदात्परत्वेन सर्वानुदात्तता । तत्र संहितायामुदात्तात्परत्वेन याकाराकारस्य स्वरितत्वम् हिकारस्य स्वरितात्परत्वात्प्रचितत्वम् । पदपाठेतु उदात्तसम्बन्धव्यपगमेन स्वरितप्रचययोरपि अभावे सर्वानुदात्तं पदम् । दर्शत । दृश्धातोरतचि प्रत्यये तस्य चित्त्वाच्चित इत्यन्तस्योदात्तता ऽवशिष्टयोः पूर्वयोः स्वरयोरनुदात्तत्वं शेषनिघातेन ततः सम्बोधने आमन्त्रितत्वेन पदात्परत्वेन आमन्त्रितस्यचेत्याष्टमिकसूत्रेण निघाते तस्य संहितायां स्वरितात्परत्वात् प्रचितत्वम् । तकाराकारस्य परवर्तीमेशब्दावयवेकारेण सन्धौ मेशब्दस्योदात्तस्य परत्वेनानुदात्ततरत्वम् । संहितायां तूक्तसर्वनिमित्तापगमात्सर्वानुदात्तत्वम् । इमे । इदंशब्दस्य फिषोऽन्त इत्यन्तोदात्तत्वे ततः परत्ताज्जसि प्रत्यये तस्य सुप्त्वादनुदात्तत्वादनुदात्तत्वेन तत्स्थानिकश्यादेशस्यापि स्थानिवत्त्वादनुदात्तत्वे विभक्तिनिमित्तकस्य व्यञ्जनस्थानिकस्य त्यदाद्यत्वस्यानुदात्तत्वे तस्य नकाराकारेण पररूपैकादेशे दकाराकारस्योदात्तत्वेन पररूपाकारस्योदात्तत्वं तेन सह श्यादेशेकारस्य गुणरूपैकादेशस्यापि एकादेश उदात्तेनोदात्त इत्युदात्तत्वं शेषनिघातेनाद्यनुदात्तत्वमिति इमेशब्दोऽन्तोदात्तः । संहितायां दर्शतशब्दीयतकाराकारेण सन्धौ गुणैकारस्यानुदात्ततरत्वम् । सोमाः । सुधातोरन्तस्योदात्तस्य ततः परवर्तिमन्प्रत्ययस्वरेण बाधे प्राप्ते तदपवादेन नित्स्वरेण पुनस्तस्यैव शेषे शेषनिघातेनान्तानुदात्तत्वम् । ततो जसि तस्य सुप्त्वादनुदात्ततया तस्य पूर्वेण सवर्णदीर्घे तस्याप्यनुदात्तत्वेन पदतादशायामुदात्तात्परत्वात्स्वरितत्वम् । संहितायामुदात्तपरतयाऽनुदात्ततरत्वम् । अरंकृताः । अत्र रेफादेशस्य छान्दसत्वादलंशब्दस्य निपातत्वेनाद्युदात्तत्वम् । शेषनिघातेन रेफाकारस्यानुदात्तत्वम् । कृतशब्दे धातोः स्वरस्य क्तप्रत्ययस्वरेणापहारे कृतशब्दोऽप्यन्तोदात्तः । तत उभयोः समासे प्राप्तस्य समासान्तोदात्तत्वस्याव्ययपूर्वपदप्रकृतिस्वरेण बाधे पूर्वपदस्वरे प्राप्तेऽलंशब्दस्य भूषणार्थत्वे गतिसञ्ज्ञाविधानाद्गतिकारकेत्यत्येनोत्तरपदप्रकृतिस्वरेण पूर्वपदस्वरस्य बाधे प्राप्ते प्रकृतिस्वरापवादेन गतिरनन्तर इत्यनेन पूर्वपदप्रकृतिस्वरे ऽरंकृतशब्द आद्युदात्तः । शेषाणामनुदात्तत्वे रेफाकारस्य पदसंहितायामुदात्तस्वरात्परत्वात्स्वरितत्वं शेषयोः प्रचितत्वम् । विभक्त्यकारस्य सवर्णदीर्घस्य च स्वराः पूर्ववद् । तेषाम् । तच्छब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वे ततष्षष्ठीबहुवचनामः सुप्त्वादनुदात्तत्वे तन्निमित्तस्य त्यदाद्यत्वस्य तस्य

स्कं०—हे वायो आयाहि आगच्छ दर्शत दर्शनीय दर्शनार्ह ! यो हि दृष्टो दर्शनफलं साधयति स दर्शनार्हो नेतरः। किं कारणमागच्छानि? उच्यते। इमे सोमा अरंकृताः। अलंशब्दस्य पर्याप्त्यर्थस्य भूषणार्थस्य वेदम्। पर्याप्ताः कृताः, भूषिताः कृता इति वा। बहवः कृताः। श्रयणादिभिर्वा संस्कारैः संस्कृता इत्यर्थः। तेषां तान् एकदेशान् वा स्वांशलक्षणान् पाहि पिब। अतः सप्रयोजनत्वादागमनस्य श्रुधि शृणु हवम् आह्वानम्। माऽत्रानादरं कृथाः॥ १॥

वे० मा०—वायवायाहि दर्शनीय इमे सोमाः पवमानाभिषवाभ्यामलङ्कृतास्तान् पिब शृणु च नो ह्वानम्॥ १॥

द्वितीयामृचमाह—

वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः।
सुतसोमा अहर्विदः॥२॥

वायो इति। उक्थेभिः। जरन्ते। त्वाम्। अच्छ। जरितारः।
सुतऽसोमाः। अहःऽविदः॥२॥

हे वायो जरितारः=स्तोतार ऋत्विग्यजमानाः, त्वामच्छ त्वामभिलक्ष्य उक्थेभिः= आज्यप्रउगादिशस्त्रैः, जरन्ते=स्तुवन्ति। कीदृशाः? सुतसोमाः=अभिषुतेन सोमेनोपेताः। अहर्विदः। अहःशब्द एकेनाह्ना निष्पाद्येऽग्निष्टोमादिक्रतौ वैदिकव्यवहारेण प्रसिद्धः। क्रतुभिज्ञा इत्यर्थः॥

"अर्चति गायति" इत्यादिषु चतुश्चत्वारिंशत्स्वर्चतिकर्मसु धातुषु "जरते ह्वयति" इति पठितम्। स्तुतेरप्यर्चनाविशेषत्वादौचित्येनात्र स्तुत्यर्थो जरतिधातुः। अच्छशब्दस्य संहितायाम् "निपातस्य च" (पा० ६. ३. १३६) इति दीर्घः। सुतसोमा इत्यत्र

पररूपेण निष्पन्नस्य तस्य तथा विभक्तिनिमित्तस्यैकारादेशस्य च स्थानिवत्त्वेन पूर्ववत्स्वरः। पाहि। तव याहिपदवत्स्वराः। श्रुधि। श्रुधातोरन्तोदात्तत्वस्य परेण सिप्स्थानिकेन हिनाऽपिताऽत एवोदात्तेन बाधे तस्य ध्यादेशे तस्यापि स्थानिवत्त्वेनोदात्तत्वे ऽन्तोदात्तं पदम्। हवम्। ह्वेञ्धातोरन्तस्योदात्तत्वे ऽपः प्रत्ययस्य पित्त्वादनुदात्तत्वम्। वकारस्य संप्रसारणे तस्यानुदात्तस्थानिकत्वेनानुदात्तत्वे ततः परपूर्वत्वे एकादेशस्योदात्तानुदात्तोभयस्थानिकतयोदात्तत्वम्। तत्र हुकारोकारस्य गुणे ऽवादेशे च स्थानिवत्त्वादुदात्तत्वमेव। अमः प्रत्ययस्य द्वितीयैकवचनस्यानुदात्तत्वादमिपूर्व्व इतिपूर्वरूपैकादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वेन हवमिति पदमाद्युदात्तम्। अन्त्यस्याकारस्य पदतादशायामुदात्तात्परत्वेन स्वरितत्वम्।

बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः (पा० ६, २, १)। अहर्विद इत्यत्र समासस्वरं (पा० ६, १, २२३) बाधित्वा "तत्पुरुषे तुल्यार्थ" इत्यादिना (पा० ६, २, २,) द्वितीयापूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादत्वेन "गतिकारकोपपदात्कृत्" (पा० ६, २, १३९) इति कृदुत्तरपदप्रकृतिस्वरः ॥ २ ॥*

स्क०—उक्थशब्दस्तोत्रवचनः। उक्थैः स्तोत्रैर्जरन्ते वायो त्वामच्छ अभि जरन्ते अभिष्टुवन्ति त्वां जरितारः स्तोतारः। कीदृशाः? सुतसोमाः कृतसोमाभिषवाः। अहर्विदः। अहःशब्दोऽत्राह्ना यः समाप्यते ज्योतिष्टोमादिः सोमयागस्तस्य वाचकः, न दिवसस्य। प्रक्रान्तस्य ज्योतिष्टोमादेरहःपरिनियतस्य सोमयागस्य ज्ञातार इत्यर्थः ॥ २ ॥

वे० मा०—वायो त्वां प्रति शस्त्रैः स्तुवन्ति स्तोतारोऽभिषुतसोमा अहर्विदो लब्धाहर्मुखाः ॥ २ ॥

---

* वायो। अस्य स्वरः पूर्ववत्। उक्थेभिः। वच्धातोः पातृदिवचीत्यादिना थक्प्रत्ययः। तत्र धातोरन्तोदात्तस्य थकःप्रत्ययस्योदात्तत्वेन बाधेऽन्तोदात्त उक्थशब्दः। शेषनिघातेनाद्यस्यानुदात्तत्वे वच्धातोर्वकारस्य संप्रसारणे तस्यानुदात्तत्वं व्यञ्जनस्थानिकत्वात्। ततः संप्रसारणपरपूर्वत्वस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। भिसस्तु सुप्त्वादनुदात्तत्वम्। तन्निमित्तकस्यैकारस्य स्थानिवत्त्वेनोदात्तत्वम्। तत्राद्यस्योदात्तपरत्वादनुदात्तत्वेनैवावस्थानम्। भिसस्तु उदात्तात्परत्वात्स्वरितत्वम्। जरन्ते। जरतेर्धातोरन्तस्योदात्तत्वम्। ततः शपः पित्त्वादनुदात्तत्वं ततः परस्य च ते इत्यस्यापि तास्यनुदात्तेदित्यादिनाऽनुदात्तत्वम्। एवं सत्याद्युदात्तं पदम्। तस्य संहितायामतिङन्तपदात्परत्वात्सर्वानुदात्तत्वम्। स्वरितात्परत्वाच्चाद्ययोः स्वरयोः प्रचितत्वम्, अन्त्यस्यतु उदात्तपरत्वेनानुदात्ततरत्वम्। पदपाठेतु सर्वेषामनुदात्तता। त्वाम्। युष्मच्छब्दस्य फिषोऽन्त इत्यन्तोदात्तत्वे तस्य मपर्यन्तभागस्य त्वादेशेऽनुदात्ते ऽद्भागस्योदात्तस्य अमिपरतो लोपेऽमः प्रत्ययस्य सुप्त्वेऽपि अनुदात्तस्य च यत्रोदात्तलोप इति उदात्तलोपनिमित्तत्वेनोदात्तत्वेऽमिपूर्व इत्येकादेशस्याप्युदात्तस्थानिकत्त्वेनोदात्तता। अच्छ। निपातत्वादाद्युदात्तः। शेषनिघातेनान्तोदात्तत्वे तस्योदात्तात्परत्वात्स्वरितत्वम्। जरितारः। जॄधातोस्तृचि धातोः स्वरस्य प्रत्ययस्वरेण चित्स्वरेण वा निवृत्तावन्तोदात्तो जरितृशब्दः। इटस्त्वागमत्वादनुदात्तता। गुणाकारस्य तु स्थानिवत्त्वेनानुदात्तता। ततो जसि तस्य सुप्त्वादनुदात्तत्वम्। ऋकारस्य गुणे दीर्घे च स्थानिवत्त्वादाकार उदात्त इति मध्योदात्तं जरितार इति पदम्। रेफाकारस्य उदात्तात्परत्वात्स्वरितत्वम्। सुतसोमाः। सुतशब्दे धातोः स्वरस्य प्रत्ययस्वरेण बाधादन्तोदात्तत्वम्। सोमशब्दे च निदन्तात्वादाद्युदात्तत्वम्। तत उभयोर्बहुव्रीहिसमासे समासान्तोदात्तस्य बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरेण बाधे सुतशब्दस्वर एव समासेऽप्यवतिष्ठते। अवशिष्टानां शेषत्वान्निघाते सोशब्दीयौकारस्योदात्तात्परत्वात्स्वरितत्वं माकारस्य च ततः परत्वात्प्रचयः। अहर्विदः। अहधातोः कनिनि प्रत्यये नित्त्वादाद्युदात्तत्वं व्युत्पत्तिपक्षे, अव्युत्पत्तिपक्षे च फिष इत्यन्तोदात्तस्य नब्विषयस्यानिसन्तस्येत्यनेनापवादाद् आद्युदात्तत्वम्। विद्धातोः क्विपि धातुस्वरेण विच्छब्दोऽन्तोदात्तः। तत उभयोः समासे समासान्तोदात्तस्य बाधेन तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यनेन द्वितीयापूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादेन गतिकारकेत्यनेन कृदुत्तरपदप्रकृतिस्वरे ततोऽहर्विद इति पदे वीकारेकार उदात्तः प्रथमावर्चौ शेषनिघातेनानुदात्तौ। जसः सुप्त्वात्पूर्ववदनुदात्तता। तस्योदात्तात्परत्वात्स्वरितत्वम्।

तृतीयामृचमाह —

वायो तव प्रपृञ्चती धेना जिगाति दाशुषे।
उरूची सोमपीतये ॥३॥

वायो इति। तव। प्रऽपृञ्चती। धेना। जिगाति। दाशुषे।
उरूची। सोमऽपीतये ॥३॥

हे वायो तव धेना = वाक् सोमपीतये = सोमपानार्थं दाशुषे = दाश्वांसं दत्तवन्तं यजमानं जिगाति = गच्छति। 'हे यजमान त्वया दत्तं सोमं पास्यामि' इत्येवं वायुर्ब्रूत इत्यर्थः। कीदृशी धेना? प्रपृञ्चती = प्रकर्षेण सोमसम्पर्कं कुर्वती। सोमगुणं वर्णयन्तीत्यर्थः। उरूची = उरून्बहून्यजमानान् गच्छन्ती। ये ये सोमयाजिनस्तान् सर्वान्वर्णयन्तीत्यर्थः।

प्रपृञ्चतीत्यत्र "शतुरनुमः" (पा० ६. १. १७३) इति ङीबुदात्तः। "श्लोको धारा" इत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु "गणः, धेना, ग्ना" इति पठितम्। "वर्तते, अयते" इत्यादिषु द्वाविंशाधिकशतसंख्येषु गतिकर्मसु "गाति, जिगाति" इति पठितम्। दाशुष इत्यत्र "गत्यर्थकर्मणि" (पा० २. ३. १२.) इति चतुर्थी। उरूचीत्यत्र गौरादित्वेन (पा० ४. १. ४१) ङीषि कृते प्रत्ययस्वरः (पा० ३।१।३)। सोमपीतय इत्यत्र बहुव्रीहित्वाभावेऽपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः ॥ ३ ॥*

---

* वायो। अत्र स्वरः पूर्ववत्। तव। युष्मच्छब्दस्य फिषोऽन्त उदात्तः। ततः षष्ठ्येकवचने ङस्। तस्य सुप्त्वादनुदात्तता। तस्मिन् परतो मपर्यन्तभागस्य तवादेशः सोऽनुदात्तः स्थानिवत्त्वात्। ततोऽद्भागस्य लोपे ङसोऽनुदात्तस्याल्लोपनिमित्तत्वेनानुदात्तस्य च यत्रोदात्तलोप इत्युदात्तत्वे प्राप्ते युष्मदस्मदोर्ङसि इत्यनेनाद्युदात्तत्वम्। ततः शेषनिघातेन तवशब्दस्यान्त्यानुदात्तत्वं तस्यान्तानुदात्तस्योदात्तात्परत्वात्स्वरितता। प्रपृञ्चती। पृची धातोः शतरि प्रशब्देन समासे ङीप्। अत्र धातोः स्वरस्य शतृप्रत्ययस्वरेण बाधे पृञ्चच्छब्दोऽन्तोदात्तः। ततो निपातेन निपातत्वादुपसर्गत्वाद्वाद्युदात्तेन प्रशब्देन समासे समासान्तोदात्तत्वस्य गतिकारकेत्यनेनोत्तरपदप्रकृतिस्वरत्वस्य च प्राप्तौ तदपवादेन गतिरनन्तर इति गतेः स्वरे प्राप्ते शतुरनुम इति ङीप उदात्तत्वविधानादवशिष्टानां शेषनिघातेनान्तोदात्तं पदम्। संहितायामाद्ययोः स्वरयोः प्रचितत्वं स्वरितात्परत्वात्, अन्त्यस्य सन्नतरत्वमुदात्तपरत्वात्। पदपाठे तु आद्यानां त्रयाणामप्यनुदात्तत्वम्। धेना। धिधातोः बाहुलकान्नप्रत्ययः। धिनोतीति धेना। धेट इत्वेत्यनेन वा नप्रत्ययः। तत्र प्रत्ययस्वरावशेषे प्राप्ते निघण्टौ धेनेत्याद्युदात्तपाठादाद्युदात्तता। बाहुलकान्निद्वा प्रत्ययः कल्प्यः। तथा सति नित्त्वादाद्युदात्तता।

स्क०—हे वायो ! तवावयवभूता प्रपृञ्चती । सामर्थ्यात्सोमसम्पर्के वर्तते न यत्र क्वचित् । प्रकर्षेण सोममभिलषन्तीत्यर्थः । प्रपृञ्चती प्रकर्षेण स्तूयमानेति वा । धेना जिह्वा ! किं करोति ? उच्यते । जिगाति गच्छति । दाशुषे दाश्वांसं यजमानं प्रतीत्यर्थः । कीदृशी ? उरूची बहून् यजमानान् प्रति गन्त्री । अवयवभूतजिह्वागमनेन अवयविनो वायोरेव गमनं लक्ष्यते । वायुर्गच्छतीत्यर्थः । किमर्थम् ? सोमपीतये सोमपानार्थम् ॥ ३ ॥

वे० मा०—वायो धनेन स्तोतॄन् प्रपृञ्चती संयोजयन्ती शतं युष्मभ्यं सहस्रं युष्मभ्यमित्येवं बह्वञ्चती तव वाग् दाश्वांसमुद्दिश्य सोमपानार्थं निष्क्रामति ॥ ३ ॥

ऐन्द्रवायवे तृचे प्रथमामृचमाह—

इन्द्र॑वायू इ॒मे सु॒ता उप॒ प्रयो॑भि॒रा ग॑तम् ।
इन्द॑वो वामु॒शन्ति॒ हि ॥४॥

इन्द्र॑वायू॒ इति॑ । इ॒मे । सु॒ताः । उप॑ । प्रयः॑ऽभिः । आ । ग॒त॒म् ।
इन्द॑वः । वा॒म् । उ॒शन्ति॑ । हि ॥४॥

एतस्या ऋच ऐन्द्रवायवग्रहे द्वितीयपुरोऽनुवाक्यारूपेण विशेषविनियोगः पूर्वमेवोक्तः । हे इन्द्रवायू भवदर्थम् इमे = सोमाः सुताः = अभिषुताः । तस्माद्युवां प्रयोभिरन्नैरस्मभ्यं दातव्यैः सह, उपागतम् = अस्मत्समीपं प्रत्यागच्छतम् । हि यस्माद् इन्दवः = सोमा वां युवाम् उशन्ति = कामयन्ते । तस्मादागमनमुचितम् ।

वृषादिपाठकल्पनेन वाऽऽद्युदात्तता । शेषनिघातेनान्तस्यानुदात्तस्योदात्तादिति स्वरितः संहितायाम् । जिगाति । गा स्तुताविरयस्य धातूनामनेकार्थत्वाद् गत्यर्थत्वेन प्रयोगः । अत्र धातोरन्तोदात्तस्य तिपि प्रत्यये तस्यानुदात्तत्वेन शेषे प्राप्तेऽभ्यस्तानामादिरित्यादेरुदात्तता पदतादशायाम् । अत्रातिङः पदात्परत्वात्सर्वानुदात्तः । तस्य पदपाठे सर्वानुदात्तत्वेन श्रवणम् । संहितायां तु स्वरितात्परत्वात्प्रचयः । दाशुषे । दाशृधातोः क्वसुप्रत्ययः । तत्र प्रत्ययस्वरः । ततश्चतुर्थ्येकवचनङेप्रत्यये तन्निमित्तकसंप्रसारणे पूर्वरूपे च निष्पन्नस्योदात्तत्वम् स्थानिवत्त्वेनेति मध्योदात्तं पदम् । अन्त्यस्य शेषनिघातेनापि अनुदात्तस्योदात्तात्परत्वात्स्वरितत्वम् । उरूची । उरुशब्दोऽन्तोदात्तः प्रातिपदिकस्वरेण तदुपपदादञ्चेः क्विनि कृदुत्तरप्रकृतिस्वरेण धातोरुदात्तत्वस्य सतिशिष्टत्वे ततो गौरादित्वान् ङीपि प्रत्ययस्वरेणान्तोदात्तता । अथवा । उगित्वान्ङीपि तन्निमित्तेऽञ्चेरकारस्य लोपे उदात्तनिवृत्तिस्वरेण ङीप उदात्तता । सोमपीतये । सोमशब्दो निदन्तत्वादाद्युदात्तः पीतिशब्दे क्तिप्रत्ययस्योदात्तता चित्त्वात् । तत्र उभयोः षष्ठीसमासे समासान्तोदात्तस्य प्राप्तावपि व्यत्ययेनाद्युदात्तत्वम् । अवशिष्टानामनुदात्तत्वे मकाराकारस्य स्वरितत्वमुदात्तात्परत्वात् । परेषां प्रचयः ।

इन्द्रवायूशब्दस्यामन्त्रिताद्युदात्तत्वम्। प्रीणयन्ति भोक्तॄनिति प्रयांस्यन्नानि। प्रीञ् धातोरन्तर्भावितण्यर्थात् (पा० ३. १. २६) असुन्प्रत्यये सति नित्स्वरः। गमिधातोर्लोण्मध्यमपुरुषद्विवचने "बहुलं छन्दसि" (पा० २ ४. ७३) इति शपो लुकि सति "अनुदात्तोपदेश" इत्यादिना (पा० २ ४ ३७) मकारलोपः। ततो गतमिति भवति। "उन्दी क्लेदने" इति धातोः "उन्देरिच्चादेः" (उ० १. १३) इत्युन्प्रत्ययः। आद्यक्षरस्येकारादेशः। तत इन्दुशब्दस्य नित्स्वरः। सोमरसस्य द्रवत्वात् क्लेदनं सम्भवति। युष्मच्छब्दादशस्य वामित्येतस्य "अनुदात्तं सर्वमपादादौ" (पा ८।१।१८) इत्यनुदात्तः। उशन्तीत्यस्य निघाते "हि च" (पा० ८।१।३४) इति सूत्रेण प्रतिषिद्धे सति प्रत्ययस्वरः (पा. ३।१।३)। हिशब्दस्य निपातस्वरः (फि. ३।१२) ॥ ४ ॥*

स्क०—हे इन्द्रवायू इमे सुता अभिषुताः सोमाः। एतज्ज्ञात्वा उप प्रयोभिरागतम्। प्रकर्षेण गन्तृभिरत्यन्तं शीघ्रैरश्वैरागच्छतम्। प्रयःशब्दोऽन्ननामसु पठितोऽन्नपरोऽपि अत्र अश्वनाम। इमे अभिषुताः सोमा न च केवलाः। किं तर्हि? सवनीयपुरोडाशादिभिरन्नैस्सहेति वा। प्रयोऽन्नमेव वा। अथवा उपागच्छतमित्येतदपेक्ष एव सहयोगः। अन्नैः सहोपागच्छतम्। मह्यं यानि दातव्यानि अन्नानि तानि गृहीत्वाऽऽगच्छतम् इत्यर्थः। कस्मात्? इन्दवो वामुशन्ति

* इन्द्रवायू। इन्द्रशब्दस्य रन्नन्तत्वान्नित्त्वेनाद्युदात्तता। वायुशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वम् शेषनिघातश्चोभयत्र। ततो देवताद्वन्द्वे समासस्यान्तोदात्तत्वे शेषनिघातः। ततो द्विवचने पूर्वसवर्णदीर्घस्य स्थानिवत्त्वेनोदात्तत्वम्। तस्य प्रगृह्यत्वबोधनाय पदपाठे इतिशब्दयुतता। इमे। अस्य स्वरः पूर्ववत्। सुताः। प्रत्ययस्वरः। उप। निपातत्वादाद्युदात्तत्वम्। प्रयोभिः। प्रीधातोरसुन्। नित्त्वादाद्युदात्तः प्रयःशब्दः। ततो भिसः सुप्त्वादनुदात्तत्वेनाद्युदात्तं पदम्। तत्र यकारोत्तरवर्त्योकारस्योदात्तात्परत्वात् स्वरितत्वम्। संहितायां भिस उदात्तपरत्वेनानुदात्ततरत्वम्। आ। निपातस्वरः। गतम्। गम्धातोः स्वरोऽन्तोदात्तः। ततो लोटो मध्यमद्विवचनस्य तम्प्रत्ययस्य प्रत्ययाद्युदात्तत्वम्। मध्यगतस्य शपो लुक् बाहुलकादिति न तास्यनुदात्तेदिति प्रवर्तते। ततो गतंपदस्यातिङन्तपदात्परत्वात्सर्वनिघातः। इन्दवः। उन्देरिच्चेत्यनेनेन्दिधातोरुन्प्रत्यय आदेरिकारश्च। तत्र धातुस्वरं बाधित्वा प्राप्तस्य प्रत्ययस्वरस्य नित्स्वरेण बाधादाद्युदात्तं पदम्। ततः प्रथमाबहुवचनजस्प्रत्ययस्य सुप्त्वादनुदात्तत्वेन तन्निमित्तकगुणादेशस्यापि अनुदात्तोकारस्थानिकत्वेनानुदात्तत्वे तत्स्थानिकस्यावादेशस्यापि तद्वदेवानुदात्तत्वम्। तत्र पदसंहितादशायामुदात्तात्परत्वादकाराकारस्य स्वरितता वकाराकारस्य तत्स्थानिकस्य संहितादशायामोकारस्यापि प्रचयस्वरः। वाम्। युष्मदः स्थानेऽनुदात्तो वामादेश इति अनुदात्तत्वम्। तस्य संहितायां प्रचयः। उशन्ति। वश्धातोर्लटि सौ अन्तादेशे संप्रसारणे रूपम्। तत्र धातोः स्वरस्य प्रत्ययाद्युदात्तत्वेन बाधान्मध्योदात्तं पदम्। तस्य अतिङन्तात् परत्वेऽपि नानुदात्तत्वम्, हिचेति तत्प्रतिषेधात्। हिशब्दे निपातस्वरः।

हि। हि शब्दो यस्मादर्थे यस्मादिन्द्रवायू एते सोमा वां युवाम् उशन्ति कामयन्ते वयमिन्द्रवायुभ्यां प्रीयेमहीत्येवम्। तस्मादुपागच्छतम् ॥ ४ ॥

वे० मा०—इन्द्रवायू! इमे सोमाः सुता अस्माकं प्रदित्सितैरन्नैः सहोपागच्छतम्। एते सोमा वां कामयन्ते हि ॥ ४ ॥

द्वितीयामृचमाह—

वाय॒विन्द्र॑श्च चेतथः सु॒ताना॑ं वाजिनीवसू।

तावा या॑तमुप॑ द्र॒वत् ॥५॥

वायो॒ इति॑। इन्द्रः॑। च॒। चे॒त॒थः॒। सु॒ताना॑म्। वा॒जि॒नी॒व॒सू॒

इति॑ वाजिनीऽवसू।

तौ। आ। या॒त॒म्। उप॑। द्र॒वत्॒ ॥५॥

अत्र चकारेणान्यः समुच्चीयते। संनिहितत्वाद्वायुरेव। हे वायो त्वम्, इन्द्रश्च युवामुभौ सुतानाम्—अभिषुतान्सोमान् चेतथः=जानीथः। यद्वा। अभिषुतानां सोमानां विशेषमित्यध्याहारः। कीदृशौ युवाम्? वाजिनीवसू। वाजिनीशब्दो यद्यप्युषोनामसु पठितस्तथाप्यत्रासंभवान्न गृह्यते। वाजोऽन्नम्। तद्यस्यां हविःसन्ततावस्ति सा वाजिनी। तस्यां वसत इति तौ वाजिनीवसू। आमन्त्रितत्वादनुदात्तः (पा ८।१।१९)। तौ—तथाविधौ युवां द्रवत्=क्षिप्रम् उप—समीप आयातम्=आगच्छतम्।

षड्विंशतिसंख्याकेषु क्षिप्रनामसु "नु, मक्षु, द्रवद्" इति पठितम्। तत्र फिट्स्वरः। (फि. १।१) ॥ ५ ॥*

इति प्रथमस्य प्रथमे तृतीयो वर्गः ॥

---

* वायो। अस्य स्वरः पूर्ववत्। इन्द्रः। रन्प्रत्ययान्तत्वान्नित्स्वरेणाद्युदात्तत्वं शेषनिघातेनान्तोऽनुदात्तस्तस्योदात्तात्परत्वात्स्वरितः। च। चादयोऽनुदात्ता इत्यनुदात्तत्वम्। चेतथः। चितधातोर्लटो मध्यमद्विवचनम्। तत्र धातोः स्वरस्य थसः प्रत्ययस्वरेण बाधः प्राप्तः परन्तु तस्य लसार्वधातुकस्वरेणानुदात्तत्वेन धातुस्वरावशेषे प्राप्ते संहितायां तिङ्ङतिङ इति सर्वानुदात्तत्वं तस्य संहितायां प्रचयः। सुतशब्दस्य प्रत्ययस्वरेणान्तोदात्तत्वम् ततो नामि तस्य सुप्त्वादनुदात्तत्वे तन्निमित्ते दीर्घे च स्थानिवत्त्वेनोदात्तत्वे सुतानामितिमध्योदात्तं पदम्। वाजिनीवसू। वाधातोर्णिजन्तात्पुंसि सञ्ज्ञायामितिघप्रत्यये वो विधूनन इति जुगागमे वाजशब्दो निष्पद्यते

स्क०—यौ हे वायो ! त्वं चेन्द्रश्च चेतथो जानीथः। किम्? सुतानाम्। द्वितीयार्थे षष्ठी। शेषमिति शेषो वा। सुतान् सोमान, सुतानां सोमानां शेषं वा स्वांशम्। वाजिनीवसू। वाजिनीत्येतदिहासम्भवान्नोषानाम। किं तर्हि? यौगिकम्। वाजो हविर्लक्षणमन्नं तद्यस्यामस्ति सा वाजिनी यागसन्ततिः। तद्वनौ। हविष्मद्यागसन्ततिधनावित्यर्थः। अथवा वाजो वेगो बलं वा तद्वती वाजिनी सेना तद्वनौ। वेगबलयोरन्यतरेण युक्तया सेनयोपेतावित्यर्थः। तावायातमिति उपागच्छतम्। द्रवत् क्षिप्रम् ॥ ५ ॥

॥ इति स्कन्दस्वामिमन्त्रभाष्यार्थे प्रथमस्य प्रथमे तृतीयो वर्गः ॥

वे० मा०—वायो ! त्वं चेन्द्रश्च दूरस्थावेव सुतान् सोमान् जानीथः। तौ क्षिप्रमुपागच्छतमन्नेन वासयितारौ वाजिनीवसू इति ॥ ५ ॥

वेङ्कटमाधवीये प्रथमस्य प्रथमे तृतीयो वर्गः ॥

ऐन्द्रवायवे तृचे तृतीयामृचमाह—

वाय॒विन्द्र॑श्च सुन्व॒त आ या॑त॒मुप॑ निष्कृ॒तम्।

म॒क्ष्वि१॒॑त्था धि॒या न॑रा ॥६॥

वायो॒ इति॑। इन्द्रः॑। च॒। सु॒न्व॒तः। आ। या॒त॒म्। उप॑। निःऽकृ॒तम्।

म॒क्षु। इ॒त्था। धि॒या। न॒रा ॥६॥

हे वायो त्वमिन्द्रश्च सुन्वतः—सोमाभिषवं कुर्वतो यजमानस्य निष्कृतम्—संस्कृतं संस्कर्तारं वा सोममुपायातम्—आगच्छतम्। नरा—हे नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ। युवयोरागतयोश्च सतोर्धियाऽमुना कर्मणा मक्षु त्वरया संस्कारः संपत्स्यते। इत्था—सत्यम् ॥

तत्र वाधातोः स्वरस्य प्रत्ययस्वरेण बाधे प्राप्ते वृषादित्वेनाद्युदात्तो वाजशब्दस्ततो मत्वर्थ इनिप्रत्यये तस्य प्रत्ययत्वेनाद्युदात्तत्वे ततो नान्तत्वान्ङीपि तस्य पित्त्वाद्वाजिनीशब्दो मध्योदात्तः, ततो वसुशब्देन बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण वाजिनीशब्दस्यैव स्वरः समासे शिष्यतेऽवशिष्टानां शेषनिघातेनानुदात्तत्वे वाकारोऽनुदात्त उदात्तपरत्वात् नीकारः स्वरित उदात्तात्परत्वात्, वसुशब्दावयवयोस्तु प्रचितः। इति प्राप्ते ततस्संबोधनप्रथमाद्विवचनौकारस्य सुप्त्वादनुदात्तस्य पूर्वसवर्णदीर्घैकादेशे तस्याप्यनुदात्तस्थानिकतयानुदात्तत्वे ततस्तस्यामन्त्रितत्वेन पदात्परत्वेन सर्वानुदात्तत्वम्। तस्य संहितायां प्रचयस्वरः। तौ। तच्छब्दस्य फिषोऽन्त इत्यन्तोदात्तत्व औकारस्य सुप्त्वात्यदाद्यत्वस्य व्यञ्जनस्थानिकतया स्थानिवत्त्वादनुदात्तत्वे त + अ + औ इत्यत्रैकादेशद्वयस्यापि उदात्तेन साहित्यादुदात्तत्वम्। आ। निपातस्वरः पूर्ववत्। उप। अत्रापि तथैव। द्रवत्। अस्य प्रातिपदिकस्वरेण अन्तोदात्तत्वम्।

वायो इत्यस्य "आमन्त्रितस्य" (पा. ६।१।१८) इति पाष्ठिकमाद्युदात्तत्वम्। इन्द्रशब्द "ऋजेन्द्र" इत्यादिना (उ. २. २८.) रन्प्रत्ययान्तत्वेन निपातितो "ञ्नित्यादिर्नित्यम्" (पा. ६. १. १९७.) इत्याद्युदात्तः। चशब्दः "चादयोऽनुदात्ताः" (फि ४. १६.) इत्यनुदात्तः। सुन्वत इत्यत्र "शतुरनुमो नद्यजादी" (पा. ६. १. १७३.) इति विभक्तेरुदात्तत्वम्। "निरित्येष समित्येतस्य स्थाने" इति यास्कः (नि. १२।७)। कृतशब्द आदिकर्मणि कर्तरि क्तः (पा ३. ४. ७१.)। संस्कर्तुं प्रवृत्त इत्यर्थः। "कुगतिप्रादयः" (पा. २. २. १८) इति समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते "थाथघञ्क्ताजबित्रकाणाम्" (पा. ६. २. १४४.) इत्यन्तोदात्तः। "गतिरनन्तरः" (पा. ६. २. ४९) इति तु निस उदात्तत्वं न भवति। तद्धि कर्मणि क्ते विहितम् (पा. ६. २. ४८)। निष्करोतीति निष्कृदिति क्विबन्तव्याख्याने तु "गतिकारकोपपदात्कृत्" (पा. ६.२.१३९) इत्यृकार उदात्तः स्यात्। धिया। "सावेकाचस्तृतीयादिः" (पा ६.१.१६८.) इति विभक्तिरुदात्ता। नरा। "सुपां सुलुक्" (पा ७।१।३९) इत्यादिना संबोधनद्विवचनस्य डादेशः। पदात्परत्वाद् "आमन्त्रितस्य" (पा. ८।१।१९) इत्याष्टमिको निघातः॥ ६॥*

स्क०—हे वायो! इन्द्रश्च त्वं च सुन्वतः सोममभिषुण्वतः यजमानस्य स्वभूतम्। निष्कृतं संस्कृतं वेद्याख्यप्रदेशं मक्षु उपायातम्। उपागच्छतम्। इत्थाऽमुतोऽन्तरिक्षात्स्वस्मात्स्थानात् धिया कर्मणा हेतुना। अस्मदीययागकर्म परिसमापयितुमित्यर्थः। अथवा इत्था सत्येन भवता-

* वायो। अत्र स्वरः पूर्ववत्। इन्द्रः, च। अत्रापि पूर्ववदेव स्वरः। सुन्वतः। सुधातोः शता मध्ये श्नुः। धातोः स्वरस्य शतुः प्रत्ययस्य स्वरेण निवृत्तौ श्नोः स्वरस्यापि निवृत्त्या सुन्वन्नित्यन्तोदात्तं पदं ततो ङसि तस्य सुप्त्वादनुदात्तत्वेन सुन्वच्छब्दस्यैव स्वरस्यावशेषे प्राप्ते शतुरनुम इत्यनेन विभक्तेरुदात्तत्वेन तस्य निवृत्त्याऽन्तोदात्तत्वं सुन्वत इति पदस्य। आ। निपातस्वरः। यातम्। याधातोः स्वरस्य लोडादेशतम्प्रत्ययस्य स्वरेण बाधे तस्यावशेषे तिङ्ङतिङ इति सर्वानुदात्तत्वम्। तत्राद्यस्य स्वरितत्वमुदात्तात्परत्वात् परस्यानुदात्ततरत्वमुदात्तपरत्वात्। उप। निपातस्वरः। निष्कृतम्। अत्र निसो निपातत्वादुदात्तत्वम् कृतशब्दे प्रत्ययस्वरेण अन्तोदात्तत्वम्। ततः समासेऽव्ययपूर्वपदेति पूर्वपदप्रकृतिस्वरे प्राप्ते तद्बाधकेन थाथघञ्क्तेत्यनेनान्तोदात्तो निष्कृतशब्दः। अम्यपि पूर्वोक्तप्रक्रिययोदात्तत्वम्। मक्षुशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। इत्थाशब्दोऽपि तथैव। तत्र मक्षिवत्थाशब्दयोः संहितायाम् उदात्तस्वरितयणः स्वरितो वानुदात्तस्येति उदात्तमक्षूकारस्थानिकयणः परत्वेनेत्थाशब्दीयानुदात्तेकारस्य स्वरितत्वम्। तस्योदात्तपरत्वे सति कम्पेनानुदात्तस्य स्पष्टं श्रवणम्। धिया। धीशब्दस्य धातुस्वरेण प्रादिपदिकस्वरेण वान्तोदात्तत्वम् तृतीयैकवचने टाप्रत्यये परतः सावेकाच इत्यनेन तस्योदात्तत्वम्। नरा। संबोधनान्तत्वादाष्टमिक आमन्त्रितनिघातः। तस्य उदात्तात्परत्वान्नकाराकारः स्वरितः परवर्तीच प्रचितः। पदपाठे उभावप्यनुदात्तौ।

रविसंवादिना सर्वदैव युष्मत्सम्बद्धेन कर्मणा हेतुना। हे नरा देवानां च मनुष्यत्वासम्भवस्ततः सर्वत्र तदाकारत्वान्मनुष्यनामभिर्व्यपदेशः। मनुष्याकारौ। यथा मनुष्या हस्ताद्युपेतशरीरास्तद्वद्धस्ताद्युपेतशरीराविन्यर्थः ॥ ६ ॥

वे० मा०—वायविन्द्रश्च सुन्वतः संस्कृतं सोममुपागच्छत शीघ्रमित्थं क्रियमाणं कर्मन्नोद्दिश्य नेतारौ ॥ ६ ॥

"मित्रं हुवे" इति मैत्रावरुणस्तृचो (१)गवामयन आरम्भणीये चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणस्य स्तोत्रियः। तत्रैवाभिप्लवषडहेऽपि विनियुक्तः। तथा चाश्वलायनेन "चतुर्विंशे होता जनिष्ट" इत्यादिखण्डे "मित्रं वयं हवामहे, मित्रं हुवे पूतदक्षम्" (आ० ७. २.)

(१) सोमयागः सोमवल्ल्या रसं निष्कास्य तेन देवतोद्देशेन यागः। स च ज्योतिष्टोमशब्देन व्यवह्रियते। तस्याग्निष्टोम इत्यपि नामान्तरम्। तस्य सोमयागस्य सप्त अनुष्ठानप्रकारभेदा भवन्ति ये सोमसंस्थाशब्देन व्यवह्रियन्ते याज्ञिकैः। ते चेमे सप्त भवन्ति—अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रः, अप्तोर्यामः, वाजपेयश्चेति। तत्राग्निष्टोमस्य स्वरूपसङ्ग्रहः सङ्क्षेपेण ऋतुसङ्ग्रहकारैरेवं कृतः—

अथाग्निष्टोमसंस्थेन ज्योतिष्टोमेन याजयेत्।
स पूर्वमृत्विजो वृत्वा देवभूमिविनिश्चये ॥
दीक्षणीयां निर्वपेत्साऽपि पत्नीसंयाजसंस्थितिः।
कृते प्राचीनवंशेऽथ संस्कारा वपनादयः ॥
हुत्वा दीक्षाहुतीः कार्या दीक्षा कृष्णाजिनादिभिः।
दीक्षितो नियमैर्युक्तो भवेत्क्षीरव्रतादिभिः ॥
द्वादशाहं दीक्षितोऽथ भिक्षित्वा द्रव्यमानयेत्।
सोमं चर्मण्यवस्थाप्य विक्रमेत्सोमविक्रयी ॥
शंय्वन्ता प्रायणीया स्याद् गृह्णीयात्क्रयणीपदम्।
क्रीत्वा सोमं रथे क्षिप्त्वा प्राग्वंशाग्रे समानयेत् ॥
आतिथ्या निर्वपेत्सोममासन्द्यामुपसादयेत्।
आतिथ्येष्टिरिडान्ता स्यात्तानूनप्त्रमवद्यति ॥
दीक्षामवान्तरामेति प्रवर्ग्योपसदोः कृतिः।
दिनत्रये तत्कृतं स्याद्वेदिर्मध्यन्दिने भवेत् ॥
षट्त्रिंशत्पदर्दीर्घैषा प्राग्वंशात्पूर्वतः स्थिता।
प्रातः प्रवर्ग्यमुद्वास्य पश्चादुत्तरवेदितः ॥
शकटे द्वे हविर्धाने हविर्धानं च मण्डपम्।
पश्चात्सदस्तस्य मध्ये निखातौदुम्बरी मिता ॥
दक्षिणस्यानसोऽधस्ताद् गर्तानुपरवान् खनेत्।
विधाय फलकास्यान्तानग्रे कुर्यान्मृदा खरम् ॥

इत्यादि सूत्रितम्। तथा "अभिप्लवपृष्ठ्याहानि" इति खण्डे "परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे मित्रं हुवे पूतदक्षम्" (आ. ७. ५.) इति च ॥

निर्वपेद्धिष्ण्यगानग्नीषोमीयं पशुमाचरेत्।
प्रयुज्योचितपात्राणि दर्शवत्सर्वमाचरेत्॥
आज्यमासादिते वेद्या अन्ते यूपं समुच्छ्रयेत्।
यूपस्योच्छ्रयणादूर्ध्वं समाप्यस्य पशुं ततः॥
वैसर्जनानि हुत्वाऽग्निं सोमं ग्रावादि चानयेत्।
हविर्द्धाने स्थापयित्वा गृह्णीयाद्वसतीवरीः॥
प्रयुञ्ज्यात्सोमपात्राणि महारात्रे खरादिषु।
ग्रावस्तुत्स्थापिते सोमे पक्षिणां ध्वनिनः पुरा॥
स्यात्प्रातरनुवाकार्थमुपाकरणमादरात्।
वसतीवर्यपां प्राप्तौ प्रचारः स्याद्दधिग्रहे।
उपांशुदाभ्यौ हुत्वाऽथो महाभिषवमाचरेत्।
उपांशुमन्तर्यामं च हुत्वा रिक्तं तु सादयेत्।
अथैन्द्रवायवं पात्रे गृहीत्वा सादयेत् खरे।
यो मैत्रावरुणस्तन्तु श्रीणाति पयसा ग्रहम्।
शुक्रः श्रतो हिरण्येन श्रतो मन्थी तु सक्तुभिः।
गृहीत्वाऽऽग्रयणं गृह्णात्यतिग्राह्याभिधग्रहान्।
गृहीत्वोक्थ्यं ध्रुवो ग्राह्यः पवमानग्रहास्त्रयः।
पूतभृद्द्रोणकलशोऽपरश्चाधवनीयकः।
ते वहिष्पवमानाय प्रसर्पन्त्यत्र पञ्च ते।
गृहीत्वाऽऽश्विनमाग्नेयपशोः कुर्यादुपाकृतिम्।
सवनीयपुरोडाशैश्चरित्वा ह्यैन्द्रवायवम्।
हुत्वा ग्रहं द्वयोर्मैत्रावरुणाश्विनयोर्हुतिः।
शुक्रमन्थ्यादिकान् हुत्वा चमसानपि जुह्वति।
संरक्ष्यतु ग्रहैन्द्राग्नं सोमप्रतिगरस्ततः।
आज्यस्तोत्रेभ्य ऊर्ध्वं हि प्रातःसवनसंस्थितिः।
माध्यन्दिनेतु सवने पुरोडाशः पशोर्भवेत्।
ग्रहो मरुत्वतीयः स्यात्पवमानेन संस्तुतिः।
दधिघर्मे हुते दद्याद्दक्षिणास्ते यथायथम्।
मरुत्वतीयांस्तान् हुत्वा माहेन्द्रेण समाप्यते।
तृतीयसवनारम्भ आदित्यग्रहमाचरेत्।

तस्य मैत्रावरुणतृचस्य प्रथमामृचमाह--

मि॒त्रं हु॑वे पू॒तद॑क्षं॒ वरु॑णं च रि॒शाद॑सम् ।
धियं॑ घृ॒ताचीं॒ साध॑न्ता ॥७॥

मि॒त्रम् । हु॒वे॒ । पू॒तऽद॑क्षम् । वरु॑णम् । च॒ । रि॒शाद॑सम् ।
धिय॑म् । घृ॒ताची॑म् । साध॑न्ता ॥७॥

आर्भवेन स्तुवीताथो पश्वङ्गैः प्रचरत्ययम् ।
सावित्रवैश्वदेवाख्यौ ग्रहौ सौम्यचरुस्तथा ।
पात्नीवतग्रहादूर्ध्वं यज्ञायज्ञीयसंस्तवः ।
आग्निमारुतशस्त्रं स्याद् गृह्णीयाद्धारियोजनम् ।
समाप्ते सवने पश्चात्कुर्यादवभृथं ततः ।
कुर्यादुदयनीयेष्टिमनूबन्ध्यां यजेत गाम् ।
देविका निर्वपेद्देवसुवामपि यजूंष्यथ ।
उद्वास्य वेदिमाग्नेयमिष्ट्वाऽग्निष्टोमसंस्थितिः ॥ इति ।

अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणि भवन्ति । ततस्तोत्रशस्त्राधिक्येन यथायथमत्यग्निष्टोमादयः संस्था भवन्ति । तासां चैतासां संस्थानां सर्वेष्वपरेषु सोमयागेषु यथायथमतिदेशो भवति । सच सोमयाग एकेनैव यजमानेन षोडशभिर्ऋत्विग्भिरनुष्ठीयन्ते । केचन सोमयागा अनेकैर्यजमानैरेवर्त्विग्भिरनुष्ठीय-- ते च सत्र-मिति व्यवह्रियन्ते याज्ञिकैः । सत्रे षोडशावराश्चतुर्विंशतिपरमाः समानकल्पा अग्निहोत्रिण एव ऋत्विज एव यजमानाः सोमयागविशेषमनुतिष्ठन्ति । तल्लक्षणं तु मीमांसकैरेवमुक्तम्—बहुत्वोपेतोपैत्यास्तिचोदनाभ्यां ये यागा विधीयन्ते तत्सत्रमिति । यथा "गवामयनेन यन्ति", रात्रीरुपयन्ति" "अङ्गिरसः सत्रमासत" इत्यादिकम् । तच्च सत्रं द्विविधम् संवत्सरात्मकमसंवत्सरात्मकमिति । असंवत्सरात्मकं द्वादशाहरूपम् संवत्सरात्मकं गवामयनादित्यानामयनाङ्गिरसामयनप्रभृति । तेषां च सांवत्सरिकाणां सत्राणां गवामयनं प्रकृतिः । तत्र सर्वस्या इतिकर्तव्यतायाः कण्ठत उल्लेखात् । सत्रे चादौ द्वादश दीक्षा द्वादशोपसदोऽनुष्ठेया भवन्ति तत ऊर्ध्वं सोमयागप्रारम्भः । सच संवत्सरं यावत् प्रत्यहं भिन्नो भिन्नः । तादृशे उपसदुत्तरभाविनि संवत्सर-प्रारम्भदिनेऽनुष्ठेये चतुर्विंशस्तोमयुते सोमयागे आरम्भणीयमिति चतुर्विंशमहरिति व्यवहारो याज्ञिकानाम् । तस्य चाह्नः सोमयागरूपत्वेन सोमयागवद् अर्थाज् ज्योतिष्टोमादिवत्सवनत्रयं भवति । तत्र प्रातःसवने मैत्रावरुणनामकेनर्त्विजा प्रयोज्ये शस्त्रे मित्रं हुव इति तृचः स्तोत्रियत्वेन विनियुक्त इत्यर्थः ।

अभिप्लवेति । षड्भिर्दिनैरनुष्ठीयमानः सोमयागविशेषः षडहशब्देनोच्यते । षडहश्च द्विविधः अभिप्लवः पृष्ठ्य इति भेदात् । तयोर्लक्षणे आश्वलायनेनैवमुक्ते उभयतोज्योतिः षडहः, अन्यतरतोज्योतिः षडह इति । तत्र यत्र षडहे आदिमेऽन्त्ये च दिने अग्निष्टोमवदनुष्ठीयेते मध्यवर्तिदिनचतुष्टये च उक्थ्यनामकसोमयाग-वदनुष्ठीयते स उभयत्राग्निष्टोमरूपज्योतिर्युक्तत्वादुभयतोज्योतीरूपोऽभिप्लवः षळहः । पृष्ठ्येतु षळहे प्रथम-चतुर्थयोरह्नोरग्निष्टोमवदनुष्ठानमवशिष्टेषु उक्थ्यवदनुष्ठानं भवति तत्रैकस्मिन्नेव पार्श्वेऽग्निष्टोमयुक्तत्वेन अन्यतरतो

अहमस्मिन्कर्मणि हविःप्रदानाय पूतदक्षम् - पवित्रबलं मित्रं हुवे। तथा रिशादसम् = रिशानां हिंसकानामदसमत्तारं वरुणं हुवे - आह्वयामि। कीदृशौ मित्रावरुणौ? घृतम् = उदकमश्चति भूमिं प्रापयति या धीर्वर्षणकर्म तां घृताचीं धियं साधन्ता - साधयन्तौ कुर्वन्तौ।[२]

ज्योतीरूपत्वं तस्य। तत्राभिप्लवषडहेऽपि प्रातःसवने मैत्रावरुणशस्त्रे स्तोत्रियत्वेनैतस्य तृचस्य विनियोग इत्यभिप्रायेण भाष्यकृतोक्तम्। तत्रैवाभिप्लवेत्यादिना।

(२) वेदे स्तूयमानानेकदेवतानां मध्ये काश्चन समुदायरूपेण स्तूयन्ते यथाऽश्विनौ साध्या विश्वेदेवा मरुत इत्यादीनां समुदायरूपेण स्तवः, काश्चन च प्रत्येकं स्तूयन्ते यथा अदितिः अग्निः इन्द्रः पूषेत्यादयः। एषां मध्ये केचन च इतरसाहित्येन वा प्रत्येकं वा स्तूयन्ते यथा इन्द्रः, अग्निः, पूषेत्यादयः प्रत्येकं स्तूयन्ते, इन्द्राग्नी इन्द्रापूषणौ सोमारुद्रौ इत्यादिनेतरसाहित्येनापि तथेमौ मित्रावरुणावपि मित्रो वरुण इत्येवं प्रत्येकरूपेणापि स्तूयेते मित्रावरुणाविति समुदितभावेनापि। तत्र मित्रावरुणयोर्वर्णने बहुलोंऽशः समो भवति इति समुदितभावेन बहुला वर्णना दृश्यते। तत्रेमौ मित्रावरुणौ काविति विचारे निरुक्तकारः मित्रस्य मध्यमस्थानत्वं प्रमीते-स्त्रायते इत्यादिवर्णनेन, वरुणस्य च मध्यमस्थानत्वं द्योलोकस्थानत्वं चेति वर्णनेन चेन्द्राभिन्नत्वमादित्याभिन्नत्वं प्रदर्शयामास। मैत्रावरुणानि सूक्तानि चेत्पर्यालोच्येरन् मित्रावरुणयोरादित्याभिन्नत्वमेव स्फुटीभवेत्। केवल-मियान् विशेषः मण्डलोदयाप्राग्वर्तिकालोपाधित्वेन मित्रत्वमस्तोत्तरकालोपाधिना वरुणत्वम्। अतएव मित्रस्य उदयप्राक्कालिकत्वेन ततः परस्तान्मण्डलस्योदयेन तस्य उत्पत्तौ कारणत्ववचनं सुशकं भवति। यथा पुत्रतः पूर्व-कालवर्ती पिता पुत्रस्य कारणमेवं तत्सामान्येन मण्डलात्मनो दक्षस्य पितृत्वं मित्रे सम्भवति। मण्डलं पूर्वस्मिन्दिने वर्त्तमानं भास्वरमासीत् ततस्तस्य रात्रावदर्शनेन मलिनत्वमिवेति मत्वा पुनरुदयकाले मलिनत्व-निराकारणेन शुद्धत्वसंपादनं मित्रेण क्रियत इति बोधनाभिप्रायेण तस्य पूतदक्षमिति विशेषणमुच्यते। दक्षश्च मण्डलात्माऽऽदित्यस्तस्य प्राणिनां दिनप्रवर्तनेनोत्साहजनकत्वात्। किञ्च अदितेर्दक्षो अजायत दक्षाद्वदितिः परि इति मन्त्रे अदितेः सकाशतो दक्षस्योत्पादवर्णनेन दक्ष आदित्य एव। अदितिश्चोषाः। अतएवैतरेयब्राह्मणे प्रायणीयेष्टिविधानावसरेऽदितेर्देवसकाशतो वरेण प्रायणीयेष्टौ उदयनीयेष्टौ च तद्देवताकयागस्य लाभेन प्रायणीयेष्टौ तस्या देवत्वं पथ्यास्वस्तिशब्देनोक्त्वा तस्याः प्राग्दिग्विज्ञापिकात्वं च प्रतिपाद्य तत्रोपपत्तित्वेनोक्तम् "पथ्यां ह्येषोऽनुसञ्चरती"ति। एष आदित्यः पथ्यामनुसञ्चरति यत्र पथ्या गच्छति तत्र तदनु आदित्योऽपि गच्छतीति पथ्यानुसारित्वं तस्य। आदित्यश्चोषसमनुसञ्चरतीति प्रसिद्धम्। पथ्याया अदितिनामत्वात् पथ्यानुसारित्व-स्यादित्ये वचनात् उषोऽनुसारितायाश्चादित्यस्य लोके प्रसिद्धेः पथ्यायाः पूर्वदिक्ज्ञापकत्ववचनाच्चादितिरुषसो-ऽभिन्नेति विज्ञायते। अदितिशब्दस्य निर्वचनादौषससूक्तपर्यालोचनाच्चादितिरुषा एव। अदितिर्देवमातेत्युच्यते निरुक्ते, उषा देवानां मातेति वर्ण्यते सूक्ते। उषसः सकाशतो दक्षाख्यस्यादित्यस्य पूर्वोत्तरकालवर्तित्वोपाधि-नोत्पत्तिः। उषाश्च वस्तुत आदित्यत एव भवतीत्यभिप्रेत्य अदितेरिति मन्त्रे परस्परजन्यत्वमुक्तम्। एवं च दक्षशब्देनादित्यस्य ग्रहणात्तत्रोक्तरीत्या पवित्रीकरणाभिप्रायेण मित्रस्य पूतदक्षमिति विशेषणम्। मित्रश्च सवितृभिन्नः। अतएव सावित्रे सूक्ते उच्यते "उत मित्रो भवसि देव धर्मभिः" इति। सवितुश्चोदयात्प्राग्-वर्ती काल इति निरुक्तकारेणोच्यते यदा द्यौराकीर्णरश्मिरपहततमस्का स सावित्रः काल इति। सवितारमुद्दिश्य

मित्रशब्दः पुंलिङ्गः प्रातिपदिक (फि. १।१) स्वरेणान्तोदात्तः। हुव इति ह्वयतेः "बहुलं छन्दसि" (पा २।४।७२) इति शपो लुकि सति "ह्वः संप्रसारणम्" (पा ६. १. ३२) इत्यनुवृत्तौ "बहुलं छन्दसि" (पा. ६।१।३४) इति संप्रसारण उवङादेशः। "तिङ्ङतिङः" (पा. ८।१।२८)

कृकवाकोः पशुत्वस्य "कृकवाकुः सावित्र" इति विधानात्कृकवाकोर्नाम्नश्च सावित्रकर्मवचनाभिप्रायकत्वं तत्रोक्तम्। तेन कृकवाकुर्यदा विरौति ततः सावित्रः कालः प्रवर्तत इति भवति। विनाकमख्यत्सविता वरेण्योऽनुप्रयाणमुषसो विराजतीत्यत्रोषसः प्रयाणमनु विराजमानतयाः सवितुर्वचनात्सवितोषसः कालात् परवर्तीति काल इति विज्ञायते। एवं च सवित्रभिन्नत्वान्मित्रस्य सवितुश्चोदयप्राक्कालिकतया मित्रोऽपि तत्काल इति भवतीति तस्य दक्षपावकत्वमुच्यमानं संगच्छते। अतएव मित्रस्य दक्षजनकत्वं गृहीत्वा मैत्रावरुणसूक्ते उभयोर्दक्षपितृत्वं "सुदक्षा दक्षपितरा" इत्युच्यमानं संगच्छते। तत्रोभयोर्दक्षपितृत्वोक्तावपि केवलं तन्मित्रस्यैव भवति न तु वरुणस्य वरुणकालतः परस्तादादित्योदयाभावेन तत्पितृत्वस्य तत्र वर्णयितुमशक्यत्वात्, सामान्याभावात। मित्रसम्बन्धमात्रेऽपि द्वन्द्वेऽन्यतरपदार्थसम्बन्धमात्रेणोभयसम्बन्धं गृहीत्वा अजाविधनौ देवदत्तयज्ञदत्तौ इत्यादिप्रयोगवन्मित्रावरुणोभयसम्बन्धाभिप्रायेणोभयोर्दक्षपितृत्ववचनम्। आदित्यमण्डलस्य च हिरण्यरूपत्वम्, तत्रत्यान किरणान् स्थूणात्वेन च गृहीत्वा सहस्रस्थूणत्वं तादृशसहस्रस्थूणरूपस्य मण्डलस्य सहविधारकत्वमुभयोः "सहस्रस्थूणं बिभृथः सह द्वौ" इत्युच्यमानमुभयोर्मण्डलासमन्ताद्वर्तित्वे सम्भवतीति तयोस्तत्कालिकत्वं साधयति। अतएवासमन्ताद्वर्तित्वेन मण्डलगोप्तृत्ववर्णनमपि "ऋतस्य गोपा" इत्यत्रायं संगच्छते। एवं मण्डलसन्निकटकालवर्तितयैतयो रात्रिशेषभागेन रात्र्या आदिभागेन च सम्बन्धात्तैत्तिरीयसंहितायाम् "अगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति" इति रात्रिभागयुक्तत्ववर्णनं संगच्छते। अतएवैतयोर्ऋग्वेदे "दानुमत्या बृहन्तं गर्तमाशाते" इति वचनमुपपद्यते। दानुमती रात्रिस्तस्या निर्वचनादवगम्यते। तत्र दाधातोर्नुप्रत्ययो "दाभाभ्यांनु"रित्यौणादिकेन सूत्रेण। ततो दानुर्दानं तद्वतीति भवति। रात्र्या अवश्यायदानादिना निमित्तेन दानवत्त्वं रात्रिशब्दतोऽपि ज्ञायते। रात्रिशब्दो हि राधातोर्दानार्थाद् राशदिभ्यां त्रिप्निति सूत्रेण त्रिप्प्रत्ययेन निष्पद्यते अतस्तस्य दानवत्त्वमर्थः। किञ्च दानुशब्दे खण्डनार्थकदाधातोर्ग्रहणेऽपि दानुमतीशब्दस्य खण्डयुतेत्यर्थः। खण्डितेति यावत्। उषसोऽदितित्वमिव रात्रेर्दितित्वमुच्यते दितिः खण्डितेत्यर्थसाजात्येन दानुमती खण्डितेति विवरणेऽपि तस्या रात्रित्वं भवति। तदीयो गर्तः कार्ण्यं तत्रोक्तरीत्या रात्रिसम्बन्धेन व्याप्तिर्भवतीति। किञ्च ऋतं दिनमनृतं रात्रिस्तत्सेतुस्तन्मर्यादारूपत्वादिति गृहीत्वोच्यते "ता भूरिपाशावनृतस्य सेतू" इति। ततोऽपि रात्रिसबन्धितोक्तरीत्योदयादिकालिकता विज्ञायते। एवं च मित्रस्योदयप्राक्कालिकत्वं वरुणस्यास्तोत्तरकालिकत्वं भवति। उदयास्तमयकालपूर्वोत्तरकालयोश्च तेजोविशिष्टयादिकं समं भवतीति उभयोर्वर्णनं बहुलं सम भवति। तावतापि उदयपूर्वकालतः पश्चादादित्यस्योदयेनास्तोत्तरकालं चान्धकारस्य प्रवृत्त्योभयोः प्रतिस्वं वैशिष्ट्यं भवति। तच्च मित्रस्य पूतदक्षशब्देनोच्यते। वरुणस्यान्धकारप्रतिक्षेपकत्वम्। अतएव यावद्वरुणकालमन्धकारासम्बन्ध इति मत्वा तस्य रिशादस्त्वमुच्यते। एवं सत्येताभ्यां मित्रावरुणाभ्यामुदकवृष्टेरकरणाद् "धियं घृताचीं साधन्ता" इत्यत्र घृताचीशब्देन न वृष्टिरूपत्वमुच्यते, किंतु घृतशब्दस्य क्षरणेन निमित्तेनाज्योदकबोधकत्ववद्दीप्त्या निमित्तेन भावे निष्ठाप्रत्ययेन घृतं तेज उच्यते। तच्च पूर्वोक्तरीत्या मण्डलसन्निकटम्। तत्तेजः प्रापयन्ती धीः कर्म, तेजःप्रदानमित्यर्थः। साधन्ता साधयन्तौ। तेजःप्रदावित्यर्थ एव समुचितो भवति। एवं च बलादिपरत्वेन व्याख्यानं सूर्यैकदेवत्वपक्षे नोपपद्यते, मतान्तराभिप्रायेण भाष्यकृतः सोक्तिरिति दिक्।

इति निघातः। पूतशब्दः प्रत्ययस्वरेणान्तोदात्तः (पा ३।१।३)। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् (पा ६।२।१)। वरुणशब्दः "कृवृदारिभ्य उनन्" (उ ३ ५३) इत्युननप्रत्ययान्तो नित्त्वादाद्युदात्तः (पा ।१।१९७६)। रिशन्ति हिंसन्तीति रिशाः शत्रवः। "इगुपधज्ञाप्रीकिरः कः" (पा ३ १ १३५) इति कः। प्रत्ययस्वरेणोदात्तः (पा ३।१।३)। तानत्तीति रिशादाः। तम्। "सर्वधातुभ्योऽसुन्" (उ ४ १९०) इत्यसुनप्रत्ययः। नित्स्वरेणोत्तरपदमाद्युदात्तम् (पा ६।१।१९७)। कृदुत्तरपदप्रकृतिस्वरेण (पा ६।२।१३९) स एवात्रशिष्यते। शेषनिघाते (पा ६।१।१५८) सति "एकादेश उदात्तेनोदात्तः" (पा ८ २ ५) इति सवर्णदीर्घोऽप्युदात्त एव। धोरिति "अप" इत्यादिषड्विंशतौ कर्मनामसु पठितः। प्रातिपदिकस्वरेणोदात्तः (फि १।१)। घृतमञ्चतीति घृताची। "ऋत्विग् दधृग्" इत्यादिना पा ३ २ ५९) क्विनि "अनिदिताम्" (पा ६ ४ २४) इति नकारलोपः। "अञ्चतेश्चोपसंख्यानम्" (पा ४,१,६,२) इति ङीप्। "अच" (पा ६,४,१३८) इत्यकारलोपे "चौ" (पा ६,३,१३८) इति दीर्घत्वम्। घृतशब्दो "नब्विषयस्यानिसन्तस्य" इत्याद्युदात्तं बाधित्वा "घृतादीनां च" (फि १,२२) इत्यन्तोदात्तः। "समासस्य" इत्यन्तोदात्तस्यापवादकं "तत्पुरुषे तुल्यार्थ" इति पूर्वपदप्रकृतिस्वरं बाधित्वा "गतिकारकोपपदात्" इत्युत्तरपदप्रकृतिस्वरेणोदात्तस्य धात्वकारस्य लोपे सति "अनुदात्तस्य च यत्रोदात्तलोपः" (पा ६,१,१६१) इति ङीप उदात्तत्वे प्राप्ते "चौ" (पा ६,१,२२२) इति पूर्वपदान्तोदात्तत्वम्। साधन्ता। "राध साध संसिद्धौ" इत्यस्मादन्तर्भावितण्यर्थाल्लटः शत्रादेशे (पा ३,२,१२४) श्नुं बाधित्वा व्यत्ययेन शप्। अदुपदेशत्वादुपरि शतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वम्। द्वितीयाद्विवचनस्य शपश्च "अनुदात्तौ सुप्पितौ" इत्यनुदात्तत्वे "धातोः" इति धातुस्वर एव शिष्यते। "सुपां सुलुग्" इत्यादिना विभक्तेराकारादेशः॥ ७ ॥*

---

* मित्रशब्दः फिषोऽन्त इत्यन्तोदात्तः। ततोऽमि तस्य सुप्त्वादनुदात्तत्वेऽमि पूर्व इति पूर्वरूपैकादेशे तस्योदात्तानुदात्तस्थानिकतया एकादेश उदात्तेनोदात्त इत्युदात्तः। शेषनिघातेनाऽरनुदात्तत्वम्। हुवे। ह्वेञ्धातोर्लटः प्रथमैकवचने आत्मनेपद इटि तस्यैत्वे ह्वयतेः संप्रसारणे परपूर्वत्वे मध्ये शपि तस्य लुकि उवङादेशे हुवे इति रूपम्। तत्र धातोरित्यन्तस्योदात्तत्वे तत इटः प्रत्ययस्य प्रत्ययाद्युदात्तत्वे तत्स्थानिकादेशस्यापि स्थानिवत्त्वादुदात्तत्वे सति सतिशिष्टत्वात्तेन धातोः स्वरनिवृत्तावनुदात्तत्वे संप्रसारणे तत्स्थनिकस्य परपूर्वैकादेशस्यापि अनुदात्तत्वे तत्स्थानिकस्योवङादेशस्यापि अनुदात्तत्वेऽन्तोदात्तं पदं प्राप्तं परन्तु तस्य प्रकृते पदात्परत्वात् तिङ्ङतिङ इत्यनुदात्तत्वम्। संहितायामुदात्तात्परत्वेनाद्यस्य स्वरस्योदात्तादनुदात्तस्वेति स्वरितः। वेकारस्य स्वरितात्परत्वात्प्रचयस्वरः। पदपाठे तु उभयोरप्यनुदात्तत्वम्। पूतदक्षम्। पूतशब्दे पूधातोः क्त-

स्क०—मित्रं हुवे आह्वयाम्यहम्। कीदृशम्? पूतदक्षम्। पूतं शुद्धम् अपगतदोषं बलं यस्य स पूतदक्षस्तं पूतदक्षम्। न च केवलं मित्रम्, किं तर्हि? वरुणम्। तं च कीदृशम्? रिशादसम्। रिशतोऽस्यतीति रिशादाः, तं रिशादसम्। हिंसकानां क्षेप्तारम्। प्रतिहिंसितारमित्यर्थः। एवमर्द्धर्चो विभक्तस्तुतिः। परस्तु सहस्तुतिः। धियं वृष्ट्याख्यं कर्म धीः, ताम्। घृताचीम् घृतमित्युदकनाम। उदकं पृथिवीं प्रति या गमयति सा घृताची ताम्। साधन्ता साधयन्तौ वृष्टिं कुर्वन्तावित्यर्थः॥ ७॥

वे० मा० मित्रं ह्वयामि शुद्धबलं वरुणं च रिशतां हिंसितॄणां क्षेप्तारम्। उदकाभिमुखं कर्म साधयन्तौ वृष्टेरीश्वरौ॥ ७॥

द्वितीयामृचमाह—

ऋ॒तेन॑ मि॒त्राव॑रुणावृता॒वृधा॑वृतस्पृशा। क्रतुं॑ बृ॒हन्त॑माशाथे॥८॥

ऋ॒तेन॑। मि॒त्राव॑रुणौ। ऋ॒त॒ऽवृ॒धौ॒। ऋ॒त॒ऽस्पृ॒शा॒।

क्रतु॑म्। बृ॒हन्त॑म्। आ॒शा॒थे॒ इति॑॥८॥

प्रत्ययः। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तावन्तोदात्तं पदम्। ततो दक्षशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वम्। ततः पूतशब्देन समासे बहुव्रीहौ समासान्तोदात्तत्वस्यापवादेन बहुव्रीहौ प्रकृत्येत्यनेन पूर्वपदप्रकृतिस्वरे तकाराकारस्योदात्तत्वमवशिष्टानां शेषनिघातेनानुदात्तत्वम्। तत्र दकाराकारस्योदात्तात्परत्वात स्वरितः। क्षाकारस्य संहितायामनुदात्ततरः। पदपाठे तु प्रचयः। वरुणम्। उनन्प्रत्ययस्य नित्त्वेन प्रत्ययस्वरं बाधित्वा ञ्नित्यादिरित्यादेरुदात्तत्वमवशिष्टयोः शेषनिघातेनानुदात्तत्वे रुकारोकारस्य स्वरितत्वं परस्य प्रचयः। अमि प्रत्यये प्रक्रिया पूर्ववदेव। च। चादयोऽनुदात्ता इत्यनुदात्तत्वम्। तस्य संहितायां स्वरितात्परत्वात्प्रचयः। रिशादसम्। रिशधातोः कप्रत्यये प्रत्ययस्वरेणान्तोदात्तता। तदुपपदाद् अद्धातोरसुनि नित्त्वादुत्तरपदस्याद्युदात्तता। ततः कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदस्यैव स्वरः समासेऽवशिष्यतेऽवशिष्टानां शेषनिघाते रिशशब्दस्यानुदात्तशकाराकारोदात्तादःशब्दाकारोभयस्थानिकस्य सवर्णदीर्घैकादेशस्यैकादेश उदात्तेनोदात्त इत्याकारस्योदात्तत्वेन मध्योदात्तं रिशादःपदम्। ततोऽमः सुप्त्वादनुदात्तत्वेन दकाराकारस्य स्वरितः परस्य प्रचयः। धियम्। धीशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वेऽमोऽनुदात्तत्वे आद्युदात्तं पदम्। संहितायाममस्योदात्तादनुदात्तस्येति स्वरितः। घृताचीम्। घृतशब्दस्याद्युदात्तस्य नब्विषयस्यानिसन्तस्येत्येनेन प्राप्तं बाधित्वा घृतादीनांचेत्यनेनान्तोदात्तः। तस्याञ्चुधातुना क्विन्नन्तेन समासे प्राप्तस्य समासस्येत्यन्तोदात्तत्वस्यापवादकेन तत्पुरुषे तुल्यार्थेत्यनेन पूर्वपदस्य प्रकृतिस्वरप्राप्तौ तद् बाधित्वा गतिकारकेत्यनेनोत्तरपदस्य कृद्रूपस्य प्रकृतिस्वरविधानेनाञ्चोऽकारस्य उदात्तत्वे तस्य स्त्रीप्रत्यये ङीपि लोपेन ङीपोऽनुदात्तस्यापि अनुदात्तस्य च यत्रोदात्तलोप इत्यनेनोदात्तत्वं प्राप्तं तत्बाधकेन चौइत्यनेन पूर्वपदान्तोदात्ततायां घृताचीशब्दो मध्योदात्तः, अन्त्यस्योदात्तापरत्वात्स्वरितत्वम्। आद्यस्य त्वनुदात्तत्वमेव। साधन्ता। साधधातोर्लटः शतरि व्यत्ययेन शपि रूपम्। तत्र शतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वं द्विवचनाकारस्य स्थानिवत्त्वेनानुदात्तत्वे धातुस्वर एवावशिष्यते।

हे मित्रावरुणौ युवां क्रतुं प्रवर्तमानमिमं सोमयागमाशाथे = आनशाथे। व्याप्तवन्तौ। केन निमित्तेन ? ऋतेन = अवश्यंभावितया सत्येन फलेन। अस्मभ्यं फलं दातुमित्यर्थः। कीदृशौ युवाम् ? ऋतावृधौ। "ऋतमित्युदकनाम" (नि. २,२५) "सत्यं वा यज्ञं वा" (नि. ४,१९) इति यास्कः। उदकादीनामन्यतमस्य वर्द्धयितारौ। अतएव ऋतस्पृशा = उदकादीन् स्पृशन्तौ। कीदृशं क्रतुम् ? बृहन्तम् = अङ्गैरुपाङ्गैश्चातिप्रौढम्।[३]

---

(३) अत्र ऋतशब्दस्य "ऋतमित्युदकनाम सत्यं वा यज्ञं वा" इति यास्कवचनानुसारेण भाष्यकृदत्र मन्त्रे सर्वत्रोक्तत्रयाणामन्यतमपरतां ब्रवीति तत्र सत्यशब्दस्यार्थविचारे लोकप्रसिद्ध्या सत्यशब्दोऽनृतविरोधिनमर्थमाह। सचार्थो वाण्या यथार्थत्वरूपे पर्यवस्यति। अवश्यंभाविरूपार्थत्वेनापि सत्यतां गृहीत्वा भाष्यकारः सत्यशब्दस्य फलपरतामाह। तत्रापि वेदे कर्मणां यानि फलान्युच्यन्ते तेषां फलानि ततोऽवश्यं भवन्तीति वेदोक्तवचनस्यायथार्थत्वव्युदासेन यथार्थपरत्व एव परंपरया पर्यवसानम्। वाण्या अर्थानुसारेण सत्यत्वेऽर्थेतु मुख्यं सत्यत्वं वक्तव्यं भवति। अर्थगतं सत्यत्वं चैकरूपात्मकं परस्मिन् ब्रह्मण्येव मुख्यं संभवति आरोपादेव च तद्व्यतिरिक्ते सांसारिके पदार्थे भवतीति सत्यशब्देन परं ब्रह्मोच्यते। एवं च ऋतमिति सत्यमिति पर्यवस्यति। तदेव वैदिकप्रयोगपर्यालोचनेन यौगिकार्थानुसन्धानेन निघण्टुकारैर्निघण्टौ सत्यनामसु उदकनामसु तच्छब्दपाठेन व्यक्तीकृतम्। उदकादिप्रयोगस्येवार्थान्तरेऽपि ऋतशब्दस्य प्रयोगो वक्तव्यो भवति यथा "ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत" इत्यत्र। अत्र ऋतशब्दस्य सत्यपरता वक्तुमशक्या तदर्थशब्दस्य तस्मिन्नेव मन्त्रे तत्रैव वाक्ये पृथक्प्रयोगात्। उदकपरताऽपि तत्र न सम्यग् भवति ततोऽग्रे, ऽर्णवस्योत्पत्तिवचनात्। तस्मादत्रर्तसत्यशब्दयोर्भिन्नार्थत्वं वक्तव्यं भवति। कृष्णयजुर्वेदे नक्षत्राणां देवतासम्बन्धप्रतिपादनप्रसङ्गे ऋतसत्यशब्दयोर्विभिन्नार्थत्वं स्पष्टं प्रतिपाद्यतेऽवस्तात्परस्ताद्रूपविभिन्नदेशबोधकशब्दप्रयोगपुरस्सरं तत्सम्बन्धबोधनद्वारेण। यथा तत्रोच्यते "इन्द्रस्य चित्रा। ऋतं परस्तात् सत्यमवस्तात्" इति। तेनाऽनुवाकेन प्रतिनक्षत्रं देवतां प्रोच्य किञ्चन परस्तात् किञ्चनावस्तादुच्यते। नह्यत्रर्तसत्यशब्दयोरेकार्थत्ववचनसम्भवः। तस्मिन्नेव वेदे "ऋतं त्वा सत्येन परिषिञ्चामि" "सत्यं त्वर्तेन परिषिञ्चामि" इति मन्त्रयोः प्रथमातृतीयारूपविभिन्नविभक्तिप्रयोगद्वारेण सम्बोध्यत्वबोधनपुरस्सरं कर्मत्वकरणत्वरूपपरस्परविरोधिधर्मयुक्तताप्रतिपादनेन तयोर्भिन्नार्थत्वमेव व्यज्यते। एवं सति अनेकधाप्रयोगदर्शनादृतशब्दार्थविचारे उक्तकृष्णयजुरनुसारेण ऋतशब्दस्य दिनपरता सत्यशब्दस्य च रात्रिपरता विज्ञायते बहुत्र। तथाहि तत्र वेदे तेनानुवाकेन कृत्तिकानां दैवदिनादित्वदशायां दैवासुरदिनरात्र्योः समाने समये एकदिनप्रारम्भतःपुनर्दिनान्तरप्रारम्भपर्यन्तं क्रमेण परिस्थितिविशेषा दृष्टिभेदेन यादृशो भवन्ति ते नक्षत्रोल्लेखपुरस्सरं देवतोल्लेखपुरस्सरं च पुरस्तादवस्ताच्छब्दग्रहणपूर्वकं प्रदर्श्यन्ते। यथा कृत्तिकायां दैवदिनादित्वे दिनादौ चाग्नेर्जातवेदसः प्रवृत्तिवचनतोऽग्निर्देवता भवति तदा च दैवदिनस्य सुमेरौ प्रवृत्त्या कुमेरावसुराणां रात्रिः प्रवृत्ता भवति। सविधवर्तिनोऽर्वागदादिशब्दैर्विदूरवर्तिनः परावदादिशब्दैर्व्यवहारस्य वेदे प्रसिद्धत्वेन तत्समानार्थकावस्तात्परस्ताच्छब्दाभ्यामत्र वाक्ये सविधवर्तिनी दैवदिनीयापरिस्थितिरवस्ताद् इत्यनेन बोध्यते, आसुरदिनपरिस्थितिश्च "परस्ताद्" इत्यनेन बोध्यते। कृत्तिकायां नक्षत्रे दैवदिनप्रारम्भे देवेषु मण्डलात्मकं ज्योतिर्भवति असुरेषु

ऋतशब्दो घृतादित्वादन्तोदात्तः। मित्रावरुणावित्यत्र मित्रश्च वरुणश्चेति मित्रावरुणौ। "देवताद्वन्द्वे च" (पा ६।३।२६) इति पूर्वपदस्यानङादेशः। ऋतस्य वर्द्धयितारावित्यर्थेऽन्तर्भावितण्यर्थाद् वृधेः क्विप्। "अन्येषामपि दृश्यते" (पा ६।३।१३७) इति पूर्वपदस्य दीर्घः। ऋतस्पृशा। "सुपां सुलुग्" (पा ७,१,३९) इति डादेशः। मित्रावरुणावित्याद्यामन्त्रितत्रयस्य स्वस्वपूर्वपदात्परत्वाद् "आमन्त्रितस्य" इत्याष्टमिको निघातः। ननु "ऋतेने"त्येतस्य "सुबामन्त्रिते पराङ्गवत् स्वरे" (पा २।१।२) इति पराङ्गवद्भावेनामन्त्रितानुप्रवेशात्पादादित्वेन पदादपरत्वेन वाऽऽष्टमिकनिघाताभावाद् "आमन्त्रितस्य च" (पा ६,१,१९८) इत्याद्युदात्तेन भवितव्यमिति चेत्। न। पराङ्गवद्भावस्य सुबामन्त्रिताश्रयत्वेन पदविधित्वात् "समर्थः पदविधिः" (पा २।१।१) इति नियमात्। इह च "ऋतेन मित्रावरुणावि"त्यनयो"राशाथे" इत्याख्यातेनैवान्वयेन परस्परमसामर्थ्यात्। यत्र पुनः परस्परान्वयेन सामर्थ्यं तत्र पराङ्गवद्भावात्पादादेराद्युदात्तत्वं भवत्येव। "मरुतां पितस्तदहं गृणामि" इति। "मृग्रोरुतिः" (उ. १।९६) इत्युतिप्रत्ययान्तत्वेन "पृश्निर्यै वै पयसो मरुतो जाताः" (तै. सं. २,२,११,४) इत्यादावन्तोदात्तोऽपि हि मरुच्छन्दो "मरुतां पितर्" इत्यत्र सामर्थ्यात्पराङ्गवद्भावादेवाद्युदात्तो जातः। प्रकृते त्वृतेनेत्यस्यासामर्थ्यादेव न पराङ्गवद्भाव इति।

अस्तादूर्ध्वंभावि शुक्लं तेजोमात्रं भवति तदेतत्—अग्नेः कृत्तिकाः ज्योतिरवस्ताच्छुक्रम् परस्तादिति प्रोच्यते। ऋतं त्वेति मन्त्रे प्रयोगानुसारेणाप्युक्त एवार्थो दृढीभवति। रात्रावयं मन्त्र उत्तरश्च दिने प्रयुज्यते। रात्रौ अतीतमृतं सम्बोध्य तदानींप्राप्तेन सत्येन परितः सेचनवचनं दिने चातीतं सत्यं सम्बोध्य प्राप्तेन तेन परिषेकवचनं ताभ्यां क्रियते। किञ्च "नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत" इति मन्त्रे मित्रावरुणयोश्चक्षुःस्थानीयस्य महतो देवस्यादित्यस्य मण्डलात्मकस्य ऋतत्वं तस्यैव च पूज्यत्वं स्पष्टमुच्यते। तथा च मण्डलस्य तदुपलक्षितस्य दिनात्मनः कालस्य ऋतशब्दार्थत्वं यदि गृह्यते एतस्य मन्त्रस्यार्थे कश्चन विशेषः प्रतीतो भवति। मित्रावरुणयोरुदयात्पूर्वकालास्तोत्तरकालवर्त्तिदेवत्वस्य पूर्वं निर्णीतत्वेन तयोर्ऋतस्य दिनस्य वर्द्धकत्वमत्र मन्त्रे ऋतावृधौशब्देनोच्यमानं संगच्छते। अस्तादुत्तरवर्तिनि उदयात्पूर्ववर्तिनि च प्रकृष्टे प्रकाशे विद्यमाने लोकानां दिनव्यवहारस्य दृष्टत्वेन तत्कालिकयोस्तयोस्तद्वर्धकत्वमुपपद्यते। स्पष्टश्चारुणोदयमारभ्य स्मृतिषु दिनान्तरव्यवहारः प्रसिद्धः। दिनान्तर्गतत्वेन तत्कालस्य ऋतवत्त्वार्थकस्य ऋतावानाविति विशेषणमपि तयोः सार्थकम्। मुख्यस्य दिनस्य आदित्यमण्डलोपलक्षितकालरूपत्वेन तयोस्तत्कालस्पर्शित्वार्थकमृतस्पृशाविति वचनमपि सार्थकम्। सविधकालिकत्वेन ऋतस्पर्शमभिप्रेत्य ऋतस्पृक्त्वं तयोः। मित्रावरुणयोरुक्तविधगौणदिनान्तःपातिकालकत्वेऽपि मुख्यदिनेऽनन्तर्भावेन रात्र्यन्तर्भूतत्वेन तयोः "दानुमत्या बृहन्तं गर्तमाशाथे" इति वचनमुपपद्यते। दानुमती च रात्रिः। तस्याश्च गर्तो नाम कार्ष्ण्यम् इति विवेचयिष्यते। तादृशयोर्मित्रावरुणयोर्ऋतेन बृहतः क्रतोः कर्मणो व्याप्तिः "ऋतेन क्रतुं बृहन्तमाशाथे" इत्युच्यमाना भवति। एवञ्चैवमर्थपरताऽस्य मन्त्रस्योक्तविधप्रणाड्या सूर्यस्यैवैकस्य वेदे स्तव इति पक्षे उपपद्यते।

ऋतावृधावित्यत्र द्वितीयामन्त्रितस्य निघाते कर्तव्य "आमन्त्रितं पूर्वमविद्यमानवत्" (पा. ८।१।७२) इति प्रथमामन्त्रितेनाविद्यमानवद्भवितव्यमिति चेत्। भवतु। अतएव तस्याव्यवधायकत्वादृतेनेति प्रथमपदात्परत्वेनैव द्वितीयामन्त्रितं निहनिष्यते। यथा "इमं मे गङ्गे यमुने" (ऋ. १०,७५,५) इत्यादौ गङ्गेशब्दस्याविद्यमानवद्भावेऽपि तस्याव्यवधायकत्वादेव "मे" इत्येतदेव पदमुपजीव्य यमुनेशब्दस्य निघातः। किञ्च प्रकृते मित्रावरुणावित्यामन्त्रितं सामान्यवचनम्, तस्य विशेषणतया विशेषवचनमृतावृधाविति। अतो "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" (पा. ८।१।७३) इति पूर्वस्याविद्यमानवद्भावप्रतिषेधादपि निरन्तरायो द्वितीयस्य निघातः। नन्वेवमपि "अपादादौ" इत्यनुवृत्तेर्ऋतावृधेत्यस्य द्वितीयपादादित्वान्न भवितव्यं निघातेन। अतएव हि "इमं मे गङ्गे" (ऋ. १०,७५,५) इत्यत्र शुतुद्रिपदस्य पदात्परस्यामन्त्रितस्यापि पादादित्वादेवानिघातादाद्युदात्तत्वं जातम्। तद्वदत्रापि भवितव्यं वक्तव्यो वा विशेष इति। उच्यते। मित्रावरुणपदस्य "सुबामन्त्रिते" (पा २,१,२) इति पराङ्गवद्भावेन परानुप्रवेशादेव "ऋतावृधौ" इत्यस्य न पादादित्वम्। शुतुद्रिपदमपि तर्ह्येवमेव पूर्वस्य सरस्वतिपदस्य पराङ्गवद्भावेन न पादादिरिति निहन्येतेति चेत्। न। पराङ्गवद्भावस्तावत्सुबन्तमामन्त्रितं चाश्रित्य प्रवृत्तः पदविधिः। अतस्तयोः सत्येव परस्परान्वये पराङ्गवद्भावेन भवितव्यम्। "समर्थः पदविधिः" (पा २,१,१) इति नियमात्। शुतुद्रिसरस्वतिपदयोश्च न परस्परेणान्वयः। किन्तु "सचता" इत्यनेनेत्यसामर्थ्यान्न पराङ्गवद्भावः। प्रकृते तु मित्रावरुणावृतावृधाविति द्वयोरपि सामानाधिकरण्येन परस्परान्वयादस्ति सामर्थ्यमिति भवितव्यं पराङ्गवद्भावेन। यथा "मरुतां पितर" इत्यत्रेति विशेषः॥

नन्वत एव तर्हि मित्रावरुणपदस्य पराङ्गवद्भावेन पादादित्वाद् "अपादादौ" (पा ८,१,१८) इति पर्युदासादामन्त्रितनिघातो न स्यादिति चेत्। न। पूर्वं सुबन्तं परं चामन्त्रितमाश्रित्य यः स्वरः प्रवर्तते तत्र "सुबामन्त्रित" (पा. २,१,२) इति पराङ्गवद्भावः। भवति चैवंविध ऋतावृधपदनिघात इति। तत्र पूर्वस्य पराङ्गवद्भावेनापादादित्वात्स प्रवर्तते। मित्रावरुणपदनिघातस्तु पूर्वमेव पदमुपजीवति, न परमामन्त्रितमिति न पराङ्गवद्भावः। ननु पराङ्गवद्भाववन्निघातोऽपि पदविधिरिति ऋतेनेत्यनेनासामर्थ्यात्ततः पदात्परस्य मित्रावरुणपदस्य न स्यादिति चेत्। न। "समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः" (पा. ८।१।१।११) इति निघाते पदविधावपि समानवाक्यत्वमेव पर्याप्तं न पराङ्गवद्भाव-

वत्परस्परान्वयोऽपीत्यलम्। क्रतुम्। कृञः कतुः (उ. १।८०) प्रत्ययस्वरेणादिरुदात्तः। आशाथे। आनशाथे। छन्दसि लुङ्लङ्लिटः (पा ३।४।६) इति वर्तमाने लिट्। नुडभावश्छान्दसः ॥ ८ ॥*

स्क०—ऋतेन यज्ञेन हेतुना हे मित्रावरुणौ ऋतावृधौ यज्ञे हि यद्धविस्तदुपभुञ्जानाः स्तूयमानाश्च देवता वीर्येण वर्द्धन्ते तदायत्तत्वात्तासां स्थितेः। अथवा वृधिरन्तर्णीतण्यर्थः। ऋतशब्दोऽपि यज्ञनाम उदकनाम वा। यज्ञस्योदकस्य वा वर्द्धयितारावित्यर्थो वा। अथवा ऋतमिति सत्यनाम। सत्यस्य स्तोतुर्यजमानस्य वा वर्द्धयितारावित्यर्थो वा। ऋतस्पृशौ यज्ञोपभोगकाले स्प्रष्टारौ। यज्ञे हविषां प्रतिग्रहीतारावित्यर्थः। अथवा ऋतस्योदकस्य वृष्टिकाले प्रष्टारौ वर्षितारावित्यर्थः। क्रतुं कर्म बृहन्तम् महत् आशाथे व्याप्नुथः। कुरुथ इत्यर्थः। यत्र यज्ञस्तत्र विषये वर्षथ इत्यर्थः ॥ ८ ॥

वे० मा०—सत्येनैव मित्रावरुणौ सत्यस्य वर्द्धयितारौ सत्यस्य स्प्रष्टारौ यज्ञं च महान्तमाशाथे ॥ ८ ॥

तृतीयामृचमाह—

कवी नो मित्रावरुणा तुविजाता उरुक्षया।

दक्षं दधाते अपसम् ॥९॥

कवी इति। नः। मित्रावरुणा। तुविऽजातौ। उरुऽक्षया।

दक्षम्। दधाते इति। अपसम् ॥९॥

मित्रावरुणावेतौ देवौ नोऽस्माकं दक्षं बलमपसं कर्म च दधाते = पोषयतः। कीदृशौ कवी = मेधाविनौ। तुविजातौ = बहूनामुपकारकतया समुत्पन्नौ। उरुक्षया = बहुनिवासौ। "विप्रो धीर" इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु "कविर्मनीषी"ति पठितम्। "उरु तुवि" इत्येतौ शब्दौ द्वादशसु बहुनामसु पठितौ। "ओजः पाज" इत्यादि-

* ऋतशब्दो घृतादित्वादन्तोदात्तस्तृतीयैकवचनटायाः सुप्त्वादनुदात्तत्वं तत्स्थानिकस्येनादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वेनेनादेशेकारस्य तकाराकारेण सहैकादेशे एकादेश उदात्तेनेति एकारस्योदात्तत्वम्। मित्रावरुणौ। अस्य आमन्त्रितत्वेनामन्त्रितस्येति सर्वानुदात्तत्वम्। ऋतावृधौ। ऋतस्पृशा। अनयोरपि मध्य ऋतावृधावित्यस्यापि ऋतेनेत्येतत्पदापेक्षयाऽनुदात्तत्वम् एवमृतस्पृशेत्यत्रापि। अनयो विचारो भाष्यकारेण बहुल उक्त इति नेह विचार्यंते। क्रतुशब्दस्य प्रत्ययस्वरेणाद्युदात्तत्वम्। बृहच्छब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वम्। आशाथे इत्यस्य तिङ्ङतिङ इति सर्वनिघातः।

ष्वष्टाविंशतिसंख्याकेषु बलनामसु "दक्षो वीळु" इति पठितम्। अपसशब्दः षड्विंशतिसंख्याकेषु कर्मनामसु पठितः। मित्रावरुणा। मित्रशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। वरुणशब्दो नित्स्वरेणाद्युदात्तः। द्वन्द्वे "देवताद्वन्द्वे च" (पा. ६।२।१४१) इत्युभाववशिष्येते। तुविजातौ। बहूनामुपकारकतया तत्सम्बन्धित्वेन जाताविति षष्ठीसमासे समासान्तोदात्तत्वम्। चतुर्थीसमासे हि "क्ते च" (पा. ६।२।४५) इति पूर्वपदप्रकृतिस्वरः स्यात्। उरूणां बहूनां क्षयावुरुक्षयौ। "क्षि निवासगत्योः" इति धातोः क्षियन्त्यस्मिन्निति क्षयः। अधिकरणे "एरच्" (पा. ३।३।५६) इत्यच्प्रत्ययान्तस्य "चित" (पा ६,१,२२३) इत्यन्तोदात्तत्वे प्राप्ते "क्षयो निवासे" (पा. ६।१।२०१) इत्याद्युदात्तत्वं विहितम्। समासे तु "समासस्य" (पा. ६,१,१६३) त्यन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं यद्यपि थाथादिस्वरेणान्तोदात्तेन बाध्यते, तथाऽपि "परादिश्छन्दसि बहुलम्" (पा. ६।२।१९९) इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यम्। दक्षो दक्षतेरुत्साहकर्मणो घञ्। ञित्त्वादाद्युदात्तः। आप्यते फलमनेनेत्यपः कर्म। "आपः कर्माख्यायां ह्रस्वो नुट् वा" (उ. ४।१० ११) इत्यसुन्नन्तस्यापसस्पारे इत्यादौ नित्त्वादाद्युदात्तस्याप्यपसशब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वम् ॥ ९ ॥*

॥ इति द्वितीयं सूक्तम् ॥

॥ इति प्रथमस्य प्रथमे चतुर्थो वर्गः ॥

स्क०—कवी मेधाविनौ नः अस्माकमस्मदर्थम् मित्रावरुणौ तुविजातौ बहूनामर्थाय जातौ सर्वेषां प्राणिनामुपकारायोत्पन्नावित्यर्थः। उरुक्षया। बहुनिवासौ विस्तीर्णनिवासौ वा। दक्षं बलं सेनालक्षणं दधाते धारयतः अपसं कर्म च। अस्मदर्थं च स्वसेनां पुष्णीतः। तथा च वृष्ट्यादिकर्म कुरुत इत्यर्थः। अस्मदर्थं बलं यागादि कर्म च दत्तमित्यर्थो वा ॥ ६ ॥

प्रथमस्य प्रथमे चतुर्थो वर्गः ॥

वे० मा०—क्रान्तदर्शिनौ मित्रावरुणावस्मभ्यमहोरात्रयोः प्रादुर्भावादनेकजन्मानौ बहुनिवासौ अनेकयज्ञौ बलं प्रयच्छतो वेगं च ॥ ६ ॥

॥ प्रथमस्य प्रथमे चतुर्थो वर्गः ॥

---

* कवी। अत्र प्रातिपदिकस्वरः। नः। अनुदात्तं सर्वमित्यधिकारे अस्मच्छब्दस्यानुदात्त आदेशः। मित्रावरुणा। देवताद्वन्द्वे चेत्यनेनोभयोरपि मित्रवरुणशब्दयोः प्रकृतिस्वरः। तुविजातौ। समासान्तोदात्तः। उरुक्षया। अत्र परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम्। दक्षशब्दस्य घञन्तस्य ञित्त्वादाद्युदात्तत्वम्। दधाते। तिङ्ङतिङ इति निघातः। अपसम्। व्यत्ययेन प्रत्ययाद्युदात्तत्वम्।

ṚGVEDA-SAṂHITĀ

TRANSLATED WITH CRITICAL NOTES

BY

DR. SITANATH PRADHAN, M. Sc., PH. D., BṚHASPATI

Published by

SATIS CHANDRA SEAL, M. A., B. L.

Hony. Secretary,

Indian Research Institute

Calcutta

1933

PREFATORY NOTE

It is undeniable that the commentary on the Ṛgveda which passes on with the name of Sāyaṇa, is not the work of one man. This is borne out by the following fact, to which the attention of scholars is specially invited. The Stanza, RV. 3, 22. 5, the author of which was, according to the Sarvānukramaṇī, Gāthin, the son of Kūśika, is repeated by his son Viśvāmitra in RV. 3, 1, 23 ; 3, 5, 11 ; 3, 6, 11 ; 3, 7, 11 ; and by Utkila, the son of Kata—the son of Viśvāmitra, in RV. 3, 15, 7 ; and also by Devaśravas and Devavāta, the sons of Bharata, in RV. 3, 23, 5.

The stanza is important and has been variously interpreted by various scholars such as Langlois, Benfey, Stevenson, Wilson. The stanza is differently interpreted in two different places in the commentary of Sāyaṇa and it is quite clear that the two interpretations are the work of two different scholiasts. Observe in the commentary of Sāyaṇa that the stanza is interpreted by the scholiast in a particular way in RV. 3, 1, 23 ; when the stanza is next repeated in RV. 3, 5, 11, apparently the same scholiast says "this stanza has already been commented upon" (pūrvaṃ vyākhyātā). When the stanza is next repeated in RV. 3, 6, 11, the same scholiast reiterates "this stanza has been already commented upon" (Ilām agna itiyaṃ pūrvaṃ vyākhātā). When the stanza is next repeated in RV. 3, 7, 11, a detailed commentary in a different way is given without any statement like "the stanza has been already commented upon." It shows quite definitely that the previous scholiast had just finished with commenting on the 6th hymn of Maṇḍala III of the Ṛgveda, and the next scholiast began his commentary with the 7th hymn of Maṇḍala III. Thus it is evident that there was a distribution of the work of commenting amongst scholiasts appointed by the king Bukka, and the inevitable result of distributing the work amongst scholiasts of varied scholarly capacities, has been that the Sāyaṇa-bhāṣya is heterogeneous. It was for reasons like this that Professor Max Müller passionately urged about fifty years ago on the necessity of re-interpreting the Ṛgveda and hoped that the combined efforts of all the Vedic scholars of the world, continued through generations, would ultimately enable us to walk faithfully in the foot-steps of these ancient poets. The same hope was cherished by the great American, the late lamented Dr. Maurice Bloomfield.

The Ṛgveda is the most previous heritage of all the Aryan nations of the world, the most ancient literary record of the Indo-European peoples, and I may request to all Vedic scholars of the world to help me with suggestions, contributions, books, periodicals, journals, off-print copies of articles of which they are authors ; as I am fully conscious that the stupendous task of explaining the Ṛgveda has been placed on my shoulders by Providence and can only become somewhat successful by the kind co-operation of all Vedic scholars. May this help be not grudged on account of barriers of country or inherited creed. All help in this direction will be gratefully acknowledged. I may request also those Fortune's favourites who are interested in ancient Aryan culture

to help me with means to provide myself with the numberless independent scholarly works bearing on the Veda, reminding them of the sacred injunction : "The gift of books on the Veda is the best of all gifts". Without their help, this venture which is likely to keep myself engaged for a number of years continually, will, I am afraid, be stifled. Any help rendered to me will be gratefully remembered and commemorated.

A word about the nature of the work. The translation throughout, will be made in strict accordance with the interpretation of Sāyaṇa, but as Sāyaṇa is manifestly wrong in his interpretation of many points in several places of the Ṛgveda, the translations which will closely follow him, would accordingly contain, not necessarily the correct interpretations, but Sāyaṇas interpretations. But at every step, Sāyaṇa's omissions and mistakes will be noticed, and an attempt will be made throughout the work to discover the real vestiges of the ancient poets, as far as it has become possible to do so with the light thrown by modern Vedic scholarship. Hence requests are made to scholars to use not the translation given in the body of the book, but the more correct interpretation always given in the foot-note, whenever Sāyaṇa is in error. In order to explain the way of arriving at the correct interpretation, the original of every stanza will be always given in Roman characters under the translation of Sāyaṇa's interpretation. Notes on important words will also be given in order to grasp the subject. It cannot but be observed, however, that Sāyaṇa's exhaustive and erudite commentary has been of immense help to us in understanding the Ṛgveda and it would have been impossible for us to improve upon it, had he not left his pioneer work before us. But he has been misled at many points by the Brāhmaṇas and the Niruktas. The Brāhmaṇas which are nearest in time to the hymns of the Ṛgveda, very often indulge in figures of speech and fanciful derivations and interpretations of words. The authors of the later Niruktas which often give the derivations of words from fanciful roots, are manifestly wrong in many cases. These two have conspired together to mislead Sāyaṇa by their authority. Where there is no such authority to mislead, Sāyaṇa is rational and gives just the correct interpretations in which the world of scholars is so very interested. But the chief reason for the creeping in of not a few errors into the so-called Sāyaṇa-bhāsya of the Ṛgveda is that the collaborators of the Sāyaṇa were not quite as competent in the field of Vedic scholarship as we expected them to have been. This will be clear as we shall proceed in our work. It will always be my aim to make the English translation of the Ṛgveda true to the very letter, in order that we may fully understand how our Aryan ancestors thought and lived and had their being. This will go no doubt somewhat against the chasteness of the English language but there is no help. As this was also the principle which guided my predecessors, I hope I shall be excused in view of our well-known object of travelling faithfully in the foot-steps of Vedic seers without going astray.

Dated the 25th June, 1933.

Calcutta,

1-1, A, Goabagan Street.

S. N. PRADHAN

ṚGVEDA-SAṂHITĀ.

I, 1

Aṣṭaka I.

Adhyāya I.

Seer.—Madhucchandas, the son of Viśvāmitra.

Metre.—Gāyatrī.

Deity.—Agni.

Tune.—Ṣadja.

General Application—In the Morning Recitation for the Agniṣṭoma Sacrifice.

Maṇḍala I.

Anuvāka I.

Sūkta. I.

Madhucchandas was (Ait. Bra. VII, 17; 18) one of the many sons of Viśvāmitra, and was addressed as a descendant of Gāthin (Ait. Bra. VII, 18), as well as of Kuśika. According to the Jaiminīya Brāhmaṇa (III, 237-8) Viśvāmitra was the son of Gāthin, while the Sarvānukramaṇī on the Ṛgveda says that Gāthin was the son of Kuśika, the son of Iṣīratha. The Pañcaviṃśa Brāhmaṇa (XXI, 12, 2) says that Viśvāmitra was formerly a king and the descendant of king Jahnu. This hymn consisting of nine stanzas was composed by Madhucchandas Vaiśvāmitra.

Varga I

1. I praise[1] (with hymns) Agni,[2] the representative[3] (priest) of the sacrifice, the bright[4] one, the invoking priest,[5] the greatest giver of reward.[6]

The original is :
agnim īle purohitaṃ yajñasya devam ṛtvijam,
hotāraṃ ratnadhātamam.

Vedārthayatna has disturbed Sāyaṇa's construction of words. He has taken 'purohitam,' 'hotāram' and 'ratnadhātamam' as separate independent substantives, and 'yajñasya,' 'devam' and "ṛtvijam' together, evidently in obedience to the Gāyatrī metre which consists of three discrete pādas ; Geldner has agreed in every respect with Vedārth. except that he has taken 'ratnadhātamam as an adjective to 'hotāram.' But Sāyaṇa has taken 'yajñasya' with 'purohitaṃ,' and 'hotāram' as a qualifying adjective to 'ṛtvijam,' and has treated 'devam' and 'ratnadhātamam' as separate and independent substantives. I think Sāyaṇa is more reasonable than either Vedarthayatna or Geldner, in taking 'hotāram' in the 3rd pāda with 'ṛtvijam' in the 2nd pāda, but less so in construing 'yajñasya' of the 2nd pāda with 'purohitaṃ' of the 1st pāda, and in taking 'devam' as an independent substantive. The reason is clear when we compare Ṛgvedic phrases used by other poets in the following :—

1, 44, 11^{a+b} : ni tvā yajñasya sādhanam agne hotāram ṛtvijam.
1, 45, 7^{a} : ni tvā hotāram ṛtvijam.
3, 10, 2^{a+b} : tvām yajñeṣv ṛtvijam agne hotāram īlate.
5, 22, 2^{a} : nyagniṃ jātavedasaṃ dadhātā devam ṛtvijam
8, 44, 6^{a} : mandraṃ hotāram ṛtvijam.

A glance at the above quotations will make it, abundantly clear that 'yajñasya,' 'devam' 'ṛtvijam' and 'hotāram' are to be construed together. This is the soundest method of interpreting the Ṛgveda. Consequently the correct translation will be :—

I praise (with hymns) Agni, the representative, the bright invoking priest of the sacrifice, the best giver of reward (of sacrifice).

[1]The verbal √ īḍ means 'to praise with hymns', 'to worship with odes.' Now as the idea of inviting is included within the meaning of the idea of worshipping, as noticed by Yāska, Geldner needed not have taken the trouble to establish the identity : √īḍ = √hve = to invite, from 4,24,2 ; 5,69,3 ; 10,104,10 ; 1,14,5 with 8,5,17 and 7,8,1 ; 7,53,1, 7,94,5 cpd. ; 8,74,6 ; 12 ; with 7,26,2, 7,61,6 and 8,66,1 ; iḍ—śru in 8,43,24 ; 8,44,6 ; and 1,139,7 like hve—śru in 1,104,9 ; 2,32,4 ; and 10,39,6. √īḍ however is broader and means much more than 'to invite' only.

[2]The ancient attempts to derive Agni are unhappy. They were ingeniously invented to explain the function of that deity. The authors of the Niruktas are not to blame for these fanciful derivations, for they are obtained from the very old Brāhmaṇas which very often indulge in figures of speech, fanciful interpretations and allegories. Thus Sthaulāṣṭhivi (son of Sthūlāṣṭhiva), an author of Nirukta, says : Agni is he who does not spare the fuel (na knopayati). Śākapūṇi (= son of Śakapūṇa) whose personal name was Rathītara, a famous author of Nirukta, now extinct, derives Agni from the three roots √in (= to go), √añj (= to anoint), and √dah (= to burn) collectively, the letters being irregularly changed to 'ag' and 'ni' vide Yāska (Nir. 7,14).

[3]'purohita' literally means 'placed or seated in front'. The high priest was the representative of the institutor of sacrifice (yajamāna), and used to get seated in front of the yajamāna in sacrifices.

[4]'devam' is derived from √div (= to shine) and means bright, brilliant, resplendent, shining, radiant, divine, godly etc. According to Sāyaṇa, it may mean also 'liberal' or 'donor', because he says √div may as well mean 'to give', but this is not sanctioned by Comparative Philology.

[5]'ṛtvik' literally means 'one who performs a sacrifice at the proper season' (ṛtau yajati—Pān. III, 2, 59) and generally 'any ministering priest.' We have already seen that Sāyaṇa is perfectly correct in taking 'hotāram' as an adjective to 'ṛtvijam'. It means the Hotṛ priest who invokes or summons (√hve) the divinity into the sacrificial hall by offering oblations (√hu).

[6]'ratna' lit. = a jewel. Sāyaṇa says that the fruits of a sacrifice are the ratnas or jewels. According to Geldner 'ratna' is the reward of a sacrifice, while according to Vedārthayatna it means wealth. Geldner seems to be the most reasonable, as the ancient meanings of 'ratna' are 'reward,' 'prize of victory' etc. Wilson makes 'ratnadhātamam' = possessor of great wealth. This is a wrong rendering of Sāyaṇa. It should have been 'the greatest giver of wealth.'

2. Agni was worthy of being praised by seers ancient[1]. and (is so) by (seers) modern May he bring the gods hither[2].

The original is—

agniḥ pūrvebhir ṛṣibhir īdyo nūtanair uta,
sa devāñ eha vakṣati.

This stanza has been correctly interpreted by Sāyaṇa, and the above translation is all right.

[1]Sāyaṇa says that seers belonging to the Bhṛgu and Aṅgiras families were more ancient than Madhucchandas. Now, many members of these two families as well as of other families were more ancient, while a host of others of these very families were later than Madhucchandas. Some of the older seers may be named with advantage here. Cyavana, Apnavāna, Uśanas, Kavi, Uru, Ṛcika, Jamadagni etc. of the Bhṛgu race, Bṛhaspati I, Bṛhaspati II, Ayāsya I, Ayāsya II, Atharvan, Dadhyañc, Vṛṣan Saṃvarta, Uśija, Ucathya, Bharadvāja, Dīrghatamas, Sudhanvan, Ṛbhu, Vibhvan, Vāja, Kavandha I, Vicāra, etc. of the Aṅgiras family, some of the Vāsiṣṭhas and the Atris, as well as his own ancestors like Kuśika, Gāthin, Viśvāmitra etc. were more ancient than Madhucchandas. Some of them have left their compositions, while others are only mentioned in the Vedas as having been seers, but their compositions are lost to us for ever.

[2]'iha' means 'in this sacrifice' which was certainly an Agniṣṭoma as the general application (sāmānya viniyoga) shows. Madhucchandas probably composed this hymn for employing it in the Agniṣṭoma sacrifice.

3. Through Agni, the worshipper obtains[1] wealth which increases day by day, and which is the source of renown, and uniting with many sons[2].

The original is—

agninā rayim aśnavat poṣam eva dive dive,
yaśasam vīravattamam.

[1]'aśnavat' is made equivalent to 'prāpnoti' by Sāyaṇa, and hence is rendered with 'obtains.' Both Vedārth. and Geld. have differed from Sāy. and that, very reasonably. They make 'may the worshipper obtain etc'. Thus according to them, a wish is expressed in the stanza. They are quite right as is evident from Sāyaṇa's own interpretations of 'aśnavat' in 1,93, 3 ; 1,113,18 ; 8.18,14 ; 9,66.27 etc.

[2]'poṣam' in the Ṛgveda is always used as a substantive and means, 'increase,' 'abundance'. It is often used in juxtaposition with 'rāyas' which means 'wealth' in the word 'rāyaspoṣa'. The word 'rāyaspoṣa' means 'increase of wealth' 'abundance of wealth' etc. Geld. takes 'poṣa' in the sense of 'increase' (Zuwachs) and Vedārth. make it mean 'prosperity.' Thus both of them take it as a substantive while Sāyaṇa takes it as an adjective to 'rayi' (= wealth). But the following pādas of stanzas quoted below will show that 'poṣa' is a substantive ;—

8,23,21[c] ; bhuri poṣaṃ sa dhatte vīravad yaśaḥ.

9,66,21[c] : dadhad rayiṃ mayi poṣam.

2,21,6.[c] : poṣaṃ rayiṇām ariṣṭiṃ tanūnām (dhehi asme).

Here although there is the indeclinable 'eva' 'poṣa' is a substantive, as the conjuction 'ca' is left understood in several places of the Ṛgveda.

[3]'vīravattamam' should have been translated : 'most uniting with sons' by Wilson.

Hence the correct translation is :—Through Agni, may (the worshipper) obtain from day to day, wealth and affluence itself accompanied with renown, and most uniting with sons.

4. O Agni, the unobstructed[1] sacrifice alone of which thou art the protector on all sides[2] arrives at the gods.

The original is ;—

agne yaṃ yajñam adhvaraṃ viśvataḥ paribhūr asi,
sa id deveṣu gacchati.

[1]'adhvaram' generally means a sacrifice in the Ṛgveda and is a substantive. Here Sāyaṇa and Vedārthayatna take it as an adjective meaning 'unobstructed', and qualifying 'yajñam.' Sāyaṇa says 'dhvara' means 'hiṃsā' i. e. obstruction, mischief, injury etc. It is derived from √dhvṛ 'to hurt'. Geldner however takes it as a substantive meaning 'worship,' 'adoration' (Anbetung.) Yāska (Nir.1.8) says that 'dhvara' means 'hiṃsā i,e. mischief, and 'adhvara' means therefore 'prevention of mischief'. Dayānanda follows Yāska and Sāyaṇa and takes 'adhvaram' as an adjective to 'yajñam'. That 'worship' or adoration' or Anbetung as the equivalent of 'adhvara' is somewhat far-fetched or indirect is clear from Rv. 5, 51, 2 where it directly means a 'sacrifice' and not 'worship' or 'adoration'. A parallel sentiment is expressed in—

2, 2, 5[a] : sa hotā viśvaṃ paribhūtv adhvaram where 'adhvara' is a substantive. Both 'adhvara' and 'yajñam' are substantives in the same place in—

4, 9, 7[a+b] : asmākaṃ josy adhvaram asmākaṃ yajñam aṅgiraḥ.

Again the term 'adhvaryu' has come from the word 'adhvara', Here 'adhvaram' is a substantive and is added to emphasize the sense and is always a substantive in the Ṛgveda.

[2]Āhavanīya, Mārjālīya, Gārhapatya and Āgnīdhriya fires were lighted at the east west, south and north respectively of the altar.

Hence the above translation which follows Sāyaṇa's commentary is correct.

5. May Agni, the Hotṛ, skilful in rituals, the true, (and) most wonderfully renowned deity, come (hither) with the gods.

The original is—

Agnir hotā kavikratuḥ satyaś citraśravastamaḥ,
devo devebhir ā gamat.

[1]'Kavikratu' literally means, according to Sāyaṇa, the attainer of skill in rituals, [kavi = attainer of skill, kratu = rituals]. Geldner makes it mean 'possessed with the temper or sense of a seer' (mit Sehersinn) and makes the illustrative remark : 'A seer in the Veda is he who sees or beholds the mysterious godly things with the inner eye.' Thus Geldner is willing to have the equations : kavi = seer, and kratu = sense or temper. Sāyaṇa here has been guided by Yāska (Naigh. 2, 1 ; Nir. 12, 13), and so also Dayānanda. Sāyāṇa himself in RV. 3, 14, 7 ; 3, 2, 4 ; 3, 27, 12 ; 6, 16, 23 ; 9, 25, 5 ; etc. makes 'kavikratu' mean 'possessed with knowledge of all things.' Besides 'kratu' in 1, 91, 2 ; 3, 40, 2 ; 5, 32, 5 ; etc., means knowledge or 'experience' and 'Kratumat' in 2, 23, 15 ; 4, 41, 1 ; etc. definitely means possessed with sense, knowledge or experience.' Yāska also (Naigh. 3, 9) makes kratu = prajñā, experience. The Rigvedic poets having been highly specialized priests, their knowledge or experience pertained to sacrificial details and rituals. Hence 'kratu' in many places of the Ṛgveda means a sacrifice, a Yāga. In some places 'kratu' means the performer of a sacrifice as in RV. 4, 10, 1. etc. However, 'kavikratu' literally means 'one who has the sense or intelligence of a kavi or seer (vahuvrihi compound), and hence the truth is on the side of Geldner.

Hence the correct translation is—

May Agni, the Hotṛ, of seerlike intelligence, the true, of the most wonderful fame, the deity, come (hither) with the deities.

Varga 2.

6. O Agni, the good that thou wilt do to the giver of oblations becomes, O Aṅgiras, truly yours only.

The original is—

yad aṅga dāśuṣe tvam agne bhadraṃ kariṣyasi,
tavet tat satyam aṅgiraḥ.

This has been correctly interpreted by Sāyaṇa and the above translation is all right.

प्रकाशरूपादित्यरूपाऽपरा व्यक्तिरितीमे द्वे व्यक्ती अश्विशब्देनोच्येते इति। तत्रादित्य इत्यु. अतएव तयोरश्विनोर्निरुक्तकारेणोक्तः काल उपपद्यते। तयोश्च तदुक्तः कालः "ऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टम्भम्" इति। अर्द्धरात्रत ऊर्ध्वं तमसां ज्योतिषा व्यतिभेदे प्रवृत्ते ततःप्रभृति सर्वथाप्रकाशोऽर्थादादित्योदयपर्यन्तस्तयोः काल इति तदर्थः। तथा सति उदयात्प्रागादित्यमण्डलाभावेनादित्यं वक्तुमशक्यत्वेन तेजोरूपस्यैवैकव्यक्तित्वेन तयोर्ग्रहणं समुचितम्। तयोश्च द्वन्द्वदेवत्वेऽपि मित्रावरुणादिवत्प्रत्येकभावेन स्तवस्यादर्शनात्समुदितभावेनैव तत्स्तव इति उभयोः सहवचने एव वक्तव्ये साहित्यं चोक्ते काले तेजसैव भवितुमर्हतीति तेजोरूपैका व्यक्तिरनुत्तमज्योतीरूपा चापरा व्यक्तिरित्येवंरूपतैव तयोः। तयोश्च सहवचनोऽयमश्विशब्द इति स सर्वदा द्विवचनान्तत्वेनैव वेदे प्रयुज्यते। एवं तद्बोधकापरनाम्नोर्नासत्यदस्ररूपयोरपि द्विवचनान्तत्वेनैव वेदे प्रयोगदर्शनादनयोरपि अश्विशब्दवदेव तद्बोधकत्वमिति भवति मतिः परन्तु न तथा तत्। तत्र दस्रशब्देन विनाशनरूपनिमित्तेन ज्योतिर्भाग उच्यते नासत्यशब्देन च असत्यप्रतिक्षेपरूपेण निमित्तेन तमसोऽनुत्तमज्योतिर्भागस्य वा वचनम्। प्रकृष्टप्रकाशस्य तेजसः सत्त्वविषये न कस्यापि विमतिरिति तत्र विशेषविचारानपेक्षणेऽपि तमसो वाऽनुत्तमज्योतिर्भागस्य वा सत्त्वविषये स्पष्टमभासनेन भवति नानाविधता विचारस्य। अतएव तमोविषये विचारकाणां नैकविधा मतभेदाः। केचन तमसोऽभावात्मकत्वं, केचन तेजसोऽभावे सत्यारोप्यमाणनीलरूपात्मकत्वम्, केचन विभिन्नपदार्थरूपत्वं हस्तयन्ति। एवं सति तमोविषये एव नैकविधमतभेदप्रवृत्त्या तस्य यथावत्तत्त्वज्ञानाभावेनाभावात्मकत्वस्य प्राप्तया तन्निवारणमत्र नासत्यशब्देनोच्यते, तस्मान्नासत्यशब्दस्तमसो बोधकः, तदानीन्तनानुत्तमतेजसो वा बोधकः। तदेतदभिप्रेत्यौर्णवाभेन "सत्यावेव नासत्यौ" इति असत्यत्वनिराकरणमुखेन सत्यत्वं तेन शब्देन प्रोच्यते। एवं च दस्रशब्दः प्रकृष्टं तेजो नासत्यशब्दश्च तमो वा तत्सत्यमनुत्तमं ज्योतिर्वा ब्रवीति। तत्रैकतरनाम्नाऽप्युभयस्योपलक्षणविधया ग्रहणेन दस्रनासत्यशब्दाभ्यां द्विवचनान्तत्वेन सहस्तवो वेदे। तदुक्तं स्कन्दस्वामिना "यद्यपि चाश्विनोरेको दस्रनामा नासत्यनामाऽपरः, तथापि द्विवचननिर्देशादन्यतरनिर्देशेनापि सर्वत्र साहचर्यादुभयोः प्रतिपादनम्" इति। अतएव "वासात्योऽन्य उषःपुत्रस्तवान्य" इति तयोः स्वरूपविवेचनप्रसङ्गे निरुक्तकारेणोच्यते। वसातीरात्रिस्तत्सम्बन्धी एक उषसः पुत्र आदित्योऽपर इति तदर्थः। अतएवानयोर्द्युलोकस्थानत्वसम्भवः। निरुक्तकारेण ज्योतीरूपस्यैव द्योलोकस्थानता परस्यानुत्तमभागरूपस्य मध्यमलोकस्थानत्वमुक्तं पूर्वं प्रदर्शितमेव। एवञ्चोक्तरूपयोरेवैतयोर्द्युलोकादिसम्बन्धवशतो द्यावापृथिवीसूर्याचन्द्रमोरूपतेति दिक्।

तयोश्चाश्विनोर्वर्णनप्रसङ्गे सूक्तेषु नैकविधाश्चर्यकरवृत्तवर्णनेन राजरूपत्वकल्पनैतिहासिकानाम्। एतयोः कालः सूर्योदयपर्यन्त इति तु निरुक्तकारेण स्पष्टमुच्यते। तत्र तयोः काले तिसृणां देवतानां सम्बन्धो भवतीति निरुक्तकारो ब्रवीति "तस्मिन्नन्या देवता ओप्यन्त" इति। तत्रोषा एका अग्निरपरः स्वयं चाश्विनौ। एते एव देवाः प्रातर्यावशब्देनोच्यन्ते वेदे इति पूर्वमुक्तमेव। एवमत्रत्याया उषसः क्रमेण मण्डले लयदर्शनेन सूक्तेषु प्रोच्यते उषा अश्विनोरथमधिरूढवतीति। अश्विनो रथश्च मण्डलम्। अतएव तस्य "रथो हि ष" इति रथरूपत्वं मन्त्रे उच्यमानं सङ्गच्छते।

(१) उक्तस्य पुनर्वचनं पुनरुक्तिः। सा च न सर्वत्र दुष्टा किन्तु अविशेषा निष्प्रयोजना पुनरुक्तिर्दोषत्वेन गण्यते। अतएव कञ्चन विशेषं विधातुं पुनरुपादानं पुनरुक्तिदोषयुता न भवति। अतएवादग्धदहनन्यायेन

कव्यमुवाच, समूलकाषं कषतीत्यादौ यथा पुनरुक्त्यभावस्तद्वत् ।
.रा: = यागनिष्पादिकाः । कीदृशावश्विनौ ? द्रवत्पाणी = हविर्ग्रहणाय
.भ्यामुपेतौ । शुभस्पती = शोभनस्य कर्मणः पालकौ । पुरुभुजा = विस्तीर्ण-
ोजिनौ वा ।१

विधेयावमर्श इति प्रामाणिकसिद्धान्तः । अतएव मीमांसकैः "दध्ना जुहोति" "पयसा जुहोति" इत्यादीनां गुणविधिपरत्वं सिद्धान्तितम् । सर्वविधायाः पुनरुक्तेर्दुष्टत्वे हि अत्रापि "अग्निहोत्रं जुहुयात्स्वर्गकाम" इत्यत्रोक्तस्य होमस्य जुहोतीत्यनेन पुनर्वचनेन वाक्यस्य दुष्टतैव स्यात् न पुनर्गुणविधिपरत्वम् । अतएव "अमावास्याया-ममावास्यया यजति", "पौर्णमास्यां पौर्णमास्या यजति" इत्यादेः समुदायनामपरत्वेन वर्णनयाऽदुष्टत्वोक्तिर्मीमांसकानाम् । एवं च प्रकृतमन्त्रे इष इत्यस्य कर्मवाचकस्यान्नपरतया चनस्यतमित्यत्र नामधातोरप्यन्नबोधकचनःशब्दत एव निष्पत्त्या क्यचा चेच्छावाचकेनापेक्षितस्य कर्मणो धात्वन्तःपातिचनःशब्दबोध्यान्नेनैव लाभादिष इत्यस्य द्वितीयान्तकर्मबोधकेषःपदस्यानन्वयः । अन्वये वा पुनर्वचनाद्दुष्टत्वं स्यादित्याशङ्क्य भाष्यकार आह यद्यपीति । अविशेषपुनःश्रुतेरेव दुष्टत्वमिति गृहीत्वा प्रकृते विशेषवचनेन तत्परिहारमाह - इच्छामुपलक्षयितुमिति । अयं भावः सामान्यतो बोधोपजननस्वभावा अपि शब्दा निमित्तवशतो यत्किञ्चिद्विशेषपरा अपि भवन्ति, यथा "अयं मम घट" इत्यादौ, घटशब्दस्य घटत्वं धर्ममुपादायार्थं बोधयितुं प्रवृत्तस्य घटसामान्यपरत्वेऽपि प्रकृतेऽयमित्यादिविशेष-बोधकसाहित्येन पुरोवर्तिघटबोधकता एवमिच्छासामान्यबोधकस्यापि क्यच्प्रत्ययस्य इच्छाविशेषपरत्वाय चनः-शब्दः । एवञ्च चनःशब्देन विशेपिताया इच्छाया इच्छात्वेन रूपेणात्र ग्रहणमिति विशेषेच्छाया अपि इच्छात्व-सामान्येनैवोपादानात्तत्रान्नरूपस्य कर्मणोऽप्रवेशेन कर्म्माकाङ्क्षायामिष इत्यस्य कर्मतया सम्बन्धः । एवं च "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वम्" इत्युक्तिरुपलक्षकार्थसम्बन्धपराऽपि । एवञ्च चनःशब्दार्थोपलक्षिते-च्छापरस्यापि क्यचः प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वमेवेति नोक्तव्युत्पत्तिविरोधः । "विशिष्टवाचकानां पदानां सति पृथग् विशेषणवाचकपदसमभिव्याहारे सामान्यार्थपरत्वम्" इत्युक्तिरपि उक्तार्थोपोद्बलिकैव । सा च सामान्येन प्रवर्तमाना प्रकृतेऽपि न्यायसाम्यात्प्रवर्तते । तथाचात्र चनस्यशब्दस्यान्नविशिष्टेच्छावाचकस्यात्रान्नरूप-विशेषणस्येष इत्यनेन पृथग्वचनाद्विशेषणरहितसामान्येच्छापरत्वमिति न पुनरुक्तिः । यथा कालिदासीये रघुवंशे "स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिः" इत्यत्र कीचकशब्देनैव मारुतपूर्णरन्ध्रत्वविशिष्टशब्दायमानवेणुरूपार्थबोधकेनैव सिद्धौ मारुतेत्यादिविशेषणवैयर्थ्यापत्त्या तादृशविशेषणपृथग्वचनात्कीचकशब्दस्य वेणुमात्रपरत्वं ततस्तत्र विशेष-सम्पादनादुक्तविशेषणसार्थक्यमेवं प्रकृतेऽपीति ।

(१) अत्र मन्त्रे प्रयुज्यमानयोरिषचनःशब्दयोर्निघण्टावन्ननामसु पाठाद् यागसाधनत्वस्यान्ने याज्ञिकप्रसिद्ध्या-दिना सम्भवेन तदर्थकस्य यज्वरीरित्यन्नविशेषणस्यात्र प्रयोगाद् अश्विनोर्द्रवत्पाणी इति साभिप्रायविशेषणदर्शनात् पुरुभुजेत्यस्य बहुभोजित्वार्थकत्वेनाश्विनोर्देवत्वप्रसिद्ध्या चात्र भाष्यकारोऽश्विनावुद्दिश्य यागसाधकान्नानामिच्छां कुरुतम् अस्माभिर्दीयमानानि हविर्लक्षणान्यन्नानि स्वीकुरुतमित्यर्थत्वेन व्याख्यातवान् । वस्तुतस्त्वश्विनोर्निरुक्ते-ऽर्द्धरात्रत ऊर्ध्वं यावत्सूर्योदयं काल इति वर्णनेन पूर्वोक्तरीत्या तेजस्तमोरूपतया सूर्योदयात्प्राक् सहप्रवृत्तिस्थले यथा तयोः सत्त्वमेवमस्तोत्तरं यावदर्द्धरात्रमपि तेजस्तमसोः सहप्रवृत्त्या सोऽपि तयोः काल इति स्वीकार्यम् ।

अश्विना। "आमन्त्रितस्य" इति षाष्ठिकमाद्युदात्तत्वम्। य
ज्ञानामसिश्छिनत्तीतिवत् स्वव्यापारे कर्तृत्वविवक्षया "सुयजोर्ङ्वनि
ङ्वनिप्प्रत्ययः। "वनो र च" (पा. ४।१।७) इति ङीप्। तत्संनिया...

सति चैवं यथा प्रातःकालीनविशेषवत्तया तयोः स्तव एवं सायंकालिकविशेषवत्तयाऽपि तयोः स्तवोऽपेक्षित एव। तत्र प्रातःकाले तयोः काले उषसः प्रवृत्तायाः क्रमेण सूर्यमण्डले विलयनात्सोषा अश्विनोरथमारुढवतीति वर्णना उषसः पतित्वं चाश्विनोः, उपसश्चान्धकारनिवारणेनारुणादिकिरणवत्तया च तैः किरणैस्तत्प्रकाश्यैर्लौकिकपदार्थैश्चान्नसम्पादिकात्वं तत्प्रकाशनरूपम्, अतएव तस्या वाजिनीति वा वाजिनीवतीति वा नाममी। तस्यैव च प्रकाशादेर्धनरूपत्वेनापि वर्णनेति कृत्वैव तस्याः सुम्नावरीति नामप्रयोगः। इत्यादिकं दृष्टोपम एवाश्विनोरन्नामि अन्नवदुपभोग्या इत्यभिप्रायसम्भवेन तथा वर्णनम्, उपसश्च सूर्यात्वमिति निरुक्तबृहद्देवतादितो व्यक्तमिति सूर्याया अश्विनो रथसमारोहवर्णना ऋग्वेदादिगतोपःपरैव, उषसः सूर्यपत्नीत्वं सूर्यभगिनीत्वं सूर्यदुहितृत्वमिति लौकिकपत्नीत्वादिसाजात्येन वर्णनम्। यथा पत्नी पत्यौ विलीयते एवमुषा अपि मण्डलोदयात्पूर्वं परिदृश्यमाना मण्डलसमुदयेऽदृश्यमाना तत्र विलीनेवेति विलीनत्वसामान्येनादित्यपत्नीत्वं तस्याः, यस्मादुदयभूधरतः सूर्यस्योदयरूपोत्पत्तिस्तस्मादेवोषसोऽपि प्रवृत्तिरूपोत्पत्तिरिति एकमातृदरत उत्पद्यमानयोर्यथा भ्रातृभगिनीत्वमेवमत्रापि समानस्थानोत्पत्तिसाजात्येनोषसः सूर्यस्य भगिनीत्वम्, एवं पितुरुत्पद्यमाना दुहिता यथा दूरे पतिगृहे हिता स्थापिता भवति तथैवमुषा अपि मण्डलतो विदूरे तत्पूर्वतने काले हिता स्थापितोदिता भवतीति दूरस्थापनसाजात्येनोषसः सूर्यदुहितृत्वम्। तदेव गृहीत्वा तस्या दिवो दुहितृत्वमित्युक्तिः। एवं च सूर्याया अश्विनो रथसमारोह इत्युक्तिरुषसो मण्डलविलयपरैव। आदित्यमण्डलस्य चाश्विरथत्वमिति "रथोहिष" इत्यादिना ऋग्वेदे शतपथब्राह्मणादिषु च व्यक्तम्। तत्र श्रिया सहाश्विनो रथवरणवर्णनं यथा "युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्या वृणीत" इत्यत्र। "आ वां पतित्वं सख्याय जग्मुषी योषा वृणीत जेन्या युवां पती" अत्र योषाशब्देनोपस एव ग्रहणम्, अत एव "आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य" इति सूर्यदुहितुरुषसो युवतित्ववर्णनाऽश्विनोरथसमासीनत्ववचनं चोपपद्यते। सैव चोषा कुलचनोर्जानी अन्नसम्पादिकेत्याभिप्रायेणोर्जानीशब्देनाश्विनोरथं समधिरूढेत्युच्यते, यथा "आ वामूर्जानीरथमश्विनारुहत्" इति। एवं च उपसोऽन्नसम्पादिकात्वमुक्तरीत्या प्रकाशनपरतया, प्रकाशवत्त्वाच्च श्रिया युक्तत्वम्, श्रीयुक्तत्वाच्च शोभमानत्वं, तच्च प्रातःकालिकास्वेवोपस्सु इति, तत्प्रातःकालीनमश्विनोः परिस्थितिरूपं गृहीत्वाऽत्र मन्त्र उच्यते — हे अश्विना अश्विनौ देवौ युवां शुभः शोभमानाया उषसः पती, एवं द्रवन् गतिमान् पाणिरुपोरूपो ययोस्तादृशौ। उपसस्तिर्यक्प्रसारितेजःसमूहरूपतया तत्र रथकेतुदण्डादिकल्पनवद्बाहुत्वकल्पनस्यापि सम्भवात्। अतएवोषस एकवचनेनोपवर्णनवद्बहुत्वेनापि वर्णनेमं बहुत्वोपेतत्वाद्बहुत्वं गृहीत्वा पुरुभुजेति तयोर्विशेषणम्। तादृशौ हे अश्विनौ देवौ इषो गतिमत्य उषसश्चनस्यतम्। तत्रान्नबुद्धिं कुरुतम्। स्वीयत्वेन तां प्रातःकालीनामुषसं सम्पादयतम् इत्यर्थः। प्रातःकालीनोषा उदिता भवतु इति प्रार्थना। अतएव तस्या यज्वरीरिति विशेषणम्। यज्वरीर्यागसम्पादिकाः। उषसां यागसम्पादिकात्वं दिनप्रवृत्तिकरत्वात्। उषसि उदितायां ततो दिनप्रवृत्त्या यागप्रवृत्तिः। दिनस्यैव यागत्वेन बोधाभिप्रायेण यागस्य अवमौत्तमत्ववर्णना। यथा "यज्ञं पृच्छाम्यवमम्" इत्यत्र। अत्र यज्ञस्यावमत्वविशेषणादुत्तमोऽपि यज्ञो भवतीति प्रतीयते। उत्तमश्च यज्ञो दैवोऽवमस्त्वासुर इति। अतएवासुरयज्ञस्य ...यज्ञशब्देन

,प्पतौ" इत्यनुदात्तत्वाद्धातुस्वर एवावशिष्यते। इषःशब्दे शसोऽनु- एव शिष्यते। द्रवन्तौ धावन्तौ पाणी ययोस्तयोः संबोधनं द्रवत्पाणी ।।त्रताद्युदात्तत्वम्, न पुनराष्टमिको निघातः, "अपादादौ" इति प्रतिषेधात्।

२।त पूर्वपदस्य "सुबामन्त्रिते" इति पराङ्गवद्भावेन "मित्रावरुणावृतावृधौ" इतिवद- पादादित्वमिति चेत्। न। तत्र सामानाधिकरण्येन परस्परान्वयात्। इह त्विषो द्रवत्पाणी इत्यनयोः सरस्वतिशुतुद्रिपदवदसामर्थ्येन प्रयुक्तत्वात्। शुभ इति "शुभ शुम्भ दीप्तौ" इत्यस्य संपदादित्वाद् भावे क्विबन्तस्य षष्ठ्येकवचनम्। "षष्ठ्याः पतिपुत्र" (पा. ८।३।५३) इति विसर्जनीयस्य सत्वम्। तस्य "पती" इत्यामन्त्रिते परतः पराङ्गवद्भावादामन्त्रिताद्युदात्तत्वम्। न पुनराष्टमिको निघातः। तस्मिन् कर्तव्ये "द्रवत्पाणी" इति पूर्वस्यामन्त्रितस्य "आमन्त्रितं पूर्वमविद्यमानवद्" इत्यविद्यमानवद्भावेन पादादित्वाद् "अपादादौ" इति प्रतिषेधात्। ननु "मित्रावरुणावृतावृधौ" इतिवद् "नामन्त्रिते समानाधिकरणे" इत्यविद्यमानवद्भावप्रतिषेधेन भवितव्यमिति चेत्। न। मित्रावरुणपदं हि सामान्यवचनमिति युक्तस्तस्याविद्यमानवत्त्व- प्रतिषेधः, द्रवत्पाणीपदं तु न तथेति वैषम्यात्। पुरुभुजौ। पुरू विस्तीर्णौ भुजौ ययोस्तौ। आमन्त्रिताद्युदात्तत्वम्। "सुपां सुलुग्" इतिडादेशः। पुरु बहु भुञ्जाते इति वा। चनस्यतमित्यत्र "चायतेरन्ने ह्रस्वश्च" (उ. ४।२०१) इति "चायृ पूजानिशामनयोः" इत्यस्यासुनप्रत्यय आकारस्य ह्रस्वे चानुकृष्टे नुडागमे च (उ. ४।१७८) "लोपो व्योर्वलि" (पा. ६।१।६६) इति यकारलोपे चनस्शब्दोऽन्ननामसु पठितः। तदात्मन इच्छतीति "सुप आत्मनः क्यच्" (पा. ३।१।८)। "सनाद्यन्ताः (पा. ३।१।३२) इति धातुत्वाल्लोण्मध्यमद्विवचनम्। क्यचः प्रत्यय-

---

व्यवहारः। इममेव बुध्नयज्ञं गृहीत्वा पारसीकग्रन्थेषु मज्दायस्नियमितिशब्दव्यवहारः। बुध्नशब्दस्य ध्वनिकार्कश्य-वर्णविपर्यासप्रणाड्या मज्देत्यपभ्रंशरूपत्वात् यस्नशब्दस्य च यज्ञरूपापभ्रंशत्वात्। एवं च बुध्नयज्ञः कुमेरुवर्ती दिनात्माऽसुरादीनां देवश्च सुमेरुवर्ती दिनात्मा देवानाम्। इति यज्ञद्वैविध्यवचनोपपत्तिः। तस्य च यज्ञस्य सम्पादिकात्वं यज्ञप्रवर्तिकात्वम् अर्थाद्दिनप्रवृत्तिकरत्वमुषसो गृहीत्वोषसां यज्वरीत्वमिति वर्णना सम्भविनी। एवं चालत्येषःशब्दो नेच्छार्थकादिषधातोर्निष्पन्नः किन्तु गत्यर्थादिषिधातोस्तस्य निष्पत्तिः। एवं चेषःशब्दस्य गतिमत्य इत्यर्थः। उषसो गतिमत्त्वं च औषसेषु सूक्तेषु "एकैका क्रतुं परियन्ति सद्य" इत्यादिना व्यक्तम्। एवञ्चास्मिन्मन्त्रे चनस्यतमित्यत्र पुनरुक्त्यादिवर्णनं पूर्वोक्तरीत्या भाष्यकारस्येति विज्ञेयम्। एवं चास्य मन्त्रस्यायं निष्कृष्टोऽर्थः तेजोरूपोषोरूपद्रुततरपाण्युपेतौ शोभमानाया उषसः पतिरूपौ, बहुविधोषोरूपबहुतरभुजयुतौ अश्विनौ देवौ दिनसम्पादिका उषसोऽन्नबुद्ध्या स्वीकुरुतम् उषसां प्रवृत्तिं कुरुतमित्यादिरर्थ इति केचनाभिप्रयन्ति।

स्वरेणोदात्तत्वम्। शपैकादेशे कृत "एकादेश उदात्तेनोदात्तः (पा
रुयातस्य लसार्वधातुकानुदात्तत्वे स्वरितत्वम्। न च "तिङ्ङति
पूर्वस्यामन्त्रितस्याविद्यमानवद्भावेन पदादपरत्वात्पादादित्वाद्वा तदप्राप्तेः ॥ १ ॥

---

* अश्विना यज्वरीः।

अश्विना। अशेर्धातोः क्वनि प्रत्यये अश्वशब्दः। तत्र "धातोः" इति धातुस्वरस्य प्रत्ययस्वरेणाद्युदात्तेन बाधेऽश्वशब्दोऽन्तोदात्तः प्राप्तः परन्तु प्रत्ययस्य नित्स्वरेण प्रत्ययाद्युदात्तस्वरस्य बाधे निदन्तेऽश्वशब्दे आदिरुदात्तः शेषनिघातेनाऽन्तोऽनुदात्तः। तस्योदात्तात्परत्वात्स्वरितत्वम्। ततस्तस्मादश्वशब्दाद् "अतइनि" इति मत्वर्थे इनिप्रत्यये इनेः प्रत्ययस्याद्युदात्तत्वेन पूर्वस्य स्वरस्य निवृत्तौ अश्विशब्दोऽन्तोदात्तः। ततो द्विवचनस्य सुप औकारस्य "सुपाम्"इत्यनेनाकारादेशे स्थानिवत्त्वेन तस्य अनुदात्तत्वेन मध्योदात्तोऽश्विनाशब्दस्तस्यामन्त्रितत्वेन पदादपरत्वेन पादादित्वेन "आमन्त्रितस्यच"इति पाष्ठिकमाद्युदात्तत्वम्, शेषनिघातेनावशिष्टयोरनुदात्तत्वेन पदावयवस्वरसंहिता-दशायाम् उदात्तात्परत्वात्मध्यवर्तिन इकारस्य स्वरितत्वम्। परवर्तिनो नाकाराकारस्य स्वरितात्परत्वात्प्रचितत्वम्। निरुक्तकारीयाश्विशब्दव्युत्पत्त्यनुसारेण तु अशूधातोरौणादिके विनिप्रत्यये कल्पिते निष्पन्नाश्विशब्दे प्रत्ययस्वरेणान्तो-दात्तत्वम्, परवर्तिनी प्रक्रियापूर्ववदेव। यज्वरीः। यजेर्ङ्वनिप् ततः स्त्रियां ङीब्रश्च। तत्र प्रत्ययस्य ङ्वनिपो ङीपश्च पित्त्वादनुदात्तत्वेन "धातोः" इति स्वर एवावशिष्यते। ततः पदावयवसंहितादशायां वकाराकारस्योदात्तात्परत्वाद् "उदात्तादनुदात्तस्य" इति स्वरितः। रेफोत्तरवर्तिन ईकारस्य स्वरितात्परत्वात्प्रचयः। यज्वरीशब्दस्य शस्प्रत्ययान्त-त्वाच्छसा प्रत्ययेन पूर्वसवर्णदीर्घैकादेशस्य स्थानिवत्त्वेनानुदात्तत्वे पूर्ववदेव प्रत्ययस्वरः। इषः। इष्धातोः क्विप्। ततः शस्। तत्र धातोः स्वरः। प्रत्ययस्य क्विपः सर्वापहारात् ततः सञ्जातस्य शसः सुप्त्वादनुदात्तत्वात। तस्य शसोऽकारस्य पदावयवसंहितादशायां स्वरितत्वम्, "उदात्तादनुदात्तस्य" इत्यनेन। पदसंहितादशायांतु इष इकारस्योदात्तस्य परत्वाद्यज्वरीःशब्दीयान्त्येकारस्य "उदात्तस्वरितपरस्य सन्नतरः" इति सन्नतरत्वम्। इषःशब्दीय-षकाराकारस्य पदसंहितादशायां द्रवत्पाणीशब्दपरत्वे रुत्वोत्वगुणेषु ओकारः, तस्य स्थानिवत्त्वेनानुदात्तत्वम्, तस्य उदात्तात्परत्वात् स्वरितत्वे प्राप्ते द्रवच्छब्दीयोदात्ताकारपरत्वेन सन्नतरत्वम्। द्रवत्पाणी। द्रवच्छब्दः क्षिप्रार्थक-मव्ययम्। तस्याव्युत्पन्नत्वेन प्रातिपदिकस्वरेणान्तोदात्तत्वम्। द्रुधातोरौणादिके बाहुलकादतिप्रत्यये प्रत्ययस्वरेण वान्तोदात्तत्वम्। शेषनिघातेनादेरनुदात्तत्वम्। पाणिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, आदेश्च शेषनिघातः। ततो द्रवत्पाणिशब्दयोर्बहुव्रीहिसमासे "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति पूर्वपदप्रकृतिस्वरः समासान्तोदात्तत्वस्य बाधकः। एवं च द्रवत्पाणिशब्दे वकाराकारस्योदात्तत्वमवशिष्टानामनुदात्तता। ततः सम्बोधनद्विवचने पूर्वसवर्ण-दीर्घादेशे दीर्घैकादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वेन मध्योदात्तं पदं प्राप्तमासीत्परन्तु अस्य सम्बोधनविभक्त्यन्तत्वे-नामन्त्रितत्वेन पाष्ठिकेन "आमन्त्रितस्यच" इत्यनेनाद्युदात्तत्वम्। आष्टमिकनिघातस्यात्राप्राप्तिः पादादित्वात्। शुभः। शुभधातोः क्विपि षष्ठीविभक्तेरेकवचनङस्प्रत्यये सिद्धिः। तत्र क्विपः सर्वापहारात्, ङसश्च सुप्त्वेनानुदात्त-त्वाद्धातोरेव स्वरः। तस्य पदस्य परवर्तिपतीरूपामन्त्रितेन सह "सुबामन्त्रिते पराङ्गवत्स्वरे" इति पराङ्गवद्भावात् षाष्ठिकेन "आमन्त्रितस्यच" इत्यनेन आद्युदात्तत्वम्। अन्त्यस्योदात्तात्परत्वात्स्वरितत्वं संहितायाम्। पती। पातेर्डतिप्रत्यये प्रत्ययस्वरेणाद्युदात्तः पतिशब्दः। शेषनिघातेनान्तस्यानुदात्तत्वे तस्योदात्तात्परत्वात्स्वरितत्वम्। तत्र पतिशब्दात्संबोधनप्रथमाद्विवचने पूर्वसवर्णदीर्घैकादेशे तस्यापि स्थानिवत्त्वेनानुदात्तत्वात्पदतादशायां पूर्ववत्स्वरित

...ः। इज्यते याभिस्ता यज्वरीः। इषो हविर्लक्षणान्यन्नानि, द्रवत्पाणी
...ावित्यर्थः। शुभस्पती। शुभमित्युदकनाम तस्याधिपती। पुरुभुजौ
...क्तारौ। चनस्यतम्। चन इत्यन्ननाम तदिच्छतं चनस्यतम्। इच्छया चात्र
... भक्षणं लक्ष्यते। अस्मदीयानि हवींषि भक्षणीयानीत्यर्थः॥ १॥

इति पतीपदमाद्युदात्तं प्राप्तम्, परन्तु पूर्ववर्तिशुभ इति सुबन्तस्य पराङ्गवद्भावेन शुभस्पती इत्यस्यामन्त्रितस्वरे आतिदेशिकैकपदत्वेन "आमन्त्रितस्य" इत्यनेन पाष्ठिकेन सूत्रेणादेरुदात्तत्वे शेषनिघातेनावशिष्टानां त्रयाणामपि स्वराणामनुदात्तत्वम्। तत्राद्यस्य स्वरस्योदात्तात्परत्वात्स्वरितत्वे स्वरितात्परत्वादवशिष्टयोः पतीशब्दगतस्वरयोः प्रचयस्वरः। अतिदेशेन विशिष्टस्य आमन्त्रितत्वरूपैकपदत्वेऽपि पतीइत्यस्यानातिदेशिकस्वतःसिद्धामन्त्रितरूपत्वेनामन्त्रितस्वरः स्यादिति न शङ्क्यम्। अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्। एवं च पतीशब्दस्य सर्वप्रचितत्वं संहितादशायां पदपाठेतु पूर्वनिमित्तव्यपगमेन प्रचितत्वमात्रं निवर्ततेऽनुदात्तत्वं त्ववतिष्ठते एवेति सर्वानुदात्तत्वम्। पुरुभुजा। पॄधातोः कुप्रत्ययेनौणादिकेन पुरुशब्दो निष्पद्यते। तत्र प्रत्ययस्वरेण धातुस्वरो निवर्तत इति पुरुशब्दोऽन्तोदात्तः शेषनिघातेनाद्यस्यानुदात्तत्वम्। भुजावित्यत्र भुज्धातुतः क्विपि भुक्शब्दाद् द्विवचने भुजाविति भवति। तत्र क्विपः सर्वापहारेण धातुस्वरः। ततो द्वयोः शब्दयोः समासे "समासस्य" इत्यन्तोदात्तस्य "तत्पुरुषे तुल्यार्थ" इत्यनेन बाधे तस्यापि "गतिकारकोपपदात्कृद्" इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः पुरुभुक्शब्दस्ततो द्विवचनस्य सम्बोधनप्रथमायास्सुप्त्वादनुदात्तत्वेन तत्स्थानिकस्य "सुपां सुलुग्" इत्याकारादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वात्पुरुभुजाशब्दो मध्योदात्तः प्राप्तः। अथवा पुरुभुजेत्यत्र विनिगमकहेत्वभावादर्थस्य सम्भवात् भुजशब्देन बहुव्रीहिः। तत्र पुरुशब्दस्य स्वरः पूर्ववत्। भुजशब्दे भुजधातोः "हलश्च" इति घञ्प्रत्यये कुत्वगुणयोः "भुजन्युब्जौ" इति निपातनेनाभावे भुजशब्दस्तत्र धातुस्वरस्य निवर्तकः प्रत्ययस्वरः प्राप्तस्तस्यापि ञित्त्वेन ञित्स्वरेण बाधाद् भुजशब्द आद्युदात्तः। ततः पुरुशब्देन बहुव्रीहिसमासे "समासस्य" इत्यन्तोदात्तस्य बहुव्रीहिस्वरेण बाधे प्राप्ते तस्यापि बाहुलकेनोत्तरपदाद्युदात्तेन बाधे मध्योदात्तं पदं निष्पद्यते इति मध्योदात्तता प्राप्ता, परन्तु तस्यामन्त्रितत्वेन पदादपरत्वेन पादादित्वेन च षाष्ठिक आद्युदात्तत्वे शेषनिघातेनापरेषामनुदात्तत्वम्। तत्र द्वितीयस्य रुशब्दोकारस्योदात्तात्परत्वात्स्वरितत्वम्, परयोः पदतादशायां स्वरितात्परत्वात्प्रचितत्वम्, तत् संहितायामप्यवतिष्ठते। चनस्यतम्। चायेर्धातोरन्ने वाच्ये "चायेरन्ने ह्रस्वश्च" इत्यौणादिकेनासुन्प्रत्ययो ह्रस्वो नुडागमश्चेति चनःशब्दो निष्पद्यते यलोपेन। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां प्रत्ययस्य नित्त्वेन नित्स्वरेण प्रत्ययस्वरापवादेन चनश्शब्द आद्युदात्तः शेषनिघातेनान्त्यस्यानुदात्तत्वं पदावयवसंहितादशायां तस्य उदात्तात्परत्वात्स्वरितत्वम्। ततश्चनःशब्दात्र "सुप आत्मन" इति क्यचि प्रत्यये तस्य प्रत्ययत्वेनाद्युदात्तत्वे प्राप्ते तस्यापवादकेन "चितः" इत्यनेनान्तस्योदात्तत्वम्। सनाद्यन्तत्वाद्धातुत्वेऽपि स एव स्वरः। एवं च चनस्शब्दस्यान्त उदात्तः। ततस्तस्माल्लोटो मध्यमद्विवचने थसि तस्य तमादेशे मध्ये शपि चनस्यतंशब्दो निष्पद्यते। तत्र थसः प्रत्ययत्वेन प्रत्ययाद्युदात्तत्वे तस्य स्थाने जातस्य तमादेशस्यापि स्थानिवत्त्वेनाद्युदात्तत्वाच्छपश्च पित्त्वादनुदात्तत्वे शपा सहैकादेशेऽनुपदेशात्परस्य लसार्वधातुकस्य तमोऽनुदात्तत्वे चनस्यतंशब्दो मध्योदात्तः संपद्यते। प्रकृते पूर्ववर्तिनः पुरुभुजाशब्दस्यामन्त्रितत्वादविद्यमानत्वेन पदात्परत्वाभावेन मध्योदात्तमेव चनस्यतंपदम्। तत्र शेषनिघातेन

वे० मा०—अश्विनौ यजमानस्य यद्गृह्यमाणानि त्रिप्रहस्तावुदकस्यैश्वर्ं चनोऽन्नं तदिच्छतम्। धातुनोक्तार्थस्य कर्मणः पदान्तरेण पृथग् वक्तुं निः भवति। तत्समानार्थेनेष्यश्नस्यतमिति ॥ १ ॥

द्वितीयामृचमाह :-

अश्विना पुरुदंससा नरा शवीरया धिया ।
धिष्ण्या वनतं गिरः ॥२॥

अश्विना । पुरुऽदंससा । नरा । शवीरया । धिया ।
धिष्ण्या । वनतम् । गिरः ॥२॥

अश्विना = हे अश्विनौ युवां गिरः = अस्मदीयाः स्तुतीर्धिया = आदरयुक्तया बुद्ध्या वनतम् = संभजतम्। स्वीकुरुतम्। कीदृशावश्विनौ? पुरुदंससा — बहुकर्माणौ। षड्विंशतिसंख्याकेषु कर्मनामसु "दंस" इति पठितम्। नरा — नेतारौ। धिष्ण्या — धार्ष्ट्ययुक्तौ, बुद्धिमन्तौ वा। कीदृश्या धिया? शवीरया = गतियुक्तया। अप्रतिहतप्रसरयेत्यर्थः ॥*

आद्ययोः स्वरयोरनुदात्तत्वस्य संहितायामादेः प्रचयेन द्वितीयस्य सन्नतरत्वेन निवृत्तिः। अन्त्यस्य तु संहितायामेवं पदपाठेऽपि उदात्तात्परत्वात्स्वरितत्वम्।

* निरुक्तेऽश्विनोर्नामनिर्वचनतः अन्यतरव्यक्तिद्वयप्रविवेचनतो, "वासात्य" इत्यादिवैदिकव्यवहारप्रदर्शनतस्तदीयकालोल्लेखतश्च तेजस्तमोरूपत्वमिति पूर्वं निर्णीतम्, तादृक् सहप्रवृत्तं रूपं गृहीत्वा "ऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टम्भम्" इति तयोः कालप्रदर्शनमपि तत्र। एवं च सहप्रवृत्तं तेजस्तमसो रूपं प्रातरिव सायमपि सूर्यास्तोत्तरं प्रवर्तत इति सोऽयमपि तयोः कालो भवितुमर्हति, परंतु दैवे यज्ञे तयोर्देवत्वं निर्व्यूढं भवतु इति प्रातरेव तयोः काल इति वर्णना। अत एवोच्यते "न सायमस्ति देवया अजुष्टम्" इति। अतएव देवासुरयुद्धवर्णने "नेमे देवा नेमे असुरा" इत्यर्धार्धभागित्वमुभयेषामुक्त्वा "अहर्वै देवा अश्रयन्त रात्रिमसुरा" इति दिवारात्रिसम्बन्धिता तेषामुक्ता सङ्गच्छते। अत एवर्ग्वेदे तयोर्वर्णनप्रसङ्गे प्रातस्सम्बन्धित्वानुरूपैव बहुला वर्णना वर्ण्यते। तावता सर्वथा रात्र्यनुरूपा वर्णनाऽपि नास्ति इति न, किन्तु स्वल्पत्वं तस्या इत्येव विशेषः। अतएव वर्णने बहुल हिरण्यवर्तनीत्वमुच्यते तयोः। हिरण्यवर्तनीत्वं हि हिरण्यस्य वर्तनिर्वर्त्म ययोरिति-विग्रहणेन तत्त्वं तयोः। हिरण्यशब्देन सुवर्णस्य ग्रहणमिवादित्यस्यापि बोधो वेदे। "हिरण्यरूपमुषसो व्युष्टौ" इति उषसो व्युष्टौ उषसो विभानानन्तरं हिरण्यरूपमिति वर्णनेनादित्यस्य हिरण्यरूपता वर्णिता भवति। किञ्चादित्यमण्डलस्य हिरण्मयता लोकेऽपि वर्ण्यमाना तमेवार्थमभिव्यनक्ति। अतएव "अयःस्थूणमुदिता उदिता

चतुष्टयस्य पाष्ठिकमामन्त्रिताद्युदात्तत्वम्। पादादित्वान्नाष्टमिको त्यपि हि पादादिरेव। "आमन्त्रितं पूर्वमविद्यमानवद्" इति पूर्वस्य ात्। "नामन्त्रिते समानाधिकरणे" इति पूर्वस्य सामान्यवचनत्वेनास्य शेषवचनत्वेन नाविद्यमानवत्त्वमिति चेत्। न। अश्विशब्दवत्पुरुदंसश्शब्दस्याप्यश्विनोरेव रूढ्या प्रयुज्यमानतया सामान्यशब्दत्वात्। सामान्यवचनं नाविद्यमानवदित्युक्तेऽर्थात्परस्य विशेषवचनत्वावगमात्। उभयोः सामान्यवचनत्वे पर्यायत्वेन

सूर्यस्य" इति सूर्यस्योदयेऽयःस्थूणत्वं सुवर्णस्थूणत्वमुच्यमानं संगच्छते वेदे। एवं च हिरण्यं सुवर्णं तदनुरूपा तदभिमुखा वर्तनिर्मार्गो ययोरिति वर्णनेनेदं प्रातःकालिकं रूपं तयोरिति प्रतीयते। तथा तयोर्वर्णने हिरण्यवर्तनित्वमिव रुद्रवर्तनित्वमप्युच्यते। रुद्रवर्तनित्वं च रुद्रस्येव वर्तनिर्ययोरिति विगृह्य रुद्रशब्दस्य रोदनं प्रवृत्तिनिमित्तत्वेनोपादाय शत्रुरोदनकरणेन निमित्तेन योद्धृपरत्वं गृहीत्वा तेषामिव मार्गो ययोरिति व्याख्यातारो व्याचक्षते। वस्तुतस्तु हिरण्यवर्तनित्वमिव रुद्रवर्तनित्वमपि रुद्रस्य सम्बन्धिनी वर्तनिर्मार्गो ययोरिति विग्रहणेन रुद्रानुकूलमार्गपरं वक्तव्यम्। रुद्रशब्देन चास्तं गच्छन्गतश्चादित्य उच्यते। तदनुकूला वर्तनिः स च रुद्रो येन मार्गेण गतः सा वर्तनिर्मार्गो ययोरित्यभिप्रायः। एवं चास्तोत्तरं तयोः प्रवृत्त्या तयो रुद्रमार्गानुसारित्वमभिप्रेत्य रुद्रवर्तनिशब्देन वर्णनेति सायन्तनसहप्रवृत्तरूपाऽनुकूलैषा वर्णना। अस्तं गच्छत आदित्यस्य रुद्रत्वं वाजसनेयिनां शतपथब्राह्मणे स्पष्टमुच्यते इत्यादिकं रुद्रवर्णनप्रसङ्गे विस्तरतः प्रदर्शयिष्यते। किञ्चान्वेदेऽश्विनोर्वर्णके सूक्ते समानेऽहनि त्रियोगाभिप्रायेणोच्यते "त्रिरश्विनो अद्या भवतं नवेदसा" इति। "समानेऽहन् त्रिरवद्यगोहना" इत्यादि। तत्रैकस्मिन्नहनि तयोस्त्रिः सम्बन्धं विना तन्नोपपद्यते। त्रिः सम्बन्धश्च तयोरेकस्मिन्नहनि यथोपपद्येत तथा तद् व्याख्येयम्। व्याख्यातृभिः सोमयागे सवनत्रयसम्बन्धिताभिप्रायेण तद् व्याख्यायते। परंतु तेजस्तमोरूपत्वे तयोस्तन्नोपपद्येत। तस्मात् तेजस्तमोरूपयोस्तयोः प्रातरा सूर्योदयमर्धरात्रत ऊर्ध्वं सह प्रवृत्त्येदमेकं, सायमादित्यास्तोत्तरं सर्वात्मना तमोरूपमध्यरात्रपर्यन्तमपि सहप्रवृत्त्या द्वितीयम्, मध्यरात्रे केवलस्य तमसो वाऽत्यन्तमव्यक्ततेजसो वा सम्बन्धो दिवाभागे च सूर्योदयमारभ्यासायं केवलस्य विस्पष्टस्य तेजस एव प्रवृत्त्या असहप्रवृत्तमिदं रूपं तयोरिति सहप्रवृत्तं रूपद्वयमुक्तरीत्याऽसहप्रवृत्तं रूपमेकमिति समानेऽहनि रूपत्रयसम्बन्धेन तद् गृहीत्वा पूर्वोक्तस्थले त्रिःसम्बन्धवर्णनस्योपपन्नता। एवं चैतद्वर्णनेनापि तयोः सायन्तनसहप्रवृत्तरूपवर्णना विस्पष्टा भवति। एवं च रुद्रवर्तनी इति वर्णनं सायंसम्बन्धाभिप्रायकम्। अतएव तयोर्धिष्ण्येति विशेषणम्। धिष्ण्यशब्दो हि धिष्धातोर्धृषधातोर्वोत्पन्नो गृहमाह धारणेन हेतुना धिषधातोः, गृहे स्थितस्य जन्तोः प्रायः प्रागल्भ्यं भवतीति प्रागल्भ्यप्रदत्वहेतुना धृष्धातोर्वा निष्पन्नो धिष्ण्यशब्दो गृहमाह। अतएव कोशादिषु धिष्ण्यशब्दस्य गृहपरतोच्यते। निघण्टौ गृहनामस्वपाठश्च गृहे तस्य लोकप्रसिद्धिसिद्धत्वमभिप्रेत्य। अतएव सत्यादिनामसु बडादीनामिव सत्यादिशब्दस्यागणनम्। अतएव तत्रत्यः "षट् सत्यनामानि" इत्यादिकः षड् इति सङ्ख्यानिर्देश उपपद्यते। एवं च धिष्ण्यशब्दस्य गृहपरत्वात्तदर्हौ तद्योगयुक्तावित्यर्थाभिप्रायकयत्प्रत्ययुक्तत्वेन धिष्ण्यशब्दोऽश्विनौ विशिनष्टि। गृहार्हौ गृहगताविति तस्यार्थः। गृहशब्दश्चास्तं तत्सम्बन्धिनं

पौनरुक्त्यात्सहाप्रयोग इति चेत्। न। गुणविशेषसम्बन्धसंकीर्तनव- संबन्धसंकीर्तनस्यापि स्तुत्युपयोगे सप्रयोजनत्वान्निष्प्रयोजनपुनर्वच- अश्विपुरुदंसःशब्दयोरेकार्थवृत्तित्वेऽपि पर्यायत्वादेव प्रवृत्तिनिमित्तभेदाभाव- धिकरण्यादपि नाविद्यमानवत्त्वप्रतिषेधः। भिन्नप्रवृत्तिनिमित्तानामेव ह्येकस्मिन्- वृत्तिः सामानाधिकरण्यम्। अश्विशब्दस्याश्वसम्बन्धो निमित्तं पुरुदंसःशब्दस्य तु बहुकर्म- सम्बन्ध इति प्रवृत्तिनिमित्तभेद इति चेत्। न। तद्धि द्वयं व्युत्पत्तिमात्रनि- मित्तम्। व्युत्पत्तिनिमित्तभेदमात्रेणापि सामानाधिकरण्याभिधाने वृक्षमहीरुहशब्दयोरपि तथात्वप्रसङ्गः। अत एव हि "इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुति। एतानि ते अघ्न्ये नामानि" इत्यत्र (तै. स ७।१।६।८) सहस्रतमीप्रशंसोपयोगित्वेनेडादिशब्दानाम् "एतानि ते अघ्न्ये नामानि" इति वचनेन पर्यायाणामप्यनेकविशिष्टनामसम्बन्धनिबन्धन-

---

कालं च बोधयति। गृहास्तशब्दयोः समानार्थत्वं निघण्टौ अस्तशब्दस्य गृहनामसु पाठेन व्यक्तम्। एवञ्च 'आदित्यादिरस्तं गतः' इत्यस्य गृहं प्राप्त इत्यार्थात्तत्रादित्यादिकानां गृहत्वेनोपवर्णना। अतएवादित्यस्या- तिथ्यादिशब्दबोध्यत्वं कदेति प्रतिपादयन्त्या हंसवत्या ऋचा दुरोणसद आदित्यस्यातिथिशब्दबोध्यत्वमिति प्रतिपाद्यते। अस्ते गृहे सीदतस्तिष्ठत आदित्यस्यातिथिशब्दबोध्यत्वमिति तदर्थः। अतएव "एकातिथिमपसायं रुणद्धि" इति एकातिथेरादित्यस्य सायमपरोध उच्यते। एवं च सायंसम्बन्ध्यादित्योऽस्तं गतस्तस्य चातिथि- शब्दबोध्यतेति हंसवतीबोध्यं संगच्छते। तथाचास्तसम्बन्धिनौ सायंसम्बन्धिनावश्विनौ धिष्ण्यशब्देनोच्येते इति सायन्तनं सहरूपमनेन प्रतिपाद्यत इति संपद्यते। एवं सति चानेन मन्त्रेणाश्विनोः सायं सम्बन्धिसहरूपं वर्ण्यते, पूर्वेण मन्त्रेण प्रातःसम्बन्धि तयोः सहरूपं प्रतिपाद्यते। तच्च पूर्वमन्त्रव्याख्यानप्रसङ्गे केचिन्मतेन प्रदर्शितम्। अत्र चास्य मन्त्रस्योक्तमतेनैवमर्थः—प्रातर्यथा पुरुभुजत्वमेवं सायं पुरुदंसस्त्वम् औपसं कर्माश्विनोरिति गृहीत्वोच्यते—पुरुदंससौ बहुविधकर्माणावश्विनौ देवौ! दैवदिनादे रात्रिसम्बन्धिनस्तमसो वा नेतारौ शवीरया गतिमत्या धिया सायन्तन्योपसा युक्तौ गिरः सायन्तनीरुपसो वननं सम्भजतं तद्युक्तौ भवतम्। उपाश्च सान्ध्यः प्रकाशः। स च प्रातःकाले यथा भवति एवं सायमपि स तथैव प्रवर्तते। एतावानेव विशेषो यत्प्रातस्तन- सान्ध्यप्रकाशोत्तरम् आदित्यमण्डलोदयेन दिनप्रवृत्तिः सायन्तनसान्ध्यप्रकाशोत्तरं च केवलतमोरूपरात्रिप्रवृत्तिरिति। अतएव प्रातः प्रकाशस्योत्तरोत्तरकाले क्रमशः प्रवर्द्धमानता सायं चोत्तरोत्तरकाले क्रमशः प्रकाशस्यावहीय- मानतेति भवति। एवं सन्ध्याया उभयत्र प्रवृत्त्या तदीयः प्रकाशोऽपि उभयत्र भवति। तत्र प्रातः- प्रकाशस्योषाः सूर्या इत्यादिशब्दबोध्यता सायंप्रकाशस्य वागादिशब्दबोध्यता। कदाचन उभयसाधारण्येनापि तैः शब्दैर्व्यवहारः। अतएव वाङ्नामासु "सूर्या सरस्वती" इत्यादिना सूर्यानाम्नः पठनं निघण्टौ। इमं विशेषमभिप्रेत्य प्रातस्तन्या उषसः सूर्या सावित्रीति व्यवहारः, सायंतन्याश्च वारुणी सरस्वतीति व्यवहारः। एवं च वाचः सायन्तनसान्ध्यप्रकाशरूपत्वेन वाङ्नामसु च गीःशब्दस्य पाठेन गिरः सम्भजतमित्यनेन तस्य सायन्तनप्रकाशस्य स्वीकारवचनमनेनाश्विनोरित्यर्थ इति पूर्वतनमतानुसार्यर्थोऽस्य मन्त्रस्येति।

..। स्तुत्युपयोगेनैव व्युत्पत्तिनिमित्तभेदविवक्षायामपि पर्यायत्वेना-
. "नामन्त्रित" इति निषेधाभावाद् "आमन्त्रितं पूर्वमविद्यमानवद्" इति
.मानवत्त्वात्सर्वेषां षाष्ठिकमाद्युदात्तत्वम्। तद्वत्प्रकृतेऽपि। कॄगॄपॄकटिपटिशौटिभ्य
.न् । (उ ४।३०) इत्यत ईरन्नित्यनुवृत्तौ बहुलवचनादन्यत्रापीत्यनेन "शु श्रु गतौ" इति
धातोरीरन्प्रत्यये कृते सति नित्त्वाच्छवीरयाशब्द आद्युदात्तः। धियेत्यत्र "सावेकाच"
इति विभक्तिरुदात्ता। वनतमित्यत्र शपः पित्त्वाल्लोण्मध्यमद्विवचनस्य लसार्वधातुकत्वाच्च
"वन षण सम्भक्तौ" इति धातूदात्तत्वमेव शिष्यते। न च "तिङ्ङतिङ" इति निघातः।
पूर्वामन्त्रितस्याविद्यमानत्वेन पादादित्वात्। गिरः। सुपोऽनुदात्तत्वे प्रातिपदिकस्वरः
शिष्यते ॥ २ ॥*

---

* अश्विना। वन्नन्तादाद्युदात्तादश्वशब्दादिनिप्रत्ययेन प्रत्ययस्वरेणान्तोदात्तोऽश्विशब्दः, अशूधातोर्वा बाहुलकेन विनिप्रत्ययेनोक्तवत्प्रत्ययस्वरेण वाऽन्तोदात्तः सः। ततः सम्बोधनप्रथमाद्विवचनेन सुप्त्वादनुदात्तेन तत्स्थानिकेनाकारादेशेनापि स्थानिवत्त्वादनुदात्तेन मध्योदात्तोऽश्विनाशब्दः प्राप्तः परन्तु तस्य संबोधनप्रथमान्तत्वेनमन्त्रितसञ्ज्ञा-युक्तत्वाद् "आमन्त्रितस्य च" इति षष्ठाध्यायस्थसूत्रेणाद्युदात्तत्वे शेषनिघातेन परवर्तिनोरचोरनुदात्तता। तत्राद्यस्येकारस्योदात्तात्परत्वात्स्वरितत्वम् "उदात्तदनुदात्तस्य स्वरितः" इत्यनेन। परवर्तिन आकारस्य च पदसंहितादशायां स्वरितात्परत्वात्प्रचयश्रुतिः। संहितायां तु पुरुदंसश्शब्दीयोदात्तपुशब्दोकारे परे "उदात्तस्वरितपरस्य सन्नतरः" इति सन्नतरः। पुरुदंससा। पॄधातोः पूरणार्थादौणादिके "पॄभिदिव्यधिगृधिधृषिभ्य" इति कुप्रत्यये गुणाभावे धातोरुत्वे रपरत्वे पुरुशब्दस्य निष्पत्तिः। पृणाति पूरयतीति पुरु। पूरकत्वं चाव्यापकस्य अनेकस्यैव भवतीत्यत्रैक-भिन्ना बहव एवाभिप्रेयन्त इति पुरुशब्दस्य बह्वर्थकता। अतएव तस्य निघण्टौ बहुनामसु पाठः। दंसस्शब्दो दस्धातोरसुनि औणादिके प्रत्यये बाहुलकान्नुमि निष्पद्यते। अथवा दमधातोः पूर्ववदसुनि बाहुलकात्सुडागमे दंसश्शब्दः। दर्शयति तत्तत्कारणेन दृश्यते दृष्टिभिरित्यस्मिन्नर्थे दसिधातोश्चुरादिकादुक्तशब्दनिष्पत्तिः, अथवा मोक्षयति पाप्मनः पुरुषं संसारादापदो वेत्यर्थे दसिधातोश्चुरादिकाद्वा तन्निष्पत्तिः, उपक्षेपयितव्यं हि तदन्तर्नेतव्य-मित्यस्मिन्नर्थे तसु उपक्षये दसुचेतिधातोरुक्तशब्दनिष्पत्तिरिति देवराजयज्वसम्मता व्युत्पत्तिः। दमधातोरुक्तशब्द-निष्पत्तौ च दाम्यति पुरुषं शमयति इष्टासाधनकृतादुद्वेगादिति दंसः कर्म। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां प्रत्ययस्वरापवादेन नित्स्वरेण धातुस्वर एवावशेष्यतेऽवशिष्टस्य शेषनिघातेनानुदात्ततायामाद्युदात्तो दंसश्शब्दः। ततः पुरुदंसश्शब्दयोर्बहुव्रीहिसमासे समासान्तोदात्तत्वस्य "बहुव्रीहौ प्रकृत्या" इति पूर्वपदप्रकृति-स्वरेणापवादेन बाधे पुरुशब्दस्वर एव समासेऽप्यवतिष्ठते। पुरुशब्दे च कुप्रत्ययस्वरेण धातुस्वरनिवृत्त्याऽन्तोदात्तता। तस्मात् पुरुदंसःशब्दे रुशब्दोकारस्योदात्तत्वे प्राप्ते वृषादिपाठकल्पनया पकारोत्तरस्याकारस्योदात्तत्वम्, अवशिष्टानां शेषनिघातेनानुदात्तत्वम्, तत्र रुशब्दाकारस्योदात्तात्परत्वात्स्वरितत्वम्, परयोः प्रचयस्वरत्वमिति प्राप्तिः पुरुदंसः-शब्दे, ततः सम्बोधनप्रथमाद्विवचने औकारस्य सुप्त्वादनुदात्तत्वं तत्स्थानिकस्य "सुपाम्" इति आकारादेशस्य स्थानिवत्त्वे पूर्ववत्तस्य प्रचयः स्वरः। तत्र "आमन्त्रितस्य च" इत्यनेन आष्टमिकेन सर्वनिघातो आमन्त्रितत्वेन वक्तव्य इति प्राप्तौ पूर्वस्याश्विनेत्यस्य "आमन्त्रितं पूर्वमविद्यमानवद्" इत्यविद्यमानवत्त्वेन पदात्परत्वाभावेनाष्टमि-

स्क०—पुरुदंससा। दंस इति कर्मनाम। बहुकर्माणौ। नः क्षिप्रमीरणं गमनं शर्वीरम्। अथवा शव इति बलनाम। परबलस्य प्रेरयातौ गच्छतस्तौ। शीघ्रगामिनौ। परबलापनोदगामिनावित्यर्थः। अथवा आ शब्दो विभक्तेरादेशो न याते रूपम्। शर्वीरशब्दस्तु पूर्ववत्कर्तृसाधनः। शीघ्रगामिनौ प्रेरयितारावित्यर्थः। शवतेर्वा गत्यर्थस्य शर्वीरशब्दः। यज्ञान् शत्रून् वा प्रति गन्तारावित्यर्थः।

कस्यात्राप्राप्तौ षाष्ठिकेनाद्युदात्तत्वविधौ पूर्वस्वर एव शिष्यते तेन पुरुदंससेति शब्द आद्युदात्तः। अत्रशिष्टस्वराः पूर्वोक्ताः पदत्वे। संहितायां नराशब्दीयोदात्तस्य परत्वेन सन्नतरत्वमन्तिमस्याकारस्येति विशेषः। नरा। "नयतेर्डिच्च" इत्यौणादिकेन सूत्रेण नीधातुत ऋन्प्रत्ययेन नृशब्दस्य सिद्धिः। नयन्ति संसारचक्रं, देशान्तरं नीयन्ते स्थानोत्तरभावेनेति व्युत्पत्तेः, नृती गात्रविक्षेपे इति धातुतो वा बाहुलकादनप्रत्ययो डित्, तेन नृशब्दसिद्धिः। नृत्यन्ति गात्रविक्षेपं कुर्वन्ति, इति व्युत्पत्तेः, इति देवराजयज्वनोऽभिमतम्। नॄ नये इत्यस्माद्धातोः "ऋदोरप्" इत्यपा प्रत्यये गुणे च सति नरेत्यकारान्तो नरशब्दो निष्पद्यते नृणन्ति नयन्ति ते नरा इति व्युत्पत्तेः। तत्र ऋकारान्तपक्षे धातुस्वरस्य डिना प्रत्ययेनापहारात् प्रत्ययसम्बन्धिन एवकारस्यावशेषादकारस्य प्रत्ययस्वरेणाद्युदात्तत्वेन रूपेणोदात्तत्वं प्राप्तमासीत्परन्तु तदपवादेन प्रकृते नित्त्वात् प्रत्ययस्य निदन्तादित्वेन "ञ्नित्यादिर्नित्यम्" इत्यादिसूत्रेणोदात्तत्वमिति नृशब्दस्यकार उदात्तः, ततस्तस्माच्छब्दात्सम्बोधन-प्रथमाद्विवचने तस्य सुप्त्वेनानुदात्तस्थानिकस्य "सुपाम्" इत्याकारस्यापि स्थानिवत्त्वेनानुदात्तत्वादाकारोऽनुदात्त-स्तन्निमित्तकस्यकारस्य गुणोऽकारोऽपि ऋकारस्थानिक इति ऋकारस्योदात्तत्वेन स्थानिवत्त्वेनोदात्त इत्याद्युदात्तं नरेति पदम्। तस्य पदात्परत्वादाष्टमिकेन "आमन्त्रितस्य च" इत्यनेन सर्वानुदात्तत्वमामन्त्रितत्वेऽपि न भवति पादादित्वात्, किन्तु षाष्ठिकेन "आमन्त्रितस्य च" इत्यनेनाद्युदात्तत्वमेव पूर्वस्थितमत्रानुमन्यते। एवं च नरा-शब्द आद्युदात्तः, रेफाकारस्यानुदात्तस्य पदतादशायामुदात्तात्परत्वात्स्वरितत्वम्, संहितादशायां शर्वीरेतिशब्दीय-शकाररूपोदात्तपरतया सन्नतरत्वम्। नरशब्दस्याकारान्तस्येदं रूपमितिपक्षेऽपः प्रत्ययस्य पित्त्वादनुदात्तत्वा-द्धातोरेव स्वरोऽवशिष्यते। तस्य गुणादेशाकारस्यापि उदात्तऋकारस्थानिकतया स्थानिवत्त्वेनोदात्तत्वमिति नर आद्युदात्तः सम्पद्यते। ततो विभक्तिप्रत्यये पूर्ववदाकारे तस्यानुदात्तत्वम्। तस्य चाकारस्य नरशब्दीय-रेफाकारेण पूर्वेण सह सवर्णदीर्घे दीर्घस्याप्यनुदात्तस्थानिकतयाऽनुदात्तत्वमिति नराशब्द आद्युदात्त एव। परवर्तिनी प्रक्रियापूर्ववदेवेति नराशब्दस्याद्युदात्तत्वमन्त्यस्यानुदात्तत्वादिकम्। शवीरया। शुधातोर्बाहुलकादी-रनि प्रत्यये शवीरशब्दो निष्पद्यते ततष्टापि शवीराशब्दस्तस्य तृतीयैकवचने शवीरयेति पदम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण बाधे प्राप्ते प्रत्ययगतनित्त्वेन नित्स्वरस्य प्रत्ययस्वरापवादकस्य वशतः शर्वीरशब्द आद्युदात्तः। शेषनिघातेन वीरशब्दीयावीकाराकारावनुदात्तौ। ततष्टापः पित्त्वादनुदात्तत्वात् तेन सह वीरशब्दीयानुदात्ता-कारेण सवर्णदीर्घैकादेशे एकादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। ततस्तृतीयैकवचनटाप्रत्ययस्यानुदात्तत्वेन तन्नि-मित्तकस्य टाबाकारस्यैत्वस्य तत्स्थानिकायादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वमिति शवीरयाशब्द आद्युदात्तोऽवशिष्टा अचस्त्वनुदात्ताः। तत्र वीशब्देकारस्यानुदात्तस्योदात्तात्परत्वेन "उदात्तादनुदात्तस्य" इति स्वरितत्वम्। ततः परयोस्तु रयेतिरेफयकाराकारयोः स्वरितात्परत्वात् प्रचितत्वम्। धिया। ध्यैधातोः क्विपि धीशब्दस्य निष्पत्तिस्तत-स्तृतीयैकवचने इयङादेशे धियाशब्दो निष्पन्नः। तत्र ध्यैधातोरन्तस्योदात्तत्वं "धातोः" इत्यनेन, प्रत्ययस्य क्विपः

...ऽऽदूरेणेत्यर्थः। धिष्णया। धिषणेति वाङ्नाम तस्याः पुत्रौ धिष्णयौ ... धीरिति प्रज्ञानाम। ष्णै वेष्टने। धीः स्ना वेष्टयित्री सर्वार्थग्रहणा- धिष्णौ। धिष्णावेव धिष्णयौ। अत्यन्तप्रज्ञावित्यर्थः। वनतं संभजतम्। ...थाः स्तुतिलक्षणा वाचः ॥ २ ॥

वे० मा०—अश्विनौ आश्चर्यभूतविविधकर्माणौ नेतारौ क्षिप्रमुपद्रुतं प्रति गमनं यस्यास्तया धिया कर्मणा धिष्णया धिषणार्हौ स्तोतव्यौ भजेथां स्तुतीः ॥ २ ॥

सर्वापहाराद्धातुस्वरस्यैव श्रेषः। ततः क्विब्निमित्तकस्य संप्रसारणस्य यकारस्थानिकत्वेन यकारस्य व्यञ्जनत्वेन "व्यञ्जनमनुदात्तम्" इत्यनुदात्ततया तत्स्थानिकस्य संप्रसारणेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। तस्य "संप्रसारणाच्च" इतिसूत्रे परवर्तिनैकारेण सह पूर्वरूपैकादेशे एकादेशनिष्पन्नस्येकारस्यानुदात्तेकारोदात्तैकाररूपानुदात्तोदात्तोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वम्। ततस्तत्स्थानिकस्य "हल" इति दीर्घस्यापि उदात्तस्थानिकत्वेन स्थानिवत्त्वेनोदात्तत्वम्। ततस्तृतीयैकवचनटाशब्दस्य सुप्त्वेनानुदात्तत्वम्। तस्मिन् परतः सञ्जायमानस्येयङादेशस्योदात्तत्वम् इति धियाशब्द आद्युदात्तः प्राप्तः, परन्तु अत्र "सावेकाच" इत्यनेन तृतीयैकवचनस्योदात्तत्वेन श्रेषनिघातेनाद्यस्येकारस्यानुदात्तत्वेऽन्तोदात्तो धियाशब्दः। धिष्ण्या। धिष्धातोर्ल्युप्रत्ययेन धिषणाशब्दस्तस्य यति प्रत्यये बाहुलकात्पकाराकारलोपे धिष्ण्येति शब्दो निष्पद्यते इति निरुक्तकारादिसम्मता व्युत्पत्तिः। उणादिषु धिष्ण्यशब्दो निपात्यते "सानसिवर्णसिपर्णसितण्डुलाङ्कुशचपालेल्वलधिष्ण्यशल्याः" इति सूत्रेण। तत्र सिद्धान्तकौमुद्यां भट्टोजीदीक्षिता त्रिधृषेतिधातोर्ऋकारस्येकारो ण्यश्च प्रत्यय इत्यभिप्रेत्य धिष्ण्यशब्दं साधयन्ति। तत्त्वबोधिनीकारैस्तदेव सम्मन्यते। एवं च धृषधातोर्ण्यप्रत्यये निष्पन्नधिष्ण्यशब्दस्य प्रत्ययस्वरेणान्तोदात्तत्वं प्राप्तं, परन्तु धिष्ण्यशब्दस्य नपुंसकलिङ्गतया "नब्विषयस्यानिसन्तस्य" इत्याद्युदात्तत्वम्। धिष्ण्यशब्दस्य स्थानाग्निगृहभबोधकत्वस्य "धिष्ण्यं स्थाने गृहे भेऽग्नौ" इत्यमरग्रन्थे, "धिष्ण्यं स्थानाग्निसद्मसु ऋक्षे शक्तौ च" इति मेदिन्यामुक्तत्वेन गृहार्थात्तस्मादर्हार्थयत्प्रत्ययेन "यस्येति च" इति चाकारलोपेन निष्पन्नस्याश्विबोधकधिष्ण्यशब्दस्य यदन्तत्वेन सिद्धिः। तत्र यतस्तित्त्वात् "तित्स्वरितम्" इति प्राप्तस्य स्वरितस्य "यतोऽनावः" इत्यनेन यदन्तस्य द्व्यच्कस्यादेरुदात्तत्वेनाद्युदात्तो धिष्ण्यशब्दः। ततः संबोधनप्रथमाद्विवचने तस्याकारादेशे तस्य पूर्वेण सह सवर्णदीर्घे निष्पन्नाकारस्य स्थानिवद्भावप्रणाल्याऽनुदात्तत्वम्। तेनाद्युदात्तो धिष्ण्याशब्दस्तत्र "आमन्त्रितस्य च" इतिपाष्ठिकसूत्रेणादेरेवोदात्तत्वमनुमन्यते। वनतम्। वनधातोर्लोटो मध्यमद्विवचने रूपम्। तत्र धातोरुदात्तत्वस्य तसोऽङित्तोऽपित्त्वेन प्रत्ययाद्युदात्तेन सति शिष्टेन निवृत्तौ प्राप्तायां तस्य लस्थानिकसार्वधातुकत्वेनोदात्तात्परत्वेन च "तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमह्निङोः" इत्यनेनानुदात्तत्वविधानादत्र धातुस्वरस्यानिवर्तनेन स एव पदे श्रूयते। वनतमितितिङन्तपदत्वेऽपि नात्र "तिङ्ङतिङ" इत्यस्य प्रवृत्तिः। पूर्वस्य धिष्ण्याशब्दस्यामन्त्रितत्वेन "आमन्त्रितं पूर्वमविद्यमानवद्" इत्यविद्यमानत्वेन पदात्परत्वाभावात्। तस्मादत्र वकार उदात्तो नकाराकारस्यानुदात्तस्योदात्तात्परत्वात्स्वरितत्वम्। तकाराकारस्य पदपाठे स्वरितात्परत्वात्प्रचितत्वम्। संहितायां तु गिरःशब्दावयवोदात्तस्य परत्वाद् "उदात्तस्वरितपरस्य सन्नतर" इति सन्नतरत्वम्। गिरः। गॄधातोः क्विपि इत्वे रपरत्वे गिर्शब्दो निष्पन्नः। तत्र धातोः स्वरः। ततः शसः प्रत्ययस्य सुप्त्वादनुदात्तत्वेन तस्योदात्तात्परत्वात्स्वरितत्वम्।

तृतीयामृचमाह :—

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः ।

आ यातं रुद्रवर्तनी ॥३॥

दस्रा । युवाकवः । सुताः । नासत्या । वृक्तऽबर्हिषः ।

आ । यातम् । रुद्रवर्तनी इति रुद्रऽवर्तनी ॥३॥

अत्राश्विनेत्यनुवर्तते। हे अश्विनौ आयातम् = अस्मिन्कर्मण्यागच्छतम् । किमर्थमिति तदुच्यते सुताः = युष्मदर्थं सोमा अभिषुताः । तान् स्वीकर्तुमिति शेषः । कीदृशावश्विनौ ? दस्रा = शत्रूणामुपक्षयितारौ। यद्वा देववैद्यत्वेन रोगाणामुपक्षयितारौ। "अश्विनौ वै देवानां भिषजौ" इति (ऐ. ब्रा १।१८) श्रुतेः।[1]नासत्या = असत्यमनृतभाषणं तद्रहितौ। अत्र यास्कः—"सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य प्रणेतारावित्याग्रायण" इति (नि. ६।१३)। रुद्रवर्तनी ।[2]रुद्रशब्दस्य रोदनं प्रवृत्तिनिमित्तम्। "यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" इति तैत्तिरीयाः। "तद्रुद्रोदयन्ति

(१) नासत्या । अत्र अस्धातोः शतरि अकारलोपे सदिति रूपम् । सत्तावान् इति तदर्थः । सति सत्तावति अर्थाद् भावरूपे पदार्थेऽर्हति तन्मध्ये गणनायोग्यं भवतीति सत्यशब्दोऽर्हार्थकतया निष्पन्नो भावरूपं पदार्थमाह । ततो नञा समासे तेन सत्यस्य भावेऽर्हस्यार्थाद्भावरूपस्य पदार्थस्य निषेधे धर्मिभूतस्य तस्य निषेधासम्भवात् तद्धर्मभूतसत्तानिषेधः क्रियते । ततो नशब्देन पुनस्तन्निषेधनिषेधे पुनस्सत्ताबोधनद्वारेणाक्षिप्तसत्ताभावो निराक्रियते । तेन सत्यावेव नासत्यौ इत्यर्थः पर्यवस्यति । तमेवार्थं गृहीत्वौर्णवाभो ब्रवीति "सत्यावेव" इत्यादि । सत्यस्य प्रणेताराविति आग्रयणाचार्येण मन्यते । तेन ततो विज्ञायते यदिमौ सत्यं रात्रिरूपमर्थं प्रणयतो दिनं संपादयत इति प्रातःकालिकाश्विसहरूपबोधकत्वम् । प्रपूर्वस्य नयतेरतिशयेन नयनस्येव संपादनकर्मणोऽप्यभिधानात्सत्यस्य रात्रिरूपस्यार्थस्य संपादकावित्यर्थस्तेन अस्तोत्तरभावितत्सहरूपबोधनं ततो भवति विज्ञातम् । एवं च "सत्यस्य प्रणेतारौ" इति प्रातःकालीनाविति वा सायन्तनाविति वार्थो भवति सचाग्रयणाचार्यसंमत इति । तत्र पूर्वमतेनाश्विरूपव्यक्तिद्वयमध्येऽन्यतरव्यक्तितमोरूपार्थमात्रबोधकत्वं तच्छब्दस्य । द्वितीयमते तद्व्यक्तिद्वयीयप्रत्येककार्यद्वारेण तस्य शब्दस्याश्विबोधकत्वमित्यर्थः । तत्र तेजोरूपाया व्यक्ते रात्रिनयनकर्तृत्वं तमोरूपाया व्यक्ते रात्रिसंपादनकर्तृत्वमिति धर्मद्वयमपि तस्माच्छब्दात्प्रतीयते इति उभयबोधकता तस्य शब्दस्येति । एवञ्चात्रापि मते तमसो वा तत्सहभाव्यव्यक्ततेजसो वा अश्विद्वयमध्येऽन्यतररूपत्वमिति संमतम् । विशेषस्त्वयान् पूर्वमतेऽयंशब्द एव तस्य वाचको द्वितीयमतेऽस्य शब्दस्य योगार्थद्वारेणोभयबोधकतेति ।

(२) रुद्रशब्दोऽत्र रुद्धातोर्बाहुलकाद्रकि प्रत्यये निष्पन्नः । नचात्र "रोदेर्णिलुक्" इत्यौणादिकेन सूत्रेण रुदेर्ण्यन्ताद्रक्प्रत्यय इति शङ्क्यम् । "सोऽरोदीद् यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" इतिनिर्वचनप्रदर्शकश्रुतिविरोधात् ।

ःयिनः। रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिर्मार्गो धाटी-
.।। यथा शूरा धाटीमुखेन शत्रून् रोदयन्ति तद्वदेतावित्यर्थः। युवाकवः।
.मानां विशेषणम्। वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिता इत्यर्थः। वृक्तबर्हिषः।
वृक्तानि मूलैर्वर्जितानि बर्हींष्यास्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः। यद्वा "भरता" इत्यादिष्वष्टस्वृत्विङ्नामसु "वृक्तबर्हिष" इति। तदानीं तृतीयार्थे प्रथमा। ऋत्विग्भिरभिषुता इत्यन्वयः॥

दस्रा। "आमन्त्रितस्य" इत्याद्युदात्तः। युवाकवः। "यु मिश्रणे"। युवन्ति मिश्रीभवन्ति वसतीवरीप्रभृतिभिः श्रयणद्रव्यैरिति युवाकवः। कटिकुपादिष्वगणितरयापि यौतेर्बहुल-ग्रहणात् (उ. ३।९६) काकुप्रत्ययः। तस्य कित्त्वेन गुणाभावादुवङादेशः। प्रत्ययस्वरेणाकार उदात्तः। न विद्यतेऽसत्यमनयोरिति नासत्यौ। "नभ्राण्नपान्नवेदानासत्ये"त्यादिना (पा ६।३।७५) प्रकृतिवद्भावान्नञो नलोपाभावः। पादादित्वेन निघाताभावादामन्त्रिता-द्युदात्तत्वम्। वृक्तबर्हिषः। वृक्तं मूलैर्वर्जितं बर्हिरास्तीर्णं येषां सोमानां ते वृक्तबर्हिषः। पूर्वपदप्रकृतिस्वरेण क्तप्रत्ययस्वर एव शिष्यते। आ इत्यत्र "उपसर्गाश्चाभिवर्जम्" (फि. ४।१२) इत्युदात्तः। रुद्रवर्तनी। "आमन्त्रितस्य च" इत्यामन्त्रितनिघातः॥ ३॥*

नच "कर्तरि कृद्" इति सूत्रानुरोधेन शंभुप्रभृतिपदे शं भावयतीति शंभुरिति अन्तर्भावितण्यर्थकल्पने रुद्धातो-रेवान्तर्भावितण्यर्थकल्पनेन "सोऽरोदीद्" इत्यत्रापि अरोदयन् इत्यर्थकल्पनेन श्रुत्या अविरोध इति वाच्यम्। प्रक्रमविरोधात्। अत्रहि देवैर्वामं वसु अग्नौ स्थापितं तच्च देवैर्याचितं तदानीमग्ने रोदनेन अन्तर्भावितण्यर्थ-कल्पनविरोधात्। एवञ्चाग्नौ प्रयुज्यमानरुद्रशब्दस्य रोदनकरणार्थकत्वेनोक्तसूत्रेण तस्य शब्दस्यासाधनात्। यस्तु ब्रह्मादिदेवतात्रयमध्ये संहारकदेवतावाचको रुद्रशब्दस्तस्य प्राणिनां संहारकत्वेन रोदनकारितया तत्र प्रयुज्य-मानस्योक्तसूत्रेण तस्य शब्दस्य साधनात्। अत्र तु अग्नौ प्रयुज्यमानो रुद्रशब्दस्तस्माद् बाहुलकादेव रुद्धातो रक्‌ प्रत्ययेन तस्य शब्दस्य सिद्धिः करणीया। अग्न्यभिप्रायक एवायं शब्द इति भाष्यकारेण तैत्तिरीयब्राह्मणगत-मग्निप्रकरणस्थमेव निर्वचनं "यदरोदीद्" इत्यादि प्रदर्शितम्। ततोऽस्याग्निपरता विज्ञायते। वाजसनेयिब्राह्मण-गतव्युत्पत्त्यनुसारेण तु अन्तर्भावितण्यर्थतयोक्ततैत्तिरीयब्राह्मणवाक्यस्यार्थकल्पनेतु णिजन्ताद्रुदे रुद्रशब्दनिष्पत्ति-र्बोध्या। तदानीं पूर्वोक्तोणादिसूत्रेणैव तस्य सिद्धिरिति ज्ञेयम्। अतएव वाजसनेयिनोऽग्नावपि "तद्यद्रोदयन्ति तस्माद्रुद्रा" इत्येव णिजर्थपुरस्कारेणैव निर्वचनं प्रदर्शयन्ति।

* दस्रा। "स्फायितञ्चि" इत्यादिनोणादिसूत्रेण दसु उपक्षये इति धातुतो रक्‌ प्रत्ययेन दस्रशब्दो निष्पद्यते। तत्र धातोरन्तस्योदात्तता "धातोः" इति सूत्रेण प्राप्ता, प्रत्ययस्याद्युदात्तताच "आद्युदात्तश्च" इति सूत्रेण, शेषनिघातेन तत्र धातोः स्वरस्य अनुदात्तत्वं सतिशिष्टन्यायेन प्रत्ययस्वरस्य बलवत्त्वेनार्थाद्दुर्बलस्य धातुस्वरस्य 'प्रबलो दुर्बलं हन्ति विरोधे' इति न्यायेन निवृत्तिस्ततस्तस्यानुदात्तत्वम्। तेन दस्रशब्दोऽन्तोदात्तः। ततः संबोधन-

स्क०—दस्रा दस्रनामानौ। दस्रावुपक्षयितारौ शत्रूणां दर्शनीयौ वा। युवाकवः। युवां क इति युवाकवः। युष्मत्पानकामा इत्यर्थः। के? सुताः सोमाः। अथवा ... केन? वसतीवर्य्येकधनादिभिरद्भिः श्रयणीर्वा। सुता अभिषुताः सोमाः। हे नासत्या, न वा असत्यौ। द्वौ प्रतिषेधौ प्रकृतिं गमयतः। सत्यावेव। वृक्तबर्हिषः सोमाः। भवतु

प्रथमाद्विवचने औकारे तस्य सुप्प्रत्याहारान्तर्वर्तित्वेन सुप्त्वाद् "अनुदात्तौ सुप्पितौ" इत्यनेनानुदात्तत्वम्, ततस्तस्यौकारस्य "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल" इति सूत्रेण आकारादेशे तस्याकारस्य स्थानिवत्त्वेनानुदात्तत्वे तेनाकारेण दस्रशब्दस्याकारस्य सवर्णदीर्घे तन्निष्पन्नाकारस्यापि स्थानिवत्त्वेनानुदात्तोदात्तस्थानिकतयोभरूपत्वरूपं स्वरितत्वं प्राप्तं तदपवादकेन "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वेनान्तोदात्तो दस्राशब्दः प्राप्तः परन्तु अत्र तस्य संबोधनप्रथमान्तत्वेन आमन्त्रितसञ्ज्ञावत्त्वाद् "आमन्त्रितस्य च" इति षष्ठाध्यायस्थेन सूत्रेणाद्युदात्तत्वमामन्त्रितस्य भवतीति दस्राशब्दोऽत्राद्युदात्तः। शेषनिघातेनान्त्यस्यानुदात्तत्वे तस्य पूर्ववर्त्त्युदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितत्वम्। युवाकवः। युधातोर्बाहुलकात्काकुप्रत्यये कित्त्वाद् गुणाभावे उवङि युवाकुशब्दस्य सिद्धिस्ततो जसि गुणेऽवादेशे युवाकव इति रूपम्। तत्र "धातोः" इति धातोरन्तस्योकारस्योदात्तत्वम्। ततः आकुप्रत्ययस्यादेराकारस्य "आद्युदात्तश्च" इति उदात्तत्वं शेषनिघातेनान्त्यस्योकारस्यानुदात्तत्वं धातुप्रत्यययोर्मध्ये प्रत्ययस्वरस्य सतिशिष्टत्वेन बलीयस्त्वात्तेन धातुस्वरस्य शेषनिघातेनानुदात्तत्वम्। तत्र धातुस्वरस्याकुप्रत्ययीयोदात्ताकारपरत्वेन अनुदात्तत्वम्, तत्र धातूकारस्थानिकस्योवङादेशीयोकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। प्रत्ययान्तकूकारस्यापि शेषनिघातेनानुदात्तत्वात्तत्स्थानिकस्य जस्प्रत्ययनिमित्तस्यौकारस्य गुणस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। तस्यापि जसकारपरे अवादेशे तदकारस्यापि तथैवानुदात्तत्वम्, तस्य पदसंहितादशायामुदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितत्वम्। जसः सुप्त्वादनुदात्तत्वमिति वकाराकारस्यानुदात्तस्य स्वरितात्परत्वात्प्रचयस्वरः। सुताः। धातुस्वरस्य प्रत्ययस्वरेण निवृत्तावन्तोदात्तस्सुतशब्दस्तस्माज्जसः सुप्त्वादनुदात्तत्वेन तेन सह सुतशब्दीयाकारस्योदात्तस्य सवर्णदीर्घैकादेशे "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वे शेषनिघातेन सूकारस्यानुदात्तत्वेऽन्तोदात्तः सुताःशब्दः। नासत्या। अस्धातोः शता, ततो यत् सत्यशब्दस्य नञा समासः, ततो नशब्देन समासे द्विवचने आकारादेशे सवर्णदीर्घे नासत्याशब्दः। अस्धातोरकारस्य लोपात्सच्छब्दे प्रत्ययस्वरः। ततो यति प्रत्ययस्वरेण सच्छब्दस्वरनिवृत्तौ प्राप्तायां प्रत्ययस्वरापवादेन "तित्स्वरितम्" इति सूत्रेण स्वरितः प्राप्तस्तस्यापवादेन "यतोऽनाव" इति सूत्रेण सत्यशब्दस्यादेरुदात्तोऽनुदात्तोऽन्तः शेषनिघातेन। ततो नञा समासे 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या" इत्यनेन नञ उदात्तत्वे प्राप्ते तदपवादेन "नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिता" इत्यनेन परवर्तिनः सत्यशब्दस्यान्तोदात्तत्वम्। ततो नशब्देन समासे "समासस्य" इत्यन्तस्योदात्तत्वे नासत्यशब्दोऽन्तोदात्तः। ततो विभक्तिप्रत्यये सम्बोधनप्रथमाद्विवचने औकारे तस्य सुप्त्वादनुदात्तत्वात्तस्य स्थाने जातस्य "सुपाम्" इत्याकारादेशस्य स्थानिवत्त्वेनानुदात्तत्वे नासत्यशब्दीयान्तोदात्ताकारेण सहैकादेशे दीर्घस्योदात्तत्वं प्राप्तं, परंतु संबोधनान्तत्वेनामन्त्रितत्वेन षाष्ठिकेन "आमन्त्रितस्य च" इति सूत्रेणाद्युदात्तत्वे शेषनिघातेनावशिष्टयोरनुदात्तत्वे उदात्तात्परत्वात्सकारस्य स्वरितत्वम्। परस्य त्यशब्दाकारस्य तु स्वरितात्परत्वात् प्रचयस्वरः। नासत्याशब्दस्य आष्टमिकेन "आमन्त्रितस्य च" इत्यनेन सर्वनिघातस्तु नात्र भवति पादादित्वात्। वृक्तबर्हिषः। वृजी वर्जने इति धातोः क्ते वृक्तशब्दः। तत्र धातोः स्वरस्य क्तप्रत्ययस्वरेण निवृत्तौ अन्तोदात्तो

र्ां स्तीर्णमित्यर्थः । एतज्ज्ञात्वा आयातमागच्छतम् । हे रुद्रवर्तनी रुद्रा शब्दयन्ती वर्तनि-
रुद्रवर्तनी । यता यतः शत्रुशब्दस्ततस्ततो गन्तारौ, स्वयं पथि गन्तारौ शब्दस्य
र्ा ॥ ३ ॥

भा० मा०—दर्शनीयौ युष्मत्पानकामाः सोमाः सत्यावेव वृक्तबर्हिषः सोमास्तरणार्थं स्तीर्ण-
बर्हिष आगच्छतं युद्धे घोरगमनमार्गौ ॥ ३ ॥

ऐन्द्रे तृचे प्रथमामृचमाह :-

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।

अण्वीभिस्तना पूतासः ॥४॥

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः ।

इमे । त्वाऽयवः ।

अण्वीभिः । तना । पूतासः ॥४॥

चित्रभानो—चित्रदीप्त हे इन्द्र, अस्मिन् कर्मणि आयाहि—आगच्छ। सुताः—अभिषुताः इमे सोमाः त्वायवः—त्वां कामयमाना वर्तन्ते। अण्वीभिः। "अग्रुव" इत्यादिषु द्वाविंशति-

वृक्तशब्दः । वृहधातोरसुनि बर्हिः शब्दस्तत्र धातोः स्वरस्य प्रत्ययस्वरेण प्रत्ययस्वरस्य च नित्स्वरेण निवृत्तावाद्युदात्तो बर्हिःशब्दः प्राप्तः परन्तु "नब्विषयस्यानिसन्तस्य" इति इसन्तस्याद्युदात्तत्वनिराकरणादन्तोदात्तः फिट्स्वरेण बर्हिश्शब्दः । ततस्तस्य वृक्तशब्देन बर्हिःशब्दस्य समासे समासान्तोदात्तत्वं बाधित्वा बहुव्रीहिस्वरेण पूर्वपदस्य प्रकृतिस्वरकता समासे । तेन द्वितीयस्वरोदात्तको वृक्तबर्हिः-शब्दः । ततो जसि सुप्त्वादनुदात्तत्वे वृक्तबर्हिषः शब्दे आदेरनुदात्तत्वं द्वितीयस्योदात्तत्वं तृतीयस्योदात्तात्परत्वात्स्वरितत्वं चतुर्थस्य स्वरितात्परत्वात्प्रचयस्वरकत्वम् । पञ्चमस्यापि तथैव प्रचयः । आ । निपातत्वादाद्युदात्तः । यातम् । याधातोर्लोटो मध्यमद्विवचने रूपम् । तत्र याधातोः स्वरस्य तसः प्रत्ययस्य स्वरेण निवृत्तौ तस्स्थानिकतमादेशस्यापि स्थानिवत्त्वेनोदात्तत्वे यातंशब्दोऽन्तोदात्तः प्राप्तः पदावस्थायां परन्तु अत्र "तिङ्ङतिङ" इति सूत्रेण पदात्परत्वात्सर्वानुदात्तत्वं तस्य सांहितिकत्वेऽपि पदपाठेऽनुवृत्तिः । संहितायां तूदात्तात्परत्वाद्याशब्दस्य स्वरितत्वं तंशब्दस्य तु स्वरितात्परत्वात्प्रचयस्वरः । रुद्रवर्तनी । रुदेर्धातोर्बाहुलकाद्रकि रुद्रशब्दः । वृतुधातोश्च "वृतेश्च" इति औणादिकेन सूत्रेणानौ प्रत्यये वर्तनिः शब्दः । तत्र रुद्रशब्दोऽन्तोदात्तः । वर्तनिशब्दोऽपि मध्योदात्तः प्रत्ययस्वरेण प्राप्तः परन्तु घृतादिपाठकल्पनयाऽन्तोदात्तः । ततो रुद्रवर्तनिशब्दयोर्बहुव्रीहौ पूर्वपदप्रकृतिस्वरः प्राप्तः परन्तु रुद्रवर्तनीशब्दस्य सम्बोधनप्रथमाद्विवचनान्तत्वेनामन्त्रितत्वादाष्टमिके निघाते यातंशब्दीययाकारात्स्वरितात्परत्वात्प्रत्ययस्वरः सर्वेषामचाम् ॥

१

संख्याकेष्वङ्गुलिनामसु "अण्व्य" इति पठितम्। ऋत्विजामङ्गुलिभिः सुता इत्यन्वयः किंच। एते सोमाः, तना = नित्यं पूतासः = पूताः शुद्धाः। दशापवित्रेण शोधितत्वात्॥*

इन्द्रायाहि

* निरुक्तप्रदर्शितेष्वैन्द्रेषु कर्मसु सोमपानमेकं कर्म। तत्र याज्ञिकरीत्या सोमवल्ल्या रसस्य पानमिति भवति। तच्च सोमपानं यावत्सोमयागेषु भवदपि त्रिकद्रुकनामकेषु ज्योतिर्गौरायुर्नामत्वेन याज्ञिकप्रसिद्धेषु त्रिषु यागेषु विशिष्य वर्ण्यते वेदे "त्रिकद्रुकेष्वपिबत्सुतस्य" इत्यादिना। तत्र च यागे त्रीणि सवनानि याज्ञिकप्रसिद्धानि। सवनं च वल्लीतो रसनिष्कासनम्। एतेषां च सोमानां रसनिष्कासनेऽङ्गुलीनां साधनता विशिष्य प्रतिपाद्यते "अण्वीभिस्तना पूतासः" इत्यादिना। इदमादि याज्ञिकाभिप्रेतमिन्द्रस्य मन्त्रमयत्वे सोमस्य वल्लीरूपत्वे च सम्भवति। परन्तु इदं निरुक्तप्रदर्शितमध्यमस्थानवासित्वे कथं सम्भवेद्? भावनामात्रेण सोमपाने तेन सञ्ज्ञानमदेनेन्द्रेण वृत्रादिवधवर्णनं तेन युद्धवर्णनादिकं च रूपकेणैव वक्तव्यम्। तथैव च निरुक्तकारेण वर्ण्यते "तत्को नाम वृत्रः? मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका" इति प्रतिपाद्य मेघपरत्वे तेन महेन्द्रस्य युद्धं वास्तवं भवितुं नार्हतीत्यत उक्तम् "उपमार्थेन युद्धवर्णा भवन्ति" इति। एतस्यार्थस्योपपत्तये तत्रोक्तम् "अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्तीति"। अत्र दुर्गाचार्यः "आह को वृत्रः? उच्यते, मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। निरुक्तमधीयते नैरुक्ताः। आह यदि मेघो वृत्रो य एष मन्त्रेषु संग्रामः स्तूयते तत्र कः समाधिः? इति। उच्यते अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति। अपां मेघोदरगतानां ज्योतिषश्च वैद्युतस्य उद्भूतवृत्तेर्मिश्रीभावकर्मणो वर्षकर्म जायते, तेन हि वैद्युतेन ज्योतिषा वायवावेष्टितेनेन्द्राख्येनोपताड्यमाना आपः प्रस्यन्दन्ते वर्षभावाय कल्पन्ते तत्रैवं सत्युदकतेजसोरितरेतरप्रतिद्वन्द्विभूतयोरुपमार्थेन रूपककल्पनया युद्धवर्णा भवन्ति इति। युद्धे रूपकाणीत्यर्थः। न ह्यत्र यथाभूतं युद्धमस्ति, नहीन्द्रस्य शत्रवः केचन सन्ति। मन्त्रोऽप्येतस्मिन्नर्थेऽस्ति नेन्द्रस्य शत्रवः "यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु। मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से"। वामदेवपुत्रस्य बृहदुक्थस्यार्षम्। त्रिष्टुप्। व्यूढस्याष्टमेऽहनि निष्केवल्ये शस्यते। 'यद् अचरो नानाप्रकारं तन्वा वावृधानः पुनःपुनर्वर्द्धमानः। कथं पुनरचरः? बलानीन्द्र प्रब्रुवाणो जनेषु, 'बलानि', आत्मीयानि हे इन्द्र प्रब्रुवाण इव, क्व? जनेषु, किं त्वं तथैव? न, मायेत्सा ते यानि युद्धान्याहुः, यानि युद्धान्याहुरैतिहासिका नानारूपाण्युपदर्शयन्तः, सा अपि च ते तव माया इत्, मायैव। किं कारणम्? नाद्य शत्रुः, तवास्ति प्रत्यनीकभूतः। न नु पुरा नापि पुरा कश्चिदासीत्, यावद्वीर्यं किञ्चित् क्वचिदस्ति सर्वं तत् त्वमेव। "वीर्यं वै प्राणो वीर्यमिन्द्र" इति विज्ञायते। क्व ते शत्रुः? येन साकं युयोधिथ। एतच्च त्वमपि विवित्से वेत्स्येव। न केवलमहमित्यभिप्रायः। एवमेतन्मन्त्रे मायामात्रमेव युद्धमिति श्रूयते। विज्ञायते च "तदाहुर्नैतदस्ति यद्देवासुरमिति"। तस्मात्साधूक्तम् "अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति" इति। एवं चेन्द्रस्य युद्धवर्णनं केवलं रूपकमेव वृष्टिकालीनयोर्मेघवाय्वोर्मध्ये वायुनेतस्ततः प्रक्षिप्यमाणान् मेघान् मध्ये मध्ये विद्युतां चञ्चलतमानां दर्शनानि मेघानामेकोपर्यपरस्याघातसमुत्थगम्भीरध्वनीन्, ततो वृष्टिञ्च दृष्ट्वा भवति मतिर्यदयं मेघो जलानि निरुध्याप्रदायान्यत्र स्थितोऽन्यत्र गन्तुमिच्छन् मरुद्भिर्वेगेनेतस्ततः प्रक्षिप्य प्रवर्त्यते प्रक्षेपणे च मेघानामितस्ततस्सञ्चारणं युद्धोद्यतानां भटानामिवेदं शत्रूपघाताय परस्परोपरि धावनम्, विद्युतो विद्योतमाना दृष्ट्वा भवति मतिरिमानि युद्धकाले प्रक्षिप्यमाणान्यायुधानि इव, ततः सञ्जायमाना गर्जनाः

इन्द्रशब्दं यास्को बहुधा निर्वक्ति (नि. १०।८)—"इन्द्र इरां दृणातीति वा, इरां ददातीति इरां दधातीति वा, इरां दारयतीति वा, इरां धारयतीति वा, इन्दवे द्रवतीति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा, तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते, इदं करणादित्याग्रायणः, इदंदर्शनादित्यौपमन्यवः, इन्दतेर्वैश्वर्यकर्मणः, इञ्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्वनामिति"। अस्यायमर्थः—"दॄ विदारणे" इति धातुः। इरामन्नमुद्दिश्य

श्रुत्वेमा युद्धे वीराणां गर्जना एतास्ततो वृष्ट्या सर्वोपद्रवशान्ति दृष्ट्वेदं युद्धं वर्षणार्थमेव समभूत्, तत्र वृष्टौ सञ्जातायां मेघानामदर्शनेन मेघानां विनाशनेन युद्धस्यावगमानं मेघानां विनाशयता वायोश्च नाशकत्वमिवेति पर्यालोच्यैषा युद्धवर्णना वृष्टिकर्मता चेन्द्रस्येति। न वास्तवमत्र युद्धं कदाऽपि समभूत् इति "वृत्रो मेघ" इत्यादिकं वर्ण्यत इति परतया तदुपपत्तिर्निरुक्तकृताम्। अत्र सोमपानस्य तत्रोपपत्तिः कथम्? अयमंशः प्रसिद्धः स्मृतिष्विति निरुक्तकारेणोपेक्षितः। स्मृतिषु उच्यते-यज्ञे प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" ॥ इति। अत्र धूमादिद्वारेणाग्नौ प्रास्ताया आहुतेरादित्यप्राप्तिद्वारा मेघरूपतासम्पत्तिपूर्वकं वृष्टिनिमित्तत्वम्, सा चाहुतिस्तं तं देवमुद्दिश्य दीयमाना अंशत उक्तान् देवान् प्राप्य परम्परया ततः फलं साधयतीति सोमयागे इन्द्रादीनुद्दिश्य सोमाहुतिर्दीयमानोक्तरीत्या वर्षणं साधयति सोमस्य च मादकत्वं लोकदृष्टमिति सा आहुतिरपि इन्द्रादीनां मदसम्वर्द्धनपूर्वमुक्तफलं प्रददातीति, तत्रेन्द्रस्य सोमजनितमदेन कार्यविशेषकरत्वं निविदादिषु सूक्तादिषूच्यमानमुपपद्यत इति कृत्वा तदुपेक्षणं निरुक्तकारादीनाम्। यागाश्च यद्यप्यनेके तथापि द्वादशाहादिष्वेतेषामेव ज्योतिरादीनामुपयोग इति तत्रैव सोमपानवर्णनमिन्द्रस्येति तत्र विशिष्य कथनानपेक्षेति तत्रौदासीन्यम्। किञ्च निरुक्तकारैरेषा दिक् प्रदर्शिता तदनुसारेण यद्यद्यथोपपद्यते तथा तथा तत्तत्त्रोपकल्पनीयमिति। परन्त्वेतदनुपपन्नमिव, यत ऐन्द्रसूक्तीयवर्णनानि निविदध्यायादिगतानि विशेषान्तराणि चैतत्पक्षे न सम्यगिवोपपद्यन्ते। वृत्रवध एव तावद्विचार्यते तत्र हि वर्ण्यमाने एवं विज्ञायते वृत्रः कश्चन विनाश्योऽसुरो बलवान्, यस्यानेके दुर्गा अनेकानि पुराणि अनेकं सैन्यम् आसीत्, तेन च स्वविवृद्ध्या सांसारिकं पदार्थमात्रमाक्रम्योदरे नीतम्। तस्य नानाविधयुद्धचातुर्योपेतत्वमनेकविधायुधयुतत्वादिकम्। तस्य चेन्द्रेण साकमनिमित्तं वैरम्, तत्रोभयोर्युद्धे प्रवृत्ते इन्द्रसाहाय्यकानां देवानामासुर्या मायया भीत्युत्पादनेन सर्वेषां प्रद्रावणम्, इन्द्रेण तत्राप्रतिबलेन मरुत्सहितेन वृत्रस्य वज्रेण शिरश्छेदनपूर्वं तद्विनाशनम्, तदीयाश्चानेके दुर्गा अनेकानि पुराणि अपरिमितं च सैन्यं विनाश्य वृत्रनिरुद्धानामपां वर्षणम्, सूर्यस्य प्रकाशनाय द्योलोकेऽवस्थापनम् तत उषसो दिनस्य च प्रवर्तनम् सर्वं चैतत्त्रिकद्रुकेषु सोमपानजनितेन हर्षेणेति। किञ्च यजुर्वेदे वृत्रसम्बन्धिनी काचन कथैवमुपवर्ण्यते त्वष्टुर्विश्वरूपनामकः पुत्र इन्द्रेण विनाशितस्ततः कुपितस्त्वष्टेन्द्रनाशायाभिचारिकं कर्म यागविशेषरूपं प्रारब्धवान्। तत्राप्यागत्येन्द्रेणानाहूतेन तत्रत्यं हविर्भक्षितम्। तद् दृष्ट्वाऽतिशयं प्रकुपितस्त्वष्टा होमार्थं गृहीतं हविरेव इन्द्रस्य घातकं सद्वर्धस्वेत्यर्थकं मन्त्रम् "इन्द्रशत्रुर्वर्द्धस्व" इति प्रपठ्याग्नौ हुतवान्। तेन हुतहविष्टः प्रवृद्धं तमः क्रमेण सर्वं जगदाक्रान्तवत्। ततः प्रकुपितेनेन्द्रेण युद्धं कृत्वा तद्विनाशनं कृतम्। इन्द्रस्य वास्तवयुद्धाभावे वर्ण्यमानस्य च युद्धस्य मेघजन्यवृष्टिपरतया नेयत्वे असुरा अपि वृत्राहिनमुचिशंबरप्रभृतयो नातिरिक्ताः। तथा च नमुचेरपि वृत्रत्वेन मेघत्वेन तद्वधे फेनस्य साधनतोच्यमानाऽपि विचारणीयैव। तत्र यजुर्ब्राह्मणे नमुचीन्द्रयोर्युध्यमानयोः परस्परं हननविषये एवं

तन्निष्पादकजलसिद्ध्यर्थं दृणाति मेघं विदीर्णं करोतीतीन्द्रः। "डुदाञ् दाने" इति धातुः इरामन्नं वृष्टिनिष्पादनेन ददातीतीन्द्रः। धाञ् पोषणार्थः। इरामन्नं तृप्तिकारणं स दधाति जलप्रदानेन पुष्णातीतीन्द्रः। इरामुत्पादयितुं कर्षकमुखेन भूमिं विदारयतीतीन्द्रः। पूर्वोक्तपोषणमुखेनेरां धारयति विनाशराहित्येन स्थापयतीतीन्द्रः। इन्दुः सोमो वल्लीरसः।

संप्रतिपत्तिरासीत् यदिन्द्रेण दिवा रात्रौ आर्द्रेण शुष्केणेत्यादिना नमुचिवधो न कर्त्तव्य इति। इन्द्रेणापि तदनुरोधेनोषःकालेऽपां फेनेन नमुचेः शिरः कर्तितम्। नायं कालो दिवा नक्तं वा। नापि फेनः आर्द्रं वा शुष्कं वेत्यादि तत्रोपवर्णितम्। तत्र मेघजलवर्षणपरतयैव सर्वेषां युद्धवर्णनानां प्रवृत्तिश्चेत्कल्पनासाम्राज्यमेव वर्णने, तादृशत्वे च वर्णनाया एकरूपत्वनियामकाभावे सर्वसारूप्यं नोपपद्येत, किञ्च वृत्रस्य शंबरस्य विनाश्यानि दुर्गाणि पुराणि वा नवनवतिरेव शतमेकशतं वेति सङ्ख्यानियमनं निर्युक्तिकमापद्यते, वृत्रस्य वधेनोषसो दिनस्य च प्रवृत्तिरुच्यमानाऽनुपपद्येत, कदाचनोषःकालिकवर्णनपरतया तथोक्तिरिति तु नित्यतया तद्वर्णनविरुद्धम्, अपां फेनेन नमुचेः शिरोनिकर्तनम्, उषस एवापां फेनरूपता, तया तस्मिन् काले तद्विनाशवर्णना मेघपक्षे नोपपद्यते। चत्वारिंश्यां शरदि शंबरलाभवर्णनाऽपि नोपपद्यते। शरदि मेघोन्नत्या युद्धवर्णनस्यासम्भवात्। वर्षाकाल एव मेघोन्नतिसम्भवात्। किंच नित्यतया तद्वर्णनं कादाचित्कमेघोन्नतिपरतया व्याख्यानस्य विरुद्धम्। एवमादिकं चैन्द्रेषु सूक्तेषु वर्ण्यमानं नोपपद्यत इत्यव्यापिकैषा कल्पना। ऐतिहासिकानुरोधेन पूर्वं वस्तुसत एवेन्द्रस्य पुरुषाकारस्य वस्तुसतां वृत्रादीनामसुराणां पुरुषाकाराणां युद्धे इन्द्रेण हननमिति पक्षपरिग्रहस्तदानीं वृत्रादीनां नवनवतिसंख्यकत्वं पुरादीनामुपवर्ण्यमानं विशेषमभिप्रायमनासादयन्मन्दप्रयोजनमिव स्यात्। किञ्चात्र वर्ण्यमानाया देवतायाः स्तुतिसंपादनार्थं तद्विनाश्यासुराणां वृत्रादीनामप्रतिद्वन्द्विसामर्थ्ययुतत्वं वर्णनीयं येन तादृशानामपि विनाशनेन विनाशयितुः सामर्थ्याधिक्यप्रतीत्योत्कृष्टत्वं विज्ञायेत। तत्र वृत्रादीनां शतपुरीयुक्तत्वे तावत्संख्याकदुर्गयुतत्वे च को वा सामर्थ्यातिशयः प्रतीयेत? किञ्चापां फेनेन नमुच्यादीनां शिरोनिकृन्तनं वाच्यया वृत्त्याऽसम्भव्येव। किञ्च वृत्रेण स्वशरीरप्रवृद्ध्या सर्वपदार्थाक्रमणमुच्यमानमनुपपद्येत। किंच वृत्रवधे सति सूर्योषआदीनामुत्पादनमिन्द्रेणेति वर्ण्यमानमनुपपन्नं स्यात्। किंचैवंविधस्य वृत्रस्यापां निरोधकत्वं तद्विनाशनेनेन्द्रेणापां प्रवर्तनमिति वर्णनमुपपत्तिविहीनं स्यात्। त्रिकद्रुकेषु सोमपानवर्णनस्य निर्युक्तिकतेत्येवमनेकेषां वर्णनानामाञ्जस्येनानुपपत्तिरत्र पक्षे इति सोऽपि ग्रहणानर्हः। अतएव निरुक्तकारेणापि ऐतिहासिकपक्षः परित्यक्तः। पूर्वोक्त ऋग्वेदीयमन्त्रविरोधश्चास्मिन्पक्षेऽपरिसमाधेय एव। तस्मादत्रापीन्द्रस्यानुक्रमणिकाकाररीत्याऽऽदित्याभिन्नत्वं सूर्यरूपत्वं गृहीत्वैवैतस्योपपादनं कर्तव्यम्। अतएव इन्द्रं मित्रमित्यादिमन्त्रस्यापि अविरोधः। ब्रह्मादिपरतायाश्च सूर्यपरत्वग्रहणेऽपि न विरोधः। एवं सूर्यस्येन्द्रत्वपक्षे तद्विनाश्या वृत्रादयस्तु न वास्तवाः पुरुषाकारा असुरा नापि मेघादिरूपा वा सम्भवन्ति तेषां सूर्येणाविनाश्यत्वात्, किन्तु अन्धकाररूपत्वमेव तेषां वक्तव्यम्। अन्धकारस्य तेजसा निवारणे युद्धकल्पनैवेति इन्द्रस्य सर्वथा सर्वदा शत्रोरभाव इत्युक्तिः संगच्छते। अन्धकाररूपिणो वृत्रस्य पुर्यो दुर्गाणि वा महान्धकारस्य तावत्परिमिता रात्रय एवेति तद्विनाशनमुच्यमानमपि न विरुद्धम्। वृत्रस्य नमुचेर्वोषसा विनाशनमप्याञ्जस्येनैवोपपद्यते। उषःकाले तमसो निवृत्त्या तया तद्विनाशकल्पनासम्भवात्। अन्धकाररूपेण वृत्रेण निरुद्धा आपस्तु न लौकिकानि जलानि किन्तु

दर्थं यागभूमौ द्रवति धावतीतीन्द्रः। इन्दौ यथोक्ते सोमे रमते क्रीडतीतीन्द्रः। "ञि धी दीप्तौ" इति धातुः। भूतानि प्राणिदेहानिन्धे जीवचैतन्यरूपेणान्तः प्रविश्य दीपयतीतीन्द्रः। एतदेवाभिप्रेत्य वाजसनेयिन आमनन्ति "इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः। तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव

तेजांसि। तेषां जलत्वेन वर्णनस्य "अमूर्या उपसूर्ये याभिर्वा सूर्यः सह" इत्यादिषु स्पष्टं वचनात्। एतच्चाग्रे विस्तरशः प्रदर्शयिष्यते। तेषामन्धकारेऽप्रवृत्त्या तेन तन्निरोध इव। तस्मिन्विनष्टे चोषआदिप्रवृत्त्या तदुत्पत्त्यादिवर्णना अपां प्रवहनवर्णना चोपपन्नतरा। इदं चान्धकारस्य विनाशनमपरैः कर्तुमशक्यमिति इन्द्रस्यानितरसाधारणं कर्मेति गौरवाधिक्येन स्तुतावुत्कृष्टत्वसाधकम्। उषःकालतो दिनान्तरवर्णनस्य स्मृत्यादिष्वपि प्रसिद्धेर्वृत्रे विनाशिते दिनान्तरप्रवृत्तिवर्णनाऽपि युक्तैव भवति। त्रिकद्रुकेषु सोमपानवर्णनमप्यत्र कल्पे सम्यगुपपद्यते। तथाहि—तेन शब्देन याज्ञिकप्रसिद्ध्या यागत्रयग्रहणवदर्थान्तरस्यापि बोधसम्भवः। यतः स शब्द एवं निष्पद्यते रुच्धातोर्वञि प्रत्यये कुत्वे गुणाभावे च रुक इति भवति। रुको नाम दीप्तिस्तेज इत्यर्थः। ततः कुत्सितार्थककुशब्देन समासे वैदिकत्वाद्रथवदयोरिव रुकशब्दे परतोऽपि कोः कदादेशे कद्रुक इति भवति। ततस्त्रिशब्देन समासे त्रयः कद्रुकास्त्रिकद्रुका इति। द्विगुत्वेऽपि बाहुलकात्पुंस्त्वम्। एवं च तिस्रः कुत्सिता दीप्तयोऽनेन शब्देनोच्यन्ते। दीप्तीनां कुत्सितत्वं चासंपूर्णतया। एवं चासंपूर्णा न्यूना दीप्तयः कद्रुकास्तास्तिस्रोऽनेन शब्देन प्रतिपाद्यन्त इति। ताश्चोक्तप्रकारा दीप्तयो रात्रिकालीना एव वक्तुं शक्यन्ते न दिनसम्बन्धिन्यः। दिने सूर्यमण्डलस्य सत्त्वेन पूर्णाया एव दीप्तेर्लाभात्। रात्रौ च सवितृकालोक्ता एका दीप्तिः प्रातः सूर्यमण्डलोदयात् प्राग्भाविनी, यस्यां प्रकाशबाहुल्येऽपि न पूर्णता। सूर्यमण्डलस्यानुदयेन दीप्तेः पूर्णत्वाभावात्। मण्डलतो लभ्यमानदीप्त्यपेक्षया तस्या न्यूनत्वाच्च। औषसकालिकी अपरा दीप्तिः। अत्रापि सावित्रप्रकाशापेक्षयाऽपि न्यूनत्वेन दीप्तेरसंपूर्णत्वात्कुत्सितत्वम्। तृतीया च मध्यरात्रप्रभृति तमोमयकालिकी अव्यक्ततेजोरूपा। एषाऽपि असंपूर्णा। एतासां तिसृणां दीप्तीनां त्रिकद्रुकशब्देन ग्रहणम्। तत्र च त्रिकद्रुकेषु सुतस्य सोमस्येन्द्रेण पानम्। सवनं चात्र पदार्थानां प्रकाश एव। अतएव प्रकाशेन तद्रूपेण सवनेन निमित्तेन सवितुः सवितृशब्देन सवनकर्तेत्यर्थकेन बोधनम्। किञ्च वृषाकपिसूक्ते उच्यते "वि हि सोतोरसृक्षत नेन्द्रं देवममंसत। यत्रामदद् वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः।" इति। अत्र सूर्यास्तोत्तरकालीनां परिस्थितिं गृहीत्वोच्यते यत्र यस्मिन् दिने मया पुष्टेषु प्रकाशेन स्वरूपवैशिष्ट्येन प्रकाश्यतां नीतेषु वृषाकपिणा वोक्तरीत्या प्रकाशितेषु पदार्थेषु मत्सखा अर्यः वृषाकपिरमदत् तोषं प्राप्तवान् तत्रैव तस्यास्तगमने इमे देवाः किरणाः सोतोः सवनं व्यसृक्षत परित्यक्तवन्तः। सूर्यमण्डलस्यास्ततः पूर्वं दृश्यमानत्वेन तदानीं किरणा भूमिं प्राप्य पदार्थान् प्रकाशयन्ति तदिदं तेषां सवनं तत्कर्तृकं सवनं तैः सूर्यस्यास्तगमने ते किरणा भूम्या असंस्पृष्टाः क्रमेणोर्ध्वमेव गन्तुं प्रवृत्ता इति तैर्भूमिप्रकाशनरूपं सवनं परित्यक्तम् रात्राविन्द्रस्य सत्त्वेन तं देवं मत्वा यथा पूर्वं तैः प्रकाशनं कर्तव्यमासीत् तन्न कृतमिति तैरिन्द्रस्य देवत्वेनामननमिति गृहीत्वोच्यते नेन्द्रं देवममंसतेति। यत्र दिने येषु किरणेषु वा पुष्टेषु अर्यो गमनशीलो वृषाकपिर्वेपकस्तेजसां कम्पयिता च तमसां तादृश आदित्यो मत्सखेति इन्द्राख्या ममसखेति व्यवहारो मत्सखेति मदनं सखिवत्प्रियं यस्येति मत्सखा वा तादृश इन्द्रः सर्वस्मादुत्तर एवेति वर्णनया सवनमस्तोत्तरकालिकं तच्च किरणप्रकाशरूपमिति

हि देवाः प्रत्यक्षद्विषः" इति। "तद्यद्" इत्यादिकं ब्राह्मणान्तरवाक्यम्। तत्र इन्द्रविषये निर्वचनमुच्यत इति शेषः। यद्यस्मात्कारणादेनं परमात्मरूपमिन्द्रं देवं प्राणैर्वाक्चक्षुरादीन्द्रियैः प्राणापानादिवायुभिश्च सहितं समैन्धन। उपासका ध्यानेन सम्यक् प्रकाशितवन्तः। तत्तस्मात्कारणादिन्द्रनाम संपन्नम्। अस्मिन् पक्ष इध्यते दीप्यत इति

व्यज्यते। अथवा इन्द्रानुकूलं सवनं कर्तव्यं तच्चेन्द्रेण पानार्थमुपादेये पात्रे चेत्सूयते तदा तत्पानानुगुणं भवति तद्वैपरीत्येन चेत्सवस्तदा न स तदनुगुणः। इन्द्रेण सोमपानार्थमुपादेयं पात्रं चादित्यमण्डलमेव। अतएव मन्त्रे उच्यते इन्द्रं प्रति "इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो" इति अतिपुराणं पुराणकालतः प्रसिद्धमिदं ते पात्रमिन्द्र एतेन सोमं पिबेति तत्र वचनात्, आदित्यमण्डलस्य च पात्रशब्देन व्यवहारो वैश्वानरसूक्ते उच्यते "आस्पात्रं जनयन्तदेवाः" इति पात्रपर्यन्तं देवा जनयन्तीति वचनेन देवाश्च किरणास्तैर्जननीयं पात्रमादित्यमण्डलरूपमेवेति मण्डलस्य पात्रशब्देन व्यवहारस्तेन पात्रेणेन्द्रं प्रति सोमपानं कुर्विति उच्यते। अतएव अत्र मन्त्रे उच्यते "इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः"। अत्रेन्द्रं प्रति यथाकामं यथेच्छं सुतस्य सोमस्य पिब प्रातःसावः प्रातकालिकं सवनं तव पूर्वपीतिश्चेति उक्त्वा तत उच्यते "इदं ते पात्रम्" इत्यादि। एवञ्चात्र प्रातःकाले सवनम् तस्य च पानं पात्रेण, तच्च पात्रं मण्डलरूपमिति स्पष्टं भवति। एवं च प्रातःकाले सवनमेव सोमसवनं प्रातःकाले च प्रकाशनमेव भवतीति तदेव सोमशब्देन सवनशब्देनोच्यते तस्य च सोमस्य पानमिन्द्रेणोक्तकालत्रये क्रियते। किञ्च सवनं नाम सुरासन्धानं सुरा च जलनामसु पठितः शब्दः, जलानां तेजःपरतया वचनं वेदे, तस्याः सुरायास्तेजसः सन्धानमत्र सवनशब्देनोच्यते इति भवति अत्र तेजःप्रकाशरूपं सवनम्। तच्चोक्तत्रये सम्पादितमिन्द्रेण पीयते इति। अतएव प्रातःसायंकालिकमुक्तरीत्या सवनद्वयमभिप्रेत्योच्यते शतपथब्राह्मणे "बृहस्पतिः पूर्वेषामुत्तमः, इन्द्र उत्तरेषां प्रथम" इति। प्रातःकालिक सवानामुत्तमोऽन्तिमो बृहस्पतिरादित्यो भवति सायन्तनसवनानां चादित्यमण्डलस्यास्तगमनतः प्रारम्भादिन्द्रः प्रथम इत्युक्तिः। सवद्वैविध्यं स्पष्टमेव तत्र ब्राह्मणे उच्यते "द्विनामा वै सवेन सुतो भवति यस्मै वै सवाय सूयते येन च सवेन सूयते" इति। किञ्च सोम्ये सूक्ते सोमं प्रति चमूसुतत्वमित्येवं विशेषणं दीयते "सोममिन्द्रचमूसुतम्" इति। चमूशब्दः सैन्यवाचक उपससमाह। एवं च चमूभिरुषोभिः सुत इति वा चमूषु उषस्सु सुतो वा अर्थः। उषसामेवानीकशब्देन व्यवहारोऽनेकस्थले वेदे "उषसामनीकम्" इत्यादिना। एवं चैतेनापि सवनमुषःकालिकमिति विज्ञायते। किञ्चैतरेयब्राह्मणे ऋभूणां विषये एकाऽऽख्यायिकोच्यते ऋभवो हि कर्मणा देवत्वं प्राप्तास्तेषां सोमभागो लब्धः, स चान्यैर्देवैर्नानुमतः, ततस्ते मनुष्यगन्धत्वात्तैः सह सोमपानं कर्तुमनिच्छवः सवितारमब्रुवन् तवेमेऽन्ते वासास्त्वमेवैतैः साकं सोमं पिबेति। तेनापि सविता तत्सम्प्रतिपद्य तथैवानुष्ठितम्। ऋभूणां तृतीयसवने सोमपानम्, तत्र सवित्रा सह तत्पानम्, तदन्तेवासत्वं च तेषामुक्तरीत्या त्रिविधसवनाभिप्रायकत्रिकद्रुकशब्दार्थस्यैव व्यञ्जनम्। उक्तविधकद्रुकत्रये प्रथममुषःकालतः प्राग्भावि, द्वितीयमुषःकालिकं, तृतीयं च सवितृकालिकम् सवनम्। एवं चेदं तृतीयं सवनमत्र सवित्रा सोमपानवचनं तदपि सम्भवत्युक्तरीत्या। एतत्कालतः परस्तादादित्यमण्डलोदयेन किरणानां तद्रूपाणामृभूणां सवितुरन्तेवासिताऽपि उपपद्यते। किञ्च त्रिकद्रुकसंज्ञकयागत्रयनामतोऽपि तदेव अभिव्यक्तं भवति। ते च याज्ञिकप्रसिद्धा यागा ज्योतिर्गौरायुरिति। ज्योतिः सवितृकालिकमनेन शब्देन बोध्यते, गोशब्द उषसां वाहनबोधको वाहमादीनां

कर्मणि व्युत्पत्तिः। आग्रायणनामको मुनिरिदंकरणादिन्द्र इति निर्वचनं मन्यते। इन्द्रो हि परमात्मरूपेणेदं जगत्करोति। औपमन्यवनामको मुनिरिदंदर्शनादिन्द्र इति निर्वचनमाह। इदमित्यापरोक्ष्यमुच्यते। विवेकेन हि परमात्मानमापरोक्ष्येण पश्यति। एतदेवाभिप्रेत्यारण्यकाण्डे समाम्नायते-"स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमितीउँ। तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः" इति। "इदि परमैश्वर्ये"इति धातुः। स्वमायया जगद्रूपत्वं पारमैश्वर्यम्। तद्योगादिन्द्रः[1]। अनेनाभिप्रायेण श्रूयते। "इन्द्रो मायाभिः पुरुरूप" इति। इनशब्दस्येश्वरवाचकस्याकारलोपे सति

देवताऽभिन्नत्वस्य निरुक्तकारोक्तेरुपसमाह। आयुःशब्द ईपद्विमिश्रमित्यर्थक उषःकालपूर्ववर्तिकालिकतां प्रतिपादयति। अतएवैन्द्रसूक्ते त्रिकद्रुकेषु सोमं पीत्वा वृत्रं निहत्य सूर्यं द्यामुषासञ्जनयंस्ततः प्रभृति शत्रुं न विवित्से किलेत्यर्थकम् "आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से" इति वर्णनमुपपद्यते। एतं चेदमादेर्बहुलस्य वर्णनस्य सूर्यरूपत्वे इन्द्रस्याञ्जस्येनोपपद्यत इति अनुक्रमणिकाकारपक्ष एव श्रेयानिति केषाञ्चिद् मतम्। देवतानुसारितया च यागानां लौकिकानां याज्ञिकप्रसिद्ध्यनुसारेण तत्स्वरूपेणोपपत्तिरित्येषा दिक्। एवं चात्र मन्त्रे सूर्यैकदेवत्वपक्षे तदभिन्नत्वमिन्द्रस्य गृहीत्वाऽयमर्थः चित्रभानो विचित्रदीप्ते इन्द्र आगच्छ इमे त्रिकद्रुकशब्दार्थरूपाः सोमाः सुतास्त्वायवस्त्वत्प्रतीक्षां कुर्वाणा वर्तन्ते ये चाण्वीभिरुषोभिस्तना स्वीयतन्वा स्वाभिन्ना नित्यं वा पूताः पाविताः वर्तन्ते। मित्रस्य पावकत्वमिव उषसोऽपि पावकत्वमुच्यत इति तया पूतत्ववचनं न विरुध्यते। उषसः पावकत्वं चानुपदमेव निदर्शयिष्यते।

(१) इन्द्रः।

वेदे स्तूयमानानेकदेवतानां मध्ये इन्द्रोऽग्निवद् बहुभिः सूक्तैः स्तूयते। तत्र निरुक्तकारो मध्यमस्थानवासितामिन्द्रस्य स्वीकरोति। आदित्यरूपैका देवता वेदे स्तूयते इति पक्षे इन्द्रस्तु आदित्यस्यैव निमित्तविशेषवशतो-रूपान्तरम्। परब्रह्मैकदेवतापक्षे आदित्यरूपोपाधिक एवेन्द्र इति भवति। तत्र केचिदस्तं यन्नादित्य इन्द्रशब्देनोच्यत इति ब्रुवते। अपरे पुनर्विषुवद्दिनसम्बन्ध्येवादित्य इन्द्र इति हस्तयन्ति। तत्राद्यमते इन्द्रस्य कर्मणो वृत्रवधादे रात्रिसंबन्धितया तथात्वम्। द्वितीयमते इन्द्रस्य हरीनामकावश्वावुच्येते ऋक्सामयोर्हरिरूपत्वमृक्सामत्वं च द्यावापृथिव्योरिति वेदे प्रतिपादनात्, इन्द्रस्य सर्वस्मादुत्तरत्वस्य वृषाकपिसूक्ते वचनात्, ऋक्सामयोरिन्द्रपार्श्वत्वेनाप्युपवर्णनादस्य मध्यमस्थानवासितैव युक्ता। मध्यमं च स्थानं गोलार्द्धद्वयविभक्तायाः पृथ्व्या अर्द्धद्वयसन्धिस्थानम्, तदेव च सूर्यसंबन्धितया विषुवं दिनं भवति। एवं च क्रान्तिवृत्ते विषुववृत्तविन्दुच्छेदविशिष्टस्यादित्यस्येन्द्रत्वं संपद्यते। एवं च संपातस्थ आदित्य इन्द्रः। संपातस्य च चलत्वेन संपातगतिसम्मुखमुखत्वेन प्रवृत्तपक्षिकल्पने गोलार्द्धद्वयसम्बन्धिन्योर्द्यावापृथिव्योस्तद्रूपयोर्ऋक्सामयोर्वा पक्षत्वपार्श्वत्वहरिरूपत्वादिकं सिध्यति।

तस्य चेन्द्रस्य कर्माणि ऐन्द्रीषु निवित्सु प्रतिपाद्यन्ते संक्षेपतः। सूक्तेषु तेषामेवाङ्गप्रत्यङ्गवर्णनया विस्तारः क्रियते। ताश्च निविदः—"इन्द्रो मरुत्वान् सोमस्य पिबतु। मरुत्स्तोत्रो मरुद्गणः। मरुत्सखा मरुद्वृधः। घ्नन्वृत्रमसृजदपः। मरुतामोजसा सह। य ईमेनं देवा अन्वमदन्। अप्तूर्ये वृत्रतूर्ये। शंबरहत्ये

नकारान्तमिन्निति पदं भवति। "दृ भय" इति धातुः। स च परमेश्वरः शत्रूणां दारयिता भीषयितेतीन्द्रः। "द्रु गतौ" इति धातुः। शत्रूणां द्रावयिता पलायनं प्रापयितेतीन्द्रः। यज्वनां यागानुष्ठायिनामादरयिता भयस्य परिहर्ता। एवमेतानि निर्वचनानि द्रष्टव्यानीति॥ इन्द्रेत्यत्रामन्त्रिताद्युदात्तत्वम्। आ इत्ययं निपातत्वेनाद्युदात्तः। चित्रभानो। पदात्परत्वादामन्त्रितनिघातः। त्वामिच्छतीत्यर्थे युष्मच्छब्दात् "सुप आत्मनः क्यच्"। (पा० ३।१।८)। "प्रत्ययोत्तरपदयोश्च" (पा० ७।२।९८) इति मपर्यन्तस्य त्वादेशः।"क्याच्छन्दसि" (पा० ३।२।१७०)

गविष्टौ। अर्चन्तं गुह्या पदा। परमस्यां परावति। आदीं ब्रह्माणि वर्द्धयन्। अनाधृष्टान्योजसा। कृण्वन्देवेभ्यो दुवः। मरुद्भिः सखिभिः सह। इन्द्रो मरुत्वाँ इह श्रवदिह सोमस्य पिबतु। प्रेमां देवो देवहूतिमवतु देव्या धिया। प्रेदं ब्रह्म प्रेदं क्षत्रम्। प्रेमं सुन्वन्तं यजमानमवतु चित्रश्चित्राभिरूतिभिः। श्रवद्ब्रह्माण्यवसा गमत्"। "इन्द्रो देवः सोमं पिबतु। एकजानां वीरतमः। भूरिदानं तवस्तवः। हर्योः स्थाता। पृश्नेः प्रेता। वज्रस्य भर्ता। पुरां भेत्ता। पुरां दर्मा। अपां स्रष्टा। अपां नेता। सत्वानां नेता। निजघ्निर्दूरेश्रवाः। उपमातिकृद्दंसनावान्। इहो ष्वं देवो बभूवान्। इन्द्रो देव इह श्रवदिह सोमस्य पिबतु। प्रेमां०"॥ अत्रेन्द्रस्य मरुद्युक्तत्वं, सोमपानं, मरुत्स्तावकत्वं, मरुत्स्तुतत्वं, मरुद्गणत्वं, मरुत्सखित्वं मरुद्वृधत्वं, वृत्रविनाशकत्वं, अपां सर्जकत्वं, मरुतां बलसाहित्यम्, एनमनुदेवानां मदनं, अवर्थं युद्धम्, वृत्रविनाशार्थं युद्धम्, गवां प्राप्त्यर्थं, परावति गुह्यस्थानार्चकत्वम्, ब्रह्मवर्द्धकत्वमोजसा, देवपूजकत्वं, अनेकाभिरूतिभिर्यजमानरक्षकत्वमुच्यते। तथा अयं वीराणां वीरः, प्रभूतस्य दाता धनस्य, हर्योः स्थाता, पृश्नेरादित्यस्य प्रेरयिता, वज्रस्य धारकः पुरां भेदकः, दारकः पुराम्। अपां स्रष्टा तथा नेता च, अतिशयहन्ता, दूरत एव गतकीर्तिः। दर्शनीयः इत्यादि। तथा इन्द्रगाथानामकेषु मन्त्रेषु उच्यते "यदिन्द्रो दाशराज्ञे मानुषं व्यगाहथाः। विरूपः सर्वस्मा आसीत्सह यक्षाय कल्पते॥ त्वं विपाक्षं मघवन्नम्रं पर्याकरोरभि। त्वं रौहिणं व्यास्यस्त्वं वृत्रस्याभिनच्छिरः। यः पर्वतान्व्यदधाद्यो अपो व्यगाहथाः। यो वृत्रो वृत्रहन्नहंस्तस्मा इन्द्र नमोऽस्तुते। प्रष्टिं धावन्तं हर्योरौच्चैःश्रवसमब्रवम्। स्वस्त्ययश्व जैत्रायेन्द्रमावह सुस्रजम्। यस्त्वाश्वेतोच्चैःश्रवसं हर्योर्युञ्जन्ति दक्षिणम्। मूर्द्धानमश्वं देवानां बिभ्रदिन्द्रं महीयसे" इति। दाशराज्ञे मानुषगाहनं, सर्वस्य विरूपत्वमक्षस्य सदक्षत्वं, विपाक्षस्य नामनं, रौहिणस्य व्यसनं, वृत्रशिरसो भेदनं, पर्वतानामुत्पादनं निरसनं वा अप्सुगाहनं श्वेताश्ववाहनमित्यादि॥ तथा सोमपानजनितमदेन इन्द्रस्य विशिष्य कर्माणि निविद्ध्याय उच्यन्ते: "अस्य मदे जरितरिन्द्रः सोमस्य मत्सत्। अस्य मदे जरितरिन्द्रोऽहिमहन्। अस्यमदे जरितरिन्द्रो वृत्रमहन्। अस्य मदे जरितरिन्द्रोऽपां वेगमैरयत्। अस्य मदे जरितरिन्द्रो जिन्वदजुवोऽपिन्वदपिवः। अस्य मदे जरितरिन्द्र उदार्यं वर्गमतिरद्वदासीद्दिशोऽस्तभ्नात्। अस्य मदे जरितरिन्द्र उद्द्यामस्तभ्नादप्रथत्पृथिवीम्। अस्य मदे जरितरिन्द्रो दिवि सूर्यमैरयद् व्यन्तरिक्षमतिरत्। अस्य मदे जरितरिन्द्रः समुद्रं प्रकुपितमरम्णात्। अस्य मदे जरितरिन्द्र ऋष्याँ इव पंकणतः पर्वतान् प्रकुपिताँ अरम्णाः। अस्य मदे जरितरिन्द्र इह श्रवत्०"॥ इत्यादि। निरुक्तकारस्तु "रसानुप्रदानं वृत्रवधो यावती वा बलकृतिरिन्द्रस्यैव तदि"तिव्याचष्टे। इन्द्रशब्दस्य प्रवृत्तिनिमित्तदर्शनव्याजेन तु बहूनि कर्मान्तराणि प्रदर्शितानि तेन। तानि यथा इन्द्र इरां दृणातीति वेत्यादिकानि। तान्येवात्र भाष्ये भाष्यकृतोल्लिख्य व्याख्यातानि।

इति क्यजन्तादुप्रत्ययः। त्वद्यव इति प्राप्तौ "युष्मदस्मदोरनादेशे" (पा. ७।२।८६) इत्यविभक्तावपि हलादौ व्यत्ययेनात्वम्। उकारः प्रत्ययस्वरेणाद्युदात्तः। अणुशब्दः सौक्ष्म्यवाचकस्तद्योगात्प्रकृतेऽङ्गुलीषु वर्तते। "वोतो गुणवचनात्" (पा. ४।१।४४) इति ङीषि प्राप्ते व्यत्ययेन ङीन्। नित्त्वादाद्युदात्तः। तना इत्यय निपातो नित्यमित्यर्थे। निपातत्वादाद्युदात्तः। पूतासः। "आज्जसेरसुक्" (पा ७।१।४०) इत्यसुक्॥ ४ ॥*

---

* इन्द्र। इन्देर्धातोरना प्रत्ययेनेन्द्रशब्दो निपातित औणादिकेन "ऋज्र" इत्यादिसूत्रेण। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां तदपवादेन प्रत्ययगतेन नित्त्वेन नित्स्वरे इन्द्रशब्द आद्युदात्तः। शेषनिघातेनान्तानुदात्तस्ततः प्रथमायाः सम्बोधनार्थकाया एकवचने तदन्तत्वेनामन्त्रितत्वाद् "आमन्त्रितस्यच" इति षाष्ठिकेनाद्युदात्तत्वमेवावतिष्ठत इति इन्द्रशब्द आद्युदात्तोऽन्त्यः शेषनिघातेनानुदात्तस्तस्य परवर्त्याकारेणोदात्तेन सवर्णदीर्घे तस्योदात्तस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वम्। आ। 'निपाता आद्युदात्ता" इत्याकार उदात्तः। याहि। याधातोर्लोटि सिपि ह्यादेशे शपि लुकि च याहीति रूपम्। तत्र धातोरुदात्तत्वस्य प्रत्ययोदात्तत्वेन बाधः प्राप्तः परन्त्वत्र प्रत्ययस्य सिपः पित्त्वात्सुप्पितावनुदात्तौ इत्यर्थकेन "अनुदात्तौ सुप्पितौ" इति अनुदात्तत्वेन धातुस्वरस्यानिवृत्तौ प्राप्तायां सिपः स्थाने विहितह्यादेशेनोदात्तेन धातुस्वरबाधादन्तोदात्तता याहिपदस्य प्राप्ता, न चात्र ह्यादेशस्य सिप्स्थानिकतया स्थानिवत्त्वेन पित्त्वादनुदात्तत्वमिति शङ्क्यम्. ह्यादेशस्य विशिष्योदात्तत्वस्य विधानात्। तस्य च श्रौतत्वेनानुमानिकतया प्राप्तस्यानुदात्तत्वस्य दौर्बल्येनोदात्तत्वमेव प्रवर्तते। एवं च पदावस्थायां याहीतिपदमन्तोदात्तं प्राप्तमासीत्परन्तु अत्रातिङन्तपदात्परत्वात् "तिङ्ङतिङः" इत्यनेन सर्वानुदात्तत्वम्। तस्य संहितायामुदात्तात्परत्वेनाद्यस्य स्वरितत्वं परस्य प्रचयः। पदपाठे तु द्वयमप्यनुदात्तम्। चित्रभानो। चित्रशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वम्। भानुशब्दस्यापि भाधातुतो नुप्रत्ययान्तत्वेन धातोः स्वरस्य परवर्तिप्रत्ययस्वरेण निवृत्त्याऽन्तोदात्तत्वम्। ततश्चित्रभानुशब्दयोर्बहुव्रीहौ "समासस्य" इत्यन्तोदात्तत्वं प्राप्तं बाधित्वा "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति पूर्वपदस्य समासप्रविष्टतादशायां यः स्वरः समासेऽपि स एव स्वर इत्यर्थकः पूर्वपदस्य प्रकृतिस्वरः। तथाच चित्रभानुशब्दे चित्रशब्दीयो योऽन्त उदात्तः समासेऽपि तस्यैवोदात्तत्वेन शेषनिघाते चिकारोऽनुदात्तस्त्राकार उदात्तो भाकारो नूकारश्चानुदात्तौ चित्रभानुशब्दे। ततः सम्बोधनप्रथमैकवचने तन्निमित्तके गुणे गुणस्याप्यनुदात्तोकारस्थानिकत्वेनानुदात्तत्वम्। ततोऽस्य शब्दस्य सम्बोधनप्रथमान्तत्वेनामन्त्रितत्वेन "आमन्त्रितस्य च" इत्याष्टमिकसूत्रेण सर्वानुदात्तत्वम्। पदपाठे तु अस्य शब्दस्य समस्तत्वेन सम्बोधनौकारान्तत्वेन चावग्रहप्रगृह्यत्वरूपप्रकारद्वयस्यैकस्मिन्नेव पदे प्रदर्शनीयतया प्रातिशाख्यरीत्याऽस्य स्थितोपस्थितभावेन पदताप्रदर्शने तत्पदं द्विरावर्त्य प्रथमवचने यथासंहितमिङ्गनरहितं सर्वानुदात्तयुतं प्रदर्श्य तत इतिकारेण सन्धाय पुनर्वचने यथापदपाठं प्रदर्शनीयतयाऽवग्रहयुतमितिशब्दीयतिकारात्स्वरितात्परत्वात्प्रचितत्वं सर्वेषामचाम्। सुताः। सुधातोः क्ते प्रत्यये सुतशब्दः। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवर्तनादन्तोदात्तः सुतशब्दः। ततो जसि पूर्वसवर्णदीर्घे आकार उदात्तसुतशब्दीयतकारानुदात्तसकारस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तः। सुशब्दोकारस्तु शेषनिघातेनानुदात्तः। इमे। इदंशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वं ततो जसि जसः सुप्त्वादनुदात्तत्वम्। तन्निमित्तकेदंशब्दीयान्तमकारस्थानिकत्यदाद्यत्वस्य व्यञ्जनस्थानिकत्वात्

स्क०—योऽयं पञ्चमस्तृचः स इन्द्रदेवतः। हे इन्द्र आयाहि आगच्छ चित्रभानो! भानुर्दीप्तिः। विचित्रदीप्ते। पूजनीयदीप्ते! वा। किं कारणम्? सुता अभिषुता इमे सोमाः। त्वायवस्त्वत्कामाः। अपि नामेन्द्रोऽस्मान् पिबेदित्येवंकामा इत्यर्थः। नचाभिषुता एव केवलम्, किन्तर्हि? अण्वीभिस्तना पूतासः। तनाशब्दो दशापवित्रवचनः। अण्वीभिर्दशापवित्रेण च पूताः। हस्तेन दशापवित्रमादाय पूता इत्यर्थः॥ ४॥

वे०—इन्द्रोपागच्छ चित्रदीप्ते! सुता इमे सोमास्त्वत्कामा भवन्ति। अङ्गुलीभिर्दशापवित्रेण च पूताः॥ ४॥

स्थानिवत्त्वेनानुदात्तत्वे तस्य पूर्वेण दकाराकारेण पररूपैकादेशे तस्यैकादेशस्योदात्तदकाराकारानुदात्तमस्थानिकाकारस्थानिकतया "एकादेश उदात्तेनोदात्त" इति उदात्तत्वम्। ततो जस्स्थानिकश्यादेशीयेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। ततः पुनर्दकाराकारेण श्यादेशीयेकारस्य गुणरूपैकादेशे तस्यापि पूर्ववदुभयस्थानिकतया पूर्ववदुदात्तत्वम्। आद्यस्येकारस्य शेषनिघातेनानुदात्तत्वम्। एवं चान्तोदात्त इमेशब्दः। त्वायवः। युष्मच्छब्दात्क्यचि युष्मशब्दीयमपर्यन्तभागस्य त्वादेशोऽतो गुणे पररूपे क्यजन्तादुप्रत्यये त्वच्छब्दस्याकारान्तादेशे त्वायुशब्दस्य प्रथमाबहुवचने जसि गुणेऽवादेशे त्वायव इति रूपम्। तत्र युष्मच्छब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वे शेषनिघातेन युशब्दस्यानुदात्तत्वे युष्मच्छब्दः अन्तोदात्तः, ततः क्यचि प्रत्यये प्रत्ययस्वरेणान्तोदात्तत्वे प्राप्ते चित्स्वरेणापितदेवान्तोदात्तत्वम्। शेषनिघातेनानुदात्तोकारयुतयुष्म् इति मपर्यन्तभागस्थले जातस्य त्वादेशस्य स्थानिवत्त्वेनानुदात्तत्वम्। अद्वागीयाकारस्यापि चित्स्वरोत्तरभाविशेषनिघातेनानुदात्तत्वात्तेन सह पररूपैकादेशस्यापि पूर्ववदनुदात्तस्थानिकत्वेनानुदात्तत्वम्। आकारादेशस्य व्यञ्जनस्थानिकतयाऽनुदात्तत्वमेवेति त्वाशब्दाकारोऽनुदात्तो यशब्दाकार उदात्तस्त्वायशब्दे क्यजन्ते,ततस्तस्मादुकारप्रत्यये प्रत्ययस्वरेण तस्योदात्तत्वमिति त्वायुशब्दोऽपि अन्तोदात्तः, ततो जसः प्रत्ययस्य सुप्त्वादनुदात्तत्वम्। तन्निमित्तगुणस्योदात्तस्थानिकतयोदात्तत्वे तत्स्थानिकस्यावादेशस्यापि स्थानिवत्त्वेनोदात्तत्वमिति त्वायवःशब्दे आदिरनुदात्तो मध्य उदात्तोऽन्तोऽनुदात्तस्तस्योदात्तात्परत्वात् स्वरितत्वम्। अण्वीभिः। अणुशब्दे अण्धातोः "अणश्च" इत्यौणादिकेन सूत्रेण उप्रत्ययः। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तावन्तोदात्तोऽणुशब्दः प्राप्तः परन्तु "ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये" इतिफिट्सूत्रेणादेरुदात्तत्वं शेषनिघातेनान्तस्यानुदात्तत्वमणुशब्दे। ततो व्यत्ययेन ङीनि प्रत्यये प्रत्ययस्वरस्य बाधकेन नित्स्वरेणाण्वीशब्द आद्युदात्तः। शेषनिघातेनान्तस्यानुदात्तत्वम्। तस्योदात्तात्परत्वात् स्वरितत्वम्। ततो भिसि तस्यापि सुप्त्वादनुदात्तत्वेनाद्युदात्तोऽण्वीभिःशब्दः। तत्र द्वितीयस्योदात्तात् परत्वात् स्वरितत्वं तृतीयस्य स्वरितात् परत्वात् प्रचितत्वं पदपाठे, संहितायां तनाशब्दीयतकारस्योदात्तस्य परत्वेनानुदात्ततरत्वम्। तना। तस्य "निपाता आद्युदात्ताः" इत्यादेरुदात्तत्वे शेषनिघातेनान्त्यस्यानुदात्तत्वे तस्योदात्तात् परत्वात् स्वरितत्वम्। पूतासः। अत्र पूधातोः क्तप्रत्ययस्तत्र प्रत्ययस्वरेणान्तोदात्तः पूतशब्दः शेषनिघातेनादेरनुदात्तत्वम्। ततो जस्यसुगागमे जसः सुप्त्वादागमस्य "आगमा अनुदात्ता" इत्यनुदात्तत्वम्। तत्रोदात्ततकाराकारेणानुदात्तासुगागमाकारेण सवर्णदीर्घैकादेशस्योदात्तानुदात्तोभयस्थानिकत्वेनोदात्तत्वम्। तत्रादिरनुदात्तो मध्य उदात्तोऽन्त उदात्तात् परत्वात् स्वरितः।

द्वितीयामृचमाह :—

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।

उप ब्रह्माणि वाघतः ॥५॥

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः ।

उप । ब्रह्माणि । वाघतः ॥५॥

इन्द्र = त्वम् आयाहि = अस्मिन् कर्मण्यागच्छ । किमर्थम् ? वाघतः = ऋत्विजो ब्रह्माणि = वेदरूपाणि स्तोत्राणि उपैतुम् । कीदृशस्त्वम् ? धिया = अस्मदीयया प्रज्ञया इषितः = प्राप्तः । अस्मद्भक्त्या प्रेरित इत्यर्थः । विप्रजूतः । यथा यजमानभक्त्या प्रेरितस्तथाऽन्यैरपि विप्रैर्मेधाविभिर्ऋत्विग्भिः प्रेरितः । कीदृशस्य वाघतः ? सुतावतः = अभिषुतसोमयुक्तस्य ॥

"केत" इत्यादिष्वेकादशसु प्रज्ञानामसु "धीः" इति पठितम् । चतुर्विंशतिसंख्याकेषु मेधाविनामसु "विप्रो धीर" इति पठितम् । "भरता" इत्यादिष्वष्टस्वृत्विङ्नामसु "वाघत" इति पठितम् । इषित इत्यत्र "इष गतौ" इत्यस्मान्निष्ठायामिडागमः । "आगमा अनुदात्ताः"। (पा. ३।१।३।१) इतीटोऽनुदात्तत्वात् क्तस्वरः शिष्यते । विप्रजूतः । "डुवप् बीजतन्तुसन्ताने" इति धातोः "ऋज्रेन्द्राग्रवज्रविप्रे"त्यादिना (उ. २।२७) रन्प्रत्ययान्तो विप्रशब्दो निपातितः । निपातनादुपधाया इकारो लघूपधगुणाभावश्च । नित्त्वादाद्युदात्तः । तैर्जूतः प्राप्तः । जू इति सौत्रो धातुर्गत्यर्थः । "श्र्युकः किति" (पा. ७।२।११) इतीट्प्रतिषेधः । "तृतीया कर्मणि" (पा ६।२।४८) इति पूर्वपदप्रकृतिस्वरत्वम् । सुतावतः । छान्दसं दीर्घत्वम् । मतुपोऽनुदात्तत्वात् क्तप्रत्ययस्वर एव शिष्यते । ब्रह्माणि । "नब्विषयस्यानिसन्तस्य" इत्याद्युदात्तः । वाघच्छब्द ऋत्विङ्नामसु पठितः । प्रातिपदिकस्वरः ॥ ५ ॥*

---

* इन्द्र । अत्र प्रातिपदिकस्वरस्य प्रत्ययस्वरेण तस्य नित्स्वरेण निवृत्तौ आद्युदात्त इन्द्रशब्दः संबोधनप्रथमान्तत्वेन "आमन्त्रितस्य" इति पाष्ठिकेनाद्युदात्त एव । आ । निपातत्वादाद्युदात्तः । याहि । धातोः स्वरस्य हिप्रत्ययस्वरेण निवृत्तावन्तोदात्ततया प्राप्तस्य "तिङ्ङतिङः" इति सर्वानुदात्तः संहितायामुदात्तात्परत्वात्प्रथमः स्वरितो द्वितीयस्तु स्वरितात्परत्वात्प्रचितः । धिया । ध्यैधातोः क्विपि संप्रसारणे परपूर्वत्वे दीर्घे धीशब्दस्ततस्तृतीयैकवचने टापि इयङादेशे धियाशब्दः । तत्र धातोः स्वरः, ततो ध्यैकारस्य यकारस्य संप्रसारण इकारे तस्य

स्क० —हे इन्द्र ! आयाहि आगच्छ धिया अस्मदीयया प्रज्ञया इषितः शुद्धोऽप्ययमिषिधातुरधिपूर्वार्थो द्रष्टव्यः। अधीष्टोऽभ्यर्थित इत्यर्थः। विप्रजूतः। मेधाविभिर्ऋत्विग्भिरभिगतः। केन? सामर्थ्यात् स्तुतिभिः। मयाभ्यर्थितोऽन्यैश्चर्त्विग्भिरभिद्रुत इत्यर्थः। क्वागच्छानि? उच्यते, सुतावतः। सुताः सोमा यस्य सन्ति स सुतावान् यजमानस्तस्य। उप ब्रह्माणि उपशब्दः सामीप्ये। ब्रह्मेत्यन्ननाम। यजमानस्य स्वभूतानामन्नानां हविर्लक्षणानां समीपे इत्यर्थः। वाघतः। ऋत्विङ् नामैतद्। इहतु सुतावतो यजमानस्य विशेषणत्वादन्तर्णीतमत्वर्थः। ऋत्वि-

---

व्यञ्जनस्थानिकतयाऽनुदात्तत्वात्तत एकारेणोदात्तेन सह पूर्वरूपैकादेशे "एकादेश उदात्तेनोदात्त" इत्युदात्त एकादेशः। ततो दीर्घस्योदात्तस्थानिकतया स्थानिवत्त्वेनोदात्तता। ततष्टायास्सुप्त्वादनुदात्तत्वे तन्निमित्तकस्येयादेशस्योदात्तेकारस्थानिकत्वादुदात्तत्वम् इति धियाशब्द आद्युदात्तः प्राप्त आसीत् परन्तु "सावेकाचस्तृतीयादिर्विभक्तिः" इति विभक्तेराकारस्योदात्तत्वे शेषनिघातेनेकार उदात्त इति धियाशब्दोऽन्तोदात्तः। इषितः। अत्र इष्धातोः क्ते इडागमे रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तिः। प्रत्ययस्वरश्च "आद्युदात्तश्च" इति प्रत्ययस्यादेरुदात्तः। सच प्रकृते यद्यपि षकारोत्तरवर्तीकारे प्राप्तः परन्तु तस्येकारस्यागमत्वेनागमविषयकेण विशेषशास्त्रेण "आगमा अनुदात्ता" इत्यनेनानुदात्तत्वविधानात्प्रत्ययस्वरस्तप्रत्ययाकार एव प्रवर्तते शेषयोः शेषनिघातेनानुदात्तत्वम्। तस्य संहितायां याकारेणोदात्तेनानुदात्तस्येकारस्य प्रथमस्य गुणैकादेशे उदात्तेन साहित्यादेकादेश उदात्तः। षीकारस्य तु उदात्तपरत्वात्सन्नतरः। विप्रजूतः। विपूर्वात्प्राधातोः कप्रत्यये विप्रशब्दः जू इति सौत्राद्धातोः क्ते जूतशब्दः। अथवा डुवप्धातोः "ऋज्रे"त्यादिनौणादिकेन सूत्रेण रन्प्रत्ययान्तो निपातितो विप्र इत्येवम्। तस्य च विप्रैर्जूत इति समासः। तत्राद्ये पक्षे धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राकारोऽनुदात्तः कप्रत्ययाकार उदात्तस्ततोऽयं धातोराकारः प्रत्ययेन लुप्यते। ततः प्रेति पदं भवति। ततस्तस्य विना समासे गतीतिस्वरेण प्रत्ययस्वरनिवृत्तावाद्युदात्तो विप्रशब्दः शेषनिघातेनान्तानुदात्तः। अन्त्ये पक्षे नित्वादाद्युदात्तत्वम्। जूत इत्यत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तावन्तोदात्तो जूतशब्दः। ततो विप्रशब्दस्य तृतीयासमासे "समासस्य" इत्यन्तोदात्तत्वस्य प्राप्तौ तद्बाधकेन "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया कृत्या" इत्यनेन तृतीयान्तस्य प्रकृतिस्वरे प्राप्ते तस्य "थाथघञ् क्ताजबित्रकाणाम्" इति सूत्रेणान्तोदात्ते प्राप्ते तदपवादेन "तृतीया कर्मणि" इत्यनेन तृतीयान्तस्य प्रकृतिस्वरविधानाद्विप्रशब्दस्य प्रकृतिस्वरकत्वं समासेऽवशिष्टानां शेषनिघातेनानुदात्तत्वम्। एवं च विप्रजूतशब्द आद्युदात्तः। प्रशब्दस्योदात्तात्परत्वात्स्वरितत्वम्। जूत इत्यनयोः स्वरयोः स्वरितात्परत्वात्प्रचयः स्वरः। सुतावतः। सुधातोः क्ते ततो मतुपि छान्दसे दीर्घे षष्ठ्यन्तस्येदं रूपम्। तत्र धातुस्वरस्य प्रत्ययस्वरेण निवृत्तिः। मतुपः प्रत्ययत्वेऽपि पित्त्वेन "अनुदात्तौ सुप्पितौ" इति विशिष्यानुदात्तत्वविधानात्पूर्वस्वरानिवृत्तौ द्वितीयोदात्तः सुतवच्छब्दः। तस्याकारस्य दीर्घेऽपि उदात्तस्थानिकतया संहितायां स्थानिवत्त्वेन तस्योदात्तत्वम्। विभक्तेस्तु सुप्त्वादनुदात्तत्वमेव। एवं च प्रथमोऽनुदात्तो द्वितीय उदात्तस्तृतीयचतुर्थावनुदात्तौ। तत्र तृतीयस्योदात्तात्परत्वात्स्वरितता। चतुर्थस्य तु स्वरितात्परत्वात्प्रचयः स्वरः। उप। निपातत्वादाद्युदात्तत्वम्। शेषनिघातेनान्त्यस्यानुदात्तत्वे पदत्वे तस्योदात्तात्परत्वात्स्वरितः। संहितायां तु ब्रह्मशब्दीयस्योदात्तस्य परत्वात्सन्नतरत्वम्। ब्रह्माणि। बृंहेर्मनिन् "बृंहेर्नोऽच्च" इति औणादिकेन सूत्रेण ब्रह्मशब्दः। तत्र धातुस्वरं बाधित्वा प्रत्ययस्वरे प्राप्ते नित्वेनाद्युदात्तता। भाष्यकारोऽव्युत्पत्तिपक्षाभिप्रायेण फिट्स्वरे प्राप्ते तद्बाधकेन "नब्विषयस्यानिसन्तस्य" इति सूत्रेणाद्युदात्तत्वम् इति प्रतिपादितवान्। ततो द्वितीयाबहुवचने शसि

ग्वतो यजमानस्येति । अथवा वाघत इत्यस्यैव सुतावत इति विशेषणम् । ब्रह्मशब्दः स्तुतिवचनः । सुतावतः कृतसोमाभिषवस्य ऋत्विजो याः स्तुतयः, तत्समीपे । यत्र सोममभिषुत्यर्त्विजः स्तुवन्तीत्यर्थः ॥ ५ ॥

वे०—इन्द्रागच्छ कर्मणा प्रेषितो मेधाविभिराकृष्टो यजमानस्य यो होता तस्य स्तोत्राणि ॥ ५ ॥

तृतीयामृचमाह—

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश्चनः ॥६॥

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः ।
सुते । दधिष्व । नः । चनः ॥६॥

हरिशब्द इन्द्रसम्बन्धिनोरश्वयोर्नामधेयम् । "हरी इन्द्रस्य रोहितोऽग्नेः" इति तदीयाश्वनामत्वेन पठितत्वात् । हे हरिवः = अश्वयुक्त इन्द्र त्वम् ब्रह्माणि उपैतुम् आयाहि । कीदृशस्त्वम् ? तूतुजानः = त्वरमाणः । आगत्य चास्मिन्सुते = सोमाभिषवयुक्ते कर्मणि नोऽस्मदीयं चनः = अन्नं हविर्लक्षणं दधिष्व = धारय । स्वीकुर्वित्यर्थः ॥

तूतुजानः । तुजेर्लिटि "लिटः कानज्वा" (पा ३।२।१०६) इति कानजादेशः । "तुजादीनां दीर्घोऽभ्यासस्य" (पा ६।१।७) । इत्यभ्यासस्य दीर्घत्वम् । "अभ्यस्तानामादिः" (पा ६।१।१८९) इत्याद्युदात्तत्वम् । हरिव इत्यत्र हरयोऽस्य सन्तीति मतुपि "छन्दसीरः" (पा ८।२।१५) इति मकारस्य वत्वम् । सम्बुद्धौ "उगिदचाम्" (पा ७।१।७०) । इति नुम् । संयोगान्तलोपः । (पा ८।२।२३) । नकारस्य "मतुवसो रु सम्बुद्धौ छन्दसि" (पा ८।३।१) इति रुत्वम् आष्टमिको निघातः । ब्रह्माणीत्यस्य हरिव इत्यनेनासामर्थ्यात् "समर्थः पदविधिः" इति नियमात्सुबामन्त्रितपराङ्गवद्भावाभावे-

तस्य शौ नुमि दीर्घे ब्रह्माणीति भवति तत्र शसः सुप्त्वादनुदात्तत्वं तत्स्थानिकशेरपि स्थानिवत्त्वेनानुदात्तत्वमेव । दीर्घोऽनुदात्तस्थानिक इत्यनुदात्त एव । तत्रादेरुदात्तात्परत्वाद् द्वितीयस्य स्वरितत्वं तृतीयस्य स्वरितात्परत्वात् प्रचयः । वाघतः । वहधातोरतिप्रत्ययो हकारस्य कुत्वमुपधावृद्धिर्बाहुलकात् । तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ अन्तोदात्तो वाघच्छब्दस्ततो विभक्तिप्रत्ययस्य सुप्त्वादनुदात्तत्वेन मध्योदात्तं पदम् । आद्योऽनुदात्तः शेषनिघातेन मध्य उदात्तोऽन्त्य उदात्तात्परत्वात्स्वरितः ।

नामन्त्रितनिघाताभावादाद्युदात्तत्वे सत्युपेत्यकारस्य सन्नतरः। दधिष्वेत्यत्र दधातेर्लोटि थास्। "थासः से" (पा ३।४।८०)। "सवाभ्यां वामौ" (पा. ३।४।९१)। इत्येकारस्य वादेशः। "छन्दस्युभयथा" (पा. ३।४।११७)। इति सार्वधातुकार्द्धधातुकसंज्ञयोः सत्योः सार्वधातुकत्वेन शपि (पा ३।१।६८) तस्य "श्लौ च" द्विर्भावः (पा. ६।१।१०), आर्द्ध-धातुकत्वेनेड़ागमश्च (पा ७।२।३५)। "आतो लोप इटि च" (पा. ६।४।६४) इत्याकारलोपः। चनः। "चायेरन्ने ह्रस्वश्च" (उ. ४।२०१) इत्यसुन्नन्तः। चकारान्नुड़ागमे यलोपः॥ ६॥*

॥ इति प्रथमस्य प्रथमे पञ्चमो वर्गः॥

---

* इन्द्र। रन्प्रत्ययान्तत्वेनाद्युदात्तत्वमस्यामन्त्रितत्वादपि तदेवावशिष्यते। आ। निपातत्वादाद्युदात्तः। संहितायामिन्द्रेत्यस्यान्त्याकारेणैकादेशे "एकादेश उदात्तेन" इत्युदात्तः। याहि। धातोः स्वरस्य प्रत्ययस्वरेण तस्यापि तिङन्तनिघातेन निवृत्तौ सर्वानुदात्तं पदम्। तूतुजानः। तुजेर्लिटि कानच् द्वित्वमभ्यासदीर्घादि। तत्र धातोः स्वरस्य कानच्प्रत्ययस्वरेण निवृत्तिस्तस्यापि 'चित' इति चिदन्तस्योदात्तत्वविधायकेन निवृत्तिस्ततो लिण्निमित्तकद्वित्वनिष्पन्नस्याभ्यामस्यापि द्वित्वस्य पाष्ठिकस्य द्विरुच्चारणरूपत्वेनानुदात्तत्वात्तत्स्थानिकदीर्घस्यापि स्थानिवत्त्वेनानुदात्तत्वेऽन्तोदात्तोऽयं शब्दः प्राप्तः परन्तु तस्य चितस्वरस्य प्रकृतेऽपवादकेन "अभ्यस्तानामादिः" इतिसूत्रेणादेरुदात्तत्वे शेषनिघाते सति द्वितीयस्याच उदात्तात्परत्वात्स्वरितत्वम्, तृतीयचतुर्थयोस्तु स्वरितात्परत्वात् प्रचयः पदपाठे। संहितायां तु उपशब्दावयवोदात्तस्य परत्वादन्तिमस्य सन्नतरत्वम्। उप। उप-शब्दो निपातत्वादाद्युदात्तः शेषनिघातेनान्तस्यानुदात्तत्वे तस्योदात्तात् परत्वात् स्वरितः पदपाठे। संहितायां तु ब्रह्मशब्दीयोदात्तः पर इति सन्नतरत्वमन्त्यस्य। ब्रह्माणि। बृंहेधातोर्मनिनि प्रत्यये धातुस्वरस्य प्रत्यय-स्वरेण निवृत्तौ प्राप्तायां नित्त्वेन प्रत्ययस्य नित्त्वनिमित्तकस्वरेण स एव स्वरोऽवस्थाप्यते। जशः शौ तयोरुभ-योरनुदात्तत्वम्। आद्यस्य सुप्त्वादन्त्यस्य स्थानिवत्त्वात्। दीर्घस्य तु स्थानिवत्त्वेनानुदात्तत्वमेव। तत्र प्रथमस्योदात्तत्वं द्वितीयस्योदात्तात् परत्वात् स्वरितत्वम्। तृतीयस्य स्वरितात् परत्वात् प्रचयस्वरः। हरिवः। हृ-धातोरिन्प्रत्यये हरिः। ततो मतुपि सम्बोधने प्रथमैकवचने रूपं रुत्वादिना। तत्र धातोः स्वरस्य प्रत्ययस्वरेण तस्य नित्स्वरेण निवृत्तावाद्युदात्तो हरिशब्दः। ततो मतुपोऽपि पित्त्वादनुदात्तत्वेनाद्युदात्तो हरिवाञ्छब्दः प्राप्तः परन्तु तस्यामन्त्रितत्वेनाष्टमिकेन "आमन्त्रितस्यच" इत्यनेन सर्वानुदात्तत्वम्। तस्य संहितायां स्वरितात्परत्वात् प्रचयः। सुते। सुधातोः क्ते धातुस्वरस्य प्रत्ययस्वरेण निवृत्तौ सुतशब्दोऽन्तोदात्तः। ततः सप्तम्येकवचने तस्य सुप्त्वादनुदात्तत्वेऽपि सुतशब्दीयोदात्तान्त्याक्षरेणैकादेशे एकादेशस्यैकादेश उदात्तेनोदात्त इति उदात्तत्वम्। दधिष्व। दधातेर्लोटि थास्, तस्य से, तस्य "सवाभ्याम्" इति वकारदेशे छान्दसत्वात् सार्वधातुकार्धधातुकेत्युभय-सञ्ज्ञावत्त्वेन सार्वधातुकत्वाद् धातोः शप् तस्य श्लुर्द्वित्वादि च। आर्धधातुकत्वादिड़ागमे रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ तस्यापि "अभ्यस्तानामादिः" इत्यभ्यस्तस्वरेण बाधे आद्युदात्तः शब्दः प्राप्तः परन्तु "तिङ्ङतिङ" इति सर्वानुदात्तो भवति। तस्योदात्तात् परत्वादाद्यस्य स्वरितत्वम्। द्वितीयस्य तृतीयस्य च स्वरयोः प्रचयः। नः। "अनुदात्तं सर्वमपादादौ" इत्यधिकारस्थेन 'बहुवचनस्य वस्नसौ' इत्यनेनानुदात्तो नसादेशोऽस्मच्छब्दस्य षष्ठीबहुवचनान्तस्य स्थाने। तस्य चनःशब्दीयोदात्तस्य परत्वमित्यनुदात्ततरत्वं

स्क०—हे इन्द्र आयाहि तूतुजानः क्षिप्रं त्वरमाण इत्यर्थः। उप ब्रह्माणि हे हरिवः। हरी अश्वौ तद्वन्। आगत्य च सुते। द्वितीयार्थे सप्तम्येषा। सुतमभिषुतं दधिष्व धारय स्वोदरे। पिबेत्यर्थः। नोऽस्माकं स्वभूतं चनः सोमलक्षणमन्नम्॥ ६॥

इति प्रथमस्य प्रथमे पञ्चमो वर्गः।

वे०—इन्द्रोपागच्छ त्वरमाणः स्तोत्राणि गमनसाधनभूताश्ववन्। आगत्य चास्मिन्सुते सोमेऽस्मभ्यमन्नं देहि॥ ६॥

॥ इति प्रथमस्य प्रथमे पञ्चमो वर्गः॥

संहितायाम्। चनः। चायृधातोरन्नेऽसुन् ह्रस्वश्च। तत्र धातोः स्वरस्य प्रत्ययस्वरेण तस्यापि नितस्वरेण निवृत्तावाद्युदात्तश्चनःशब्दः। शेषनिघातेनान्तस्यानुदात्तस्योदात्तात् परत्वात् स्वरितः॥

(१) निघण्टौ कानिचन वाक्यानि प्रपठ्योच्यते "दशादिष्टोपयोजनानि" इति। तत्र आदिष्टमादेशः आज्ञा। तेनादिष्टेनोपयोजनमुपयोगो येषां तानि। आज्ञयैवोपयोगार्हाणि निमित्तं विनैवमेव प्रयोज्यानीत्यर्थः। एवं सति अन्वयवाक्यीयपदानां परस्परसाहित्यमर्थद्वारेणेति भवति। तानि च वाक्यानि—हरी इन्द्रस्य, रोहितोऽग्नेः, हरित आदित्यस्य, रासभावश्विनोः, अजाः पूष्णः, पृषत्यो मरुताम्, अरुण्यो गाव उषसाम्, श्यावाः सवितुः, विश्वरूपा बृहस्पतेः, नियुतो वायोरिति। अत्राजादिकतिपयशब्दानां प्राणि वाचकत्वेन प्रसिद्ध्या हर्यादि-शब्दानां तद्वाचकत्वस्यापि सम्भवेन अत्र हर्यादिशब्दैरिन्द्रादीनामश्वा बोध्यन्ते इति व्याख्यातारो व्याचक्षते। एवं सति अजगोरासभादिशब्दानामश्वेतरार्थेषु प्रसिद्धानामपि अत्र वैदिकप्रसिद्ध्या तत्तद्देवताश्वबोधकत्वम्। एवं चैतेषां शब्दानामश्वबोधकतयाऽश्वानां वाहनत्वेन प्रसिद्ध्या तत्सविधवर्तीन्द्रादिपदानां वाहनिबोधकत्वेनोपपत्त्या फलत इन्द्राद्यश्वबोधकत्वमेव हर्यादिशब्दानामिति पर्यवस्यति। तत्र केचन शब्दा उक्तवाक्यदशके बहुवचनान्ता उच्यन्ते केचनशब्दाश्च द्विवचनान्ताः। तत्राचाश्वबोधकत्वे प्रायो रथेऽश्वद्वयस्यैवापेक्षणेन बहुवचनान्तस्य वचनं अभिप्रायविशेषकल्पकम्। अधिकाश्वयोगस्यापि प्रसिद्ध्या तु द्विवचनान्तस्य न सम्यक् स्वारस्यमिति प्राप्तौ अत्र संख्याविशेषनिर्देशोऽविवक्षित इति मन्तव्यं वेदे प्रयोगानुरोधात्। हरी इन्द्रस्येत्यनेन द्विवचनान्तत्वेन हरिशब्दस्य ग्रहणेऽपि वैदिकोदाहरणेषु इन्द्रसम्बन्धितया बहुवचनान्तत्वेनापि प्रयोगो दृश्यते "आयाहीन्द्र हरिभिः" आयाहीन्द्र हरिभिरित्यादौ। एवं रासभावश्विनोरित्यत्र रासभशब्दस्य द्विवचनान्तत्वेन वचनेऽपि प्रयोगेषु एकवचनान्तत्वेनापि दर्शनम् "कदा योगो वाजिनो रासभस्य" इत्यादौ। तस्मादत्र संख्यानिर्देशोऽविवक्षित इति केचन। परंतु अत्र संख्यानिर्देशस्य विवक्षितार्थत्वमेव प्रयोगेषु विभिन्नसंख्याबोधकवचननिर्देशस्य वैदिकत्वेनोपपादनं कर्तव्यम्। अतएव हरिदादिशब्दानां बहुवचनान्तत्वेनैव प्रयोगः सर्वत्र वेदे। बाहुल्यानुरोधेन संख्याया विवक्षितत्वे कतिपयविरुद्धवचनवत्स्थलेष्वेव वैदिकत्वेन अर्थान्तराभिप्रायकत्वं न्याय्यम् इति। संख्याविवक्षणे चेन्द्रस्य द्वावेव हरी भवतः। तौ चाश्वाविति पूर्वोक्तरीत्या वचने "ऋक्सामे वा इन्द्रस्य हरी" इत्यादिवैदिकव्यवहारस्याञ्जस्ये-नोपपत्त्यभावः। तस्मादुक्तविधशब्दानां लक्षणयाऽपरार्थबोधकत्वमिति। वस्तुतस्तु हर्यादिशब्दानां किरणार्थ-त्वमेवानुक्रमणिकाकारपक्षे। अतएव निरुक्तकारस्य देवताया आत्मैव वाहनमात्मैवायुधमात्मैव सर्वमिति वर्णनमुपपद्यते। सूर्यस्यैवैकस्यर्ग्वेददेवत्वेन वर्णने हर्यादयोऽपि तदभिन्नकिरणात्मका एव वक्तव्या भवन्ति। अतएवेन्द्रं मित्रमिति मन्त्रार्थस्याप्युपपन्नत्वम्। किरणेषु तु बहुविधसंख्यानिर्देशस्याभिप्रायविशेषेण सम्भव-दुक्तिकेनेति। प्रपञ्चयिष्यतेऽयमर्थोऽवसरान्तरे इति दिगिति।

वैश्वदेवतृचे प्रथमामृचमाह—

ओमा॑सश्चर्षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त ।
दा॒श्वांसो॑ दा॒शुषः॑ सु॒तम् ॥७॥

ओमा॑सः । च॒र्ष॒णि॒ऽधृ॒तः॒ । विश्वे॑ । दे॒वा॒सः॒ । आ । ग॒त॒ ।
दा॒श्वांसः॑ । दा॒शुषः॑ । सु॒तम् ॥७॥

हे विश्वे देवासः—एतन्नामका देवविशेषाः[१] । दाशुषो—हविर्दत्तवतो यजमानस्य सुतम्—अभिषुतं सोमं प्रति आगत आगच्छत। ते च देवा ओमासो—रक्षकाः। चर्षणीधृतो—मनुष्याणां धारकाः। दाश्वांसः—फलस्य दातारः ॥

मनुष्या इत्यादिषु पञ्चविंशतिसंख्याकेषु मनुष्यनामसु चर्षणिशब्दः पठितः। अश्विनावित्यादिष्वेकत्रिंशत्संख्याकेषु देवविशेषनामसु "विश्वेदेवाः, साध्याः" इति पठितम्। एतामृचं यास्क एवं व्याख्यातवान्—"अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा

(१) वेदे केचन देवाः प्रत्येकमितरसाहित्येन वा स्वशब्देन स्तूयन्ते, यथा इन्द्रः, अग्निः, मित्रः, वरुणः, सूर्यः, इत्यादयः प्रत्येकं स्तूयन्ते, इतरसाहित्येन यथा इन्द्राग्नी, मित्रावरुणौ, इन्द्रासोमौ, द्यावापृथिव्यौप्रभृतयः। केचन समुदायरूपेणैव स्तूयन्ते यथाः साध्याः, मरुतः, आदित्याः इत्यादयः, तद्वद्विश्वेदेवा अपि सङ्घश एव स्तूयन्ते। तत्र सङ्घविशेषो यथा मरुच्छब्देनोच्यते एवं सङ्घविशेषस्य विश्वशब्दाभिधेयत्वम्। एवं च विश्वशब्दस्तत्सङ्घस्य वाचक इति तात्पर्यार्थः। तादृशानां विश्वेषां देवानां स्तुतौ, वैदिककर्मसु चोपयोगे विश्वशब्दोपेतसूक्तानामेवानुगुण्यम्, परन्तु विश्वेषां देवानां गायत्रच्छन्दोयुतमन्त्रैः स्तवापेक्षणे दाशतय्यामेकमेव सूक्तं वैश्वदेवं वर्तते। तदधिकसूक्तापेक्षणेच कर्मसु कथं व्यवस्थेति निरुक्तकारेणेमं पक्षमुत्थाप्योक्तं यदि तादृशसूक्तस्यापेक्षा तदानीं बहुदेवतोपेतं सूक्तं वैश्वदेवत्वेनोपयोजनीयम्। एवं च विश्वदेवशब्दे विश्वशब्दो बह्वर्थको देवताविशेषणम् इति तदर्थः। शाकपूणिस्त्वाचार्य उक्तस्थले विश्वशब्दोपेतस्यैव सूक्तस्य विनियोग इत्यभिप्रैति। तन्मते विश्वशब्दः पूर्वोक्तरीत्या देवानां नामेति। तदुक्तं निरुक्ते "तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दाशतयीषु विद्यते यत्तु किञ्चिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमितिशाकपूणिः" इति। तत्र बहुदेवतत्वपक्षे च नैतावन्त एव इम एव देवा इति नियमः किन्तु ये यत्र यावन्तो वोच्यन्ते ते सर्वे ऽविशेषवचने विश्वदेवशब्दबोध्या भवन्ति। विश्वशब्दो हि तदानीं सर्वशब्दपर्यायः। सर्वशब्दस्य यथा कात्स्न्र्यबोधकत्वमेवं प्रकृताशेषबोधकत्वमिति सर्वसम्मतम्। तत्र प्रकृताशेषबोधकत्वे ये यत्र प्रकृतास्ते सर्वे यथा सर्वशब्देन बोध्यन्ते एवं तत्समानार्थेन विश्वशब्देनापीति नात्र पक्षे उक्तविधनियमसम्भव इति दिक्।

इहागच्छत दत्तवन्तो दत्तवतः सुतमिति, तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति शाकपूणिः" (नि १२ ४०) इति। अत्र विश्वशब्दः सर्वशब्दपर्याय इति यास्कस्य मतम्। देवविशेषस्यैवासाधारणं लिङ्गमिति शाकपूणेर्मतम्। अवन्तीत्योमासो देवाः। मन्नित्यनुवृत्तौ "अविसिविसिशुषिभ्यः कित्" (उ १।१४३) इति मन्प्रत्ययः। "ज्वरत्वरस्रिव्यविमवामुपधायाश्च" (पा. ६।४।२०) इत्यूठ्। मनः कित्त्वेऽपि बाहुलकत्वाद् गुणः। "आज्जसेरसुक्" (पा. ७।१।५०) इति जसेरसुगागमः। आमन्त्रिताद्युदात्तत्वम्। चर्षणयो मनुष्याः। तान्वृष्टिदानादिना धारयन्तीति चर्षणीधृतो देवाः। पूर्वस्यामन्त्रितस्य सामान्यवचनस्य "विभाषितं विशेषवचने बहुवचनम्" (पा. ८।१।७४) इत्यविद्यमानवत्त्वप्रतिषेधादपादादित्वेन निघातः। नन्वत एव विद्यमानवत्त्वात् "सुबामन्त्रित" इति (पा. २।१।२) पराङ्गवत्त्वेनैकपदीभावात्पदादपरत्वेन कथं निघात इति चेत्। न। "वत्करणं स्वाश्रयमपि यथा स्याद्" इति (म. ८।१।७२) वचनात्पदभेदप्रयुक्तस्य निघातस्याप्युपपत्तेः। ऐकपद्येऽप्याद्युदात्तत्वे "अनुदात्तं पदमेकवर्जम्" इति (पा. ६।१।१५७) सुतरामेव निघातो भविष्यति। इत्थमेव तर्हि "द्रवत्पाणी शुभस्पती" इत्यत्रापि पराङ्गवत्त्वेनैकपद्यादुत्तरस्य शेषनिघातप्रसङ्ग इति चेत्। न। तत्र पराङ्गवद्भावस्य परेण "आमन्त्रितं पूर्वमविद्यमानवद्" (पा ८।१।७८) इत्यविद्यमानवद्भावेन बाधितत्वात्। इह पुनर् "विभाषितं विशेषवचने बहुवचनम्" (पा. ८।१।७४) इत्यविद्यमानवत्त्वस्य निषेधात् पूर्वस्याप्यामन्त्रितस्य विद्यमानवत्त्वात्पराङ्गवत्त्वं स्वीकृतमिति वैषम्यम्। विश्वे। पादादित्वादाद्युदात्तः। गणदेवतावचनश्चात्र विश्वशब्दो न सर्वशब्दपर्याय इति विशेष्यपरतया सामान्यवचनत्वादोमास इत्यनेन न सामानाधिकरण्यम्। सामानाधिकरण्ये हि पूर्वस्य पादस्य पराङ्गवद्भावे सति "मित्रावरुणावृतावृधौ" इत्यादाविवात्राप्यामन्त्रिताद्युदात्तता न स्यात्। विश्व इत्यस्य विशेषणं देवास इति। दीव्यन्तीति देवाः प्रकाशवन्तः। ननु[२] "अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी" इति (परि. ९८) रूढ्

---

(२) देवशब्दस्य समुदायप्रसिद्ध्या देवताबोधकत्वम्, अवयवप्रसिद्ध्या प्रकाशनवन्त इत्यर्थः, तत्रावयवार्थो वा ग्राह्यः ? समुदायार्थो वेति सन्देहे मीमांसकै रथकाराधिकरणे विचारितम्—"वर्षासु रथकारोऽग्नीनादधीत" इत्यत्र रथकारशब्देन रथं करोतीति व्युत्पत्त्या रथकर्तृत्रैवर्णिकग्रहणमुत समुदायप्रसिद्ध्या सौधन्वनापरपर्यायजातिविशेषस्य ग्रहणमिति सन्दिह्य पूर्वपक्षितम् अत्र योगार्थानुसारेण त्रैवर्णिकानामेव ग्रहणमुचितम्, प्रमाणान्तरानुग्रहात्, "विद्वानेव यजेत विद्वानेव याजयेत्" इत्यनेन हि विदुष एव कर्मकरणेऽधिकारो बोध्यते,

एवार्थो देवशब्दस्य ग्राह्यो न यौगिकः। यौगिकत्वे ह्यवयवार्थानुसन्धानव्यवधानेन प्रतिपत्तिर्विक्षिप्ता स्यात्। समुदायप्रसिद्धौ तु न विक्षेप इति चेत्। न। समुदायप्रसिद्धौ हि देवशब्दस्य सामान्यपरतया विशेष-वचनत्वाभावात् "विभाषितं विशेषवचने बहुवचनम्" (पा ८।१।७४) इत्यनेनानिषिद्धत्वाद्विश्वे इत्यस्याविद्यमानत्वेन शुभस्पती इति पदवद्देवा इत्यस्याप्याद्युदात्तत्वं स्यात्। स्वरानुसारेण च रूढित्यागेनापि देवशब्दस्य योगस्वीकारो युक्त एव। आगत। आगच्छत। "बहुलं छन्दसि" इति (पा २।४।७३) शपो लुकि सति "अनुदात्तोपदेश"(पा ६।४।३७) इत्यादिना मकारलोपः। आङः पदात्परत्वान्निघातः। दाश्वांसः। "दाशृ दाने" इत्यस्य क्वसौ "दाश्वान् साह्वान् मीढ्वांश्च" (पा ६।१।१२) इति निपातनात्क्रादिनियमप्राप्त इडागमो द्विर्वचनं च न भवति। प्रत्ययस्वरेण क्वसोरुदात्तत्वम्। दाशुष इत्यत्र "वसोः सम्प्रसारणम्" (पा ६।४।१३१) इति सम्प्रसारणम्। "सम्प्रसारणाच्च" (पा ६।१।१०८) इति पूर्वरूपत्वम्। "आदेशप्रत्यययोः" (पा ८।३।५७) इति षत्वम् ॥ ७ ॥[३]*

स च प्रकृतस्थले योगमर्यादया त्रैवर्णिकग्रहणेऽबाधितो भवति, रूढ्यनुसरणे च रथकारशब्दितस्य जातिविशेषवतो ग्रहणे तस्य विद्याभावेन "विद्वानेव" इति शास्त्रबाधप्रसङ्गः स्यादिति। ततः सिद्धान्तितम्--अत्र रूढ्यर्थानुसरणमेव युक्तम् रूढेः समुदायशक्तिरूपत्वेनैकमात्रशक्तिपर्यालोचनेन सौधन्वनापरपर्यायजातिविशेषस्य झटित्युपस्थितिः, योगाश्रयणे तस्यावयवशक्तिरूपत्वेनात्रावयवानामनेकत्वेन तावतीनां शक्तीनां पर्यालोचनसहकारेणोपतिष्ठतोऽर्थस्य विलम्बितत्वात्पूर्वोपस्थितार्थेनैव वाक्यार्थस्य सिद्धत्वाद् नास्याश्रयणमिति। न च "विद्वानेव" इति शास्त्रस्य तथा सति बाधो रूढ्याश्रयणे, योगाश्रयणे तु नेति वाच्यम्। वाक्यार्थबोधे पदतदर्थमात्राश्रयणेन शास्त्रान्तरस्यानपेक्षितत्वात्। सिद्धे वाक्यार्थबोधाच्छास्त्रत्वे तेनापरशास्त्रविरोधे न्यायान्तरमनुसर्तव्यम्, नैतावता शास्त्रमशास्त्रं स्यादिति। तेन न्यायेन प्रकृतेऽपि झटित्यर्थोपस्थापकतया रूढ्यर्थाश्रयणमेव युक्तं न योगार्थाश्रयणम्। एतन्मूलकस्य लौकिकस्य "रूढिर्योगमपहरति" इति न्यायस्य तथाप्यनुरोधः स्यात् इति न वाच्यम्। तथा सति देवशब्दस्य विशेष्यपरतया विशेषणत्वाभावेन "विभाषितं विशेषवचने" इति शास्त्रस्याप्रवृत्त्या अभीष्टः स्वरो न सिद्ध्येत्। एवं च बलवत्तरसंहितागतस्वरेणात्र "रूढिर्योगम्" इति न्यायस्य परित्यागः प्रकृते। एवं च विलम्बं सोढ्वाऽपि योगार्थाश्रयणम्। बलवत्तराश्रयणेन दुर्बलस्यापि बलवत्कार्यकारितेति लौकिकन्यायसिद्धम्। तदुक्तमापदेव्याम्-अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः। दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः॥ इति। तदेतदाहात्र भाष्यकारो नन्वित्यादिना।

(३) ओमासः। अवतेर्धातोः "अविसिविसिशुषिभ्यः कित्" इत्यौणादिकसूत्रेण मनि प्रत्यये ततो जसि प्रथमाबहुवचनेऽसुगागमे च रूपम्। तत्रावतेर्धातोः "धातोः" इति अन्तोदात्तस्य "आद्युदात्तश्च" इति प्रत्ययस्वरेण बाधे प्राप्ते तस्याप्यपवादकेन मन्प्रत्ययगतनित्त्वनिमित्तेन "ञ्नित्यादिर्नित्यम्" इत्यनेन मन्नन्तस्यादिरुदात्तः, तथा चौमशब्दे ओकार उदात्तः शेषनिघातेन मकाराकारस्यानुदात्तत्वम्। ततो जसः सुप्त्वाद् "अनुदात्तौ

स्क०—हे ओमासः। अवितारो रक्षितारस्तर्पयितारो वा। चर्षणीधृतः। चर्षणयो मनुष्यास्तेषां तैस्तैरुपकारैर्धारयितारः विश्वे सर्वे देवासो देवा आगत आगच्छत। दाश्वांसः।

सुप्पितौ" इति विशेषविहितेन सूत्रेणानुदात्तत्वे आगमस्यासुकोऽपि "आगमा अनुदात्ताः" इत्यनुदात्तत्वेऽनुदात्तेन मनूप्रत्ययीयमकाराकारेण असुगागमाकारस्य सवर्णदीर्घैकादेशे एकादेशनिष्पन्नस्य दीर्घाकारस्य स्थानिवत्त्वेनानुदात्तत्वमिति ओमासःशब्दे ओकार उदात्तो मकाराकारोऽनुदात्तः सन् पदावयवसंहितादशायामोकारादुदात्तात् पर इति कृत्वा स्वरितत्वं गतः। सकाराकारस्यतु पूर्ववर्तिस्वरिताकारात्परत्वेन प्रचयः स्वरः। अस्य शब्दस्य प्रथमाबहुवचनान्ततया यः स्वरः स एव संबोधनार्थकत्वेऽप्यवतिष्ठते। संबोधनेऽपि प्रथमाया एव विधानात्। संबोधनविभक्त्यन्तत्वनिबन्धनोऽपि "आमन्त्रितस्य च" इति पाष्ठिकसूत्रेण संपाद्यः स्वरोऽपि प्रकृते पूर्वसिद्धस्वरात्मक एवेति संबोधनान्तत्वेऽपि आद्युदात्तमेव पदम्। चर्षणीधृतः। चरतेर्धातोः 'अर्तिसृधृधम्यश्यवितृभ्योऽनिः' इत्यनिप्रत्ययस्य बहुवचनादत्रापि प्रवृत्तौ पुगागमे च बाहुलकाच्चर्षणिशब्दः। चरणवन्तश्चरणशीलाश्चर्षणय इति तदर्थः। अथवा "कृषेरादेश्च चः" इति सूत्रेण कृषेरनिप्रत्यये आदेश्चकारादेशे चर्षणिशब्दः। आकर्षन्ति वशीकुर्वन्ति इति चर्षणय इति भास्करमिश्राभिमतम्। यद्वा चर्षणयश्चायितारो द्रष्टारः सर्वेषां पदार्थानाम् इति चायृधातोर्बाहुलकादनिप्रत्यये पुगागमे धात्वन्तस्य रेफादेशे आकारस्य ह्रस्वे च रूपमिति स्कन्दस्वामिनोऽभिमतम् इति देवराजयज्वप्रदर्शिता व्युत्पत्तिः। वस्तुतस्तु चरधातोः सनधातोश्चोक्तशब्दसिद्धिः। चरधातोः क्विप्, पण्धातोरिन्, रेफस्य बाहुलकादहरादिगणे परिगणनाद्वा विसर्गाभावो विसर्गस्य रेफो वा। व्यवस्थितविभाषाश्रयणेन रेफविशिष्टमेव रूपम्। भाष्योक्तातिरिक्तव्यवस्थितविभाषानाश्रयणे तु बाहुलकादेवात्र विसर्गाभावः। पणधातोश्च हर्यादिवदिनि प्रत्यये समासे चर्षणिशब्दः। चरन्ति संचरन्ति सनन्ति ददतीति चर्षणयः। सञ्चरणशीला दातारश्चेति तदर्थः। अस्मिन् कल्पे पदपाठे विग्रहाभावस्तु सन्देहादिति ज्ञेयम्। तत्र पूर्वेषु कल्पेषु धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ अनिप्रत्ययाकारस्योदात्तत्वेन चर्षणिशब्दो मध्योदात्तः प्राप्तः, परन्तु घृतादिपाठकल्पनयाऽत्रान्तोदात्तत्वं बोध्यम्। अन्तिमे कल्पेतु चरधातोः क्विपि धातुस्वरेण चर्शब्दोऽन्तोदात्तः, पणधातोर्धातुस्वरस्य प्रत्ययस्वरेण तस्यापि नित्स्वरेण निवृत्तौ सनिशब्दआद्युदात्तः। ततश्चर्सनिशब्दयोः समासे समासान्तोदात्तत्वेन चर्षणिशब्दोऽन्तोदात्तः। शेषनिघातेनाद्ययोरचोरनुदात्तत्वम्। ततस्तदुपपदाद् धृधातोः क्विपि तदन्ताज्जसि चर्षणीधृतः। तत्र धृधातोः स्वरः समासेऽपि समासत्वेनावशिष्यत इति चर्षणीधृतशब्दोऽन्तोदात्तः। जसः सुप्त्वादनुदात्तत्वेन पदावयवसंहितादशायां तस्योदात्तात्परत्वात्स्वरित इति स्वराः प्राप्ता आसन्, परंतु एतस्य शब्दस्य सम्बोधनविभक्त्यन्तत्वेनामन्त्रितत्वादाष्टमिकेन "आमन्त्रितस्य च" इति निघाते सर्वानुदात्तत्वं पदपाठे, संहितायांतु स्वरितात्परत्वात्प्रचय आदितश्चतुर्णां पञ्चमस्य तु विश्वेशब्दीय उदात्तः पर इति सन्नतरत्वम्। विश्वे। विशेर्धातोः "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्" इत्यौणादिकेन सूत्रेण क्वन्प्रत्यये तदन्ताज्जसि जसः श्यादेशे गुणे रूपम्। तत्र 'धातोः" इत्यन्तोदात्तत्वस्य "आद्युदात्तश्च" इत्यनेन प्रत्ययस्वरेण निवृत्तौ तस्यापि नित्स्वरेण निवृत्त्या निन्निमित्तको विश्वशब्दस्यादिरत्र उदात्तः शेषनिघातेन श्वशब्दाकारोऽनुदात्तः, ततो जातस्य जसः प्रत्ययस्य सुप्त्वादनुदात्तत्वेन तत्स्थानिकश्यादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। ततो विश्वशब्दीयश्वाकारमनुदात्तमनुदात्तं च श्यादेशेकारं गृहीत्वा जातस्यैकादेशैकारस्य स्थानिवत्त्वेनानुदात्तत्वम्। तस्य विशब्देकारादुदात्तात्परत्वेन स्वरितत्वम्। अस्य विश्वेशब्दस्य संबोधनविभक्त्यन्तत्वेन पाष्ठिकेन "आमन्त्रितस्य च" इत्यनेन पूर्वस्थितस्याद्युदात्तस्यैव संमोदनं

प्रत्यक्षकृतोऽयं मन्त्रः, नचेदममान्वितम्। अतो यत्तच्छब्दावध्याहृत्यैकवाक्यता करणीया। ये दाश्वांसो दत्तवन्तो यजमानाय धनानि ते अप्रतिहतदानशक्तयः, दाशुषो हवींषि दत्तवतो यजमानस्य सुतं सोमं प्रति ॥ ७ ॥

वे०—ओमासः, अवितारो मनुष्यधृतः सर्वे देवा इहागच्छत दानशीला दाशुषः सुतम् ॥ ७ ॥

सतिशिष्टत्वेन। पादादित्वादाष्टमिकनिघाताभावः। देवासः। देवशब्दः पचाद्यजन्तः। तस्माज्जसि असुगागमे रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तत्वाऽन्तोदात्तत्वं तत्रैव चित्स्वरोऽप्यत्रानुमन्यते। जसः सुप्त्वेनानुदात्तत्वेनासुगागमस्याप्यनुदात्तत्वेन तेन सह देवशब्दीयान्त्याकारस्य सवर्णदीर्घैकादेशे तस्योदात्तानुदात्तोभयस्थानिकतयोदात्तत्वेन मध्योदात्तं देवासःपदं प्राप्तं परंतु तस्य संबोधनविभक्त्यन्तत्वेनामन्त्रितत्वेन विश्वेशब्दात्परत्वेन आष्टमिकेन "आमन्त्रितस्यच" इति सूत्रेण सर्वनिघाते तस्य स्वरितात्परत्वेन प्रचय आद्ययोः, अन्त्यस्यतु आकाररूपोदात्तपरत्वेन सन्नतरत्वम्। आ। निपातत्वादाद्युदात्तो "निपाता आद्युदात्ताः" इति सूत्रेण। गत। गमधातोर्लोटि मध्यमपुरुषबहुवचने प्रत्यये तस्य तादेशे मध्ये शपि बाहुलकात्तस्य लुकि धातोरन्त्यमकारस्य "अनुदात्तोपदेशवनतितनोत्यादीनाम्" इति सूत्रेण लोपे गतेतिपदम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ गतशब्दोऽन्तोदात्तः प्राप्तः परन्त्वत्र पदात्परत्वात्—"तिङ्ङतिङः" इत्यनेन सर्वानुदात्तत्वम्। तस्य च उदात्तात्परत्वात्स्वरितत्वमाद्यस्य गकाराकारस्यान्त्यस्य तु स्वरितात्परत्वात्प्रचयः स्वरः। दाश्वांसः। दाशृ दाने इत्यस्माल्लिटि तस्य क्वसौ द्वित्वादिप्राप्तौ तदभावादिकं "दाश्वान्साह्वान्मीढ्वांश्च" इति सूत्रे निपातनात्। तत्र धातुस्वरं बाधित्वा प्रत्ययस्वरस्तेनान्तोदात्तत्वम्। ततो जसि नुमि दीर्घे दाश्वांस इत्यत्र दीर्घस्योदात्तस्थानिकत्वेन स्थानिवद्भावादुदात्तत्वम्, जसस्त्वनुदात्तत्वं तस्योदात्तात्परत्वात्प्रचयः स्वरः। संहितादशायां तु दाशुषःपदीयदकारपरत्वेन दाश्वांसःशब्दीयविसर्गस्थानिकसस्य रुत्वे उत्वे गुणे दाश्वांसो इति रूपे उकारस्य व्यञ्जनस्थानिकतया "व्यञ्जनमनुदात्तम्" इति अनुदात्तत्वम्, गुणस्यापि ओकारस्यानुदात्तद्वयस्थानिकत्वेनानुदात्तत्वं स्थानिवत्त्वात्। दाशुषः। अत्र पूर्वोक्तदाश्वस्शब्दात् षष्ठ्येकवचने ङसोः प्रत्ययस्य संप्रसारणे परपूर्वत्वे रूपम्। तत्र दाश्वस्शब्दीयवकारस्थानिकसंप्रसारणोकारस्य व्यञ्जनस्थानिकतयाऽनुदात्तत्वम्। परस्याकारस्य संप्रसारणोकारेण पूर्वरूपैकादेशे एकादेशस्यानुदात्तोकारोदात्ताकारस्थानिकत्वेन "एकादेश उदात्तेनोदात्त" इत्यनेनोदात्तत्वम्। एवं सति दाकार उदात्त उकारोऽनुदात्तोऽन्तिमोऽनुदात्तः सन्नुदात्तात्परत्वात्स्वरितः। सुतम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्त्याऽन्तोदात्तं पदम्। ततोऽमि तस्य सुप्त्वेन अनुदात्तत्वे तकाराकारेणोदात्तेन सह पूर्वरूपैकादेशे 'एकादेश उदात्तेन" इत्यादेश उदात्त इतिसुतंशब्दे-आदिरुदात्तोऽन्त्योऽनुदात्तः ॥

* शब्दाः प्रयुज्यमाना अर्थबोधनायैव प्रयुज्यन्त इति निर्विवादम्। अर्थश्च लोके वाक्येनैव बोध्यते। तत्र न पदविभागज्ञानापेक्षा। असत्यपि पदज्ञाने वाक्यतो वाक्यार्थविज्ञानस्य वृद्धव्यवहारे प्राथमिकशाब्दव्यवहारावसरे दृष्टत्वात्। अतएव वैयाकरणा अखण्डमेव वाक्यस्फोटं वाक्यार्थवाचकमिति प्रतियन्ति। अतएव तैरुच्यते—पदे न वर्णा विद्यन्ते वाक्येष्ववयवा नचेति। अतएव विष्णोऽव इति वाक्येऽसत्यपि पदविभागज्ञाने ततोऽर्थावबोधो निराबाधो भवति। तत्र वाक्यस्य मुख्ये बोधकत्वेऽपि शब्दीयव्यवहारस्य शक्तिज्ञानपूर्वकत्वापेक्षणात्, शक्तेश्च वाक्यगताया विज्ञानोपायत्वेन लाघवार्थं पदतदवयवतदर्थसंकेतादिकं कल्पितवन्तः पूर्वाचार्याः। एवं च पदतदवयवादीनां कल्पितत्वेन केनचन काचन केनचन काचनेति कल्पनाविभेदपुरस्सरं वाक्यार्थ-

द्वितीयामृचमाह—

विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तमा ग॑न्त॒ तूर्ण॑यः ।
उ॒स्रा इ॑व॒ स्वस॑राणि ॥८॥

विश्वे॑ । दे॒वासः॑ । अ॒प्ऽतुरः॑ । सु॒तम् । आ । ग॒न्त॒ । तूर्ण॑यः ।
उ॒स्राःऽइ॑व । स्वस॑राणि ॥८॥

विज्ञानाय यत्न आस्थीयते। अतएव शब्दनिर्वचने स्थौलाष्ठीवेराचार्यस्य अक्षरसाम्यान्निर्वचनम्, शाकपूणेराचार्यस्य तु वर्णसाम्यान्निर्वचनं प्रवर्त्तते। पदतदवयवादीनां कल्पनाया अव्यवस्थितत्वेऽपि यदर्थमयमुद्यमस्तस्य वास्तवत्वेनाकल्पितत्वेनैकरूप्यं सर्वत्र। अतएवोक्तं भर्तृहरिणा-उपायाः शिक्ष्यमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥ इति। स्थौलाष्ठीव्यादिभिरिव पाणिनिनाऽपि पदावयवादिकल्पनाद्वारा प्रयासः समास्थितः। सचापरापेक्षया व्यवस्थित इति सर्वैः शिष्टैः समादरणं प्रायेण। तदनुसारेण भाष्ये व्याख्यानावसरे भाष्यकृता सर्वत्र पाणिन्यनुसारेणैव पदानां निर्वचनं स्वरादिकं व्यवस्थाप्यते। एषाऽपि निर्वचनार्थमुपादीयमाना कल्पनैवेति माधवभट्टैर्वेङ्कटार्य्यतनुजैः पदानां स्वरप्रयोजनादिनिर्णयावसरे कल्पनान्तरमाश्रितम्। तदुक्तं मन्यन्ते पण्डितास्त्वन्ये यथाव्याकरणं स्वरम्। व्यवस्थितो व्यवस्थायां हेतुस्त्वत्र न विद्यते। माधवस्य त्वयं पक्षः स्वरेणैव व्यवस्थितिः। इति। तत्र स्वरभेदानुसारेण तैस्तात्पर्यविशेष उपकल्पितः, यदि मन्त्रे तिङन्तपदस्योदात्तत्वं तर्हि तच्छ्रोतुरभिमुखीकाराभिप्रायकम्। अनुदात्तं चेन्न तथा। पाणिनिना पदात्परस्यापादादौ स्थितस्य तिङन्तपदस्यानुदात्तत्वमित्युच्यते, एतैरुच्यते पादादौ तिङन्तमुदात्तं कुतः? यतश्श्रोतुर्बोधनाभिप्रायः, वाक्ये संबोधनपदप्रयोगेणैवोन्मुखीकारे पुनस्तिङ उन्मुखीकरणमप्रयोजनमिति न वाच्यम्। सम्बोधितस्यापि पुनस्सम्बोधनमावश्यकोन्मुखीकारायेति। तदुक्तं तैः—

अथात्र कारणं ब्रूहि वाक्यादौ तिङुदात्तवत्॥ सर्वानुदात्तमन्यत्र नार्थभेदस्तु कश्चन॥ अर्थभेदादिति ब्रूमः श्रोतारमिह तिङ्पदम्॥ उदात्तवत्समाहन्ति स यथाभिमुखो भवेत्। उदात्तकारकपदैस्तत्र पूर्वं समाहते॥ पदं सर्वानुदात्तं स्यान्मध्येऽन्ते वाथ यद्भवेत्॥ अनुपादं विरम्यार्थमृपयः कथयन्त्यतः। पुनश्श्रोद्बोधनं कर्तुं पादादौ तिङुदात्तवत्। इति। तत्र सम्बोधनपदैर्नरः संबोधितोऽपि सन्। वाक्यार्थबोधनं कर्तुं पुनराहन्यते तिङा। इति च। तदनुसारेण सर्वत्र वाक्यगतस्य तिङ उदात्तस्य वाऽनुदात्तस्य वा दर्शनतोऽर्थविशेषो विचार्यः। एवमामन्त्रितपदानामपि केषाञ्चनाद्युदात्तत्वं सर्वानुदात्तत्वं वा भावान्तरनिबन्धनम्। यत्रामन्त्रितस्याप्युदात्तत्वं तत्रामन्त्रणस्योच्चैस्त्वमभिप्रेयम्। अनुदात्तत्वे नीचैरामन्त्रणं भवति। क्वचनैतस्य व्यभिचारोऽपि अर्थस्वभावानुरोधेन ज्ञेयः। तदुक्तं तैः-आमन्त्रिताद्युदात्तत्वमुच्चैरामन्त्रणे भवेत्॥ नीचैरामन्त्रणे कार्ये पदं सर्वं निहन्यते॥ अर्थस्वभावाद्वाक्यस्य मध्यस्थं तन्निहन्यते॥ इति। एवम्-अर्थस्वभावादुच्चैस्त्वं क्वचिन्मध्येऽपि दृश्यते। इति च। एवं समासस्थले पदानां स्वरव्यत्यासोऽभिप्रायविशेषाभिप्रायक एव। सर्वत्रायं दण्डको यत्स्वरवशेन तात्पर्यविशेषकल्पनेति। अतएव तैरुक्तम्-प्रकृतौ प्रत्यये वाऽपि स्वरो यत्र व्यवस्थितः॥ तात्पर्यं तत्र शब्दस्य स्थापयेदिति निर्णयः॥ इति तत्र तत्र ज्ञेयमिति।

विश्वे देवासः = एतन्नामकगणरूपा देवविशेषाः सुतम् = सोमम् आगन्त = आगच्छन्तु। कीदृशाः अप्तुरः। तत्तत्काले वृष्टिप्रदा इत्यर्थः। तूर्णयः = त्वरायुक्ताः। यजमानमनुग्रहीतुमालस्यरहिता इत्यर्थः। विश्वेषां देवानां सोमं प्रत्यागमन उस्रा इत्यादिर्दृष्टान्तः। उस्राः = सूर्यरश्मयः स्वसराणि = अहानि प्रत्यालस्यरहिता यथा समागच्छन्ति तद्वत्।

"खेदय" इत्यादिषु पञ्चदशसु रश्मिनामसु "उस्राः, वसवः" इति पठितम्। "वस्तोः" इत्यादिषु द्वादशस्वहर्नामसु "स्वसराणि, घ्रंसो, घर्मः" इति पठितम्। तच्च पदं यास्केन व्याख्यातम् "स्वसराण्यहानि भवन्ति स्वयंसारीण्यपि वा स्वरादित्यो भवति स एतानि सारयति। उस्रा इव स्वसराणीत्यपि निगमो भवति" इति (नि. ५।४)॥ देवासः। पचाद्यजन्तश्चित्त्वादन्तोदात्तः (पा ३।१।१३४)। अप्तुरः। तुर त्वरणे श्लुविकरणी। तुतुरति त्वरयन्तीत्यर्थे "क्विप् च" इति (पा ३।२।७६) क्विप्। "गतिकारकोपपदात्कृत्" (पा ६।२।१३९) इत्युत्तरपदप्रकृतिस्वरत्वम्। आगन्त। आगच्छन्त्वित्यर्थे व्यत्ययेन मध्यमपुरुषबहुवचनम्। "बहुलं छन्दसि" इति (पा ६।४।३७) शपो लुक्। तस्य "तप्तनप्तनथनाश्च" (पा ७।१।४५)। इति तबादेशे "अपित्" (पा १।२।४) इति प्रतिषेधादङित्त्वादनुनासिकलोपाभावः। "तिङ्ङतिङ" इति (पा. ८।१।२८) निघातः। "ञित्वरा संभ्रमे" इति धातोस्त्वरन्त इति तूर्णयः। निरित्यनुवृत्तौ "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" (उ. ४।५२) इति निप्रत्ययो नित्त्वादाद्युदात्तः। उस्रा इवेत्यत्र "इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति (पा. २।१।४।२) समासे पूर्वपदप्रकृतिस्वरत्वं नित्यम्। सरतीति सरः सूर्यः। पचाद्यच्। स्वः सरो येषां तानि स्वसराण्यहानि। "बहुव्रीहौ प्रकृत्या पूर्वपदम्" (पा. ६।२।१) इति स्वशब्द आद्युदात्तः॥ ७॥*

---

* विश्वे। विश्वशब्दोविशेर्धातो क्वन्प्रत्ययेन निष्पादितः। तत्र नित्स्वरेणाद्युदात्तत्वम्। ततो जसि श्यादेशे गुणे च विश्वे इति रूपम्। तत्र जसः सुप्त्वादनुदात्तत्वे तत्स्थानिकश्यादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वे गुणैकादेशस्यापि तथैवानुदात्तत्वम्। ततः पदे उदात्तात्परत्वात्स्वरितोऽन्त्यस्यैकारस्य। देवासः। देवशब्दो दिवेर्धातोः पचाद्यचा निष्पन्नः। तत्र प्रत्ययस्वरेण चित्स्वरेण वाऽन्तोदात्तत्वम्। ततो जस्यसुगागमे सुप्त्वेन जसोऽनुदात्तत्वमागमत्वे नासुकोऽनुदात्तत्वे असुगागमाकारस्य देवशब्दीयान्त्याकारेणोदात्तेन सवर्णदीर्घाकारैकादेशे तस्य उदात्तानुदात्तोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इति उदात्तत्वम्। एवं च प्रथमोऽनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्तोऽपि उदात्तात्पर इति स्वरितः। तस्य संहितायामसुरःशब्दीयाद्याकारे परतो जसः सकारस्य रुत्वे उत्वे ओकाररूपगुणैकादेशे पूर्वरूपाभावे "देवासो" इति रूपम्। तत्र उकारस्य व्यञ्जनस्थानिकत्वेनानुदात्तत्वम्। ओकारस्यापि पूर्ववर्त्तिसकाराकारपरवर्त्तिसकारस्थानिकोकार-

स्क०—विश्वे देवासः हे विश्वे देवाः। अप्तुरः। अपशब्द उदकवचनः। अन्तर्णीतण्यर्थस्य तरतेरप्तुरः। अपां तारयितारः। आदित्यं प्रति गमयितारः। रश्मयो हि नैरुक्तानां विश्वे देवाः। तेच रसानामादातारः। अथवा आप्लृ व्याप्तावित्येतस्य तृजन्तस्य षष्ठ्येकवचन एतद्रूपम्। स्तुतिभिश्च हविर्भिश्च देवानामाप्तुर्यजमानस्य स्वभूतं सोममागन्त। आगच्छन्तु। आगन्तेति वा मध्यमपुरुषश्रुतिसामर्थ्याद् विश्वे देवासः अप्तुर इत्येतौ व्यत्ययेनामन्त्रितप्रथमान्तौ व्याख्यातव्यौ।

रूपोभयानुदात्तस्थानिकतया स्थानिवत्त्वेनानुदात्तत्वे उदात्तात्परत्वात्तस्य प्रचयः। अप्तुरः। तत्र आप्धातोः "आप्नोतेर्ह्रस्वश्च" इत्यौणादिकेन क्विपि आकारस्य ह्रस्वे अबितिपदम्। तुरधातोः "क्विप्च" इति क्विपि तुरिति। ततोऽप्तुरशब्दयोः समासे ततो जसि अप्तुर इति रूपम्। तत्र अप्शब्दे धातोरित्युदात्त आप्धातोराकारस्य, तत्स्थानिकह्रस्वस्य तु स्थानिवद्भावात् उदात्तत्वम्। तुर्शब्देऽपि धात्वन्त उदात्तः। तत उभयोः समासे समासस्येत्यन्त्यस्योदात्तत्वे शेषनिघातेनादिरकारोऽनुदात्तः, तुकारस्तूदात्तः, अन्त्यस्तु जसकारोऽनुदात्तस्सुप्त्वात्। सुतम्। सुधातोः क्ते द्वितीयैकवचनेऽमि पूर्वरूपे रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण बाधात्प्रत्ययस्वरेणान्तोदात्तत्वम्, ततोऽमः सुप्त्वादनुदात्तत्वं तेन पूर्ववर्तितकाराकारस्य पूर्वरूपैकादेशे तन्निष्पन्नाकारस्योदात्तानुदात्तोभयस्थानिकतया एकादेश उदात्तेनोदात्त इत्युदात्तत्वम्। आ। निपातत्वादाद्युदात्तत्वम्। गन्त। गम्धातोर्लोटि व्यत्ययेन मध्यमपुरुषबहुवचने थप्रत्यये तस्य तकारादेशे मध्ये शपि बाहुलकात्तस्य लुकि ततो बहुवचनतकारस्य "तप्तनप्तनथनाश्च" इति सूत्रेण तादेशः। तस्य पित्त्वान्ङित्वाभावः। "सार्वधातुकमपिद्" इत्यनेन पितो ङित्त्वाभावस्योक्तेरङित्त्वेन "गम हन" इत्युपधालोपाभावे मकारस्यानुनासिके परसवर्णे गन्तेति रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां प्रत्ययस्यादेशेनापहरणसम्भावनया तन्निमित्तस्य स्वरस्य प्रथममप्रवृत्तौ तकारादेशेऽपि उक्तरीत्या स्थानिवत्त्वेन प्रत्ययस्वरस्याप्रवृत्तौ ततस्तबादेशे तस्य पित्त्वेनानुदात्तत्वेन प्रत्ययोदात्तत्वाप्रवृत्तौ धातुस्वरस्यैव शेषः। प्रथमं प्रत्ययस्वरस्यादेशेनापहरणसम्भावनायामपि प्रवृत्तौ तु स्थानिवत्त्वेन तकारादेशस्यापि उदात्तत्वे ततस्तपादेशे तस्य पित्त्वेन निर्देशात् स्थानिवद्भावप्राप्तस्योदात्तत्वस्याप्राप्रवृत्तौ धातोः स्वरस्य निवारकाभावेन तस्यैव शेषः एवं सति आद्युदात्तं पदं प्राप्तं परन्त्वत्र "तिङ्ङतिङः" इत्यनेन सर्वानुदात्तत्वम्। तत्र चोदात्तादाकारात्परत्वेन गकाराकारस्य स्वरितत्वं तकाराकारस्य तु परवर्तितूर्णयःशब्दावयवोदात्तपरकत्वेन सन्नतरत्वम्। तूर्णयः। त्वरधातोः "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" इत्यौणादिकेन निप्रत्यये उपधावकारयोः "ज्वरत्वरस्रिव्यविमवामुपधायाश्च" इत्यनेनोठादेशे तूर्णिशब्दः। तत्र धात्रोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां प्रत्ययस्वरापवादकेन नित्स्वरेणादेरुदात्तत्वविधानाद्धातुस्वरोऽवावशिष्यते। तत्र ऊठादेशे निष्पन्नस्य तूदात्तस्थानिकत्वेन स्थानिवत्त्वादुदात्तत्वम् इति तूशब्द उदात्तो निशब्दः शेषनिघातेनानुदात्तः। ततो जसि तस्य सुप्त्वेनानुदात्तत्वम्। तन्निमित्तकस्येकारस्थानिकगुणस्य स्थानिवत्त्वेनानुदात्तत्वम्। तत्स्थानिकस्यायादेशस्यापि तथैवानुदात्तत्वमिति तूर्णयःशब्दे आदिरुदात्तः परवर्तिनावचौ अनुदात्तौ। तत्राप्याद्यस्योदात्तात्परत्वात्स्वरितो द्वितीयस्य तु स्वरितात्परत्वात्प्रचयः स्वरः। उस्राइव। वसधातोः "स्फायितञ्चि"त्यादिनौणादिकेन सूत्रेण रक्प्रत्ययो बाहुलकात्संप्रसारणे उस्रशब्दः षत्वाभावस्तु बाहुलकात्। वसत्येषु परं तेजः, वसन्त्येषु रसा इति वा उस्रा इति। अथवा उत्पूर्वात्'स्रु गतौ' इतिधातोर्बाहुलकाड्डप्रत्यये उदोऽन्तलोपे च उस्र इति। उत्स्रवन्त्येभ्यो रसा इति व्युत्पत्त्येति देवराजयज्वा। तस्मादुस्रशब्दाज्जसि सवर्णदीर्घे उस्रा इति, तस्येवेन समासे विभक्त्यलोपे उस्रा इवेतिपदम्। तत्र वसधातो-

हे विश्वे देवा अप्तुरो यूयमागच्छत इति। तूर्णयः। क्षिप्रनामैतत्। क्षिप्राः। कथम्? उस्रा-इव स्वसराणि। उस्रा इति गोनाम रश्मिनाम वा। स्वसराणीत्यहर्नाम। यथा दोहार्थं गावः समस्ता रश्मयो वा अहानि प्रत्यागच्छन्ति तद्वत्समस्ता आगच्छतेत्यर्थः॥ ८॥

वे०—विश्वे देवासः। विश्वे देवा मेघस्थानामपामुद्गमयितारः क्षिप्राः सुतमागच्छत सर्वे ये तरन्ति रश्मय इवाहानि यद्वा गोष्ठानीव गावः॥ ८॥

तृतीयामृचमाह—

विश्वे॑ दे॒वासो॑ अ॒स्रिध॒ एहि॑मायासो अ॒द्रुहः॑।
मेधं॑ जुषन्त॒ वह्न॑यः॥९॥

विश्वे॑। दे॒वासः॑। अ॒स्रिधः॑। एहि॑ऽमायासः। अ॒द्रुहः॑।
मेध॑म्। जु॒ष॒न्त॒। वह्न॑यः॥९॥

विश्वे देवासः=एतन्नामका देवविशेषाः। मेधम्=हविर्यज्ञसंबद्धं जुषन्त=सेवन्ताम्। कीदृशाः? अस्रिधः=क्षयरहिताः, शोषरहिता वा। एहिमायासः=सर्वतो व्याप्तप्रज्ञाः। यद्वा सौचीकमग्निमप्सु प्रविष्टमेहि मा यासीरिति यदवोचन् तदनुकरणहेतुकोऽयं विश्वेषां

उस्रशब्दव्युत्पत्तिस्थले धातोः स्वरो रका प्रत्ययेन तत्स्वरेण निवर्त्यते वकारस्य संप्रसारण उकारे तस्य व्यञ्जनस्थानिकतयानुदात्तत्वम्, ततः परेणोदात्तेनाकारेण पूर्वरूपैकादेशे उस्रशब्दोऽन्तोदात्तः शेषनिघातेनादिरुदात्तः। ततो जसः प्रत्ययस्य सुप्त्वादनुदात्तत्वे तेन सह पूर्वस्योदात्तस्यैकादेशे एकादेशनिष्पन्नस्य सवर्णदीर्घाकारस्य "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वम्, तत इवशब्देन समासे विभक्त्यलोपे पूर्वपदप्रकृतिस्वरकत्वे च उस्राःशब्दस्यैव स्वरः समासेऽपीति शेषनिघातेन इवशब्दीयावचावुभावप्यनुदात्तौ। तत्र प्रथमस्योदात्तात्परत्वात् स्वरितो द्वितीयस्तु प्रचयः पदपाठे। संहितायांतु स्वसरशब्दीयोदात्तपरत्वेन सन्नतरत्वम्। उत्पूर्वकात्स्रुधातोर्निष्पत्तिकल्पे स्र इत्यत्र प्रत्ययस्वरः। उत्शब्देन समासे समासस्वरं बाधित्वा गतिरनन्तर इति उदात्तत्वं प्राप्तं परन्तु घृतादिगणे उस्र-शब्दस्य पाठकल्पनया गतिस्वरं बाधित्वाऽन्तोदात्ततोस्रशब्दस्येति विज्ञेयम्। अवशिष्टं पूर्ववत्। स्वसराणि। स्वः सरो येषामिति विग्रहः। तत्र स्वशब्दस्य फिषोऽन्त इत्यन्तोदात्तत्वम्। सरशब्दे सृधातोः पचाद्यच्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ सोऽपि चित्स्वरेणान्तोदात्तत्वेनानुमन्यते। प्रत्ययस्वरोहि प्रत्ययत्वनिमित्तवशात आद्युदात्तत्वरूपो भवति। चित्त्वनिमित्तकस्तु अन्तोदात्तत्वरूप इति रूपभेदः। ततो बहुव्रीहौ पूर्वस्य प्रकृतिस्वरकत्वे स्वसरशब्द आद्युदात्तः। ततो द्वितीयतृतीयावचावनुदात्तौ। ततस्तस्माज्जशि श्यादेशे नुमागम उपधादीर्घे णत्वे स्वसराणीति पदम्। तत्र जसः सुप्त्वादनुदात्तत्वं श्यादेशस्य स्थानिवत्त्वादनुदात्तता तन्निमित्तकस्योपधा-दीर्घस्याप्यनुदात्ताकारस्थानिकतयानुदात्तत्वम्। एवं च स्वसरशब्दे प्रथम उदात्तः, द्वितीयस्तूदात्तात्पर इति स्वरितस्तृतीयचतुर्थौतु स्वरितात्पराविति प्रचितौ भवतः।

देवानां व्यपदेश एहिमायास इति। अद्रुहः=द्रोहरहिताः। वह्नयः=वोढारः। धनानां प्रापयितारः।

अस्रिधः स्रिधेः क्षयार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विपि (पा. ३।३।१०८।९) नञा बहुव्रीहिः। पूर्वपदप्रकृतिस्वरं बाधित्वा "नञ्सुभ्याम्" (पा. ६।२।१७२) इत्युत्तरपदान्तोदात्तत्वम्। एहिमायासः। "ईह चेष्टायाम्" आ समन्तादीहत इत्येहिः। इन् (उ. ४।११७) इति सर्वधातुसाधारण इन्प्रत्ययो नित्त्वादाद्युदात्तः। एहिर्माया प्रज्ञा येषामिति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अथवा। आङ उदात्तादुत्तरस्येहीति लोण्मध्यमैकवचनस्य "तिङ्ङतिङः" (पा. ८।१।२८) इति निघाते "एकादेश उदात्तेनोदात्तः" (पा. ८।२।५) इत्येकार उदात्तः। एहीत्येतत्पदयुक्तं मा यासीरित्यत्र मायेत्यक्षरद्वयं येषां त एहिमायासः। पूर्वपदप्रकृतिस्वरः। अद्रुहः "द्रुह जिघांसायाम्"। संपदादित्वाद्भावे क्विपि (पा. ३।३।१०८।९)। बहुव्रीहौ "नञ्सुभ्याम्" (पा ६।२।१७२) इत्युत्तरपदान्तोदात्तत्वम्। मेधम्। "मेधृ संगमे च"। मेध्यते देवैः संगम्यत इति मेधं हविः। कर्मणि घञ्। ञित्त्वादाद्युदात्तः। जुषन्त सेवन्तामित्यर्थे "छन्दसि लुङ्लङ्लिटः" (पा. ३।४।६)। इति धातुसंबन्धे लङ्। यत उक्तरूपा विश्वे देवा अतो जुषन्तेति द्रुहादिधात्वर्थैः सम्बन्धात्। "बहुलं छन्दस्यमाङ्योगेऽपि" (पा, ६।४।७५) इत्यडागमाभावः। वह्नयः। निरित्यनुवृत्तौ "वहिश्रि" (उ. ४।५३) इत्यादिना विहितस्य निप्रत्ययस्य नित्त्वादाद्युदात्तत्वम् ॥ ९ ॥*

---

* विश्वे। विश्धातोः क्वनि ततो जसि रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण बाधे प्राप्ते प्रत्ययगतनित्त्वनिमित्तस्वरेण विश्वशब्दे धातुस्वर एवानुमन्यते। ततो विश्वशब्द आद्युदात्तः शेषनिघातेनान्त्यस्यानुदात्तत्वम्। जसः सुप्त्वादनुदात्तत्वे तत्स्थानिकश्यादेशस्यापि स्थानिवत्वेनानुदात्ततया तेन सह विश्वशब्दीयान्त्याकारस्यानुदात्तस्यैकादेशोऽपि स्थानिवत्त्वेनानुदात्त इति विश्वे शब्देऽन्त्योऽनुदात्त एकारस्तस्योदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। देवासः। देव-शब्दः पचाद्यजन्त इति धातु-स्वरं बाधित्वा प्राप्तः प्रत्ययस्वरः प्रत्ययगतनित्त्वनिमित्तकस्वरेणानुमन्यते इति स शब्दोऽन्तोदात्तः। जसोऽसुगागमस्य चानुदात्तत्वम्, पूर्वस्य सुप्त्वात्परस्यागमत्वात्। आगमाकारस्य देवशब्दीयान्त्याकारेणोदात्तेन सवर्णदीर्घैकादेशस्तु "एकादेश उदात्तेनोदात्तः" इत्युदात्तः। ततश्च शेषनिघातेनाद्यन्तयोश्चानुदात्तत्वम्। तत्राद्यस्य उदात्तः पर इति अनुदात्तापरपर्याय-सन्नतरत्वम्। अन्त्यस्योदात्तात्परत्वात्स्वरितः पदपाठे। संहितायां तु अस्रिधःशब्दीयलघ्वकारपरत्वेन जसः सकारस्य रुत्वे तस्योत्वे पूर्वेण गुणे ओकारः। तत्र उत्वस्य व्यञ्जनस्थानिकत्वेन व्यञ्जनस्य च "व्यञ्जनमनुदात्तम्" इत्यनुदात्तत्वेन स्थानिवत्त्वादनुदात्तत्वम्। तेन सह देवासःशब्दीयानुदात्तसकाराकारस्यैकादेशे गुणे तस्यानुदात्तस्थानिकत्वेनानुदात्तत्वम्। तस्य चोदात्तात्परत्वात्पूर्ववत्

स्क०—विश्वे देवासः विश्वे देवाः। अस्रिधः। अक्षया अशोषयितारो वा। एहिमायासः। सौचीकमग्निमप्सु प्रविष्टमेहि मा यासीरिति यद्वोचन्, तदनुकरणहेतुकोऽयं विश्वेषां देवानां व्यपदेश एहिमायास इति। अथवा अहीनमाया एहिमायासः। अन्यूनप्रज्ञाना इत्यर्थः। अद्रुहः, अद्रोग्धारो यजमानानाम्, मेधं यज्ञमस्मदीयं जुषन्तां सेवन्ताम्। वह्नयो वोढारः। धनानां दातार इत्यर्थः॥९॥

स्वरितः। अस्रिधः। स्रिध्-धातोः क्विप्, ततो नञा पदेन बहुव्रीहिस्ततो जसि रूपम्। तत्र प्रत्ययस्यापहारेण धातोः स्वरः स्रिध्शब्दे। नञो निपातत्वेन "निपाता आद्युदात्ता" इत्याद्युदात्तत्वम्। ततो बहुव्रीहौ "समासस्य" इति प्राप्तस्य समासस्वरस्यापवादकेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वपदस्य प्रकृतिस्वरे प्राप्ते तदपवादकेन "नञ्सुभ्याम्" इति सूत्रेण नञः परस्योत्तरपदस्यान्तोदात्तत्वे अस्रिध्शब्दोऽन्तोदात्तः। जसः सुप्त्वेनानुदात्तत्वात्तदकारस्य अस्रिधःशब्दे उदात्तात्परत्वेन स्वरितत्वम् पदावस्थायाम्। आद्यस्य तु शेषनिघातेनानुदात्तत्वम्। संहितायां तु एहिमायासःशब्दीयैकाररूपोदात्तः पर इति कृत्वा अस्रिधःशब्दीयान्त्योऽनुदात्त एवावतिष्ठते। "उदात्तस्वरितपरस्य सन्नतरः" इति सूत्रेण। एहिमायासः। आङ्पूर्वाद् ईह चेष्टायामिति धातोः सार्वधातुके इनि एहिशब्दः। मायाशब्दश्च माङ् माने इति धातोः "माछाससिभ्यो यः" इत्यौणादिकेन सूत्रेण यप्रत्यये स्त्रियां टापि निष्पद्यते। तत एहिशब्देन बहुव्रीहौ जसि असुगागमे एहिमायास इति पदम्। तत्र धातोः स्वरस्यैहिशब्दे प्रत्ययस्वरेणापहारे प्राप्ते प्रत्ययगतेन नित्त्वेन तन्निमित्तेनापवादभूतस्वरेण धातोः स्वर एवोदात्तोऽनुमन्यते। आङो निपातत्वादाद्युदात्तत्वेन तेन सह ईहिशब्दस्योपपदसमासे समासत्वात्प्राप्तान्तोदात्तत्वस्य "गतिरनन्तर" इति सूत्रेण बाधे प्राप्ते तद्बाधकेन "गतिकारकोपपदात्कृद्" इत्यनेन कृदन्तस्वरेण बाधे ईहिशब्दस्वर एव आ ईहि पदयोः समासेऽप्यवतिष्ठते। तत आङ आकारेण ईहिशब्दीयेकारस्य गुणैकादेशे तस्य पूर्वोक्तरीत्या शेषनिघातेनानुदात्ताङाकाराद्युदात्तेहिशब्दीयोदात्तेकारोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्येकार उदात्तः। हिशब्दश्च शेषनिघातेनानुदात्तः। मायाशब्दे च धातुस्वरस्य प्रत्ययस्वरेणापहारादन्तोदात्तत्वं मायशब्दे ततष्टापि तस्य पित्त्वाद् "अनुदात्तौ सुप्पितौ" इत्यनेन प्रत्ययस्वरापवादकेनानुदात्तत्वे तस्य मायशब्दीयोदात्तयकाराकारेण सवर्णदीर्घैकादेशे तस्य "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वमिति मायाशब्दोऽन्तोदात्तः। शेषनिघातेनाद्यस्यानुदात्तत्वम्। तत एहिमायाशब्दयोर्बहुव्रीहौ समासस्वरापवादकेन बहुव्रीहिस्वरेण समास आद्युदात्तः। ततो जसि असुगागमे च तेन सह सवर्णदीर्घस्य च स्थानिवत्त्वादिनानुदात्तत्वम् इति एहिमायासःशब्द आद्युदात्तः-परेषां द्वितीयादीनामनुदात्तत्वम्, तत्र द्वितीयस्योदात्तात्परत्वात्स्वरितत्वम्, तृतीयचतुर्थपञ्चमानां तु स्वरितात्परत्वात्प्रचितत्वम्। केवलमन्त्यस्य परवर्त्तिपदेन संहितादशायां तु "देवासो" इत्यत्रेव रुत्वे उत्वे गुणे ओकाररूपत्वं तदानीमप्यनुदात्तत्वमेवेति प्रचय एवोक्तरीत्या। अस्य शब्दस्य प्रकारान्तरेणापि व्युत्पत्तिर्भाष्ये। तथा हि आङ्पूर्वकस्येण्धातोर्लोटो रूपमेहि। तत्पूर्वपदं "मायासीः" इति वाक्यीयमायाइत्यंशानुकरणमायाशब्देन बहुव्रीहौ पूर्ववत् एहिमायासः पदमिति। तत्र इण्धातोः आदादिकात् लोटि शपि तल्लुकि लोटो मध्यमैकवचने सिपि तस्य स्थाने ह्यादेशेऽपित्त्वान्ङित्वेन पूर्वगुणाभावे इहीति पदम्, तस्याङा गुणे एहि इति भवति। तत्र धातोरित्यन्त उदात्तस्ततो लोटः सिपः पित्त्वात्तत्स्थानिकह्यादेशस्य स्थानिवत्त्वेनानुदात्तत्वे प्राप्ते सूत्रे "सेर्ह्यपिच्च" इत्यनेनापित्त्वस्य वचनाच्चानुदात्तत्वाभावः। "पिच्च ङिन्न ङिच्च पिन्न" इति पित्त्वस्य निषेधात्स्थानिवत्त्वेनापि नात्रानुदात्तत्वम्। एवं च इहिशब्दोऽन्तोदात्तः शेषनिघातेनाद्यनुदात्तः। तत आङा सह समासे

वे०—विश्वे देवासः। विश्वे देवाः क्षयरहितास्तोतारमेहि मा यासीरिति वदन्तो द्रोहरहिता यज्ञमसेवन्त वोढारः ॥ ९ ॥

बाहुलकात् "गतिरनन्तर" इत्यनेन समासेऽपि आङ एव स्वरस्यावशेषे शेषनिघातेनेहिपदमनुदात्तम्। तत्राङ आकारेणेहीतिपदीयाद्येकारस्य गुणादेशे "एकादेश उदात्तेनोदात्तः" इति एकार उदात्तः। मायासीःशब्दीयमायेत्यंशस्यानुकरणशब्दतया "अनुकार्यादनुकरणं भिद्यते" इति पक्षे तस्यापि प्रातिपदिकत्वेन "फिषोऽन्त" इत्यन्तोदात्तत्वम्। "न भिद्यते" इति पक्षेतु घृतादिपाठकल्पनयान्तोदात्तत्वं व्यवस्थापनीयम्। तस्य पूर्वोक्तेहिशब्देन बहुव्रीहौ पूर्ववदेव समासस्वरादिकमिति। अद्रुहः। द्रुहधातोः क्विपि नञा बहुव्रीहौ समासे रूपम्। तत्र क्विपः सर्वापहारात् धातुस्वर एव द्रुह इत्यत्र॥ नञा बहुव्रीहौ समासस्वरबाधकबहुव्रीहिस्वरस्यापि "अस्रिधः" शब्दोक्तरीत्या बाधकेन "नञ्सुभ्याम्" इत्यनेनोत्तरपदान्तोदात्तत्वविधानाच्छेषनिघातेनादेरनुदात्तत्वम्। जसः सुप्त्वेनानुदात्तत्वात्तस्योदात्तात्परत्वात्स्वरितत्वम्। मेधम्। मेधधातोः कर्मणि घञ्। धातोः स्वरस्य प्रत्ययस्वरेण तस्यापि ञित्स्वरेणाप्रवृत्तौ मेधशब्द आद्युदात्तः शेषनिघातेनान्तानुदात्तत्वम्। अमिच सुप्त्वेनानुदात्तत्वात्पूर्वेणैकादेशस्यापि उभयानुदात्तस्थानिकतयानुदात्तत्वमित्यनुदात्तान्तो मेधशब्दः। तत्रादेरुदात्तात्परत्वाद्द्वितीयस्यानुदात्तस्य स्वरितत्वम्। जुषन्त। जुषी प्रीतिसेवनयोः। अस्माल्लङि प्रथमबहुवचने अन्तादेशे शपि बाहुलकादडागमाभावे जुषन्त इति रूपम्। तत्र धातोरित्यन्त उदात्तः झप्रत्ययस्य स्वरेण निवर्तते झस्यान्तादेशे च स्थानिवत्त्वेनवा औपदेशिकत्वेन स्वरप्रवृत्तेः पूर्वमन्तादेशे "आद्युदात्तश्चे" ति स्वरः प्रवर्तमान अन्तशब्दीयाकार एव प्रवर्तत इतिवचनेन वाद्युदात्तोऽन्तशब्दः। शेषनिघातेन धातोः स्वरोऽनुदात्तः। एवं च जुषन्तशब्दे प्रथमोऽनुदात्तो द्वितीय उदात्तस्तृतीय उदात्तात्परत्वात्स्वरितः पदपाठे इत्येवं प्राप्तमासीत्परं तु प्रकृते जुषन्तपदस्य "तिङ्ङतिङः" इत्यनेन निघातेनेह सर्वानुदात्तत्वम्। तस्य मेधंशब्दीयान्तस्वरितात्परत्वात्प्रचय आद्ययोः, अन्त्यस्यतु वह्निशब्दीयोदात्तः पर इति सन्नतरः "उदात्तस्वरितपरस्य सन्नतरः" इत्यनेन। वह्नयः। वहधातोर्निप्रत्यये जसि रूपम्। तत्र धातुस्वरस्यापवादकप्रत्ययस्वरस्याप्यपवादकेन प्रत्ययगतनित्त्वनिबन्धननित्स्वरेण आद्युदात्तं वह्निपदम्। जसि तस्य सुप्त्वादनुदात्तत्वम्। तन्निमित्तकस्य गुणस्य अयादेशस्य च स्थानिवत्वेनानुदात्तत्वम्। तत्र वकाराकारादुदात्तात्परत्वाद्द्वितीयस्य स्वरितः। तृतीयस्तु स्वरितात्परत्वात्प्रचितः।

एतत्पूर्वतनं च सूक्तं प्रउगे शस्त्रे विनियुक्तमित्युक्तम्। तत्र शस्त्रे शंसनावसरे विशेष आश्वलायनेनोच्यते यदा इमे तृचाः शंसनीयास्तदा एषां पूर्वम् वायुरग्रेगा इत्यादीनां सप्तानां पुरोरुचां मध्ये एकैकां शंसेत्। ताश्च पुरोरुच एवं परिशिष्टाध्याये उच्यन्ते यथा - वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः॥ १॥ हिरण्यवर्तनी नरा देवा पती अभिष्टये। वायुश्चेन्द्रश्च सुमुखः॥ २॥ काव्या राजाना क्रत्वा दक्षस्य दुरोणे। रिशादसा सधस्थ आ॥ ३॥ दैव्या अध्वर्यू आगतं रथेन सूर्यत्वचा। मध्वा यज्ञं समञ्जाथे॥ ४॥ इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः। हरिवां सुतानां सखा॥ ५॥ विश्वान्देवान् हवामहेऽस्मिन्यज्ञे सुपेशसः। त इमं यज्ञमागमन्देवासो दैव्या धिया॥ ६॥ जुषाणा अध्वरे सदा ये यज्ञस्य तनूकृतः। विश्व आ सोमपीतये॥ ७॥ वाचमहं देवीं वाचाऽस्मिन्यज्ञे सुपेशसा। सरस्वतीं हवामहे॥ ८॥ इति पुरोरुचां पूर्वं त्रिराह्वयेत्। आहावं ब्रूयादिति तदर्थः। आहावो नाम सूक्तप्रारम्भे होत्राऽध्वर्योर्निवेदनात्मकः पठ्यमानः शोंसावोमिति मन्त्रः। तस्य च शंसाव इत्यर्थः। आदेः स्वरस्यौत्वं छान्दसत्वात्।

ṚGVEDA-SAṂHITĀ

TRANSLATED WITH CRITICAL NOTES

BY

MR. PRABHAT KUMAR SHASTRI,

M. A., P. R. S.

Published by

SATIS CHANDRA SEAL, M. A., B. L.

Hony. Secretary,

Indian Research Institute

Calcutta

1933

I, 3.

Ṛṣi—Madhucchandas

Metre.—Gāyatri.

Deity.— Aśvins for stanzas 1—3.

Indra for " 4—6

Viśvadevas " 7—9

Sarasvati " 10—12

Aṣṭaka I. **Maṇḍala I.**

Adhyāya I. **Anuvāka I.**

Varga 5. **Sūkta 3.**

General application—The four triplets constituting the Sūkta form a part of the Praugaśastra[1] to be recited by Hotā at the Prātaḥ savana[2] after the Prataranuvāka[3] has been recited by Hotā called on by Adhvaryu to do so before the sun-rise on the Press-day[4] (Sutyā dina) at the Agniṣṭoma sacrifice.

Notes on the rituals connected with the 'General application stated above :—

1. Praugaśastra—There are twelve stotras (chants or hymns) and twelve śastras (songs of praise) at the Agniṣṭoma sacrifice. These twelve stotras and śastras are to be chanted and recited respectively at the three 'savanas' (pressings of soma juice). Of these twelve stotras and śastras, five stotras and five śastras are devoted to the Prātaḥ savana (Morning Pressing); to the Mādhyandina savana (Midday Pressing) belong five stotras and five śastras, and to the Tṛtiyasavana (Third Pressing), two stotras and two śastras. Every chant or hymn (stotra) of Udgātṛ is followed by a song of praise (śastra) recited by the Hotṛ or one of his three assistants (Maitrāvaruṇa, Brāhmaṇācchaṃsin and Acchāvāka); the first two śastras at each savana being recited by the Hotṛ and the three additional ones at the morning and midday pressing by his assistants (Hotrakas). Thus are recited six śastras by Hotā (two śastras in the morning-pressing, two in the midday pressing and two in the third pressing); of the said six śastras the second one in the morning-pressing is known as 'Praugaśastra'. This Praugaśastra consists of seven triplets. (Rv. 1. 2. 1-3 ; 1. 2. 4-6 ; 1. 2. 7-9 ; 1. 3. 1-3 ; 1. 3. 4-6 ; 1. 3. 7-9 ; 1. 3. 10-12) the triplets being devoted to the respective deities Vāyu, Indra & Vāyu (jointly), Mitra & Varuṇa (jointly), Aśvins, Indra, Viśvadevas, and Sarasvati.

2. Prātaḥ savana—Morning Pressing. What is intended to be given here has been given in the foot-note no. 1. Details will follow.

3. "The Prātaranuvāka or morning prayer (matin chant) has to be recited by the Hotṛ in the latter part of the night before any sound of birds, etc. is to be heard. It may begin immediately after midnight and conclude as soon as day light appears.

"When called upon by the Adhvaryu to recite the morning prayer, the Hotṛ first makes an oblation of ghee on the Āgnīdhra fire, with the mantra, 'Protect me from the spell of the mouth, from every imprecation, Hail !' and then the two oblations on the Āhavanīya with appropriate mantras. Thereupon he betakes himself to the Havirdhāna (cart-shed), in entering which, by the east door, he touches successively the front wreath

(rarāṭā) and the door posts, with formulas. He then squats down between the yoke-pieces of the two Soma-Carts, and begins his recitation with Ṛgveda X. 30. 12. 'Ye, O, wealthy waters, verily possess good things ; ye confer desirable energy and immortality ; ye command riches with abundant offspring : may Sarasvati (the River S., and Speech) bestow on the bard that vital vigour !' The 'early-coming' dieties to whom the recitation is successively addressed, are Agni, Uṣas, (the dawn), and the two Aśvins (the pre-cursors of the sun) ; the prayer thus consisting of three sections, termed *kratu* (Agni kratu etc). The hymns and detached verses making up these sections are arranged according to the seven metres (thus forming seven sub-sections of each), viz, gāyatrī, anuṣṭubh, triṣṭubh, bṛhati, uṣṇiḥ, jagatī, and paṅkti. The prayer may consist of as many verses as can be recited between midnight and day break ; but there should at least be one hymn in each of the seven metres to each of the three deities ; nor should the recitation consist of less than a hundred verses. From the beginning of the recitation up to the end of the last hymn but one, Ṛgveda I, 112, there is to be a gradual modulation of the voice so as to pass upwards through the seven tones (yama) of the deep scale (mandrasvara). Moreover, that hymn is to be repeated (if necessary) till day light appears. As soon as this is the case, he passes on without any break from the last (25th verse) to the last hymn (v. 75, 1-9), which he intones in the lowest tone of the middle scale, after shifting his place further east towards the gate. The recitation of the first eight verses of this hymn, again gradually ascends through the whole of the middle scale ; when—after once more shifting his place so as to be seated between the two door-posts—he intones the last verse—'The Dawn hath appeared with her shining kine, Agni hath been kindled at his appointed time ; your car hath been yoked, ye mighty, mead-loving Aśvins, showerers of wealth, hear my call !' in reciting which, he makes his voice pass through the several tones of the high scale. The Subrahmaṇya, likewise, has to chant the Subrahmaṇya litany (see III, 3, 4, 17 seq.)—as he had to do on the previous evening—inserting in it the names of the sacrificer's father and son. The Agnīdh, in the mean time, prepares the five haviṣ—oblations (savanīyāh puroḍāśāḥ) to be offered at the morning pressing (cf IV, 2, 4, 18), and the 'Unnetṛ' puts the numerous Soma-vessels in their respective places on the 'khara', about the Somacarts."* (Sacred Books of the East. Vol. XXVI, pp. 223, 230.)

4. Sutyādina = the pressing-day i. e. the day of Soma extraction, 'consisting of three services (or pressings, savana)—the morning, midday, and third (or evening services) at each of which certain cups of Soma-liquor are drawn, destined to be ultimately consumed by the priests and sacrificer, after libations to the respective deities have been duly made therefrom,'

5. The simplest and most common form of Soma sacrifice is Agniṣṭoma Sacrifice. Only one victim is immolated herein and the victim is a he-goat to Agni. In it are chanted twelve stotras by the Udgātṛs, each of which is followed by the recitation of a

---

* The transliteration, in all the quotations has been made to accord with ours to avoid confusion and will be so maintained hereafter.

Śastra by Hotā or one of his assistants (Maitrāvaruṇa, Brāhmaṇācchaṃsin and Acchāvāka. The Stotras and their corresponding Śastras at the three savanas are as follows :—

1. Prātaḥsavana

1. Bahiṣpavamāna stotra	1. Ājyā Śastra (Hotṛ)
2. Ājyāstotras	2. Praūga Śastra ,,
3. ,,	3. } Ājyā Sastras (Hotrakas)
4. ,,	4. }
5. ,,	5. }

2. Mādhyandina Savana

6. Mādhyandina pavamāna stotra	6. Marutvatīya Śastra (Hotṛ)
7. Pṛṣṭha stotra	7. Niṣkevalya Śastra ,,
8. ,,	8. } Hotrakas
9. ,,	9. }
10. ,,	10. }

3. Tṛtīya Savana

11. Ārbhava (or Tṛtīya) Pavamāna	11. Vaiśvadeva Śastra (Hotṛ)
12. Agniṣṭoma sāman (Yajñāyajñīya)	12. Āgnimāruta Śastra ,,

It is from the name of the last stotra that the scrifice derives its name. The sacrifice has thus been explained as the 'Agniṣṭomasaṃsthāḥ Kratuḥ' or the sacrifice concluding with the 'praise of Agni'. In his remark on Śatapatha Brāhmaṇa V. 1. 3. 1. Sāyaṇa gives further an exposition of the appellation 'agniṣṭoma sāman' : 'agniḥ stūyate'smin ityagniṣṭomo nāma sāma' i. e. the sāma (chant) in which Agni is praised.

The application of this triplet to the Aśvins is in the 'Aśvina Kratu' at the Prātaranuvāka

N. B.—'Aśvina Kratu' means a collection of hymns and detached verses forming one of the three sections constituting the entire Prātaranuvāka (Āś. Śr. 4. 15)

1. Aśvins, cherishers of good deeds, long-armed, having outstretched hands (for receiving the oblation) desire for sacrificial food.

The original is :—

aśvinā yajvarīriṣo dravatpāṇī śubhaspatī,
purubhujā canasyatam.

Sāyaṇa takes 'śubhaspatī' to mean 'cherishers af good deeds.' Skandasvāmin and Veṅkaṭamādhava render it as 'lords of the water'. Vedārthayatna's rendering of it is 'lords of prosperity'. Wilson follows Sāyana and gives the rendering as 'cherishers of pious acts'. According to Grassmann the expression means 'the lords of splendour' or 'the lords of ornaments or jewels' (herren des glanzes oder schmuckes).

'Lords of splendour' is the meaning upheld by a majority of the western scholars such as Ludwig, Geldner, Monier Williams, Griffith. The expression 'śuhbaspatī' is used in the dual everywhere in the Ṛgveda as an adjunct to the Aśvins. Still it has been differently interpreted by Sāyaṇa at different places. And these various interpretations of Sāyaṇa have been the source of different views of the subsequent authors. Of these 'lords of splendour' is the meaning adopted here as it is directly derived and does not show any trace of elliptical construction as the derivation reveals. This meaning though not covered by the numerous interpretations of the word by Sāyaṇa is not unsupported by Sāyaṇa who gives the meaning of 'śubh' as splendour (sobhā) in many places.

According to Sāyaṇa 'purubhujā' means 'long-armed' or'great eaters.' Skandasvāmin takes it to mean 'eaters of plenty of oblations'. Veṅkaṭamādhava explains it with the word 'bahubhojanau' which may mean both 'eating much' and 'feeding much.' Vedārthayatna renders it 'bestowers of plenty of food.' Wilson follows Sāyaṇa. So does Langlois whose rendering is 'aux longs bras' (with long hand). Grassmann takes it in the sense of 'possessing much' (viel besitzend). Ludwig holds nearly the same meaning and makes it mean 'rich in enjoyment' (genuszreiche). Geldner and Monier Williams support the sense of enjoyment and Griffith the sense of possession. All these meanings are given in the different interpretations of Sāyaṇa but at different places. A collation of these given below clearly shows that the meaning adopted in our translation of the Ṛk. is not only supported by Sāyaṇa in a majority of cases but seems happier both in sound and sense.

purubhujā—R.V. 1. 116. 13. protectors of many (bahūnāṃ pālakau) or many-armed (prabhūta-hastau)
RV. 1. 116. 14. long-armed (mahābāhū) or many-armed (prabhūtahastau)
5. 49. 1. enjoying much (puru bhuñjāta iti)
5. 73. 1. eating (oblations) at many sacrifces (bahuṣu yajñeṣu bhoktārau) or protecting much (adhikaṁ rakṣitārau)
6. 63. 5 ; 8. with hands full (of gifts to make over to the worshippers) or protectors of many (bahupālakau)
8. 8. 17. eaters of plenty of oblations (bahulasya haviṣo bhoktārau)
8. 10. 6. or protectors of many (bahunāṃ pālakau).
8. 86. 3. feeding many with gifts of wealth (bahunāṃ dhanādidānena bhojayitārau) or protectors of many worshippers (bahūnāṁ stotṛṇāṁ pālayitārau).

Sāyaṇa explains 'dravatpāṇī' as 'having outstretched hands for receiving the oblation' (havirgrahaṇāya dravatbhyāṃ dhāvaḍbhyāṃ pāṇibhyāmupetau). Skandasvāmin and Veṅkaṭamādhava render it as 'kśiprahastau' (quick-handed). This is further elucidated by Skandasvāmin as 'acting or operating speedily' (śīghrakāriṇau). According to Vedārthayatna it means 'riding on quick horses'. Like Wilson, Ludwig follows Sāyana (mit sich auszbreitenden hānden). Geldner and Griffith follow Skandasvāmin and Veṅkaṭamādhava (flinkhāndigen—Geldner, having nimble hands—Griffith). Monier

Williams gives but a replica of Vedārthayatna's interpretation (having quick horses). The same sense is expressed by Grassmann who renders it as 'having quickhoofed horses' (raschhufige Rosse habend). It should be noted here that of all the meanings 'quick handed' is the most evident one. Though not so easily deducible, the meaning 'quick-footed' is not impossible as the use of 'pāṇi' in the sense of foot is admitted by native authorities and foreign scholars too. The use of 'pāṇi' in the sense of 'hoof' is admitted by native authorities and foreign scholars too. The use of 'paṇi' in the sense 'Khura' is also noticed by them. But the meaning 'quickhoofed' is at once given a good go by—the adjective 'quickhoofed' may be highly suited to the two horses of the Aśvins but not to the Aśvins themselves. 'Quick-horsed' is a fitting epithet of the Aśvins, but the meaning, the component members of the compound are not adequate to yield. To equate the sense therefore a rhetorical use of the word 'pāṇi' is to be assumed or the sense is to be purchased at the cost of supplementing a word as has been done by Grassmann. From these it is clear that 'quickhanded' is the best of all the interpretations.

'Canasyatam' is a denominative verb derived from the base 'canas' (food), the suffix having a desiderative significance. The meaning is therefore 'desire for food'. The object of this verb is 'iṣas' (food). A tautolgogy may very likely be apprehended. That such usages are not rare is pointed out and examples have been adduced to by both Sāyaṇa and Veṅkaṭamādhava.

'gavāṃ gopatiḥ' (Rv. 1, 101, 4) ; 'somaṃ somapātamā' (Rv. 1, 21, 1) ; 'draviṇodā draviṇasaḥ' (Rv. 1, 96, 8)—Veṅkaṭamādhava 'samūlakāṣam kaṣati—Sāyana'. This example of Sāyaṇa is not a Vedic quotation but a popular grammatical expression that is intended here merely to illustrate the nature of the examples where tautology is beyond all comprehension.

Hence the traslation that seems happier is:

Oh Aśvins, lords of splendour, protectors of many, having nimble hands accept the sacrificial food.

2. Aśvins of many acts, guides, endowed with fortitude, accept our praises with a (loving) mind unaverted.

The original is :—

aśvinā purudaṃsasā narā śavīrayā dhiyā
dhiṣṇyā vanataṃ giraḥ.

Purudaṃsasā—According to Sāyaṇa and Skanda-svāmin, it means 'of many acts' (bahu-karmāṇau), daṃsas, being one of the twenty six synonyms of 'karma' (work). This sense is expressed in a little modified form by Veṇkaṭamādhava who renders it with 'āścaryabhūtavividhakarmāṇau' (of many wonderful deeds). Vedārthayatna's rendering 'āścaryakārakabahukṛtyakarte' is evidently a vernacular translation of the exposition of Veṅkaṭamādhava. The foreign scholars with but difference in the modes of their expressions, all alike share the view of Veṇkaṭamādhava. Even Wilson who follows Sāyaṇa differs a little from Sāyaṇa here and gives the meaning by 'abounding in mighty deeds'. Grassmann gives first 'thatenreich' (rich in deeds) and then by way

of elucidation as it were, expresses the meaning with 'reiche ān wunderbaren thaten' (rich in wonderful deeds). In the respective translations of the Ṛgveda by Grassmann and Ludwig the sense is expressed by the same phraseology 'wunderreiche' (rich in wonders). From these meanings a little departure is made by Geldner who renders it with 'kunstreiche' (rich in artifices, artful) yielding a sense suited to the miraculous nature of the achievements of the Aśvins,—a departure from his own rendering 'vielvermögend' (powerful, capable of doing much) formerly given of the word 'purudamṣam' Rv. 3.6.11 (Der Ṛgveda in Auswahl Teil, 1907, p. 111). In giving the meaning of the word Monier Williams echoes the two senses, one of Wilson, his preceptor, and the other of Geldner and others. The meaning given by Veṇkaṭamādhava seems best and is adopted here in our translation as it is worth noticing the original sense which the philology of the word reveals and which accords well with the achievements of the Aśvins (as mentioned in the hymns—Rv. 1, 112, 116 ; 117 ; 118) for the protection and benefit of those who craved his aid.

Narā—Sāyaṇa and Veṅkaṭa render 'narā' with 'netārau' (leaders, guides) and Skanda. with 'manuṣyākṛti' (of human form). Vedārthayatna makes it mean 'valourous'. Wilson expresses Sāyaṇa's meaning by 'guides (of devotion)'. The western scholars generally interpret it as 'herren' whenever it is used of the gods. Whitney renders 'naraḥ' with 'manly' (A. V. 6. 22.2) and Stevenson with 'who assumes the human form' (S. V, 1. 5. 5). Geldner in (Der Ṛgveda in Auswahl. Teil 1) gives several meanings of the word 'nṛ' : 'mann' (man) 'held' (hero) 'Anfuhrer' (leader, guide) and herr (lord) and though Geldner has not specifically mentioned the cases where the word should be used in the different senses as Grassmann has done. It seems likely that Geldner had in view the meaning 'anfuhrer' in such cases as the present one under consideration. However, without resorting to any sort of conjecture like this, we have adopted Sāyaṇa's interpretation as it seems best, it being in perfect consonance with the etymology, as a derivative of root √nṛ 'to lead' and highly fitting as an adjunct of the gods.

Savīrayā—Sāyaṇa takes Śavīrayā as an instrumental singular of a feminine base 'savīrā'. It has been explained by him as derived from the root √Śu 'to go'. Thus he makes it mean 'progressive,' i e.'with progress unimpeded'(gatiyuktayā apratihataprasarayā ityarthaḥ). Skanda. takes 'Śavīrayā' as the dual form of the vocative and construes it with 'Aśvinā.' A fourfold derivation is given by him. 'Śu' 'Swift, [Śu is one of the twenty six synonyms of 'kṣipra', (quick or quickly). Nigh. 2. 15] 'īra' = gait from √īr 'to go' 'Śavīra' = 'Swift gait'. Hence 'Śavīrayā,' a compound formed of the base 'Śavīra (swift gait) and the stem 'yā' (going), means 'going with a swift gait'. Or, 'Śavas' = 'strength' ['Śavas' is one of the twenty eight synonyms of 'bala' (strength). Nigh 2. 9] ; īra = throwing off, driving away, (a noun action, and, a derivative of the causal form of the root √īr) ; 'Śavīra' = the driving away of the strength (of others). Hence the compound 'Śavīrayā' means 'going by driving away the strength of others.' Or, there being no 'avagraha' in the Padapāṭha as is generally used for denoting a 'pada,' 'yā' should be regarded as a substitute of a noun inflection and not a verbal derivation. And the base 'īra,' in the compound 'śavīra' formed with the same constituents as stated above, should be an agent substantive and not an action noun. Thus 'śavīrayā'

means 'going quickly' or 'driving away the strength of others'. Or the base 'śavīra' is a derivative of the root 'śav', 'to go'. Thus is 'śavīrayā' made to mean 'going (towards the secrifices or the enemies)'. Veṅkaṭamādhva like Sāyaṇa takes 'śavīrayā' as an instrumental singular of a feminine base 'śavīrā, an adjective qualifying the word 'dhiyā'. But he explains 'śavīrā' as a Bahubrīhi compound with 'śu' and 'īra' meaning 'going quickly (to the oppressed). According to Vedārthayatna it means 'mighty.' The western scholars too make it mean 'strong' 'mighty' 'powerful.' Wilson fōllowing Sāyaṇa renders it with 'unaverted.' 'Śavīrā' may also be explained as composed of 'śa' = 'happiness' 'pleasure' (Nigh. 3. 6.) and 'vīra = 'sending', a derivative of the causal form of the root √īr with the prefix 'vi'. And the words 'śambhuvā', 'śambhaviṣṭhā' 'śantāti' and 'mayobhuvā' (causing delight or happiness) used very often as adjuncts of the Aśvins lend salutary aid to the acceptance of such an explanation. 'ś'avīrayā' (delighting) may thus be assumed as an adjective of 'dhiyā'. This too does not appear to be wholly untenable as is evident from 'ś'antamā gīḥ' (RV. 5, 42, 1 ; 5. 43. 8), śantamā śarmāṇi (RV. 3. 13. 4) śantamā brahmāṇi (RV. 5. 73,10) śantamā matiḥ (RV. 8. 74. 8) mayobhūḥ (RV. 1. 117. 19) mayobhuvaṃ stotram (RV. 1. 138,)

dhiyā—Sāyaṇa renders it with 'ādaryūktayā buddhyā (with a loving mind) and Skandasvāmin with 'cittena' (heartily). Veṅkaṭamādhava takes 'dhiyā' in the sense of 'act', 'deed'. Vedārthayatna follows Sāyaṇa. The western scholars all take it in the sense of 'mind', 'thought', 'attention' and it has been construed with the verb 'vanataṃ' by all the authorities excepting Veṅkaṭamādhava who construes 'dhiyā' with 'dhiṣṇyā'. It may similarly be construed with 'narā'. It may also be construed with the nominative but with the assumption of an elliptic word as has been done by Sāyaṇa in RV. 8. 87. 6. where 'dhiyā' has been rendered with 'asmadīyayā stutyāhutau santau' (invoked with our prayer). It seems possible that 'dhiyā' is a vocative dual,meaning 'intelligence' of a derivative of the stem 'dhī' (intelligence) with a secondary suffix 'a' (c) used in the sense of 'having'. This explanation would not have been too remote to be accepted had not the accent stood in the way. Sāyaṇa's interpretation though a little elliptic is in perfect tune with the tone of the prayer of a prayerer. This is why we have accepted the meaning of Sāyaṇa in our translation.

The variance in reading tells no tale of difference in meaning To determine the true reading by an examination into the manuscripts or an enquiry of subservient nature is, therefore beyond, the pale of our consideration, as the aid it offers in achieving our purposes is too little to be noticed. Three other meanings have been pronounced by Uvaṭa and Mahīdhara. On V.S. 15. 17. the two commentators both render 'dhiṣṇyā' with 'dhārayitārau' (holders, supporters). On V. S. 20, 83. they each offer two meanings. 'Agnirūpau' (having the form of Agni) is the sense predicated by both alike. As for the other meaning Uvaṭa gives 'dātārau' (giving, a giver, donor, liberal) and Mahīdhara, dhātārau (holders, supporters). From above it is clear that the majority of voices leans favourably to the sense 'intelligent'. The sense 'worthy of praise' puts forward no inferior claims. The reason is not far to seek. The word 'dhiṣṇya' or 'dhiṣṇyā' means 'hearth', a sense which is universally admitted. It is so called because it is the place of recitation 'of praises' (Nir VIII. 3). Thus 'dhiṣaṇā'

(praise) equally and very satisfactorily explains both the senses ('worthy of praise' and 'hearth') which the other derivations cannot. This sense is also upheld by Sāyaṇa and Veṅkaṭamādhava in a majority of cases. We therefore adopt it in our translation. Caland-Henry, 240. renders the third foot of the Ṛk with "choyez les chant de propitiation' taking 'dhisṇyā = dhiṣṇyāḥ' a form of the accusative plural,and construing it with 'giraḥ'—a construction the Padapātha disapproves and the context nullifies.

यहां शंका—अच्छा मन्त्र भागको प्रामाण्य हो। किन्तु ब्राह्मण भागका तो प्रामाण्य नहीं हो सकता क्यों जैसे—ब्राह्मण दो प्रकारके हैं,—एक विधि, दोसरा अर्थवाद। जैसा कि आपस्तब कहा है; "कर्म चोदना ब्राह्मणानि। ब्राह्मणशेषोऽर्थवादः"(आप० ३२।३३। इति) विधि भी दो प्रकारका है। एक अप्रवृत्त प्रवर्त्तन, दोसरा अज्ञात ज्ञापन। "आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयायाम् (ऐ० ब्रा० १।१।१) इत्यादिक कर्मकाण्डगत विधिसमूह अप्रवृत्तप्रवर्त्तक हैं। "आत्मा वा इदमेक एवाग्र आसीद्" (ऐ० आ० २।४।१) इत्यादि ब्रह्मकाण्डगत विधिसमूह अज्ञातज्ञापक हैं। वहां कर्मकाण्डगत "जर्त्तिल यवाग्वावाजुहुयाद्गवीधुक यवाग्वा वा" (तै० स० ५।४।३।२) इत्यादि विधिओंका प्रामाण्य नहीं है; क्योंकि आहुतीकी अयोग्यद्रव्य विधानसे यथार्थ अनुभव साधनत्वके अभाव होनेसे,

ाहुतिर्वै जर्त्तिलाश्चगवीधुकाश्च" (तै० स० ५।४।२।१०)

आरण्यगोधूमोंके आहुतिद्रव्यत्व निषिद्ध है, (अर्थात्

इनसे होम नहीं करना) इस हेतुसे बाधित जर्त्तिलादि विधि

।. तैत्तिरीयादि ब्राह्मणोंमें "तत्तथाहत्यं, तत्तथान कार्यम्" इन दोनों

द्ध हुए, और ऐतरेय ब्राह्मणमें अनुदित होमको बहुत प्रकारसे

' (ऐ० ब्रा० ५।५।५) उदित होम वार बार कहा है। तैत्तिरीय

शाखा ना ऐसे क "यदनुदिते सूर्ये प्रातर्जुहुयादुभयमेवाग्नेयं स्यात्। उदिते सूर्ये प्रातर्जुहोति" (तै० ब्रा० २।१।२।३) इति। फिर भी वे ही उदित होममें दोष कहते हैं—"यदुदिते सूर्ये प्रातर्जुहुयाद्यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति तादृगेवतद्" (तै० ब्रा० २।१।२।१२) अर्थ—सूर्य उदित न होनेपर प्रातःकालमें होम करे तो दोनों ही आग्नेय हो जायगा। इसलिये सूर्य उदित होनेपर प्रातःकालीन होम करना चाहिये। वैसा ही—"अतिरात्रे षोडशिनं गृह्णाति" यह विधि—"नाति रात्रे षोडशिनं गृह्णाति" इस निषेधसे वाधित होता है। ज्योतिष्टोमादि यागमें भी अनुष्ठानके बाद ही स्वर्गादि फल तो नहीं प्राप्त होता है। भोजनानन्तर तृप्तिकी अनुपलम्भ तो नहीं होता है, किन्तु उपलम्भ ही होता है। इसलिये कर्म विधिओंमें प्रामाण्य होना कठिन है।

अज्ञात ज्ञापक ब्रह्मविधियोंमें भी परस्पर विरोध होनेसे प्रामाण्य नहीं है। "आत्मावा इदमेक एवाग्र आसीत्" (ऐ० ब्रा० २।४।१) ऐसे ऐतरेय शाखावाले भी कहते हैं, "असद्वा इदमग्र आसीत्" (तै० आ० ८।७) ऐसा तैत्तिरीय शाखावाले भी कहते हैं, यही विरोध हुआ। इस हेतुसे वेदमें समस्त ही विधि भाग अप्रामाण है, ऐसे कहनेपर कहते हैं। अच्छा इस तरहसे जर्त्तिलादि विधिको अप्रामाण्य हो उस अर्थका अनुष्ठान न होनेसे। और अनुष्ठेय अर्थ तो उपर लिखे हुए "अजाक्षीरेण जुहोति" (तै० सं० ५।४।३।२) इस वाक्यमें विधान किया जाता है और उसकी प्रशंसाके लिये यहां जर्त्तिलादिको अनुवाद कर निन्दा की जाती है। जैसे गौओंकी एवं अश्वोंकी प्रशंसाके लिये 'अपशवो वा अन्ये गवाश्वेभ्यः" (तै० ब्रा० ३।६।१०।२) अर्थवादरूप इस वाक्यसे अजादिकोंके पशुत्व की निन्दा की जाती है, वैसे ही ऐसे होनेपर अजादि पशुओंके जैसे वास्तविकमें पशुत्व है, वैसे ही जर्त्तिलादि विधि यहां निन्द्य होनेपर भी किसी शाखान्तरमें हो ऐसा कहो तो। हो ऐसा, प्रामाण्य भी उसी शाखाध्यायीके प्रति होगा। जैसे गृहस्थाश्रममें निषिद्ध भी परान्नभोभन, आश्रमान्तरमें प्रामाणिक। इस न्यायसे सर्वत्र परस्पर विरुद्ध भी विधि, निषेध, पुरुषभेदसे व्यवस्था करनी चाहिये, जैसे कि मन्त्रमें पाठभेद। शाखाभेद होनेसे व्यवस्थित होनेके कारण। तैत्तिरीय शाखावाले "वायवस्थो पायवस्थ" (तै० स० १।१।१) यह मन्त्र कहते हैं वाजसनेयी शाखावाले तो "उपायवस्थ" (वा० स० १।१) इस भागको नहीं पढ़ते हैं। किन्तु शतपथ

पथ ब्राह्मणमें (१।७।१।३) उस भागको ...
शाखान्तरीय पाठ हटाकर, तै...
स्वध्यवसाना च इति प्र...
"सूपचरणा च स्वधित्र...
भेदसे व्यवस्था की।

वैसाही विधि वाक्योंमें देखना चा...
मीमांसा वृत्तान्त तुम्हारेको शोभता है। पू...
ग्रहके ग्रहण अग्रहण दोनों विकल्प करके निर्णय किये...
कालान्तरमें होनेवाले फलसिद्धि के लिये अपूर्व (अदृष्ट) का भी निर्णय...
मीमांसामें प्रथमाध्यायके चतुर्थपादमें "कारणत्वेन चाकाशादिषु यथा...
१।४।१४) इस सूत्रमें जगत्के कारण परमात्मामें श्रुतिकी विप्रप... द्वितीय अध्यायके प्रथम पादके आरम्भाधिकरणमें "असद्व्यपदेशान्नेतिचेन्न ... वाक्यशेषात्" (ब्र० सू० २।१।१३) इस सूत्रमें तैत्तिरीय वाक्यगत असत् शब्दका शून्यपरत्व अर्थ नहीं है किन्तु अव्यक्त (अप्रकाश) अवस्थापरत्व है ऐसा निर्णय किया है। ऐसे जैमिनि भी चोदना (विधायक) सूत्रमें (१।१।२) विधिवाक्य धर्ममें प्रमाण है, ऐसी प्रतिज्ञा कर औत्पत्तिक सूत्रमें (जै० सू० १।१।५) जिस प्रामाण्यका समर्थन (दिखलाना) किया है। व्यास भी शास्त्रयोनित्व सूत्र (ब्र० सू० १।१।३) में वेदान्त वाक्योंके ब्रह्ममें प्रामाण्य दिखाकर "तत्तु समन्वयात्" (ब्र० स० १।१।४) इत्यादि सूत्र द्वारा समर्थन (समझाना) किया है। इसलिये अमीमांसक (मीमांसाको न जाननेवाला) तुम्हारा ही पूर्वोक्त स्थाणु अन्धन्याय दुष्परिहर है। इसलिये विधि भागका प्रामाण्य ठीक ही है।

अर्थवाद भागका प्रामाण्यको जैमिनि बहुत प्रयत्नसे देखाये हैं, उन सूत्रोंके व्याख्याको करेंगे। वहांपर पूर्वपक्ष दिखाते हैं—"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" ॥१॥ (जै० सू० १।२।१) क्रिया (कर्म) प्रतिपादनके लिये समस्त वेदोंके प्रवृत्त होनेके कारण अक्रिया प्रतिपादक अर्थवाद वाक्योंके कोई भी स्वार्थविवक्षित नहीं है। वे अर्थवाद समूह इस तरह कहे जाते हैं—"सोऽरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वम्" (तै० स० १।५।१।१) "स आत्मनोवपामुदखिदत्" (तै० स० २।१।१।४) देवावै देवयजनमध्यवसाय दिशोन प्रजानन्" (तै स० ६।१ ५।१) इति। जिसलिये ऐसे वाक्यका कोई भी विवक्षित अर्थ नहीं है। इसी हेतुसे यह वाक्य सब अनित्य कहे जाते हैं। यद्यपि अनादि होनेके कारण स्वरूपसे अनित्यत्व नहीं है, तो भी धर्मोंका अवबोधन (समझाना) लक्षण (स्वरूप) नित्यकार्यके अभाव होनेसे, अनित्य काव्यालापोंसे समान होनेके कारण अप्रमाण है ॥१॥

...नेके योग्य धर्ममें प्रामाण्याभाव होनेपर
...नतः प्रामाण्यको दोष लगानेको
...रोध देखनेसे अप्रामाण्य
...ऐसा जानकर सूत्रके
१।२।२) अर्थ विरोध तीन प्रकारके होते
...वरोध, इस तरह तीनप्रकारके विरोध,
स्तेनं मनोऽनृतवादिनी वाक्" यहांपर देखा जाता
...की मिथ्याबोलना, ये दोनों प्रतिषेध शास्त्रसे विरुद्ध है।
...शे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूमः" (तै० ब्रा० २।१।२।६।१०
... तथा "न चैतद्विद्मो वयं ब्राह्मणा वास्मोऽब्राह्मणा वा" (तै स० १।४।११)
यहांपर ... है। "कोहितद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वा" (तै० स० ६।१।१।१)
यहांपर शास्त्रदृष्ट... "स्वर्गकामो यजेत" इत्यादि शास्त्रमें तो आमुष्मिक (परलोक) फल देखते हैं। इसलिये विरोध होनेके कारण अर्थवादोंके अप्रामाण्य ही सिद्ध हुआ ॥२॥

शंका—यदि कहो!—"सोऽरोदीद्" (तै० सं २।१।१।४) इत्यादि वाक्योंके निष्प्रयोजन हेतुक एवं "स्तेनं मनः" (तै० सं २।१।१।४) इत्यादि वाक्योंका भी विरोध हेतुक अप्रामाण्य होनेपर भी फल प्रतिपादक अर्थवादोंके उनदोनोंसे विलक्षण होनेके कारण ही प्रामाण्य, ऐसीशंकाकर उत्तर दिखाते है। "तथा फलाभावात्" इति (जै० स १।२।३) अर्थ—जैसा प्रमाणान्तरविरुद्ध अर्थवादोंसे कहा गया, वैसा ही फल भी अविद्यमान ही उससे कहा जाता है। जैसे—गर्गत्रि त्रिरात्रको लेकर कहा जाता है "शोभतेऽस्यमुखं य एवं वेद"(ता० ब्रा० २०।१६।६ इति अर्थ जो ऐसा जानता है उसका मुख शोभमान देखा जाता है। दर्शपूर्णमास यागमें वेदाभिमर्शन को लेकर कहा जाता है "आऽस्यप्रजायां वाजी जायते यएवं वेद" इति अर्थ---जो ऐसा जानता है उसकी प्रजाओंमें वेगवान् उत्पन्न होता है। और न तो हमलोक जाननेवालोंके उस फलको ही देखते हैं ॥३॥

शङ्का यदि कहो! ऐहिक फलवाक्योंके परस्पर विरोध होनेसे अप्रामाण्य होनेपरभी पारलौकिक फलवाक्यों का प्रामाण्य हो ऐसी शाङ्काकर उत्तर दिखाते हैं—"अन्यानर्थक्याद्" इति (जै० सू० १।२।४)। ऐसा देखा जाता है—"पूर्णाहुत्या सर्वान् कामानवाप्नोति" (तै० ब्रा० ३।८।१०।५)। "पशुबन्धयाजी सर्वांल्लोकानभिजयति"। "तरतिमृत्यं, तरति पाप्मानं, तरति ब्रह्महत्यां" योऽश्वमेधेन यजते। य उचैनमेवं वेद (तै० स० ५।३।१२।२) इति। वहांपर अग्न्याधेयगत पूर्णाहुतीद्वारा समस्त काम प्राप्ति होनेसे अन्य अग्निहोत्रादि उत्तर (पश्चात्) काल में फल देनेवाले अनर्थक ही हो जांयगें। और निरूढ़ (नियमित) पशुबन्धानुष्ठानसे समस्त

सारस्वते तृचे या प्रथमा सान्वारम्भणीयेष्टौ सरस्वत्याः पुरोनुवाक्या। तथा "दर्शपूर्णमासावारप्स्यमान" इत्यस्मिन् खण्डे "पावका नः सरस्वती पावीरवी कन्या चित्रायुः" (आ. २।८) इति सूत्रितम्। तामेतामृचमाहः—

पावका नः सरस्वती वाजेभिर्वाजिनीवती।

यज्ञं वष्टु धियावसुः ॥१०॥

पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती।

यज्ञम्। वष्टु। धियाऽवसुः ॥१०॥

अन्ते चायमोंकारस्त्रिमात्रो वाक्यस्य टेः स्थाने कर्तव्य इति आश्वलायनेन वचनादुक्तवाक्यटेः स्थाने स उपजातः। अयमाहाव इत्युच्यते। पच्छ्यां पुरोरुचि त्रिरवस्येद् इति तत्र, त्रिरवस्यानं पुरोरुगन्ते पठ्यमानतृचे तत्र प्रत्यर्द्धर्चमवसानं कर्तव्यम्। उत्तमातु न वक्तव्या। उत्तमाया वचने तत्र विकल्प उक्तः। तत्र कल्पेऽनुष्ठाने विशेषोऽपि तत्रोच्यते यद्यशंसनपक्षस्तदानीं माधुच्छन्दसं प्रउगं न भवतीति। तदुक्तमाश्वलायनेन—"वायुरग्रेगा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्तृचं तृचं शंसेद्वायवायाहिदर्शतेति सप्त तृचा द्वितीयः प्रउगे त्रिः पुरोरुग्भ्य आह्वयीत पच्छ्यां त्रिरवस्येदर्द्धर्चेऽर्द्धर्चं उत्तमां न शंसेच्छंसत्येके तृच आह्वानमशंसनेऽमाधुच्छन्दसं प्रउगमित्याचक्षते" इति।

(१)वेदोक्तप्रक्रिययाऽरणिनिर्मन्थनपूर्वं निष्पादितानामाहवनीयादीनामग्नीनामजस्रं धारणं द्वादशदिनपर्यन्तं वान्ततोऽनुष्ठायाग्निहोत्राख्यहोमौ सायं प्रातरनुष्ठाय पर्वणि दर्शपूर्णमासाख्ययागयोरारम्भतः पूर्वमन्वारम्भणीयानामिकेष्टिरनुष्ठीयते। तत्र पौर्णमास्याः पूर्वं पुण्याहवाचननान्दीश्राद्धं रात्रावुदकशान्त्याख्यं कर्मानुष्ठाय यजमानस्य पत्न्याश्च हस्ते प्रतिसरसञ्ज्ञिते सूत्रे मन्त्रिते आबध्य प्रातः स्नानाद्यनुष्ठाय शक्त्यनुसारं यावज्जीवादिकल्पेन दर्शपूर्णमासानुष्ठानसंकल्पं करोति यजमानः—'यावज्जीवं दर्शपूर्णमासाभ्यां यक्ष्ये' इत्यादिरूपम्। ततोऽन्वारम्भणीयया यक्ष्ये इति संकल्प्य विहरणपक्षे अग्नीं विहरति। आधाननिष्पादितानां त्रयाणामग्नीनां पूर्वोक्तं सर्वदा धारणमजस्रधारणशब्देनोच्यते। पक्षान्तरे केवलं गार्हपत्यस्यैवाजस्रं धारणमितरयोस्तु कर्मकाले गार्हपत्याग्नेरंशतो नयनेन तत्सम्पादनं विहरणशब्देनोच्यते। अस्यामिष्टौ पौर्णमासानुष्ठानरीतिवदन्वाधानव्रते अनुतिष्ठति। अन्वाधानेऽत्र कर्मणि प्रधानदेवता :—अग्नाविष्णू, सरस्वती, सरस्वान्, अग्निर्भगी इति। ततः सारस्वतहोमादिकमनुष्ठीयते। तत्र आग्नावैष्णव एकादशकपालः पुरोडाशयागः। सरस्वत्यै चरुः। सारस्वतो द्वादशकपालः, अग्नये भगिने अष्टादशकपाल इति यागाः पूर्णमासतन्त्रेणानुष्ठीयन्ते। तत्राग्नाविष्णवोः—अग्नाविष्णू सजोषसेति अनुवाक्या, अग्नाविष्णू महि धाम प्रियं वामिति याज्या, सरस्वत्याः– पावका नः सरस्वतीति अनुवाक्या, पावीरवी कन्या चित्रायुरिति याज्या। सरस्वतः– पीपिवांसं सरस्वत इत्यनुवाक्या, दिव्यं सुपर्णं वायसमिति याज्या, अग्नेर्भगिनः– आ सर्वं सवितुर्यथेत्यनुवाक्या, स नो राधांस्याभरेति याज्या। अवशिष्टं सर्वं पौर्णमासवदनुष्ठेयम्। गोमिथुनं दक्षिणेति विशेषः। इयमिष्टिरन्वारम्भणीयाशब्देनोच्यते। तत्र प्रधानायाः

सरस्वती = देवी वाजेभिः = हविर्लक्षणैरन्नैर्निमित्तभूतैः। यद्वा यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैर्नोऽस्मदीयं यज्ञं वष्टु = कामयताम्। कामयित्वा च निर्वहत्वित्यर्थः। तथा चारण्यककाण्डे श्रुत्यैव व्याख्यातम्—"यज्ञं वष्ट्विति यदाह यज्ञं वहत्वित्येव तदाहे"ति (ऐ. आ. १।१।४)। कीदृशी सरस्वती? पावका = शोधयित्री। वाजिनीवती = अन्नवत्क्रियावती। धियावसुः = कर्मप्राप्यधननिमित्तभूता। वाग्देवतायास्तथाविधं धननिमित्तत्वमारण्यककाण्डे श्रुत्या व्याख्यातम्—"यज्ञं वष्टुधियावसुरिति वाग्वै धियावसुरिति" (ऐ. आ. १।१।४) ॥१*

सरस्वत्या देवतायाश्चरुयागे ऽनुवाक्यात्वेन पावकान इत्यस्या विनियोग इति उपर्युक्तमाश्वलायनेन श्रौतसूत्रे विनियोजितमिति दर्शयति भाष्यकारः।

(१) पावकान इत्यस्यामृचि सरस्वतीवाजिनीवतीतिशब्दद्वयं प्रयुज्यते विशेष्यत्वयोग्यम्। तत्रैकस्मिन्वाक्ये ऽसति समुच्चये एकवचनान्तक्रियापदयोगे विशेष्यद्वयप्रयोगस्यायुक्तत्वादेकस्य विशेष्यत्वमपरस्य विशेषणत्वमिति वक्तव्यं, तत्र किं विशेष्यं किंच विशेषणं कुतश्चेति विचारे भाष्यकारोऽनुक्रमणिकाकारानुसारेण सरस्वतीपदस्य विशेष्यत्वं वाजिनीवतीति तद्विशेषणमिति गृहीत्वा व्याचचक्षे। विनिगमनाविरहस्तु तावताऽनिवारितो भवतीति विचार्यमत्र। तत्र यथा सरस्वतीपदं निघण्टौ दैवतकाण्डे देवताबोधकत्वेनोच्यते एवं वाजिनीवतीशब्दोऽपि तत्रैवोषोनामसु पठ्यते। उषसश्च देवत्वं दैवतकाण्डतो व्यक्तं भवति। एवं सति वाजिनीवतीशब्दस्यापि उषोरूपदेवताबोधकत्वेन प्राधान्यं भवितुमर्हति। प्रसिद्धेर्वैदिकप्रयोगस्य चोभयत्र समत्वात्। एकस्य प्राधान्येऽपरस्याप्राधान्यमपि यौगिकार्थग्रहणेनोभयत्र सममित्यनिर्णयः प्राधान्यविषये। यथाहि सरस्वतीपदे प्रधानत्वेनोपादीयमाने वाजिनीवतीशब्दस्यान्नवत्क्रियावतीत्यादियौगिकार्थपरत्वमेवं वाजिनीवतीशब्दस्य प्राधान्यदशायामपि सरस्वतीशब्दस्यापि सरो विद्यते यस्या इति व्युत्पत्त्या सरःशब्दस्य च सृगताविति धातुतो निष्पत्त्या गमनार्थानां ज्ञानपरत्वस्य प्रकाशपरत्वस्य च संमततया सरः प्रकाशो यस्या विद्यते सा सरस्वतीति यौगिकार्थपरत्वमपि सम्भवतीति नानयोः शब्दयोः प्राधान्याप्राधान्यनिर्णायकं किञ्चिदिति। मन्त्रे उच्यमानं पावकत्वं शोधकत्वं सरस्वत्या इवोषसोऽपि सम्भवति नैशतमोनिवारणद्वारा जगत्पावकत्वात्, धीनामवित्रीत्वमपि मन्त्रान्तरे उच्यमानं सरस्वतीवदुषसोऽपि सम्भवति रात्रौ प्राणिनां निद्राभिभूतत्वेन धीयोगाभावः प्रातश्च निद्रापरित्यागेन धीयोगवत्त्वं तच्चोषसा प्रदीयत इति तस्या अपि धीनामवित्रीत्वस्य सम्भवात्। यज्ञनिर्वाहकत्वं च देवत्वादुभयत्राविशिष्टम्। न च विनियोगानुसारेण सरस्वतीशब्दस्यैव प्राधान्यम्। अत एव "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इत्यनेन "कदाचन स्तरीरसि" इत्यादिकाया ऐन्द्र्या अपि ऋचो विनियोगानुसारेण गार्हपत्यपरतया निर्णयो मीमांसायाम्। तत्र प्रसिद्धस्यापि ऋग्गतस्येन्द्रपदस्य योगार्थपरतया ऐश्वर्यवत्त्वार्थकत्वेनाग्निपरत्वमुक्तमेवं प्रकृतेऽपि इति वाच्यम्। विनियुक्तस्य कर्मान्तर्गतस्य तस्य मन्त्रस्य सरस्वतीपरत्वेऽपि कर्मानन्तःपातित्वदशायामन्यपरत्वस्यापि सम्भवेन उक्तमीमांसकोदाहरणरीत्यैवात्रान्यपरत्वस्य वारणाभावात्। यथाहि तत्र मन्त्रे गार्हपत्योपस्थानकर्मगतस्य तस्य मन्त्रस्य गार्हपत्यपरत्वेऽपि तदनन्तःपातदशायां तस्येन्द्रपरत्वम्। अतएव तस्य ऐन्द्रीत्वेन विधिवाक्ये उल्लेखोऽपि समञ्जसो भवति। अन्यथा तस्य सर्वथा गार्हपत्यपरत्वेनैन्द्रीत्वाभावाद् "ऐन्द्र्या" इति वचनमनुपपन्नं स्यात्। एवमत्रापि कर्मानन्तःपतितस्य प्रकृतमन्त्रस्य वाजिनीवतीपरत्वस्यापि सम्भवात्। एवं च प्राधान्यविषयेऽत्रानियम इति चेन्न। सरस्वतीशब्दस्यैवात्र प्राधान्यस्वीकारस्य युक्तत्वात्। तथाहि वाजिनीवतीशब्दस्य

"श्येनः सोम" इत्यादिषु पञ्चत्रिंशत्संख्याकेषु देवताविशेषवाचिषु पदेषु "सरमा सरस्वती" इति पठितम्। एतामृचं यास्क एवं व्याचष्टे। "पावका नः सरस्वत्यन्नैरन्नवती यज्ञं

विशेषणत्वाभिप्रायेण मन्त्रे वाजेभिरिति तृतीयान्तं पदं प्रयुज्यते। कुतो वाजिनीवती एषा सरस्वतीति अनुयोगवारणार्थत्वेन वाजेभिरित्यस्य मन्त्रे प्रयोगात्। यथा लोके प्रयुज्यते धान्येन धनेन धनवान्। यथा वा वेदे "प्र वो महे सहसा सहस्वते", "त्वमग्ने सहसा सहन्तमः" "यज्ञैर्वा यज्ञवाहस" इत्यादिस्थलेषु सहस्वदादित्वं सहआदिभिः सिद्धमपि हेत्वभिप्रायेण सहसेत्यादयः शब्दा प्रयुज्यन्ते सहसा हेतुना सहस्वत्त्वमित्यादिर्यथा तत्रार्थ एवं वाजेभिर्हेतुभिर्वाजिनीवतीत्यभिप्रायेण वाजेभिरिति तृतीयान्तशब्दस्य प्रयोगात्। ततश्च वाजिनीवतीशब्दस्य यौगिकार्थपरत्वमेवेत्यप्राधान्यमेव तस्य। वाजेभिरित्यस्य हेतुतृतीयान्तताया व्याख्यातृभिः स्वीकारात्। अतएव निरुक्तकारेण पावकान इति प्रकृतमन्त्रस्य व्याख्यावसरे वाजेभिरित्यस्य वाजिनीवतीत्यनेन सम्बन्धमभिप्रेत्य अन्नैरन्नवतीति व्याख्यानं कृतम्। भाष्यकारा अपि वाजेभिरन्नैर्निमित्तभूतैरिति व्याख्यानं कुर्वन्तोऽस्य निमित्तपरतां स्वीकुर्वते। किञ्च हेतुपरत्वस्वीकारे सविधवर्तिपदार्थेन सह हेतुता वक्तव्येत व्यवहितेनेति विवेके सविधवर्त्तिनस्तादृगन्वययोग्यत्वे तत्रैवान्वयस्य लोकेऽपि सिद्धत्वेन तथा स्वीकार एव युक्तः। किञ्च निघण्टुकारै दैवतकाण्डे प्राधान्येन देवताबोधकशब्दानामेव पाठात् तत्र सरस्वतीशब्दस्य पाठदर्शनेनात्र सरस्वतीपदमेव प्राधान्येन देवताबोधकतया स्वीकर्तुमुचितं न तु वाजिनीवतीपदम्। उपसो बोधकेष्वनेकेषु नामसु सत्स्वपि उपःशब्दस्यैव प्राधान्येन दैवताबोधकत्वम्। अतस्तस्यैव तत्र पाठो नापरेषां विभावर्यादिपदानाम्। अतएव तत्र तत्र निरुक्तकारेण नैघण्टुककाण्डगतानामेकार्थानेकशब्दानां व्याख्यानप्रसङ्गे एकार्थानामनेकेषां नाम्नां मध्ये यस्य प्राधान्येन देवताभिप्रायेण प्रयोगस्तस्य पृथक्कृत्य व्याख्यानं क्रियते। यथा "अत्यः हयः" इत्यादिकानामश्वबोधकानां नाम्नां व्याख्यानावसरे तेनोक्तं "दधिक्रा इत्येतस्याश्ववद् देवतावच्च निगमा भवन्ति तस्य देवतावदुपरिष्टाद् व्याख्यास्यामः" इति। एवंच सत्स्वप्यनेकेषु नामसु किञ्चनैव प्राधान्येन देवताभिप्रायेण प्रयुज्यते न सर्वम्। यच्च तादृशं तस्य दैवतकाण्डे पाठः। एवं चोपोबोधकेषु नामसु प्राधान्येन देवताबोधनोपयोगित्वेनैकमेव नाम भवति तच्चोपा इत्येवेति तस्यैव दैवतकाण्डे प्रयोगादपरेषां मन्त्रेषु प्रयोगे ऽप्राधान्यमिति विस्पष्टं भवति। किञ्च "पावकान" इत्यादिमन्त्रत्रयस्य समानार्थप्राधान्यं दृश्यते। तत्रोपरितनमन्त्रयोः "यज्ञं दधे सरस्वती" "सरस्वती प्रचेतयति" इति सरस्वतीशब्दस्य देवतात्वेन प्राधान्येन प्रयोगदर्शनादत्रापि मन्त्रे सरस्वतीपदस्य प्राधान्येन देवतापरत्वस्य न्याय्यत्वम्। एवं च वाजेभिरिति हेतुबोधकपदस्य मन्त्रे प्रयोगात्, देवताकाण्डे प्राधान्येन देवताबोधकत्वेनास्य शब्दस्याप्रयोगात्, वैपरीत्येन सरस्वतीशब्दस्य तथात्वेन तत्र प्रयोगदर्शनात्, प्रकरणात् मन्त्रत्रयसाजात्यानुरोधात्, अनुक्रमणिकाकारादिसम्मतत्वाच्चात्र वाजिनीवतीशब्दः प्राधान्येन देवतानामत्वेनासम्भवन्नपि तच्छब्दयुक्तमन्त्रस्थले उच्यमानदेवतास्वरूपविशेषनिर्णयाय प्रभवत्येव। तथा च सरस्वती केति सन्देहे वाजिनीवतीरूपा इति निर्णयार्थत्वेन तस्योपादानं भवितुमर्हति। वाजिनीवतीत्येतद्योगरूढमुषोनामेदं तस्य विशेषणतयोपादानात्सरस्वती उपोरूपेति निर्णयात्। योगरूढत्वाच्चैकदेशयोगार्थस्य संपत्तिसाधकत्वेन वाजेभिरिति हेतूपादानमप्यत्र न विरुध्यते। एवं चोपसो विशेषा अत्र वर्ण्यमाना नासङ्गता भवन्तीति। तदेतदग्रे सुविस्तरं विचारयिष्यत इति दिक्।

*सरस्वती। वैदिकदेवेषु सरस्वत्या अपि स्तवो दृश्यते। तत्र कैषा सरस्वती देवतेत्यत्र निरुक्तकारेण विशिष्य किमपि नोच्यते केवलं सरस्वतीविषये एतदेव प्रतिपाद्यते यदस्या "नदीवद्देवतावच्च निगमा भवन्ति" इति।

वष्टु धियावसुः कर्मवसुः" (नि. ११।२६) इति। पवनं पावः शुद्धिस्तं कायतीति पावका। "कै गै रै शब्दे"। "आतोऽनुपसर्गे कः" (पा. ३।२।३)। कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वम्।

तस्यायमर्थः—सारस्वतेषु निगमेषु कुत्रचन नदीत्वेन वर्णना कुत्रचन देवतानुगुणा वर्णनेति। तावता किमेषा नद्येव देवत्वेन स्तूयते देवता वा नदीत्वेन स्तूयते उत देवता च नदीचेति द्वयं स्तुतिभाग् इति, देवतापक्षे च कैषा देवतेति, नदीपक्षेऽपि येदानीं प्रसिद्धा त्रिवेण्यादिप्रसिद्धशब्दमाहात्म्यादनुमीयमाना प्राचीसरस्वत्यादिशब्दैरलप्यमाना वोतापरा काचन नदीति नैकविधशङ्कास्थानानामनिराकरणम्। तत्र वेदस्य यज्ञार्थप्रवृत्त्या यज्ञेषु देवतानामपेक्षणेन ऋग्वेदस्य देवतास्तावकत्वेन नद्या अचेतनायाः स्तवस्याननुगुणता। यत्राप्यचेतनाः स्तूयमाना दृश्यन्ते तत्रापि तदभिमानिदेवताव्यपदेश एव तत्र। अतएवाभिमानिव्यपदेशस्तु इति सूत्रेण जैमिनिरिममर्थं सूत्रयामास। एवं चोभयवर्णनपक्षोऽयुक्तः। एवं नद्या देवत्वेन वर्णनस्याप्ययुक्ततेति देवताया एव नदीत्वेन वर्णना स्तुत्यर्थेति स्वीकार्यम्। एवं सति नदीविषयका विकल्पा निरस्तप्रायाः। देवता च लोके प्रसिद्धा वागधिष्ठात्री शारदेति व्यपदिश्यमाना विद्यास्वरूपिणी हंसवाहिनी वा तदन्या वेति विषये अन्त्यः पक्ष एव श्रेयाननुक्रमणिकाकारमतेन। साच उपाधिविशेषविशिष्टा आदित्यरूपैव। उपाधिश्च सान्ध्यः कालः। एवं च तात्कालिकः प्रकाशस्तद्विशिष्ट आदित्योऽत्र सरस्वतीत्वेन स्तूयते। तस्य सरस्वतीत्वं सरस्वत्त्वात्। सरःशब्दश्च सृधातुतो निष्पन्नस्सरणेन निमित्तेन जलमाह। अतएव निघण्टुषु जलनामसु तच्छब्दस्य पाठः। जलं तेजोरूपमेवेति पूर्वं निरूपितम्। निरूपयिष्यते चाग्रे। एवं च सरः तेजो यस्या विद्यते सा सरस्वतीति भवति। साच प्रातर्वाचां प्रवर्तिका, प्राणिनां स्वापपरित्यागेन स्वोचितव्यवहारेषु प्रवृत्तौ शब्दायमानतायाः प्रवृत्तेः, रात्रौ च वाचां निरोधिका रात्रौ प्राणिनां निलायनिलीनत्वेन सुप्यमानतया शब्दविरामात्। एवं च शब्दस्य प्रवर्तिका निवर्तिका एषैव लोके सरस्वतीत्वेन व्यपदिश्यते नान्या। एषा चोषोरूपिण्येवेति उषस एव सरस्वतीत्वं वाग्रूपत्वादिकम्। अतएवोषोनामसु सूनृता सूनृतावती सूनृतावरीति नामानि। सूनृतशब्देन प्रियसत्यात्मिका वाच उच्यन्त इति व्याख्यातारः। वस्तुतस्तु सूनृतादयः शब्दाः सूनर्यादिसमानार्थाः सम्यग्नयनमाहुः। सम्यग्नयनकर्त्री चोषा रात्रिसकाशतो दिनं प्रति इति। अथवा सम्यग् नरा नेतारो रात्रिसम्बन्धितमस्तः प्रकाशं प्रतीति नेतारः किरणा यस्यामिति वा। उषसि प्रोदितायां क्रमशो दिनप्रवृत्त्या किरणप्रवृत्तिरिति तथात्वं तस्याः। निरुक्ताचार्यैरपि निघण्टौ देवतकाण्डे मध्यमस्थानवासिदेवतानिर्देशप्रसङ्गे वाय्वादीनुक्त्वा प्रत्येकं पुंदेवान्मरुदादीन् गणांश्च निर्दिश्य मध्यमस्थानवासिस्त्रीदेवतानिर्देशप्रसङ्गे अदित्यादीनां मध्ये सरस्वती देवत्वेन निर्दिश्यते। देवतात्रयवादो नैरुक्ताभिमत इति तत्र तत्र स्थाने उच्यमाना अनेकेऽपि देवा वस्तुतोऽभिन्ना एव सन्तो विभिन्ननामभिरुच्यन्ते इति तदभिप्रेतत्वात्सरस्वत्यपि मध्यमस्थानवासिदेवता वायुरूपा वेन्द्ररूपा वा तदभिन्ना। एवं तत्रोषसोऽपि निर्देश इति सापि तद्रूपैवेति व्यक्तं भवति। एवं च तत्र कथमपि लौकिकनद्या वा वागधिष्ठात्रीत्वेन मन्यमानाया इन्द्रविभेदेनाभिप्रेयमाणाया नावसर इति तन्मतेऽपि पूर्वोक्तपूर्वपक्षो नावतिष्ठते। वस्तुतस्तु वागधिष्ठात्रीत्वेनाभिप्रेयमाणा विद्यारूपा सरस्वत्यपि वस्तुत आदित्यतो न व्यतिरिच्यते। तस्याप्युक्तरीत्या वाचां प्रवर्तकत्वेन तथात्वमप्युपपद्यते। तस्याश्चास्याः सरस्वत्या लोके शारदेति नामविशेषवत्त्वाच्छरत्कालिकस्य तस्यादित्यस्य तथात्वम्। देवतासु उदयप्रभृतितः वसन्तादिऋतुत्रयस्यापगमेन शरदः सायमस्तोत्तरं प्राप्त्या सायंतनसान्ध्यप्रकाशविशिष्टस्यादित्यस्यैव सरस्वतीत्वेन शारदात्वेन वचनम्। साच सरस्वती सायंसम्बन्धिनीति कृत्वैव वरुणसम्बन्धेन वारुणी सरस्वतीत्यपि व्यवह्रियते। अतएव सन्ध्योपासने कर्मणि प्रातःकालिकायाः

यद्वा। पुनातीत्यर्थे ण्वुलि "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप" (पा. ७।३।४४) इतीत्वस्याभावोऽन्तोदात्तत्वं च छान्दसं द्रष्टव्यम्। सरः शब्दः सर्तेरसुन्नन्तत्वादाद्युदात्तः। मतुब्ङीपोः पित्त्वादनुदात्तत्वम्। वाजेभिः। वाजशब्दो वृषादित्वादाद्युदात्तः। स ह्यष्टत्कृतत्वादाकृतिगणः।

सन्ध्यायाः सूर्यासावित्रीति देवता सायंकालिकायाश्च वारुणी सरस्वतीति देवतेति च वैदिकव्यवहार उपपद्यते। किञ्च तस्य कर्मणः सन्ध्योपासनमितिनाम। तच्च सन्ध्याया उपासनादेव। सन्ध्याकालिकं सन्ध्याया उपासनं सन्ध्योपासनम्। तच्चोपासनं पूजनपूर्वकमिति तत्तोपासकेन मार्जनादिना स्वस्य शुद्धिं संपाद्य अर्घ्यप्रदानरूप पूजनं कृत्वा गायत्रीमन्त्रेणोपास्यते। अर्घ्यप्रदानं च "सूर्यायै सावित्र्या" इति सूर्यां सावित्रीमुद्दिश्य क्रियते इति तन्नामिका प्रातस्तनी सन्ध्यैव तत्रोपास्यते इति विशदं भवति। एवं सायं सन्ध्यायामपि अर्घ्यप्रदाने 'वारुण्यै सरस्वत्या" इति मन्त्रवचनात्सायंतनी सन्ध्या वरुणसम्बन्धिनी सरस्वतीशब्दाभिलप्येति प्रतीयते। उभयोरपि सन्ध्ययोरुपासने एकस्यैव गायत्रीमन्त्रस्य विनियोगेन विभिन्नत्वेनोच्यमानयोरप्यनयोः सन्ध्ययोर्वस्तुत ऐक्यमेवेति व्यञ्जयति। किञ्च प्रथमेऽष्टके द्वितीयेऽध्याये प्रातर्युजेति सूक्ते देवपत्नीनिर्देशके मन्त्रे वरुणपत्न्या धिषणाशब्देन व्यवहाराद्धिषणाशब्दस्य च वाङ्नामत्वेन वरुणसम्बन्धिन्येव सरस्वतीति स्पष्टं भवति। अतएव तदग्रेतनमन्त्रेण वरुणानीशब्देन स्पष्टं क्रियमाणो निर्देश उपपद्यत इति तत्रैव प्रदर्शयिष्यामः।

सायन्तन्या उषसश्च देवतासु प्रवृत्त्याऽसुरेषु आदित्योदयेनोदितस्य तस्य तत्त श्वेतत्वावभासनात् मण्डलस्य कमलत्वेनापि रूपणाच्छ्वेतकमलमध्यवर्तिनी सरस्वतीतिवर्णनमप्याञ्जसं भवति। उषसश्च स्वयं श्वेतरूपत्वात्सर्वस्य जगतः स्वीयप्रकाशेन श्वेतत्वसंपादकत्वाच्च श्वेत्येति तन्नाम निघण्टावुच्यमानं समञ्जसं भवति। अर्जुनीत्येतदपि तस्या नामोक्तमर्थमेव पुष्णाति। तदभिन्नायाः सरस्वत्या अपि तथात्वेन वचनमपि सूपपन्नं भवति। सारस्वताभिध्यानबोधकश्च लौकिकः श्लोकः—या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना। या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा। धावल्यं शुभ्रवस्त्रसम्बन्धित्वं श्वेतपद्मासनत्वं जाड्यापहत्वं च निमित्तीकृत्य सरस्वतीं लक्षयन्नुक्तविधवैदिकसरस्वतीमेवाचष्टे। सरस्वत्या उषोऽभिन्नत्वादेवाश्विनो रथे दिवोदुहित्रादिपदबोध्याया उपसः समारोहणमुच्यते तच्च सरस्वत्याः सम्बन्धितयोच्यमानमपि संगच्छते सुष्टुभो वां वृषण्वसू रथे वाणीच्याहितेत्यत्र। वाणीचीशब्दो वाङ्नामसु पठ्यते सरस्वतीत्यपि। तत्र वाणीच्या अश्विनो रथे आधानवचनादुषसश्च सर्वत्राश्विनो रथे आधानारोहणादिवर्णनदर्शनादश्विनो रथे आहिता वाणीचो उषा एवेति वाणीची च सरस्वतीत्युक्तमेव निघण्टुतः सिध्यति। किञ्च बृहद्देवताकारः शौनको नैरुक्तानामिव देवतात्रयवादं समर्थयन् पार्थिवानां सर्वेषां पदार्थानामग्न्यभिन्नत्वं मध्यमस्थानगतानां सर्वेषामिन्द्राभिन्नत्वं द्युस्थानगतानां चादित्याभिन्नत्वं प्रतिपाद्य सरस्वती त्रिस्थाना भवतीत्युक्त्वा तस्याः पार्थिवत्वेऽग्न्यभिन्नत्वं मध्यमस्थानस्थितत्वे इन्द्राभिन्नत्वं द्युस्थानगत्वेचादित्याभिन्नत्वमिति स्पष्टमेव प्रतिपादितवान्। यदा चादित्याभिन्ना तदानीमेषा सूर्यात्वेनोपस्त्वेनोच्यमाना दृश्यते इति स्पष्टं प्रतिपादयति। तदुक्तं तेन—

> अग्निरस्मिन्नथेन्द्रस्तु मध्यमो वायुरेवच।
> सूर्यो दिवीति विज्ञेयास्तिस्र एवेह देवताः॥
> एतासामेव माहात्म्यान्नामान्यत्वं विधीयते।
> तत्तत्स्थानविभागेन तत्र तत्रोपलक्षयेत्॥

वाजोऽन्नमास्विति वाजिन्यः क्रियाः। 'अत इनिठनौ'' (पा. ५।२।११५) इतीनिप्रत्ययः। ताः क्रिया यस्याः सन्ति सा सरस्वती वाजिनीवती। ''छन्दसीरः'' (पा. ८।२।१५) इति मतुपो वत्वम्। मतुम्ङीपोः पित्त्वेनानुदात्तत्वादिनेः प्रत्ययाद्युदात्तत्वमेव शिष्यते। यज्ञम्। ''यजयाच'' इत्यादिना (पा. ३।३।९०) नङ् प्रत्ययस्वरेणान्तोदात्तः। वष्टु। वश कान्तौ। कान्तिरभिलाषः। ''अदिप्रभृतिभ्यः शपः'' (पा. २।४।७२) इति शपो लुक्। निघातः। धियावसुः। धिया कर्मणा वसु यस्याः सकाशाद्भवति सा धियावसुः। ''सावेकाचः'' (पा. ६।१।१६८) इति विभक्तिरुदात्ता। ''बहुव्रीहौ प्रकृत्या पूर्वपदम्'' (पा. ६।२।१) इति विभक्तिस्वर एव शिष्यते। छान्दसस्तृतीयाया अलुक्॥ १०॥*

इत्येवं देवतात्रयं तदतिरिक्तं तत्तत्स्थानगंच देवजातं तदभिन्नमिति प्रतिपाद्य पुनस्तेनोक्तम् -

अग्निभक्तिस्तुतान्सर्वानग्नावेव समापयेत्।

यदिन्द्रभक्ति तच्चैन्द्रे सूर्ये सूर्यानुगंच यत्॥ इति।

उक्तस्यैव प्रपञ्चकरणावसरे तत्तत्स्थानगताञ्चानाविधान्देवान् प्रदर्श्य तत्तदभिन्नत्वमुक्त्वा पुनरुक्तम् —

सूर्यवैश्वानराग्नीनामैकात्म्यमिह दृश्यते। इति।

तेनाग्न्यादयः सूर्यतो न व्यतिरिक्ता इति स्पष्टं भवति। अयमेव इन्द्रस्थलेऽपि न्यायः॥ एतेन न्यायेन त्रिस्थाना वागुच्यमाना मध्यमस्थानवासित्वेन सरस्वतीशब्देनाभिलप्यमाना वाग् सूर्याभिन्नेति प्रतिपन्नं भवति। किञ्च,

यदा च वाग्भवत्येषा सूर्योऽमुं लोकमाश्रिता।

तदा सूक्तमुषा भूत्वा सूर्यां च भजतेऽखिलम्॥

इत्येतेन वाण्याः सूर्यात्वमुषस्त्वं द्युस्थानगत्वं च प्रदर्श्यते इति पूर्वन्यायेन तस्या आदित्याभिन्नत्वं विस्पष्टमेव संपद्यते। किञ्चादित्यस्य हंसत्वं ''हंसःशुचिषद्'' इत्यादौ, सरस्वती च हंसवाहिनीति च पुराणे उच्यते। एवं सति हंसवाहिनी हंसारूढेति वचनम् आदित्यसमारोहाभिप्रायेणेति उक्तमन्त्रदर्शनात् प्रतीयते। उक्तं चोपरि अश्विनो रथे वाणीत्यभिन्ना सरस्वती आहितेति। उक्तं च पुरस्ताद्विस्तरेण उषसोऽश्विनो रथसमारोहो रथश्चादित्याभिन्न इति। किञ्चोषसो यथा त्रिंशद्योजनसंम्बन्धिता त्रिंशत्पदगामिता त्रिंशत्स्वसृकतोच्यते ''अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परियन्ति सद्यः'', ''त्रिंशत्पदान्यक्रमीत्'', यजुर्वेदे त्रिंशदुपस्तावके सूक्ते इत्यादिभिः, एवं वाण्या अपि त्रिंशद्धाम-पर्यन्तं विराजमानत्वं सूर्याय धानं च ''त्रिंशद्धाम विराजति वाक् पतङ्गाय धीयते'' इत्यादिना स्पष्टमुच्यते। प्रदर्शयिष्यतेऽयमर्थ उपरिष्टाद्विस्तरेण। एवं च सायन्तन्युषाः सरस्वती तस्याश्चोषसोंऽशुमतीत्वं प्रतिपाद्य ततः परस्तात्कृष्णस्यासुरस्य दशसहस्रयुतस्यावस्थानं तस्यचेन्द्रेण वध इत्यादि ''अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः'' इत्यादिस्थले उच्यमानं सूपपद्यत इत्यवसरान्तरे प्रदर्शयिष्यते। एतावतोषःपरत्वे सरस्वत्या मन्त्रार्थे कश्चन विशेषः प्रतिपन्नो भवतीति स दिक्प्रदर्शनिकया पूर्वमुक्तो मन्त्रव्याख्यानप्रसङ्गे। एवमादिबहुलमत्र वर्ण्यते कैश्चन तदपि विज्ञेयमिति सङ्क्षिप्य अत्र निवेशितमिति दिक्।

* पावका। पूञ्धातोः कर्तरि ण्वुल् बाहुलकादित्त्वाभावः स्त्रियाम्। तत्र धातोः स्वरस्य ''आद्युदात्तश्च'' इति प्रत्ययस्वरेण निवृत्तौ तस्याप्यपवादकेन प्रत्ययगतलित्त्वनिमित्तकेन ''लिति''तिस्वरेण प्रत्ययात्पूर्वस्योदात्तत्वे धातु-

स्क०—सारस्वतोऽयं सप्तमस्तृचः। सरस्वतीदेवतोऽयम्। पावका शोधयित्री अंहसां पापानामपनेत्री अथवा तारयित्र्युदकानाम्, नोऽस्माकं स्वभूतम्, सरस्वती मध्यमस्थाना वाक्, कीदृशी? वाजेभिर्वाजिनीवती। यजमानेभ्यो यानि ददाति तैरन्नैरन्नवती। अथवा हविर्लक्षणैरन्नैर्युक्ता। वाजिनीवती। वाजो बलं वेगो वा तद्वती वाजिनी काऽसौ? सरस्वत्याः स्वभूता सेना तद्वती वाजिनीवती सरस्वती। अथवा वाजो हविर्लक्षणमन्नम्, तद् यस्यामस्ति सा वाजिनी

स्वरेणैवात्र स्थेयं परन्तु मन्त्रे पावकाशब्दस्यान्तोदात्तत्वेन प्रयोगाच्छान्दसत्वादत्रान्तोदात्ततेति भाष्यकारः। अत्र भाष्यकारेण अपराऽप्येका व्युत्पत्तिः प्रदर्शिता—पवनं पावस्तं कायतीति। तत्र पूधातोर्घञि पावः, तदुपपदात् कै शब्दे इतिधातोः "आतोऽनुपसर्गे कः" इति कप्रत्ययः। तत्र धातोः स्वरस्य प्रत्ययस्वरेण तस्यापि ञित्स्वरेण बाधे प्राप्ते तस्यापि ञित्स्वरस्य विशेषविहितेन "कर्षात्वतो घञोऽन्त उदात्त" इति सूत्रेणान्तस्योदात्तः शेषनिघातेन पाकारोऽनुदात्तः। कैधातोः के प्रत्यये धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तिरिति कशब्दे प्रत्ययाद्युदात्ततैव। ततः पावकशब्दयोः समासे समासस्येत्यन्तस्योदात्तत्वं शेषनिघातेनाद्ययोः पावेत्यचोरनुदात्तत्वमिति। ततस्त्रियां टापि तस्य पित्त्वादनुदात्तत्वम्। तस्य पावकशब्दावयवान्तोदात्तककाराकारेण सवर्णदीर्घरूपैकादेशे एकादेशस्योदात्तानुदात्तोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वमिति पावकाशब्दोऽन्तोदात्तः संपद्यते। अत्र पक्षे पावका इत्यत्रावग्रहाकरणं दोषः। इत्वाभावश्च स्वरसेनैवोपपद्यते। अवग्रहाभावः सन्देहतो न भवेदिति सत्त्वेऽपि तद्व्युत्पत्तिमुक्त्वा व्युत्पत्त्यन्तरप्रदर्शनतो भाष्यकारस्य पूर्वव्युत्पत्तावरुचिः प्रतीयते। तद्बीजंतु पावकशब्दस्य स्वरसतः पवनकर्त्रर्थकत्वेनातिप्रसिद्धत्वम्, द्वितीयव्युत्पत्तेश्चात्यन्तमप्रसिद्धत्वं च। केवलमित्वाभावः स्वरश्च छान्दसत्वादुपपादनीयौ प्रसिध्दिबलादिति तथोपपाद्य प्रदर्शितौ भाष्ये। नः। "अनुदात्तं सर्वमपादादौ" इत्यधिकारे "बहुवचनस्य वस्नसौ" इत्यनेन अस्मच्छब्दस्य षष्ठीबहुवचनान्तस्य स्थानेऽनुदात्तनसादेशविधानान्न इति पदमनुदात्तम्। सरस्वती। सृधातोरसुन् ततो मतुप् स्त्रियां ङीप् च। तत्र धातोः स्वरस्य प्रत्ययस्वरेण "आद्युदात्तश्चे"त्यनेन बाधे प्राप्ते तस्यापि प्रत्ययगतनित्त्वनिमित्तकेन "ञ्नित्यादिर्नित्यम्" इति नित्स्वरेण बाधादत्र धातुस्वर एव नित्स्वरेण अनुमन्यते इति सरःशब्द आद्युदात्तः। ततः परवर्तिमतुपः पित्त्वादनुदात्तत्वं ङीपोऽपि पित्वेन तथैवानुदात्तत्वम्। तत्र रेफाकारस्य सकाराकाररूपोदात्तात्परत्वेन "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। परवर्तिनोः स्वतीशब्दगतस्वरयोस्तु स्वरितात्परत्वात्प्रचयः पदपाठे। संहितायांतु वाजेभिःशब्दावयववाकाररूपोदात्तस्य परवर्तित्वेन तीशब्देकारस्य "उदात्तस्वरितपरस्य सन्नतर" इति सन्नतरत्वम्। वाजेभिः। वजधातोर्गत्यर्थाद् "अकर्त्तरि च कारके सञ्ज्ञायामि"ति घञ्। "अजिव्रज्योश्चे"त्यत्र चकारोऽनुक्तसमुच्चयार्थ इति कुत्वाभावः। अतएव न्यासकार आह—"चकारस्यानुक्तसमुच्चयार्थत्वात्कुत्वप्रतिषेधे सिद्धो भवति वाज इति" इति। निगम्यते अभिगम्यते च तदन्नं सर्वैः। गच्छति अनेन आत्तेन सुखानि भुङ्क्ते तृप्तिं वा गच्छति अनेन शुद्धेन सत्त्वशुद्धिं गच्छति भोक्ता वा। तदाहुः आहारशुद्धौ सत्वशुद्धिरिति। यद्वा गत्यर्थानां बुद्ध्यर्थत्वात् गच्छति जानात्यनेन भुक्तेन धर्मम्। "दश धर्मान्न जानन्ति धृतराष्ट्र निबोधय। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः" इति महाभारतात्। इति देवराजसम्मतव्युत्पत्तिप्रकारः। दुर्गाचार्यस्तु वाधातोर्णिजन्तादचि प्रत्यये तच्छब्दसिद्धिमाह धातूनामनेकार्थत्वादत्र वाधातोः पूजायां वृत्तिः। एवं च वाजयितव्यं पूजयितव्यमेतद्भोजनायोपस्थितं भवतीति वाज इति तेनोक्तम्। वाधातोर्विधूननार्थाज्जुक् इति पाणिनिना "वो विधूनने जुगि"ति सूत्रेण वर्णनाद्वाधातोः कम्पनार्थादेवोक्तप्रत्ययेन वाजः। वाजयति कम्पयति

यागसन्ततिस्तद्वती सरस्वती यज्ञं वष्टु कामयताम्। कामनेनात्रागमनं सम्भजनं च लक्ष्यते। यो हि यं कामयते स तमागच्छति सम्भजति च। आगच्छतु सम्भजतां चेत्यर्थः। धियावसुः प्रज्ञावसुः ; प्रज्ञया छादयित्री सर्वार्थानाम् ॥ १० ॥

वे०—शोधयित्र्यस्माकं सरस्वत्यन्नैरन्नवती यज्ञं वहतु कामयतां वा प्रज्ञया सर्वेषां वासयित्री ॥ १० ॥

यदनाशितं सदिति तद्व्युत्पत्तिः। सर्वथा अच्प्रत्ययेन प्रकृते वाजशब्दः साधनीयः। एवं च वजधातोर्घञि वाधातोर्वा णिजन्तादचि वाजशब्दस्तस्मात्तृतीयाबहुवचने बाहुलकाद्भिस ऐसादेशाभावे रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायामत्र पूर्वकल्पे प्रत्ययगतञित्त्वनिमित्तकेन "ञ्नित्यादिर्नित्यमि"ति प्रत्ययादित्वं बाधित्वा ञिदन्तस्यादेरुदात्तत्वविधानेन अत्र धातुस्वर एवानुमन्यत इति वाजशब्द आद्युदात्तः शेषनिघाते-नान्तस्यानुदात्तत्वे तस्योदात्तात्परत्वात्स्वरितत्वम्। ततो भिसः प्रत्ययस्य प्रत्ययत्वादाद्युदात्ते प्राप्ते तदपवादेन "अनुदात्तौ सुप्पितौ" इत्यनेनानुदात्तत्वम्। तन्निमित्तकस्य जकाराकारस्य एकारादेशे तस्यानुदात्तत्वेन स्थानि-वत्त्वेनानुदात्तत्वम्, तस्य च पुनरुदात्तात्परत्वात्स्वरितत्वम्। भिस इकारस्य तु स्वरितात्परत्वात् प्रचयः। वाजिनीवती। वाजो बलं वेगो वा तेन युक्ता वाजिनी तद्वती वाजिनीवती, यद्वा वाजो हविर्लक्षणमन्नादि यस्या अस्ति सा वाजिनी हविःसन्ततिः, तद्वती वाजिनीवती. अथवा वाजः अन्नं तद्वती वाजिनी अन्नसन्ततिस्तद्युक्ता वाजिनीवती। अथवा द्वावेतौ मत्वर्थीयौ तयोरैकार्थ्येनातितरो मत्वर्थः। तथाचातिशयेनान्नवती वाजि-नीवतीति देवराजयज्वसम्मता व्युत्पत्तिः। मतुपो वत्वं तु "संज्ञायाम्" इति वा "छन्दसीर" इति वा विज्ञेयम्। भाष्यकारेण तु वाजोऽन्नमास्विति वाजिन्यः क्रियाः। "अत इनिठनावि"ति इनिप्रत्ययः। ताः क्रिया यस्याः सन्त्येषा वाजिनीवती सरस्वतीति व्युत्पादितम्। सर्वथा वाजशब्दादिन् ततो मतुबिति प्रत्ययद्वयेन तच्छब्द-व्युत्पादनम्। तत्र वाजशब्दः पूर्ववदाद्युदात्तः। तत इनिप्रत्यये प्रत्ययस्वरेण वाजिशब्दोऽन्तोदात्तः शेषनिघाते-नादेरनुदात्तत्वम्। ततः स्त्रियाम् "ऋन्नेभ्य" इति ङीपि प्रत्यये तस्यापि पित्त्वेनानुदात्तत्वमिति वाजिनीशब्दो मध्योदात्तः। ततो मतुपि तस्य पित्त्वाद् "अनुदात्तौ सुप्पितावि"त्यनुदात्तत्वेन वाजिनीवत् शब्दे द्वितीय एवोदात्तः। ततः स्त्रियाम् "उगितश्चे"ति ङीपि तस्यापि पित्त्वेन वाजिनीवतीशब्दे द्वितीय उदात्तः, शिष्टाः सर्वेऽप्चोऽनुदात्ताः। तत्र प्रथमस्योदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इति सन्नतरः। तृतीय-स्योदात्तात्परत्वात् "उदात्तादनुदात्तस्य" इति स्वरितः। चतुर्थपञ्चमयोस्तु "स्वरितात्परेषामनुदात्तानाम्" इति प्रचितत्वम्। यज्ञम्। यज्धातोर्नङि प्रत्यये ततोऽमि यज्ञमिति पदम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण शेषनिघातेनानुदात्तत्वेऽन्तोदात्तो यज्ञशब्दः। ततोऽमः प्रत्ययस्य सुप्त्वादनुदात्तत्वेन तेन सह यज्ञशब्दाकारस्य "अमिपूर्व" इति पूर्वरूपस्य "एकादेश उदात्तेनोदात्त" इति उदात्तत्वम्। वष्टु। वशधातोरादादिकाल्लोटि शपि तल्लुकि लोटो लकारस्य प्रथमपुरुषैकवचनतिप्रत्ययस्येकारस्योत्वे शकारस्य धात्वन्तस्य "व्रश्चभ्रस्जसृजमृजयजराज-भ्राजच्छशां षः" इति षत्वे तकारस्य ष्टुत्वे वष्टु इति रूपम्। तत्र धातो"र्धातो"रित्यन्त उदात्तः, तिपः प्रत्ययस्य पित्त्वेनानुदात्तत्वेन वष्टुशब्दे धातोः स्वर एवावशिष्यते, परमत्र वष्टुशब्दस्यातिङन्तपदात्परत्वेन "तिङ्ङतिङः" इति सूत्रेण सर्वनिघाते वष्टुशब्दीयस्वरद्वयमनुदात्तम्। तत्राद्यस्योदात्तात्परत्वेन स्वरितः संहितायां द्वितीयस्यतु स्वरितात्परत्वात्प्रचयः। धियावसुः। ध्यैधातोः क्विपि संप्रसारणे परपूर्वत्वे दीर्घे च धीशब्दस्ततस्तृतीयैकवचने

द्वितीयामृचमाह :—

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥११॥

चोदयित्री । सूनृतानाम् । चेतन्ती । सुऽमतीनाम् ।
यज्ञम् । दधे । सरस्वती ॥११॥

या सरस्वती सेयमिमं यज्ञं दधे = धारितवती । कीदृशी ? सूनृतानाम् = प्रियाणां सत्यवाक्यानां चोदयित्री = प्रेरयित्री । सुमतीनाम् = शोभनबुद्धियुक्तानामनुष्ठातॄणां चेतन्ती = तदीयमनुष्ठेयं ज्ञापयन्ती ॥

चोदयित्री । चुद प्रेरणे । ण्यन्तात्तृच् । चित्त्वादन्तोदात्तः । "ऋन्नेभ्यो ङीप्" (पा. ४।१।५) इति ङीप् । तस्य "उदात्तयणो हल्पूर्वात्" (पा. ६।१।१७४) इत्युदात्तत्वम् । सूनृतानाम् । "ऊन परिहाणे" इत्यतः "क्विप्चे"ति (पा. ३।२।७६) क्विपि सुतरामूनयत्यप्रियमिति सून इति प्रियमुच्यते । तच्च तदृतं सत्यं चेति सूनृतम् । "परादिश्छन्दसि बहुलम्" (पा ६।२।१९९) इत्युत्तरपदाद्युदात्तत्वम् चेतन्ती । "चिती संज्ञाने" । अत्र शपो ङीपश्च पित्त्वादनुदात्तत्वम् ।

टाप्रत्यये तस्मिन्परतो धीकारस्य "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" इति इयङादेशे धियाशब्दः । वसधातोश्चौणादिके "इदसृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चे"त्यौणादिकेन उप्रत्यये वसुशब्दः । तत्र ध्यैधातो- "धीतोरि"त्यन्त उदात्तः । संप्रसारणस्य यकारस्थानिकत्वेन यकारस्य व्यञ्जनत्वा"द्व्यञ्जनमनुदात्तमि"त्यनुदात्तत्वेन तत्स्थानिकसंप्रसारणेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम् । परवर्तिन एकारस्य पूर्वरूपैकादेशे पूर्वस्य संप्रसारणस्यानुदात्तत्वादैकारस्य धातुस्वरेणोदात्तत्वात्तदुभयस्थाने जातस्य पूर्वरूपैकादेशनिष्पन्नस्यैकारस्य "एकादेश उदात्तेनोदात्त" इति सूत्रेणोदात्तत्वम् । तत्स्थाने जातस्य दीर्घस्य तु स्थानिवत्त्वेनोदात्तत्वमिति धीशब्दोऽन्तोदात्तः । तत स्तृतीयैकवचनटाप्रत्यये तस्य सुप्त्वादनुदात्तत्वे प्राप्ते "सावेकाचस्तृतीयादिर्विभक्तिरि"तिसूत्रेणोदात्तत्वम् । शेषनिघातेनाद्यस्य धीकारस्यानुदात्तत्वम् । ततष्टान्निमित्तकेयङादेशीयेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वमिति धियाशब्दोऽन्तोदात्तः । वसुशब्दे धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायां "ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये" इति वसुशब्दे आदिस्वरस्य शेषः । उकारः शेषनिघातेनानुदात्तः । तस्योदात्तात्परत्वात् स्वरितत्वं वसुशब्दे । ततो बहुव्रीहौ "समासस्ये"ति प्राप्तस्यान्तोदात्तत्वस्यापवादकेन बहुव्रीहिस्वरेण धियाशब्दस्य प्रकृतिस्वरकत्वविधानात् धियावसुशब्दे द्वितीय उदात्तः । शिष्टा अनुदात्ताः । तत्र प्रथम उदात्तपर इत्यनुदात्त एवावतिष्ठते । तृतीय उदात्तात्परत्वात्स्वरितश्चतुर्थः स्वरितात्परत्वात्प्रचितः ।

शतुश्चानुदात्तेत्वादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वम्। धात्वन्तस्वर एव शिष्यते। सुमतिशब्दस्य मतुपि ह्रस्वत्वाद् "नामन्यतरस्याम्" (पा. ६।१।१७७) इति विभक्तेरुदात्तत्वम् ॥ ११ ॥*

* चोदयित्री। चुद प्रेरणे ण्यन्तात् तृचि प्रत्यये स्त्रियां ङीपि चोदयित्रीति पदम्। तत्र धातोरिति धात्वन्तस्योदात्तत्वस्य णिजगतचित्त्वप्रयुक्तस्वरेण बाधे णिजन्तस्य चित्त्वनिमित्तकः "चितः" इत्यन्तोदात्तः। णिजन्तस्य "सनाद्यन्ता" इति धातुत्वेन "धातोरि"त्यनेनापि स एव स्वरः। ततस्तृचि प्रत्यये तस्य चित्त्वेन चित्त्वनिमित्तकः स्वरस्तृजन्तेऽन्तोदात्तरूपः। स च सति शिष्ट इति पूर्ववर्तिनां सर्वेषां शेषनिघातः। तृच आर्द्धधातुकत्वेनेटि तस्यागमत्वेनानुदात्तत्वम्। तस्मिन् परतो णिचो गुणेऽयादेशे चानुदात्तत्वमेव स्थानिवत्त्वेन। ततस्तृजन्तात्स्त्रियाम् "ऋन्नेभ्यो ङीबि"ति ङीपि तस्य पित्त्वेन सुप्पितावनुदात्तावित्यर्थकेन "अनुदात्तौ सुप्पितावि"ति सूत्रेणानुदात्तत्वम्। तस्मिंश्चानुदात्ते परे तृच ऋकारस्य यणादेश इति "उदात्तयणो हल्पूर्वादि"ति उदात्तत्वम् इति चोदयित्रीशब्दोऽन्तोदात्तः पूर्ववर्तिनोऽचस्त्वनुदात्ताश्रयः। सूनृता। सुपूर्वात् "ऊन परिहाणे" इत्यस्मात् क्विप्। सुष्ठु ऊन्यतेऽप्रियैरिति सून्। ऋतशब्दश्च ऋधातोः क्ते प्रत्यये। तयोः कर्मधारयः-सूँश्च तदृतं चेति सूनृतम्। पृषोदरादित्वान्नकारलोपाभावः। ततो मत्वर्थीयोऽकारः प्रत्ययो वाणीपरत्वे, वाक्यपरत्वेतु न। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तितः पूर्वं प्रत्ययस्य णिचः क्विपि लोपः। ततो धातुस्वरोऽवशिष्यते। तस्य सुशब्देन समासे समासान्तोदात्तत्वेन "गतिरनन्तर" इत्यनेन वा सूकार उदात्तः। आद्ये कल्पे ऊन ऊकारस्योदात्तत्वे शेषनिघातेन सूकारस्यानुदात्तत्वे सु + ऊन् इत्यत्र सवर्णदीर्घे तस्यानुदात्तसुशब्दोकारोदात्तोन्शब्दीयोकारोभयस्थानिकत्वेन "एकादेश उदात्तेनोदात्त" इत्युदात्तः सूनशब्दीय ऊकारः, अन्त्ये कल्पे तु सुशब्दीयोकार उदात्तः परवर्तिन ऊनृइत्यस्य शेषनिघातेनानुदात्तत्वे सवर्णदीर्घे पूर्ववदेव स्वरः। ऋतशब्दे धातोः स्वरस्य क्तप्रत्ययस्वरेण निवृत्त्या ऋतशब्दोऽन्तोदात्तः। ततः सून्ऋतमितिशब्दयोः कर्मधारयसमासे सूनृतशब्देऽन्तस्योदात्तत्वे प्राप्ते "परादिश्छन्दसि बहुलमि"त्यनेन समासे परपदस्य ऋतमित्यस्यादिरुदात्त इति सूनृतशब्दो मध्योदात्तः। तकाराकारस्योदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। ततष्षष्ठीबहुवचने आमि नुटि पूर्वाकारस्य दीर्घत्वे सूनृतानामितिशब्दः। तत्रामः सुप्त्वेनानुदात्तत्वम्। तकाराकारस्यानुदात्तत्वेन तत्स्थानिकत्वेन दीर्घोऽप्यनुदात्तः। तस्योदात्तात्परत्वात्स्वरितः। नामस्तु स्वरितात्परत्वात्प्रचयः। चेतन्ती। "चिती सञ्ज्ञाने" इति धातोर्लटः शतरि शपि गुणे धातोः शपा सह शतुरकारस्य पररूपैकादेशे शत्रन्तात्स्त्रियाम् "उगितश्चे"ति ङीपि "शप्श्यनोर्नित्यमि"ति नुमि चेतन्तीति रूपम्। तत्र धातोः स्वरस्य शतृप्रत्ययस्वरेण बाधे प्राप्ते शतुर्लसार्वधातुकत्वेन "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्हिङोरि"त्यनेन शतुः प्रत्ययस्यानुदात्तत्वविधानाद्धातुस्वर एवात्र शिष्यते। ङीपस्तु पित्त्वादनुदात्तत्वम्। एवञ्च 'चेतन्ती' इत्यत्र चकारोत्तरवर्त्यकार उदात्तस्तकारोत्तरवर्तिनोऽकारस्यानुदात्तत्वेन तस्य पूर्ववर्त्युदात्तात्परत्वेन "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। परवर्त्तितीकारेकारस्य तु स्वरितात्परत्वात् "स्वरितात्संहितायामनुदात्तानाम्" इत्यनेनैकश्रुत्यपरपर्यायः प्रचितः। सुमतीनाम्। सुशब्दो निपातो निपातत्वादाद्युदात्तः। मतिशब्दश्च मनु अवबोधने इति धातोः "क्तिच्क्तौ च सञ्ज्ञायामि"त्यनेन क्तिच्प्रत्यये सिद्धः। तत्र "धातोरि"ति स्वरस्य "आद्युदात्तश्चे"ति प्रत्ययस्वरेण निवृत्तौ प्राप्तायां तस्याप्यपवादकेन प्रत्ययगतचित्त्वेन "चित" इति चिदन्तस्वरस्यान्तोदात्तत्वविधानेन तिशब्दस्यान्तोदात्तत्वे शेषनिघातेन धातुस्वरस्यानुदात्तत्वे मतिशब्दोऽन्तोदात्तः। ततः सुमतिशब्दयोर्बहुव्रीहौ "समासस्य" इति समासस्वरः प्राप्तस्तदपवादकेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वपदस्य प्रकृतिस्वरत्वे प्राप्ते

स्क०—चोदयत्री सूनृतानाम्। अपठितमपि वाङ्नामैतद्। मध्यमस्थाना हि सरस्वती सा च गर्जितलक्षणां वाचं चोदयति। चेतन्ती सुमतीनां सुमतीन् भक्तिपरान् यजमानान् यज्ञं दधे धारयति सरस्वती। भूमिष्ठस्य यज्ञस्य मन्त्रलक्षणवागायत्तत्वात्, तस्याश्च सरस्वत्यायत्तत्वात्॥ ११॥

वे०—चोदयित्री प्रियाणां सत्यानां प्रज्ञापयन्त्युदाराणां सुमतीनां यज्ञं धारयित्री सरस्वती मन्त्रभूता॥ ११॥

तृतीयामृचमाह :—

महो अर्णः सरस्वती प्र चेतयति केतुना।
धियो विश्वा वि राजति॥१२॥

महः। अर्णः। सरस्वती। प्र। चेतयति। केतुना।
धियः। विश्वाः। वि। राजति॥१२॥

तस्याप्यपवादकेन "नञ्सुभ्याम्" इति सूत्रेणोत्तरपदस्यान्तोदात्तत्वविधानात्सुमतिशब्दोऽन्तोदात्तः। शेषनिघातेन पूर्वयोः स्वरयोरनुदात्तत्वम्। ततष्षष्ठीबहुवचने आमि नुटि "नामी"ति दीर्घे सुमतीनामिति पदम्। तत्रामः सुप्त्वेनानुदात्तत्वे प्राप्ते प्रकृते सुमतिशब्दान्मतुपः सम्भावनायां ह्रस्वान्तत्वेन ततो विहितस्य नामः प्रत्ययस्योदात्तत्वबोधकेन "नामन्यतरस्याम्" इत्यनेन नामः पाक्षिके उदात्तत्वे शेषनिघातेन पूर्वे त्रयोऽप्यचोऽनुदात्ताः। तत्र संहितायां पूर्ववर्तिचेतन्तीपदगतस्वरितात्परत्वात्सुमतीत्येतेषां त्रयाणामनुदात्तानां मध्ये आद्ययोः "स्वरितात्संहितायामनुदात्तानाम्" इति प्रचयः स्वरः। तृतीयस्य तु उदात्तपरत्वेन "उदात्तस्वरितपरस्य सन्नतरः" इति सन्नतरः। सुमतिशब्दीयान्त्येकारस्यानुदात्तत्वेन तत्स्थाने नामि परतो जातस्य दीर्घेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वं भवतीति दीर्घेकारस्यात्र सन्नतरत्वम्। यज्ञम्। यज् धातोः "यजयाचविच्छप्रच्छरक्षो नङ्" इत्यनेन नङि प्रत्यये नकारस्य श्चुत्वेन ञकारे जञयोगे सम्पद्यमाने विशिष्टे वर्णे ज्ञकारे यज्ञशब्दः। ततोऽमि प्रत्ययेऽमिपूर्व इति पूर्वरूपे यज्ञमिति पदम्। तत्र धातुस्वरस्य प्रत्ययस्वरेण निवृत्तिरिति यज्ञशब्दोऽन्तोदात्तः। अमः प्रत्ययस्य "अनुदात्तौ सुप्पितौ" इत्यनेनानुदात्वात्तस्मिन् परतो यज्ञशब्दीयोदात्तान्त्याकारस्य तेनामा प्रत्ययेन पूर्वरूपैकादेशे निष्पन्नस्याकारस्य यज्ञशब्दीयोदात्ताकाराम्प्रत्ययीयानुदात्ताकाररूपोदात्तानुदात्तोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तत्वम् इति यज्ञंपदमन्तोदात्तम्। आदेश्च शेषनिघातेनानुदात्तत्वं तच्चोदात्तपरत्वात्तथैवावतिष्ठते। दधे। डुधाञ् धारणपोषणयोरिति धातोर्लिटि प्रथमैकवचने तप्रत्यये तस्य "लिटस्तझयोरेशिरेजि"ति एशादेशे लिङ्निमित्तकद्विर्वचने ह्रस्वेऽभ्यासस्य हलादिः शेषे दधे इति रूपम्। तत्र धातोः स्वरस्य प्रत्ययस्वरेण निवृत्त्याऽन्तोदात्तं दधेपदं प्राप्तं परन्तु अत्र यज्ञमित्यतिङन्तात्पदात्परत्वादस्य तिङन्तपदस्य "तिङ्ङतिङ" इत्यनेन सर्वानुदात्तत्वम्। तस्य संहितादशायामाद्यस्य दाकारस्य

द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च। तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता। अनया तु नदीरूपा प्रतिपाद्यते। तादृशी सरस्वती केतुना = कर्मणा, प्रवाहरूपेण, महो अर्णः = प्रभूतमुदकं प्रचेतयति = प्रकर्षेण ज्ञापयति॥ किञ्च। स्वकीयेन देवतारूपेण विश्वा धियः = सर्वाण्यनुष्ठातृप्रज्ञानानि विराजति = विशेषेण दीपयति। अनुष्ठानविषयबुद्धीः सर्वदोत्पादयतीत्यर्थः। सरस्वत्या द्विरूपत्वं यास्को दर्शयति—"तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति" (नि. २।२३) इति। एकशतसंख्याकेषूदकनामसु "अर्णः क्षोदः" (निघ. १।१२) इति पठतम्। एतामृचं यास्को व्याचष्टे "महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिविराजति" (नि० ११।२७) इति।

महो अर्णः। महदिति तकारस्य व्यत्ययेन सकारः। तस्य रुत्वोत्वगुणाः। प्रातिपदिकस्वरेणान्तोदात्तः। "एङः पदान्तादति" (पा० ६. १. १०९.) इति पूर्वरूपे प्राप्ते "प्रकृत्यान्तःपादमव्यपरे" (पा० ६. १. ११५. ।) इति प्रकृतिभावः। अर्तीत्यर्णः। "उदके नुट् च" (उ० ४. १९८. ।) इत्यसुनप्रत्ययो नुडागमश्च। केतुना। प्रातिपदिकस्वरेणान्तोदात्तः। विश्वाः। विश्वशब्दः क्वन्प्रत्ययान्त आद्युदात्तः॥ १२ ॥* ॥६॥ ॥१॥ ॥१॥

॥ इति प्रथमस्य प्रथमे षष्ठो वर्गः ॥

॥ इति प्रथममण्डले प्रथमोऽनुवाकः ॥

यज्ञंशब्दीयोदात्तात् परत्वात् "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितत्वम्। अन्त्यस्य धे इत्येकारस्य परवर्तिसरस्वतीशब्दावयवाद्योदात्तपरत्वेन "उदात्तस्वरितपरस्य सन्नतर" इति सन्नतरापरपर्यायोऽनुदात्त एव। सरस्वती। अस्य शब्दस्य स्वराः पूर्ववद्। सृधातोरसुनि सरः शब्दस्तत्र धातुस्वरस्य नित्स्वरेणाप्यनुमोदनमित्याद्युदात्तत्वम्। मतुपः पित्त्वात्परवर्तिङीपोऽपि पित्त्वादनुदात्तत्वमुभयोः। तत्रोदात्तात्परत्वात् द्वितीयः सरस्वतीशब्दे स्वरितः। परयोस्तु स्वरितात्परत्वात्प्रचयः स्वरः।

* महः। "मह पूजायामि"ति भौवादिकान्महधातोः कथादेर्वा चौरादिकाद्प्रत्ययः शतृवद्भावश्च "वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च" इत्यौणादिकेन सूत्रेण। तस्य महदिति शब्दस्य व्यत्ययेन तकारस्य सकारो मह इति शब्दे इति भाष्यकारः। महति महयति वा देवतामनेन पुरुषस्य मह्यते वा देवतात्वादित्यर्थः। यद्वा मानेन स्वगतेन परिमाणेन अन्यान्स्वस्मादूनपरिमाणाञ्जहाति अतिक्रामतीत्यर्थे मानशब्दाज्जहातेर्धातोः पृषोदरादित्वान्महशब्द इति देवराजयज्वा। तत्र प्रथमे कल्पे धातोः स्वरस्य प्रत्ययस्वरेण निवृत्तौ महशब्दोऽन्तोदात्तः शेषनिघातेनादेरनुदात्तत्वम्। उणादीनामव्युत्पत्तिपक्षे महच्छब्दे 'फिषोऽन्त" इति फिट्सूत्रेणान्तस्योदात्तः। द्वितीये कल्पे मानशब्दस्थाने मरूपादेशो मान इत्यत्र नकारस्य लोपे पूर्वस्य ह्रस्वे वा, हाधातोश्चासुनि आकारलोपादिकल्पनया वा महःशब्दः। तत्रापि विकारस्यानिर्णयेन "फिषोऽन्त" इति प्रातिपदिकस्वर एवोचितः।

स्क०—महो महत् बहु अर्णो मेघस्थमुदकम्। सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा गर्जनाख्येन। गम्भीरं हि गर्जितं श्रुत्वा महदत्र मेघ उदकमित्यवगम्यते? केतुशब्दोऽपठितोऽपि कर्मनामापि, न प्रज्ञानामैव। कुत एतत्? "वैश्वानरस्य विमितानि चक्षसे"त्यत्र प्रयोगदर्शनात्। अत्र हि चक्षसेत्यनेन प्रज्ञाया उपात्तत्वात् असन्दिग्धं केतुशब्दस्य कर्मवचनत्वम्। किञ्च धियः कर्माणि प्रज्ञा वा विश्वाः सर्वा वा विराजति। विविधं दीपयति वृष्टिद्वारेण। अथवा धियो विश्वा इति षष्ठ्यर्थे द्वितीये। राजतिरप्यैश्वर्यकर्मा। कर्मणां प्रज्ञानां वा सर्वासां विविधमीष्टे इत्यर्थः॥ १२॥

इति प्रथमस्य प्रथमे षष्ठो वर्गः॥

॥ इति प्रथमे मण्डले प्रथमोऽनुवाकः॥

तस्य महःशब्दस्यार्णे शब्दे परतोऽन्त्यसकारस्य रुत्वे उत्वे गुणे महो इति पदरूपं संहितायाम्। तत्र सकारस्य व्यञ्जनत्वेन तत्स्थानिकस्य परंपरयोत्वस्यापि "व्यञ्जनमनुदात्तमि"त्यनुदात्तव्यञ्जनस्थानिकत्वेन स्थानिवत्त्वेनानुदात्तत्वम्। तस्योकारस्य हकाराकारेणोदात्तेन सहैकादेशे एकादेशनिष्पन्नौकारस्यापि "एकादेश उदात्तेनोदात्तः" इति उदात्तः। अर्णः। ऋधातोरसुन्प्रत्यये नुडागमे गुणे चार्ण इति शब्दः। "उदके नुट् च"- त्यौणादिकं सूत्रमसुनो नुटश्च विधायकमर्तेरुदकार्थत्वे। तत्र धातुस्वरस्य प्रत्ययस्वरेण निवृत्तौ प्राप्तायामपि प्रत्ययस्वरापवादकेन प्रत्ययगतनित्त्वनिमित्तकेन "ञ्नित्यादिर्नित्यमि"त्यनेनादेरुदात्तत्वम्। शेषनिघातेनान्त्यस्यानुदात्तत्वम्। तस्य पदतादशायामुदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। संहितायां तु प्रकृते सरस्वतीशब्दीयोदात्तः पर इति उदात्तस्वरितपरस्य सन्नतर इति सन्नतरः। सरस्वती। अत्र स्वराः पूर्ववत्। केवलं संहितायां प्रशब्दाकार उदात्तः पर इति अन्त्यस्य सन्नतरः। प्र। निपातत्वात् "निपाता आद्युदात्ता" इत्यनेन उपसर्गत्वाद् "उपसर्गाश्चाभिवर्जमि"त्यनेन वा आद्युदात्तः। चेतयति। चिती सञ्ज्ञाने इति धातोर्णिचि तदन्ताल्लटि प्रथमैकवचने तिपि शपि गुणेऽयादेशे चेतयति इति रूपम्। तत्र धातोः स्वरस्य णिच्प्रत्ययगतचित्स्वरेणापवादनाच्चेतिशब्दोऽन्तोदात्तः। धातोरिकारस्य गुणोऽप्यनुदात्तेकारस्थानिक इति स्थानिवत्त्वेनानुदात्तः। ततः सन्नाद्यन्तत्वाद्धातुत्वे जातस्य लटः स्थानिकस्य तिपः प्रत्ययस्य पित्त्वेनानुदात्तत्वम्। तन्निमित्तकशपोऽपि पित्त्वेनानुदात्तत्वमेव। तन्निमित्तकस्य गुणस्योदात्तेकारस्थानिकत्वेन स्थानिवत्त्वादुदात्तत्वम्। तत्स्थानिकस्यायादेशस्यापि उक्तवदेव स्थानिवत्त्वादुदात्तत्वमिति चेतयतिशब्दे द्वितीय उदात्तः प्राप्तः परंतु प्रकृते तस्य शब्दस्यातिङन्तपदात्परत्वा"त्तिङ्ङतिङ" इति सर्वानुदात्तत्वम्। संहितायां तस्य प्रशब्दीयोदात्तात्परत्वादाद्यस्य स्वरितः। परवर्तिनां द्वितीयादीनां स्वरितात्परत्वात्प्रचयः। केतुना। चायृ पूजानिशामनयोरितिधातोः "चायः किः" इत्यौणादिकेन सूत्रेण तुप्रत्ययश्चाय्धातोः किरादेशश्च। ततो यलोपे गुणे केतुशब्दः तस्मात्तृतीयैकवचने टाप्रत्यये तस्य नादेशे केतुना इति पदम्। तत्र सतिशिष्टत्वात्प्रत्ययस्वरेण धातुस्वरस्य निवृत्तौ शेषनिघातेन धातोराकारस्यानुदात्तत्वे क्यादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। तत्स्थानिकगुणादेशस्याप्युक्तवदेव स्थानिवत्त्वेनानुदात्तत्वम्। प्रत्ययस्योदात्तत्वमिति केतुशब्दोऽन्तोदात्त आद्यनुदात्तश्च। ततस्तृतीयैकवचनटाप्रत्ययस्य सुप्त्वादनुदात्तत्वेन तत्स्थानिकनादेशस्यापि स्थानिवत्त्वादनुदात्तत्वमिति केतुनाशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्तः। तस्य च तृतीयस्योदात्तात्परत्वात्स्वरितः। धियः। ध्यैधातोः क्विप्। संप्रसारणे परपूर्वत्वे दीर्घे च धीशब्दस्तस्मा-

वे०—महदुदकं सरस्वती मध्यमस्थाना प्रज्ञापयति कर्मणा सर्वाणि च कर्माणि राजति ॥ १२ ॥

॥ इति प्रथमस्य प्रथमे षष्ठो वर्गः ॥

॥ इति प्रथमस्य मण्डलस्य प्रथमोऽनुवाकः ॥

प्रथमे मण्डले द्वितीयानुवाके चत्वारि१ सूक्तानि तत्र "सुरूपेत्या"दिकं दशर्चं प्रथमं

द्वितीयाबहुवचने शसि धीशब्देकारस्येयङादेशे धिय इति रूपम्। तत्र धातोः स्वरः, प्रत्ययस्यापहारात्। ततः सम्प्रसारणस्येकारस्य व्यञ्जनस्थानिकत्वेनानुदात्तत्वम्। तेनेकारेण धातुस्वरस्य पूर्वरूपैकादेशे एकादेशनिष्पन्नस्योदात्तानुदात्तस्थानिकतयोदात्तत्वम्। तत्स्थानिकदीर्घस्यापि स्थानिवत्त्वेनोदात्तत्वमिति धीशब्दोऽन्तोदात्तः। शसः सुप्त्वेनानुदात्तत्वम्। तन्निमित्तकस्येयङादेशस्य उदात्तधीशब्देकारस्थानिकतया स्थानिवत्त्वेनोदात्तत्वमिति धियःशब्द आद्युदात्तोऽन्तानुदात्तश्च। तस्यान्तस्यानुदात्तस्योदात्तात्परत्वात्स्वरितत्वं पदपाठे। संहितायां तु विश्वाशब्दीय उदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इति अनुदात्तत्वमेव तस्य। तत्रैतावान् विशेषः—शसोऽकारस्यानुदात्तस्य परवर्तिसकारस्य रुत्वे उत्वे गुणे च ओकाररूपता। तत्रापि उत्वस्य व्यञ्जनस्थानिकतयाऽनुदात्तत्वं गुणैकादेशस्य स्थानिवत्त्वेनानुदात्तत्वमिति। विश्वाः। विशेः क्वनि स्त्रियां टापि सवर्णदीर्घे शसि पूर्वसवर्णदीर्घे रुत्वे विसर्गे च विश्वा इति रूपम्। तत्र क्वनो नित्त्वाद्विश्वशब्द आद्युदात्तः शेषनिघातेनान्तानुदात्तश्च। टापः पित्त्वादनुदात्तत्वम्। सवर्णदीर्घस्य स्थानिवत्त्वेनानुदात्तत्वम्। शसः सुप्त्वादनुदात्तता। पुनः पूर्वसवर्णदीर्घस्यापि पूर्ववदेव स्थानिवत्त्वेनानुदात्तत्वमिति विश्वाःशब्द आद्युदात्तोऽन्तानुदात्तश्च। तत्रान्तस्यानुदात्तस्योदात्तात्परत्वात् स्वरितत्वं पदपाठे। संहितायामुदात्तपरत्वादनुदात्तत्वम्। वि। निपातत्वादुपसर्गत्वाद्वा आद्युदात्तः। आद्ये "निपाता आद्युदात्ता" इत्यनेन, अन्त्ये "उपसर्गाश्चाभिवर्जमि"त्यनेनेति विशेषः। राजति। राजधातोर्लटि तत्स्थाने प्रथमपुरुषैकवचने तिपि मध्ये शपि राजतीतिपदम्। तत्र तिपः प्रत्ययस्य पित्त्वादनुदात्तत्वं शपोऽपि तथैवानुदात्तत्वमिति धातोः स्वरस्यैवावशेषेण राजतिशब्द आद्युदात्तः प्राप्तः परंतु अत्र अतिङन्तपदात्परत्वेन "तिङ्ङतिङ" इति सर्वानुदात्तत्वम्। तस्य संहितायामुदात्तात्परत्वादादेः स्वरस्य स्वरित "उदात्तादनुदात्तस्य स्वरित" इत्यनेन। द्वितीयतृतीययोरचोस्तु स्वरितात्परत्वात् "स्वरितात्परेषामनुदात्तानाम्" इति प्रचयः स्वरः।

(१) ऋक्संहितायां 'दश मण्डलानी'त्युक्तं तत्र प्रथममण्डलेऽनुवाकाश्चतुर्विंशतिः सूक्तानि चात्र साकल्येन एकोनविंशत्यधिकैकशतसङ्ख्याकानि। तत्र (१) प्रथमानुवाके त्रीणि सूक्तानि अग्निमीळे (१) वायवायाहि (२) अश्विनायज्वरीः (३)। प्रथमे सूक्ते नवर्चः, द्वितीये नवर्चः, तृतीये द्वादश ऋच इति साकल्येन त्रिंशदृचोऽत्रानुवाके प्रथमे मण्डले। अनुवाकस्यास्यारम्भश्च अग्निमीळे इति मन्त्रतः। अस्यानुवाकादिभूतस्य मन्त्रस्य मधुच्छन्दा ऋषिरग्निर्देवता गायत्रीछन्दः॥ (२) द्वितीयोऽनुवाकस्तु सुरूपकृत्नुमित्यतः प्रारभ्यते। अस्य द्वितीयानुवाकादिमन्त्रस्य इन्द्रो देवता मधुच्छन्दा ऋषिर्गायत्री छन्दः। अस्मिन्ननुवाके चत्वारि सूक्तानि—सुरूपकृत्नुम् (१), आत्वेतानिषीदत (२), युञ्जन्तिब्रध्नम् (३), इन्द्रमिद्गाथिनः (४)। तत्र प्रथमे सूक्ते दश ऋचः, द्वितीये सूक्ते दश ऋचः, तृतीयेऽपि दशैव ऋचः, चतुर्थेऽपि दशैवेति साकल्येन चत्वारिंशदृचो द्वितीयेऽनुवाके॥ (३) तृतीयानुवाक एन्द्रसानसिमित्यतः प्रवर्तते। तस्यानुवाकादिमन्त्रस्य मधुच्छन्दा ऋषिरिन्द्रो देवता गायत्रं छन्दः। अस्मिन्ननुवाके चत्वारि सूक्तानि एन्द्रसानसिम् (१), इन्द्रेहिमत्स्यन्धसः (२), गायन्ति-

सूक्तं "सुरूपकृत्नुं दश" इत्यनुक्रान्तत्वात्। पूर्वव॰न्मधुच्छन्दसो गायत्रस्य चानुवृत्तेस्त एवर्षिच्छन्दसी। "इन्द्रं पृच्छ" इति चतुर्थ्यामृचि लिङ्गदर्शनादिन्द्रो देवता। अभिप्लवषडहे

त्वा (३) इन्द्रंविश्वाः (४)। तत्र प्रथमे सूक्ते दश ऋचः, द्वितीये दश ऋचः, तृतीये द्वादश ऋचः, चतुर्थेऽष्टावृच इति साकल्येनात्रानुवाके चत्वारिंशदृचः॥ (४) चतुर्थोऽनुवाकोऽग्निंदूतं वृणीमह इत्यतः प्रवर्तते। अस्यानुवाकाद्यमन्त्रस्य मेधातिथिः काण्व ऋषिरग्निर्देवता गायत्री छन्दः। अत्रानुवाके षट्सूक्तानि—अग्निंदूतम् (१) सुसमिद्धो न आवह (२) ऐभिरग्ने (३) इन्द्र सोमं पिबऋतुना (४) आत्वावहन्तुहरयः (५) इन्द्रावरुणयोः (६) इति। तत्र प्रथमे सूक्तेऽग्निर्देवता द्वादशर्चः, द्वितीये द्वादशर्चः, अत्र प्रत्यृचं क्रमेण इध्मः, तनूनपात्, नराशंसः, इळः, बर्हिः, देव्यो द्वारः, उषासानक्ता, दैव्यौ होतारौ, इळासरस्वतीभारत्यः, त्वष्टा, वनस्पतिः, स्वाहाकृतयः देवताः, तृतीये विश्वेदेवा देवताः द्वादश ऋचः, चतुर्थे ऋतुदेवता द्वादश ऋचः, पञ्चमे इन्द्रो देवता नव ऋचः। साकल्येनात्रानुवाके सप्तपञ्चाशदृचः॥ (५) पञ्चमेऽनुवाके षट् सूक्तानि। अयमनुवाकः सोमानं स्वरणमित्यतः प्रवर्तते। अस्यानुवाकाद्यमन्त्रस्य मेधातिथिः काण्व ऋषिर्ब्रह्मणस्पतिर्देवता गायत्री छन्दः। सूक्तानि च सोमानं स्वरणम् (१) प्रतित्यं चारुम् (२) अयं देवाय (३) इहेन्द्राग्नी (४) प्रातर्युजा विबोधय (५) तीव्राः सोमासः (६)। तत्र प्रथमे सूक्ते नव ऋचः, आद्यानां तिसृणां ब्रह्मणस्पतिश्चतुर्थ्या इन्द्रसोमब्रह्मणस्पतयः, पञ्चम्या इन्द्रसोमब्रह्मणस्पतयो दक्षिणा च, ततश्चतसृणां सदसस्पतिर्देवताः। द्वितीये अग्नामरुतो देवता नव च ऋचः। तृतीये ऋभवो देवता अष्टावृचः। चतुर्थे इन्द्राग्नी देवते षट्च ऋचः। पञ्चमे एकविंशति-ऋचः, तत्राद्यानां चतसृणामश्विनौ ततश्चतसृणां सविता ततो द्वयोरग्निस्तत एकस्या देव्यस्तत एकस्या इन्द्राणीवरुणान्यग्नाय्यस्ततो द्वयोर्द्यावापृथिव्यौ ततः षण्णां विष्णुर्देवताः। षष्ठे चतुर्विंशति-ऋचः आद्याया वायुः, ततो द्वयोरिन्द्रवायू, ततस्तिसृणां मित्रावरुणौ, ततस्तिसृणां मरुतः, ततस्तिसृणां विश्वेदेवाः ततस्तिसृणां पूषा, ततः सप्तानामापः, तत एकस्या अग्निः देवताः, तत्र अप्स्वन्तरित्येषा पुरउष्णिक्, अप्सुम इत्यनुष्टुप्, इदमाप इत्याद्यास्तिस्रोऽनुष्टुभ आपः पृणीतेति प्रतिष्ठा शेषा गायत्र्यः। साकल्येनात्रानुवाके सप्तसप्ततिर्ऋचां सङ्ख्या॥६ षष्ठेऽनुवाके सप्त सूक्तानि। अयमनुवाकः कस्यनूनमित्यतः प्रवर्त्तते। तत्राद्याया ऋच आजीगर्तिः शुनःशेप ऋषिः को देवता त्रिष्टुप्छन्दः। सूक्तानि च कस्य नूनं कतमस्य (१) यच्चिद्धिते (२) वसिष्वाहिमियेध्य (३) अश्वं नत्वावारवन्तम् (४) यत्रग्रावापृथुबुध्नः (५) यच्चिद्धिसत्यसोमपाः (६) आव इन्द्रं क्रिविं यथा (७)। तत्र प्रथमस्य पञ्चदश ऋचः, आद्यायाः कः, द्वितीयाया अग्निः, ततस्तिसृणां सविता, परासां वरुणः, द्वितीयस्य एकविंशतिर्ऋचो वरुणो देवता, तृतीयस्य दश ऋचोऽग्निर्देवता। चतुर्थस्य त्रयोदश ऋचः अग्निर्देवता। पञ्चमस्य नवऋचः, आद्यानां चतसृणामिन्द्रः, ततो द्वयोरुलूखलमुसलेऽन्त्यायाः प्रजापतिर्देवताः। षष्ठस्य सप्त ऋच इन्द्रो देवता। सप्तमस्य द्वाविंशतिर्ऋचः इन्द्रो देवता, सप्तदश्यादितिसृणामश्विनौ ततस्तिसृणामुषा देवता। अत्रानुवाके साकल्येन ऋचो नवतिः॥ उत्तरेषां सप्तमाद्यनुवाकानां सूक्तादिकं परस्तात् प्रदर्शयिष्यते। एवञ्चैतदनुरोधेनात्र प्रथमे मण्डले द्वितीयेऽनुवाके चत्वारि सूक्तानि तेषां मध्ये सुरूपमिति प्रथमं सूक्तमित्याह भाष्यकारः॥

(२) सुरूपकृत्नुमित्यस्य सूक्तस्य ऋक्सङ्ख्या विषयेऽनुक्रमणिकाग्रन्थं प्रमाणयति भाष्यकृत् सुरूपकृत्नुं दशेत्यनुक्रान्तत्वात्। अनुक्रमणिकाकारेण सुरूपकृत्नुमिति सूक्तप्रतीकमुपादाय दशेति ऋचां सङ्ख्याऽनुक्रान्ताऽनुक्रमण्यामुक्ता तस्मादस्य सूक्तस्य दश ऋच इत्यर्थः। अनुक्रमणिकाकारेण स्वग्रन्थप्रारम्भे ऋषिदैवतच्छन्दांस्यनु-

ब्राह्मणाच्छंसिनः प्रातःसवने स्तोमवृद्धावावापार्थानि "सुरूपकृत्नुमूतये" इत्यादीनि षट् सूक्तानि[३]। सूत्रितं च "अभिप्लवपृष्ठ्याहानि" इति खण्डे "ब्रह्मणाच्छंसिनः सुरूपकृत्नुमूतय

क्रमिष्याम इति प्रतिज्ञातमत्र च सूक्ते केवलमृक्संख्यैवोक्ता ततः ऋष्यादिप्रतीतिः कथमित्याशङ्क्य तद्ग्रन्थीयपरिभाषामर्थतस्समनुयंस्ते ऋषिच्छन्दसी तावत्प्रदर्शयति पूर्ववदित्यादिना। अनुवृत्तिः पूर्वतः प्राप्तः सम्बन्धः। तेन सम्बन्धेन ते विज्ञेये इत्यर्थः।

(३) अभिप्लवपृष्ठ्यनामकौ षळहौ पूर्वोक्तौ-अभिप्लव आद्यमन्त्यं चाहनी अग्निष्टोमवदितराणि उक्थ्यवद्, पृष्ठ्ये आद्यं चतुर्थं चाहनी अग्निष्टोम-षोडशिवत् इतराणि उक्थ्यवदिति। तत्राभिप्लवषळहेऽयुजानि दिनानि प्रथमं तृतीयं पञ्चमंचेति त्रीणि रथन्तरपृष्ठानि। अत्राहस्सु सामगैर्माध्यन्दिने सवने पृष्ठ्यस्तोत्रेषु रथन्तरेण साम्ना गीयमानत्वात् इमानि रथन्तरपृष्ठानीत्युच्यन्ते। युजानि द्वितीयं चतुर्थं षष्ठं चेति त्रीणि बृहत्पृष्ठानि, अत्र पूर्ववत्पृष्ठ्यस्तोत्रेषु बृहत्साम्नो गीयमानत्वात्। तृतीयदिनमारभ्य च प्रतिदिनं पृष्ठ्यस्तोत्रेषु द्वितीयत्वेन वैरूप-वैराजशाक्वररैवतानि सामानि गीयन्ते। तेषु चाहस्सु सामगैः सामगानायोपादीयमानतृचेषु यथायथमावृत्त्या-दिनाऽभिप्रेतसङ्ख्यायुक्तत्वेन ऋचां सङ्घः सम्पाद्यते स स्तोमशब्देनोच्यते। तेच स्तोमा अनेके त्रिवृत्पञ्चदशः सप्तदशस्त्रिणवस्त्रयस्त्रिंश इत्यादयः। तेषां स्तोमानां संख्यासंपादनरीतिर्विष्टुतिशब्देनोच्यते। ताश्च रीतयः प्रति-स्तोममनेका भवन्ति तासां नामान्यपि पृथक् पृथगेव भवन्ति। तानि च ताण्ड्यब्राह्मणे प्रतिपाद्यन्ते। तत्र त्रिवृत्स्तोमस्तृचगताभिस्तिसृभिर्ऋग्भिस्त्रिरावृत्ताभिः संपद्यते। त्रिवृच्छब्देन ऋङ्नवकस्योच्यमानत्वात्। तस्य च त्रिवृत्स्तोमस्योद्यतीनामिका विष्टुतिरेवं तत्रोक्ता "तिसृभ्यो हिंकरोति स पराचीभिः, तिसृभ्यो हिंकरोति स पराचीभिः, तिसृभ्यो हिंकरोति स पराचीभिरुद्यती त्रिवृतो विष्टुतिरिति", तस्यायमर्थः:—विष्टुतावपेक्षिता सङ्ख्या पर्यायत्रयेण पूर्यते। पर्यायो नाम गृहीतस्य तृचस्यावृत्त्यादिविशिष्टतयोच्यमानस्यावृत्तिः। तत्र त्रिवृदर्थं कश्चन तृचो गृहीतस्तस्य त्रिः पठनं कर्तव्यम्। तत्र प्रथमे पाठे तृचगतास्तिस्र ऋचो वेदे येन क्रमेणोक्तास्तेनैव क्रमेण वक्तव्याः। अयमेकः पर्यायः। तदेतदुक्तमुपरितनब्राह्मणवाक्ये तिसृभ्यो हिंकरोतीत्यनेनोच्यते। तत्र तृतीयार्थे चतुर्थी। तिसृभ्यो नाम तिसृभिः। हिंकरोति गायति। तत्र प्रकार उच्यते पराचीभिरिति, पराचीत्वं नामाध्ययन-क्रमेणाम्नातत्वम्। एवं द्वितीयेऽपि पर्याये, एवमेव तृतीयेऽपि पर्याये, इति पर्यायत्रयं मिलित्वा एकैषा विष्टुतिः संपद्यते त्रिवृत्स्तोमस्य, तस्या नामोद्यतीति। एवं कुलायिनीनामिकोक्तस्तोमस्यापरा विष्टुतिस्तत्रोच्यते— "तिसृभ्यो हिंकरोति स पराचीभिः, तिसृभ्यो हिंकरोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा या प्रथमा सोत्तमा। तिसृभ्यो हिंकरोति योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा कुलायिनी त्रिवृतो विष्टुतिरि"ति। अस्यां विष्टुतौ प्रथमे पर्याये यथावेदपाठक्रममेवाम्नानं तिसृणामृचाम्। द्वितीये पर्याये तिसृणामृचां मध्ये या प्रथमा तां तृतीयात्वेन द्वितीयायाः प्रथमस्थाने तृतीयायास्तु मध्यमस्थाने निवेशं कृत्वा गायेदसौ द्वितीयः पर्यायः। तृतीयेतु पर्याये उक्तानां तिसृणामृचां मध्ये या अन्तिमा सा प्रथमस्थाने या प्रथमा सा द्वितीयस्थाने या च द्वितीया सा तृतीयस्थाने यथा भवेदेवं निवेशं कृत्वा गानं कर्त्तव्यम्। एषा त्रिवृतः स्तोमस्य कुलायिनीनामिका विष्टुतिः। एवं पञ्चदशस्तोमस्योद्यतीनामिका विष्टुतिरेवम्— "पञ्चभ्यो हिंकरोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिंकरोति स एकया स तिसृभिः स एकया, पञ्चभ्यो हिंकरोति स एकया स एकया स तिसृभिः, उद्यती पञ्चदशस्तोमस्य विष्टुतिरिति"। अत्र प्रथमे पर्याये तृचमध्ये प्रथमाया ऋचस्त्रिरावृत्तिः। द्वितीयातृतीये च सकृत्पाठ्ये, द्वितीये पर्याये प्रथमायाः सकृत्पाठो

इति षट् सूक्तानि" (आ० ७.५.) इति॥ आद्यानि त्रीणिसूक्तानि महाव्रते निष्केवल्य औष्णिहतृचाशीतौ शस्तव्यानि[४]। उक्तं च शौनकेन "सुरूपकृत्नुमूतय इति त्रीण्यैन्द्र

द्वितीयस्यास्त्रिरावृत्तिस्तृतीयायाः सकृत्पाठः। तृतीये पर्याये प्रथमाद्वितीययोः सकृत्पाठस्तृतीयस्यास्त्रिरावृत्तिरिति। एवं पर्यायत्रयेण ऋचां पञ्चदशसङ्ख्यापूरणादसौ पञ्चदशस्तोमः, अस्य स्तवप्रकारस्य च नामोद्यतीति। एवमेतस्यापराऽपि विष्टुतिर्भवति। एवमेव ब्राह्मणोक्तरीत्या सप्तदशादिस्तोमानामपि विष्टुतयो भवन्ति। तेषां च स्तोमानां मध्ये असति विशेषे प्रातःसवने त्रिवृत्स्तोमः, माध्यन्दिने पञ्चदशः तृतीयसवने सप्तदश इति स्तोमा भवन्ति। अत्र चाभिप्लवषडहे त्रिवृदादीनां स्तोमानां स्थाने उत्तरस्तोमानामपि ग्रहणं भवति। यदा च यत्र यः स्तोम उक्तस्तदपेक्षयोत्तरस्य तदधिकस्य स्तोमस्य तत्र ग्रहणं स्तोमवृद्धिः। सा च सामगैरभिप्लवषळहे यदा क्रियते तदानीं मैत्रावरुणब्राह्मणाच्छंसच्छावाकनामकैर्ऋत्विभिः स्तोमावृध्दौ यत्स्वं शंसनीयं तच्छस्त्वा तदधिकं स्तोमवृध्दिनिमित्तशंसनीयमावापशब्देनोच्यते। तत्र प्रातःसवने ब्राह्मणाच्छंसिनोक्ताभिप्लवषळहे यदि ऋचामावापः कर्तव्यस्तदा सुरूपकृत्नुमूतय इत्यारभ्य संहिताया-मुक्तानि षट् सूक्तानि आवापार्थं ग्रहीतव्यानि। तत्र षण्णामपि सूक्तानां युगपत्पाठः कर्तव्य इति नार्थः, किन्तु तत्र सवने आधिक्येनाभिप्रेयमाणऋक्संख्यापूर्त्तिपर्यन्तं सुरूपकृत्नुमित्यादिषट्सूक्तत ऋचो ग्राह्या इत्यर्थः। तत्राधिकस्तोमो यदि सप्तदशस्तदा पञ्चैव ऋचोऽधिकाः सुरूपकृत्नुमित्यादितो ग्राह्याः, यदि वृद्धः स्तोम एकविंशः तदानीं नव ऋचः, चतुर्विंशे द्वादश, त्रिणवे पञ्चदश, त्रयस्त्रिंशे एकविंशतिः, चतुश्चत्वारिंशे द्वात्रिंशत्, अष्टाचत्वारिंशे षट्त्रिंशदित्यादिरूपेण। तदुक्तमाश्वलायनेन "नित्यादधिकं स्तोम-कारणात्पञ्च सप्तदशे नवैकविंशे द्वादश चतुर्विंशे पञ्चदश त्रिणव एकविंशतिं त्रयस्त्रिंशे द्वात्रिंशतं चतुश्चत्वारिंशे षट्त्रिंशतमष्टाचत्वारिंश" इति। मैत्रावरुणस्यायं प्रकारो ब्राह्मणाच्छंसिकृते तत्रातिदिष्टः—"षट्-सूक्तान्यावाप उक्तो मैत्रावरुणेनेति"। तदेतद्भाष्यकारेणात्रोक्तमभिप्लवषडह इत्यादिना।

(४) सुरूपकृत्नुम्, आत्वेता, युञ्जन्तिब्रध्नम् इति त्रीणि सूक्तानि महाव्रते विनियुज्यन्ते। महाव्रतं च सोम-यागविशेषस्त्रयोदशरात्रादीनामहःसङ्ख्यापूर्त्यर्थमनुष्ठीयते। तत्र सर्वेषां त्रयोदशरात्रादीनां द्वादशाहः प्रकृतिः। तत्र च द्वादशाहे आद्यन्तावतिरात्रौ मध्ये व्यूळ्हो दशरात्रो भवति। तत उत्तरेषां त्रयोदशचतुर्दश-रात्रादीनामनुष्ठाने द्वादशाहापेक्षया एकस्यान्होऽधिकस्य अपेक्षणे महाव्रतमनुष्ठेयं तच्च त्रयोदशरात्रे भवति। तच्च दशरात्रादूर्ध्वमन्तिमातिरात्रतः पूर्वतनेऽह्नि अनुष्ठेयम्। अहर्द्वयस्यापेक्षणे चतुर्दशरात्रे गोआयुषी सोमयागावनुष्ठेयौ। तौ च दशरात्रतः पूर्वं प्रथमातिरात्रत ऊर्ध्वतनेऽहर्द्वयेऽनुष्ठेयौ। पञ्चदशरात्रे त्र्यहापेक्षणे त्रिकद्रुका अनुष्ठेयाः। अभिप्लवषळहस्य पूर्वस्त्र्यहस्त्रिकद्रुकशब्देनोच्यते। चतुरहापेक्षणेऽर्थो-त्षोळशरात्रे त्रिकद्रुका महाव्रतं चानुष्ठेयम्। सप्तदशरात्रे पञ्चाहापेक्षणेऽभिप्लवस्य पूर्वतनानि पञ्चाहानि अनुष्ठेयानि। एवमष्टादशरात्रे षळहापेक्षणेऽभिप्लवः षळह इति। एवमेवेत ऊर्ध्वमपि एकाहादीनामपेक्षणे पूर्ववदेवेदमावर्तनीयम्। तदुक्तमाश्वलायनेन "एकाहोऽतिरात्र आदौ प्रायणीय एषोऽन्त्य उदयनीयो व्यक्तो मध्येऽहीनेषु वैश्वानर एष एव तावन्तरेण व्यूळ्हो दशरात्र एषा प्रकृतिः सत्राणां तत्रावापस्थानमूर्ध्वं दशरात्रा-देकाहार्थे महाव्रतं प्राग्दशरात्रादितरेषामन्हां द्व्यहार्थे गोआयुषी त्र्यहार्थे त्रिकद्रुका अभिप्लवत्र्यहं पूर्वं त्रिकद्रुका इत्याचक्षते चतुरहार्थे त्रिकद्रुका महाव्रतं च पञ्चाहार्थेऽभिप्लवपञ्चाह उत्तमस्य तु षष्ठात्तृतीयं सवनं षळहार्थेऽभिप्लवः षळह एवंन्याया आवापा षळहान्ताः पुनः पुनः पूर्णः पूर्णश्च षळह-

सानसिं रयिमिति सूक्ते" (ऐ. आ. ५-२-५) इति॥ चतुर्विंशेऽहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिनः "सुरूपकृत्नुमूतय" इति वै कल्पिकः स्तोत्रियस्तृचः१। "होत्रकाणाम्"

स्तन्वतामेव गच्छतीति"। एवञ्च सत्रे उपान्त्यमहर्महाव्रतमिति भवति। तच्चेदमहरैतरेये पञ्चमेऽरण्यके प्रतिपादितम्।

तत्र च महाव्रते माध्यन्दिने सवने निष्केवल्यशस्त्रे पक्ष्याकारतां प्रकल्प्य तदीया इमे भागा इति कल्प्यते। तत्र चित्यस्याग्नेर्यथा पञ्चावयवा आम्नाताः शिरो दक्षिणः पक्ष उत्तरः पक्षः पुच्छमात्मेति एवं पक्ष्याकारत्वेन कल्पितस्य निष्केवल्यशस्त्रस्यापि भागा भवन्ति। तत्र विहृतं तदिदासेत्यादिसूक्तमेको भागः, यस्येदमारजस्तुज इति द्वितीयो भागः, अभित्वा शूरेत्यादिकस्तृतीयो भागः, त्वामिद्धिहवामह इत्यादिकस्तु चतुर्थो भागः, इमानुकं भुवनेति पञ्चमो भागः, तेचेमे भागा आत्मा, ग्रीवा (शिरः) दक्षिणः पक्षः, उत्तरः पक्षः, पुच्छमिति शब्देनाभिलप्यन्ते। एवं भागपञ्चकशंसनोत्तरं तत्रोक्तपक्ष्याकारस्य निष्केवल्यशस्त्रस्यान्नस्थानीयत्वेन तिस्रस्तृचाशीतयः शंसनीयाः, गायत्रतृचाशीतिः प्रथमा, बार्हततृचाशीतिर्द्वितीया, औष्णिहतृचाशीतिस्तृतीयेति। तत ऊर्ध्वं "त्वावतःपुरुवसो" इत्यादिभाग उदरं पक्षिरूपस्य शस्त्रस्य, इन्द्राग्नीयुवं सु न इत्यादिर्भागः ऊरू इत्येवं भागविशिष्टे शंसनीये उक्तनिष्केवल्यशस्त्रे औष्णिहतृचाशीतिमध्ये सुरूपकृत्नुमित्यादीनि त्रीणि सूक्तानि शस्तव्यानीत्यर्थः। अयमर्थ ऐतरेयारण्यके प्रपञ्चित इति भाष्यकारेण स्वीयभाष्ये उल्लिखितम्। एतच्च महाव्रतं यद्यपि सत्रान्तर्गतं सत्रस्योपान्त्यमहरित्युक्तं पूर्वं तथापि इदं सत्रतः पृथक् स्वातन्त्र्येणाप्यनुष्ठीयते अवेष्टिन्यायेन। यथा राजसूयान्तर्गतत्वेनाम्नाताऽवेष्टिर्वचनात्पृथगनुष्ठीयते, यथा वा राजसूय एव समाम्नातानां चातुर्मास्ययागानाम् "अक्षय्यं ह वा चातुर्मास्ययाजिनः सुकृतं भवती"ति वचनात्पृथगनुष्ठानमेवमस्यापि। एवं च महाव्रतं सत्रगतम्, अहीनगतं स्वतन्त्रैकाहरूपमिति त्रिधा। तत्रास्य सर्वः कथंभावः सत्रान्तर्गतमहाव्रते निर्दिश्यते इति तत्प्रकृतिभूतम्, अहीनाङ्गमेकाहरूपं च विकृतिरूपम्। ऐतरेयारण्यके च सत्रान्तर्गतस्य महाव्रतस्य प्राधान्येन प्रयोग आम्नायते। "महाव्रतस्य पञ्चविंशतिं सामिधेन्य" इत्यादिना। यद्यपि महाव्रतस्याग्निष्टोमविकृतिरूपत्वेन सोमयागरूपत्वमिति सोमयागे सामिधेनीनामङ्गत्वाभावाद् "महाव्रतस्य पञ्चविंशतिं सामिधेन्य" इति सामिधेनीसङ्ख्याविधानमयुक्तमिति शङ्कावसरस्तथापि "आनर्थक्यात्तदङ्गेषु" इति मीमांसकन्यायानुरोधेन मुख्येऽसम्भवत्तदङ्गे सन्निविशते पशुयागरूपे। सच पशुः "वैश्वकर्मण ऋषभ उपालम्भनीय"इत्यनेन तत्र प्रदर्शितः। एवं च पशुद्वारा महाव्रताङ्गत्वं सामिधेनीनामिति तद्वारेयं सङ्ख्यापि तदङ्गमिति तदर्थः।

(१) सांवत्सरिकाणां सत्राणां गवामयनं प्रकृतिः। तस्य च क्रम एवम् प्रथमं प्रायणीयोऽतिरात्रः प्रथममहस्ततश्चतुर्विंश उक्थ्य आरम्णीय इति इमे उभे अहनी अनुष्ठाय ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्याभिप्लविकः षळहश्चतुर्वारमावर्तनीयः। ततस्त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशरूपस्तोमषट्कसम्बन्धी पृष्ठ्यः षळह इत्येवं पञ्चभिः षडहैरेको मासः पूर्यते। एतस्यैव मासस्यैवं प्रकारेण पञ्चवारमावृत्त्या पञ्च मासाः संपाद्याः। षष्ठे मासि प्रथमतोऽभिप्लवषडहत्रिकं पृष्ठ्यश्च षडह एक इति षडहचतुष्टयमनुष्ठाय ततोऽभिजिन्नामक एकाहः स्वरसामनामकानि च त्रीणि अहानि इति अष्टाविंशतिदिनानि षष्ठस्य मासस्य। तत्र मासगतदिनानां त्रिंशत्त्वसंख्या प्रथममनुष्ठिताभ्यां प्रायणीयचतुर्विंशाभ्यां पूर्यते इति त्रिंशद्दिनकं मासषट्कं भवति। एवं सत्रेऽत्र संवत्सरे प्रथममासषट्केऽशीत्युत्तरं शतं दिनानि भवन्ति। ततो विषुवनामक एकाहोऽनुष्ठीयते। ततः सप्तमे मासि आदौ स्वरसामनामकानि त्रीणि दिनानि तन्नामकैरेकाहयागैः पूर्वमासषट्केऽनुष्ठितक्रमविपर्यासेनानुष्ठेयानि। ततो

इति खण्डे "मदे मदे हि नो ददिः सुरूपकृत्नुमूतये" (अ० ७. ४. ।) इति सूत्रितत्वात् ॥ अग्निष्टोमे वैश्वदेवशस्त्रे "सुरूपकृत्नुमूतये" इति धाय्या२। "सुरूपकृत्नुमूतये तक्षत्रथम्" इति सूत्रितत्वात् (आ ५।१८)। तामेतां सूक्तगतां प्रथमामृचमाह :—

विश्वजिन्नामक एकाहः। ततः पृष्ठ्यः षडहः पूर्वोक्त क्रमप्रातिलोम्येन त्रयस्त्रिंशत्रिणवचतुर्विंशैकविंशसप्तदश-त्रिवृद्रूपस्तोमसम्बन्धी अनुष्ठेयः। ततस्त्रयोऽभिप्लवाः षडहा इत्येवमत्राष्टाविंशत्यहानि भवन्ति। अत्र माससंख्या-पूर्त्यर्थमपेक्षितं दिनद्वयं च द्वादशमासान्तेऽनुष्ठीयते महाव्रतातिरात्राभिधम्। ततः पृष्ठ्यः षडहः पूर्वमभिप्लवा-श्चत्वारः षडहाः पश्चादिति रूपं मासचतुष्टयं संपाद्यम्। ततो द्वादशे मासि आदौ त्रयोऽभिप्लवाः षडहास्ततो गोआयुषी द्वे अहनी ततो द्वादशाहनामकयागीयदशाहानि अनुष्ठेयानि। ततो महाव्रतमुपान्त्यमहः। उदयनीयोऽतिरात्रश्चान्त्यमहरिति। एवं चात्र सत्रे दिनानामावृत्त्यैव संख्या पूर्यते। तानि चावर्त्यमानानि दिनानि पञ्चविंशतिरेव भवन्ति। तदुक्तमाश्वलायनेन—

अतिरात्रश्चतुर्विंशं पळहावभिजित्स्वराः।
विषुवान्विश्वजिच्चैव च्छन्दोमा दशमव्रतम्॥ इति॥
प्रायणीयश्चतुर्विंशं पृष्ठ्योऽभिप्लव एव च।
अभिजित्स्वरसामानो विषुवान्विश्वजित्तथा॥
छन्दोमा दशमं चाह उत्तमं तु महाव्रतम्।
अहीनैकाहःसत्राणां प्रकृतिः समुदाहियते॥ इति च।

एवं चास्मिन् गवामयनसत्रे द्वितीये प्रारम्भणीयनामके चतुर्विंशापरनामकेऽहनि माध्यन्दिने सवने ब्राह्मणा-च्छंसिनः सुरूपकृत्नुरिति वैकल्पिकः स्तोत्रियस्तृचो भवतीत्यर्थः। एतदुक्तं भवति उक्तेऽहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिन एकादश स्तोत्रियानुरूपयुगलानि उच्यन्ते तं वो दस्ममृतीषहम्, तत्त्वा यामि सुवीर्यम्; (१)अभि प्र वः सुराधसम्, प्र सु श्रुतं सुराधसम्; (२) वयं घत्वा सुतावन्तः, क ईं वेद सुते सचा; (३) विश्वाः पृतना अभिभूतरं नरम्, तमिन्द्रं जोहवीमि; (४) या इन्द्र भुज आ भर (एका ऋक्) इन्द्रो मदाय वावृधे (ऋग्द्वयम्) (मिलितास्तिस्र ऋचः), मदे मदे हि नो ददिः; (५) सुरूपकृत्नुमूतये, शुष्मिन्तमन्न ऊतये; (६) श्रायन्त इव सूर्यम्, बण्महांअसि सूर्य; (७) उदु त्यद्दर्शतं वपुः, उदु त्ये मधुमत्तमाः; (८) त्वमिन्द्र प्रतूर्तिषु, त्वमिन्द्र यशा असि; (९) इन्द्र क्रन्तुं न आ भर, इन्द्र ज्येष्ठं न आभर; (१०) आ त्वा सहस्रमाशतम्, ममत्वा सूर उदिते (११) इत्येवमेकादशतृचद्विका ब्राह्मणाच्छंसिकृते उच्यन्ते। तत्रैतन्मध्ये सामगैर्यत्तृचद्वयगते यस्मिंस्तृचे स्तूयते तत्तृचद्वयगतोऽपरस्तृचो ब्राह्मणाच्छंसिना अनुरूपतया वक्तव्यः। एवं च सुरूपकृत्नुमिति तृचद्वये यदा सामगाः शुष्मिन्तमन्नऊतये इति तृचे स्तुवीरंस्तदा ब्राह्मणाच्छंसिना सुरूपकृत्नुमूतय इति तृचोऽनुरूपतया शंसनीय इति। एतेषामेकादशानां समकार्यकरत्वमिति विकल्प इति वैकल्पिक इत्युक्तं भाष्ये। तृच इत्यनेन ऋक्त्रयं ग्रहीतव्यम्।

(२) अग्निष्टोमे सोमयागे होतुः प्रतिसवनं शस्त्रद्वयम् आज्यम्, प्रउगम् इति प्रातःसवने; निष्केवल्यम्, मरुत्वतीयम् इति माध्यन्दिने सवने; वैश्वदेवम् आग्निमारुतम् इति तृतीयसवने। तत्र तृतीयसवनगतशस्त्रद्वये प्रथमशस्त्रे वैश्वदेवाख्ये सुरूपकृत्नुमूतये इत्येका ऋग् धाय्यात्वेनाभवसूक्तात्पूर्वं शंसनीया। तदुक्तं ब्राह्मणे "ते एते

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।

जुहूमसि द्यविद्यवि ॥१॥

सुरूपऽकृत्नुम् । ऊतये । सुदुघाम्ऽइव । गोऽदुहे ।

जुहूमसि । द्यविऽद्यवि ॥१॥

सुरूपकृत्नुम् = शोभनरूपोपेतस्य कर्मणः कर्तारमिन्द्रमूतये = अस्मद्रक्षार्थं द्यवि द्यवि = प्रतिदिनं जुहूमसि = आह्वयामः । आह्वाने दृष्टान्तः गोदुहे = गोधुगर्थं सुदुघामिव = सुष्ठु दोग्ध्रीं गामिव । यथा लोके गोर्यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयति तद्वत् ॥

"वस्तः" इत्यादिषु द्वादशस्वहर्नामसु "द्यवि द्यवि" इति पठितम् (निघ. १।९) ॥ सुरूपकृत्नुम् । करोतीति कृत्नुः । "कृहनिभ्यां क्त्नुः" (उ० ३. ३०. ।) कित्त्वाद्गुणाभावः । तकारोपजनश्छान्दसः । समासान्तोदात्तः । ऊतये । अवतेर्धातोः "उदात्त" इत्यनुवृत्तौ "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" (पा० ३. ३. ९७. ।) इति क्तिन्नुदात्तो निपातितः । सुदुघाम् । सुष्ठु दुग्ध इति सुदुघा । "दुहः कब्घश्च" (पा० ३. २. ७०. ।) इति कप्प्रत्ययो हकारस्य च घकारः । कित्त्वाद् गुणाभावः । कपः पित्त्वादनुदात्तत्वे धातुस्वरेणोकार उदात्तः । सुशब्देन गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव स्वरः । "इवेन समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति" (पा. २।१।४।२) इवसमासे स एव । गां दोग्धीति गोधुक् । "सत्सूद्विष" इत्यादिना (पा. ३।२।६१) क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जुहूमसि । ह्वयतेर्लडुत्तमपुरुषबहुवचने "बहुलं छन्दसि" इति (पा. २।४।७६) शपः श्लुः । "अभ्यस्तस्य च" (पा. ६।१।३३) इत्यभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्सम्प्रसारणम् । "सम्प्रसारणाच्च" (पा. ६।१।१०८) इति पूर्वत्वम् । "हलः" (पा. ६।४।२) इति दीर्घः । ततः "श्लौ" (पा ६।१।१०) इति द्विर्वचनम् । "अभ्यासस्य ह्रस्वः" (पा. ७।४।५९) । चुत्वजश्त्वे । "इदन्तो मसिः" (पा ७।१।४६) इतीकारागमः । प्रत्ययस्वरेण मकारस्योदात्तत्वम् । द्यविद्यवि ।

धाय्ये अनिरुक्ते प्राजापत्ये शस्येते अभित आर्भवं सुरूपकृत्नुमूतये, अयं वेनश्चोदयत्पृश्निगर्भा इति" । एतदाश्वलायनेनाप्युक्तमिति भाष्यकृताऽऽश्वलायनश्रौतसूत्रस्थानं निर्दिष्टं सुरूपकृत्नुमित्यादिना ।

द्योशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। "नित्यवीप्सयोः" (पा. ८।१।४) इति द्विर्भावः। "तस्य परमाम्रेडितम्" (पा. ८।१।२)। "अनुदात्तं च" (पा. ८।१।३)। इति द्वितीयस्यानुदात्तत्वम्॥ १ ॥*

---

* सुरूपकृत्नुम्। रु शब्दे। अस्माद्धातोः "खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः" इति सूत्रे पप्रत्ययो धातोर्दीर्घश्च निपात्येते। रूयते स्तूयते जनैरिति रूपम्। तस्य सुशब्देन बहुव्रीहिः। ततः कृत्नुशब्देन षष्ठीतत्पुरुषः। कृत्नुशब्दे च कृ धातोः "कृ हनिभ्यां क्त्नुः" इत्यौणादिकेन सूत्रेण क्त्नु प्रत्ययः। कित्त्वाद् गुणाभावे कृत्नुशब्दः। अत्र उणादिषु क्त्नुरिति तकारविशिष्टस्यैव प्रत्ययस्य वचनम्। अतएव हत्नुरित्यपि हनधातो रूपं सिद्धम्। तथापि भाष्येऽत्र तकारोपजनः छान्दस इत्युक्तिस्तु क्नु प्रत्यय इति गृहीत्वेति बोध्यम्। तत्र रूपशब्दे धातोः स्वरः प्रत्ययस्वरेण निरस्यते शेषनिघातेन धातोरुकारोऽनुदात्तः पकाराकारश्चोदात्तः। धातोरुकारस्य दीर्घे दीर्घस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। ततः सुशब्देन बहुव्रीहौ "समासस्ये"ति समासान्तस्य उदात्तत्वे प्राप्ते तदपवादकेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति पूर्वपदस्य प्रकृतिस्वरत्वे प्राप्ते तस्यापि अपवादेन "नञ्सुभ्याम्" इति सूत्रेण सुशब्दात्परस्यान्तोदात्तत्वस्य बहुव्रीहौ विधानाद्रूपशब्दस्यान्त उदात्तः सुरूपशब्दे प्रथमद्वितीययोरचोस्तु शेषनिघातेनानुदात्तत्वम्। कृत्नुशब्दे च कृञो धातोःस्वरस्य त्नुप्रत्ययस्वरेण सतिशिष्टेन निराघात्कृत्नुशब्दोऽन्तोदात्तः। ततः सुरूपशब्देन कृत्नुशब्दस्य षष्ठीसमासे "समासस्य" इत्यनेन समासान्त उदात्तः इति सुरूपकृत्नुशब्दोऽन्तोदात्तः। ततोऽमि प्रत्यये तस्य सुप्त्वेनानुदात्तत्वे तन्निमित्तकपूर्वरूपैकादेशस्य पूर्ववर्त्युदात्तनुकारपरवर्त्यनुदात्तामकारस्थानिकतया 'एकादेश उदात्तेनोदात्त" इति नुशब्दावयवोकार उदात्तः। ऊतये। अवतेर्धातोः "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इति सूत्रेण उदात्तक्तिन्प्रत्ययान्तस्य रूपं निपात्यते। तेन धातोः स्वरः प्रत्ययस्वरेण तस्यापि नित्स्वरेण बाधान्नित्स्वरप्राप्तौ निपातनात्तिकार उदात्तः। शेषनिघातेन ऊकारोऽनुदात्तः। अत्र निपातनं भवतीति तत्स्वरेण पूर्वेषां निरास इति अव्धातोरुपधा—वकारयोरूठि स्वरप्रवृत्त्यादिकं नोक्तम्। तत ऊतिशब्दाच्चतुर्थ्येकवचनङेप्रत्यये ऊतिशब्दान्त्यस्य गुणेऽयादेशे ऊतये इति पदम्। तत्र ङेप्रत्यस्य सुप्त्वेनानुदात्तत्वम्। तन्निमित्तकगुणस्योदात्तत्तीकारस्थानिकतया स्थानिवत्त्वेनोदात्तत्वम्। तत्स्थानिकायादेशस्यापि तथैव स्थानिवद्भावादुदात्तत्वम्। एवं चोतयेशब्दे आदिः स्वरोऽनुदात्तो द्वितीयः स्वरितस्तृतीयोऽनुदात्तस्तस्योदात्तात्परत्वात्स्वरितः "उदात्तादनुदात्तस्य स्वरित" इति सूत्रेण। सुदुघामिव। दुहधातोः "दुहः कब् घश्च" इति वचनात्कप्प्रत्ययो हकारस्य घकारादेशस्ततो दुघ इति भवति। ततो गतिसञ्ज्ञकेन सुशब्देन समासे स्त्रियां टापि सुदुघा। तस्य शब्दस्य द्वितीयान्ततादशायामिवेन समासे विभक्त्यलोपे सुदुघामिवेति रूपम्। तत्र दुह्धातोः कप्प्रत्ययस्य पित्त्वादनुदात्तत्वेन धातोरेव स्वरो दुघशब्दे। ततस्सुब्देन समासे "समासस्ये ति समासस्वरस्य प्राप्तौ तदपवादकेन "गतिकारकोपपदात्कृदि"त्यनेनोत्तरपदस्य प्रकृतिस्वरकत्वमिति शेषनिघातेनावशिष्टयोरनुदात्तत्वे सुदुघशब्दो मध्योदात्तः, आद्यन्तयोस्तु स्वरयोरनुदात्तत्वम्। ततष्टापि तस्य पित्त्वेन अनुदात्ततया तेन सह सुदुघशब्दस्यान्त्याकारस्य सवर्णदीर्घे सोऽपि अनुदात्तस्थानिक इति स्थानिवद्भावेनानुदात्तः। ततोऽमि प्रत्यये तस्य सुप्त्वेन "अनुदात्तौ सुप्पितौ" इत्यनेनानुदात्तत्वेन तेन सह पूर्वस्य सवर्णदीर्घाकारस्य पूर्वरूपैकादेशे तस्यापि पूर्ववदेव स्थानिवत्त्वेनानुदात्तत्वम्। इवेन समासे वचनाद्विभक्तेरलुकि समासान्तोदात्तस्य पूर्वपदप्रकृतिस्वरकत्वमिति विशेषवचनेनापवादात्पूर्वपदस्य प्रकृतिस्वरकत्वे समासेऽपि सुदुघांशब्दस्य मध्यमः

स्क०—सुरूपकृत्नुमित्यत आरभ्यैन्द्रदेवतमा मेधातिथेरार्षात्। सुरूपाणि शोभनानि कर्माणि तेषां कर्तारम् इन्द्रम्। ऊतये सोमेन तर्पणाय, पालनाय वा आत्मनः सुदुघामिव गोदुहे। यथा कश्चित्सुदोहां गां तस्या एव गोर्दोहायाह्वयेत्, तद्वत्। जुहूमसि आह्वयामः। द्यवि द्यवि अहन्यहनि। सततमित्यर्थः ॥ १ ॥

वे०—सुरूपाणां कर्मणां कर्तारं रक्षणाय सुदोहामिव धेनुं तस्या एव दोहार्थमाव्हयामोऽन्वहम् ॥ १ ॥

स्वर एवोदात्तः। अवशिष्टाः सर्वेऽचः शेषनिघातेनानुदात्ताः। तत्र प्रथमादुदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इति सन्नतरापरपर्यायोऽनुदात्त एव। द्वितीय उदात्तः। तृतीयस्तु उदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितः। चतुर्थपञ्चमयोस्तु स्वरितात्परत्वात्प्रचयः। गोदुहे। गमेर्डोसि प्रत्यये गोशब्दः। तदुपपदाद् दुह्धातोः "सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्" इति सूत्रेण क्विप्। ततश्चतुर्थ्यो एकवचने गोदुहे इति रूपम्। तत्र गोशब्दे प्रत्ययस्वरेणान्तोदात्तत्वं फिट्स्वरेण वा। दुह्शब्देऽपि धातुस्वरेणान्तोदात्तत्वम्। समासे समासान्तोदात्तत्वस्यापवादकेन "गतिकारकोपपदात्कृत्" इति सूत्रेणोत्तरपदस्य प्रकृतिस्वरकत्वे गोधुक्शब्दोऽन्तोदात्तः। चतुर्थ्येकवचनस्य सुप्त्वेनानुदात्ततया गोदुहे इति सुबन्ते मध्योदात्तत्वम्। शेषनिघातेनावशिष्टयोरनुदात्तत्वे आदिरुदात्तपर इति अनुदात्त एवावशिष्यते ऽन्त्यश्च उदात्तात्पर इतिस्वरितः। जुहूमसि। व्हयतेर्लटि उत्तमपुरुषबहुवचने मस्प्रत्यये शपि "बहुलं छन्दसी"ति तस्य श्लुः। द्वित्वात्पूर्वम् "अभ्यस्तस्यच" इति संप्रसारणं परपूर्वत्वम् "हल" इति दीर्घे ततो हूशब्दस्य "श्लावि"ति द्वित्वेऽभ्याससंज्ञायां ह्रस्वे श्चुत्वेन अभ्यासहकारस्य जकारे उत्तमपुरुषस्य मस "इदन्तो मसिरि"ति इकारागमे जुहूमसीतिरूपम्। तत्र धातोरित्यनेन व्हयतेरन्त उदात्तः। मस् प्रत्यय इति "आद्युदात्तश्चे"तिसूत्रेण सोऽपि आद्युदात्तः। सतिशिष्टन तेन धातोः स्वरस्य "अनुदात्तं पदमेकवर्जम्" इति सूत्रेणशेषनिघातः। ततो वकारस्य संप्रसारणोकारस्य व्यञ्जनस्थानिकतयाऽनुदात्तत्वम्। परपूर्वैकादेशस्यापि अनुदात्तद्वयस्थानिकतया स्थानिवत्त्वेनानुदात्तत्वम्। "हल" इति दीर्घोकारस्यापि पूर्वैकादेशरूपानुदात्तोकारस्थानिकतयानुदात्तत्वम्। एवं हूशब्दस्य अनुदात्तत्वेन तस्य द्विरुच्चारणरूपद्विर्वचनेऽपि उभयोरपि वचनयोरनुदात्तत्वम्। तत्राद्यस्य अभ्याससञ्ज्ञायां ह्रस्वोऽपि स्थानिवत्त्वेनानुदात्तः। प्रत्ययस्य इकार आगमस्तु आगमत्वाद् "आगमा अनुदात्ता" इति अनुदात्तस्तस्य पूर्ववत्त्युदात्तात्परत्वात्स्वरितत्वम्। आद्ययोस्तु स्वरयोरनुदात्तपरित्यागकारणाभावादनुदात्तत्वमेव। अन्त्यस्येकारस्य संहितायां "द्यविद्यवि" इति पदीयोदात्तः पर इति सन्नतर "उदात्तस्वरितपरस्य सन्नतर" इतिसूत्रेण। द्यविद्यवि। द्युत दीप्तौ इत्यस्माद् बाहुलकाद् डोप्रत्ययः। अतएव "गमेर्डोरि"त्यस्यौणादिकस्य सूत्रस्य व्याख्यावसरे भट्टोजीदीक्षितैः कौमुद्यां बाहुलकाद् "द्युतेरपि द्यौरित्युक्तं" सङ्गच्छते। भोजदेवस्तु द्युधातोर्डोसं प्रत्ययमाह। अभिगच्छन्त्यस्मिन् स्वं स्वं प्रदेशं प्राणिन इति द्यौरहः। तस्य सप्तम्येकवचनान्तस्येदं रूपम्। नित्यवीप्सयोरिति द्विर्भावः। तत्र धातुस्वरस्य प्रत्ययस्वरेणापहारादन्तोदात्तो द्योशब्दः। ततः परस्य सप्तमीप्रत्ययस्य सुप्त्वेनानुदात्तत्वम्। सावेकाच इति विभक्तेरुदात्तत्वं तु बाहुलकान्न भवति। द्वित्वे परस्य वचनस्य "अनुदात्तंच" इति पाणिनिसूत्रेण अनुदात्तत्वम्। द्योशब्दस्यावादेशे तस्यापि स्थानिवत्त्वेनोदात्तत्वमिति अत्रादिरुदात्तः परेऽनुदात्तास्तत्रापि प्रथमस्य स्वरितत्वं द्वितीयतृतीययोः प्रचयः।

द्वितीयामृचमाह—

उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद्रेवतो मदः ॥ २ ॥

उप । नः । सवना । आ । गहि । सोमस्य । सोमऽपाः । पिब ।
गोऽदाः । इत् । रेवतः । मदः ॥२॥

हे सोमपाः = सोमस्य पातरिन्द्र सोमं पातुं नोऽस्मदीयानि सवना = त्रीणि सवनानि प्रत्युप = समीप आगहि = आगच्छ । आगत्य च सोमस्य = सोमं पिब । रेवतो धनवतस्तव मदो = हर्षो गोदा इत् = गोप्रद एव । त्वयि हृष्टे सत्यस्माभिर्गावो लभ्यन्त इत्यर्थः ॥

उप । निपातत्वादाद्युदात्तः । सवना । सूयते सोम एष्विति सवनानि । अधिकरणे ल्युट् (पा. ३।३।११७) । सुपो डादेशष्टिलोपश्च । "लिति" (पा. ६।१।१९३) इति प्रत्ययात्पूर्वस्याकारस्योदात्तत्वम् । गहि । गमेः "बहुलं छन्दसि" (पा २।४।७३) इति शपो लुक् । हेर्ङित्वाद् "अनुदात्तोपदेश" इत्यादिना (पा. ६।४।३७) मकारलोपः । "अतो हेः" (पा. ६।४।१०५) इत्याभाच्छास्त्रीये लुकि कर्तव्ये "असिद्धवदत्राभात्" (पा. ६।४।२२) इत्याभाच्छास्त्रीयो मकारलोपोऽसिद्धवद्भवति । सोमपाः । "आमन्त्रितस्य च" (पा. ८।१।१९) इति निघातः । तस्याविद्यमानवत्त्वेऽपि पूर्वापेक्षया "तिङ्ङतिङः" (पा ८।१।२८) इति पिबेत्यस्य निघातः । न च पूर्वस्यापि पराङ्गवद्भावेनाविद्यमानवत्त्वम् । असामर्थ्येन तदभावात् । गां ददातीति गोदाः । "क्विप् च" (पा. ३।२।७६) इति क्विपं परमपि सरूपं बाधित्वा प्रतिपदविधित्वात् "आतो मनिन्क्वनिब्वनिपश्च" (पा ३।२।७४) इति विच् । क्विपि हि "घुमास्था" इत्यादिना (पा. ६४६६) धातोराकारस्येत्वं स्यात् । रेवान् । रयिर्धनमस्यास्तीति मतुप् । "ह्रस्वनुड्भ्यां मतुप्" (पा. ६।१।१७६) इति मतुबुदात्तः । "छन्दसीरः (पा. ८।२।१५) इति वत्वम् । "रयेर्मतौ बहुलं छन्दसि" (पा. ६।१।३७।२) इति सम्प्रसारणपरपूर्वत्वे गुणश्च । मदः । "मदोऽनुपसर्गे" (पा ; ३।३।६७) इत्यप् । पित्त्वादनुदात्तः ॥ २ ॥*

---

* उप । निपातत्वात् 'निपाता आद्युदात्ता" इत्याद्युदात्तः, शेषनिघातेनान्तानुदात्तः । तस्य उदात्तात्परत्वात् स्वरित "उदात्तादनुदात्तस्य स्वरित" इत्यनेन । नः । "अनुदात्तं सर्वमपादादौ" इति अधिकारे "बहुवचनस्य वस्नसौ" इत्यनेन अस्मच्छब्दस्य षष्ठीबहुवचनान्तस्य स्थानेऽनुदात्तो नसादेश इति अनुदात्तः । सवना । सूयते

स्क०—उपेत्युपसर्ग आगहीत्याख्यातेन सम्बध्यते। उपागहि उपागच्छ नः अस्माकं स्वभूतानि प्रातःसवनमाध्यदिनतृतीयसवनानि। यज्ञनाम वा सवनशब्दः। यज्ञान्। उपागत्य च सोमस्य सोमं सोमस्य वैकदेशं स्वांशलक्षणं वा हे सोमपाः सोमानां पातः। पिब। किं कारणम्, उच्यते गोदा इत्। इच्छब्दः पदपूरणो यस्मादर्थे वा। गवां दाता यस्माद् रेवतो धनवतस्तव मदः। यस्मात्सोमेन मत्तो गां ददासीत्यर्थः॥ २॥

सोमो येष्विति सवनानि। षूधातोरधिकरणे ल्युट् "करणाधिकरणयोश्च" इति सूत्रेण। "युवोरनाकावि"ति तस्यानादेशे तस्मिन् परतो धातोर्गुणेऽवादेशे सवनशब्दः। ततो द्वितीयाबहुवचने शसि तस्य इयादेशे नुमि उपधादीर्घे "शेश्छन्दसि बहुलमि"ति शेर्लोपे नलोपे "सवना" इतिरूपम्। भाष्ये तु अत्र शसः "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल" इतिसूत्रेण डाप्रत्ययष्टेर्लोपश्च उच्येते। तत्र धातोः स्वरस्य प्रत्ययस्वरेणापहारे प्राप्ते प्रत्ययस्य लित्करणादत्र "लिती"तिसूत्रेण प्रत्ययस्वरं बाधित्वा प्रत्ययात्पूर्वस्य धातुस्वरस्यैवोदात्तत्वं विधीयते। शेषनिघातेन प्रत्ययस्यानुदात्तत्वम्। धातोरुकारस्य गुणे तस्यावादेशे च स्थानिवत्त्वेनोदात्तत्वमिति सवनशब्दे आदिरुदात्तो द्वितीयस्तृतीयश्चानुदात्तौ। ततो जसि तस्य सुप्त्वादनुदात्तत्वेन तत्स्थानिकइयादेशस्याप्यनुदात्तत्वं स्थानिवत्त्वात्। तन्निमित्तकनकाराकारस्य दीर्घोऽप्यनुदात्त एवेति सवनाशब्द आदिरुदात्तो द्वितीयोऽनुदात्तोऽपि उदात्तात्पर इति स्वरितस्तृतीयस्तु स्वरितात्पर इति प्रचितः पदपाठे। संहितायां तु आकार उदात्तः परस्तेन सह सवनाशब्दीयान्त्याकारस्य सवर्णदीर्घे तस्यानुदात्तोदात्तस्थानिकतया "एकादेश उदात्तेनोदात्त" इति उदात्तत्वेन तस्मिन् परतः पूर्वस्य वकाराकारस्य "उदात्तस्वरितपरस्य सन्नतरः" इति सन्नतरः। आ। निपातत्वादाद्युदात्तः। गहि। गम्धातोर्लोट् मध्यमपुरुषैकवचने सिपि तत्स्थाने "सेर्ह्यपिच्चे"ति हिरादेशः। मध्ये कर्तरि शबिति शप्। तस्य "बहुलं छन्दसी"ति लुक्। "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिती"ति गम्धातोर्मकारस्य लोपः। आभीयत्वेन मलोपस्यासिद्धत्वा"दतोहेरि"ति लुक् न। ततो गहि इति रूपम्। तत्र गम्धातो"र्धातोरि"त्यन्त उदात्तः, सिपः पित्त्वेनानुदात्तत्वम्। तत्स्थानिकहेरपि स्थानिवत्त्वेनानुदात्तत्वं प्राप्तं परंतु अत्र गहि इति तिङन्तस्यातिङन्तपदात्परत्वेन तिङ्ङतिङ इत्यनेन सर्वानुदात्तत्वम्। तत्र संहितायामाद्यस्योदात्तात्परत्वा"दुदात्तादनुदात्तस्य स्वरित" इति स्वरितः। हिकारस्य तु स्वरितात्परत्वात्प्रचयः प्राप्त आसीत् परन्तु ततः परस्मात्सोमस्यशब्दावयवोदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इत्यनेन सन्नतरत्वम्। सोमस्य। सुधातोः, "अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्" इति औणादिकेन सूत्रेण मन्प्रत्यये धातूकारस्य गुणे सोमशब्दः, ततः षष्ठ्येकवचने ङसि तस्य स्यादेशे सोमस्येति रूपम्। तत्र धातोः स्वरः प्रत्ययस्वरेण सोऽपि प्रत्ययगतनित्त्वनिमित्तकस्वरेण निवर्त्यत इति सोमशब्दे निदन्तत्वाद् "ञ्नित्यादिर्नित्यमि"त्यादिरुदात्तः। ङसः सुप्त्वेनानुदात्तत्वात्तत्स्थानिकस्यादेशस्यापि स्थानिवद्भावेनानुदात्तत्वात्सोमस्येतिपदे आदिरुदात्तो द्वितीयतृतीयावचौ अनुदात्तौ। तत्र द्वियीयस्योदात्तात्परत्वात्स्वरितः, तृतीयस्य तु स्वरितात्परत्वात्प्रचयः। सोमपाः। उक्तरीत्या मन्प्रत्ययेन सोमशब्दो निदन्तत्वादाद्युदात्तः। तदुपपदात्पाधातोः क्विपि सोमपाशब्दः सम्बोधनप्रथमाया एकवचनान्तः। तत्र पाइत्यस्य धातुस्वरेणान्तोदात्तत्वम्। सोम + पा इत्यनयोः समासे "गतिकारकोपपदात्कृदि"ति उत्तरपदस्य प्रकृतिस्वरकत्वं समासस्वरं बाधित्वा भवतीति सोमपाःशब्दोऽन्तोदात्तः प्राप्त आसीत्परन्तु अस्य सम्बोधनविभक्त्यन्तत्वेनामन्त्रितत्वादाष्टमिकेन "आमन्त्रितस्य च" इत्यनेन सर्वनिघातः। संहितायां तु तस्य स्वरितात्परत्वात्सर्वेषामचां प्रचयः स्वरः। पिब। पाधातोर्लोटि मध्यमैकवचने सिपि तस्य ह्यादेशे

वे०—उपागच्छतास्माकं सवनानि सोमं च सोमपातः पिबाथ परस्तात् गोदा एव भवत्याश्रित आढ्यः। मदतृप्त आढ्यः प्रयच्छति पशूनिति ॥ २ ॥

मध्ये शपि शब्निमित्तके पाधातोः पिबादेशे "अतो गुण" इति पररूपे "अतोहेरि"ति हेर्लुकि पिबेति रूपम्। तत्र "धातो रितिसूत्रेण धातोरन्त उदात्तः सिपः शपश्च पित्त्वादनुदात्तत्वम्। सिप्स्थानिकह्यादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। धातोः पिबादेशस्यापि स्थानिवत्त्वेनान्तोदात्तत्वे शपैकादेशे तस्यापि अनुदात्तोदात्तोभयस्थानिकतयोदात्तत्वेऽन्तोदात्तत्वं प्राप्तमासीत् परन्तु अत्र "तिङ्ङतिङ" इति सूत्रेण अतिङन्तपदात्परत्वात्सर्वनिघातः। यद्यपि पूर्ववर्तिसोमपाःपदस्यामन्त्रितत्वेन "आमन्त्रितं पूर्वमविद्यमानवद्"इति स्वरे कर्तव्येऽविद्यमानवत्त्वात्तत्परत्वनिबन्धनस्य "तिङ्ङतिङ" इति निघातस्यासम्भवः, तथापि ततः पूर्ववर्तिसोमस्येतिपदमादाय ततः परत्वाद्भवत्यत्र निघातः। निघाते च सति तस्य सोमस्येतिमकाराकाररूपस्वरितात्परत्वात्प्रचयस्वर उभयोरप्यचोः। गोदाः। गम्धातोर्डोस् "गमेर्डोस्" इत्यौणादिकेन सूत्रेण। स च कर्तरि कारके अधिकरणे वा। ततो गच्छति या स्वयं सा वा गच्छन्त्यत्र प्राणिनो वा गौरिति। केचन गा स्तुतौ इत्यस्मादादादिकाद् बाहुलकात्कर्मणि अधिकरणे वा प्रत्ययः, गीयते स्तूयते या सा गौः, गीयतेऽत्रेति वा गौरितिव्युत्पत्तिमाहुः। तत्र गमधातोर्वा गाधातोर्वा डोसि प्रत्यये तेन डित्त्वात्पूर्वस्य टेरपहारे प्रत्ययस्वरेण गोशब्द उदात्तः। प्रत्ययस्वरेणास्याद्युदात्तत्वव्यवहारः। उणादीनामव्युत्पन्नत्वमिति मते तु फिट्सूत्रेणोदात्तः। तदानीमस्यान्तोदात्तत्वेन व्यवहारः। फले तु न विशेषः केवलं व्यवहार एव। तदुपपदाद्दाधातोः क्विपि प्रथमैकवचने गोदा इति रूपम्। तत्र दाधातो"र्धातोरि"त्यन्त उदात्तः। गोदाशब्दयोः समासे तु समासान्तत्वनिबन्धनस्यान्तोदात्तत्वस्यात्र "गतिकारकोपपदात्कृदि"त्यनेनानुमोदनाद् गोदाशब्दोऽन्तोदात्तः शेषनिघातेनादेरनुदात्तत्वम्। इत्। निपातोऽयमेवार्थे। अतो निपातत्वादाद्युदात्तो "निपाता आद्युदात्ता" इति सूत्रेण। रेवतः। रीङ् गतावित्यस्माद्धातोः "अच इरि"ति इप्रत्यये गुणेऽयादेशे रयिशब्दः रीयते गम्यते प्राप्यते पुण्येनेति रयिर्धनम्। रातेर्वा धातोरिप्रत्यये बाहुलकाद्युगागमे धातोर्ह्रस्वे च रयिशब्दः। राति यशो ददाति रीयतेऽर्थिभ्यो दीयते इति वा रयिः। तस्मान्मतुप्प्रत्ययः। तस्मिन् परे "रयेर्मतौ बहुलमि"ति संप्रसारणपरपूर्वत्वे। संप्रसारणात्पूर्वं "छन्दसीर" इति मतोर्मस्य वत्वम्। ततो गुण एकारे रेवच्छब्दो निष्पद्यते। ततः षष्ठ्येकवचने ङसि रेवत इति पदम्। तत्र रीङ्धातोरिप्रत्यये धातोरन्तोदात्तस्वरः इप्रत्ययाद्युदात्तेन निवर्तते सतिशिष्टत्वात्। एवं च धातोरीकारः "अनुदात्तं पदमेकवर्जमि"त्यनुदात्त इति तत्स्थानिकगुणस्य तत्स्थानिकायादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वमिति रयिशब्दोऽन्तोदात्तः। राधातोरिप्रत्यय इति कल्पे उक्तरीत्या प्रत्ययस्वर एवावशिष्यते। विशेषस्त्वियान् धातोराकारस्यानुदात्तत्वेन तत्स्थानिकह्रस्वस्याप्यनुदात्तत्वं स्थानिवत्त्वेनेति। रयिशब्दतः परस्य मतुपः पित्त्वादनुदात्तत्वं प्राप्तं परन्त्वत्र "ह्रस्वनुड्भ्यां मतुबि"ति विशेषसूत्रेण मतुप उदात्तत्वम्। ततो मतुब्निमित्तकसम्प्रसारणस्य व्यञ्जनस्थानिकतया व्यञ्जनस्यानुदात्तत्वेन स्थानिवद्भावेनानुदात्तत्वं परवर्तीकारस्य शेषनिघातेनानुदात्तत्वात्तेन सह संप्रसारणस्य पूर्वरूपैकादेशस्य स्थानिवत्त्वेनानुदात्तत्वमेव। तस्य पूर्वेण रेफाकारेण गुणेऽपि तथैवानुदात्तत्वम्। ङसः प्रत्ययस्य सुप्त्वादनुदात्तत्वमिति रेवतःशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्त उदात्तात्पर इति स्वरितः पददशायाम्। संहितायांतु मदशब्दावयव उदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इति तस्यानुदात्तापरपर्यायसन्नतरत्वम्। ततो मकारपरत्वे रुत्वे उत्वे गुणेऽपि अनुदात्तत्वमेव गुणौकारस्य उत्त्वस्य व्यञ्जनस्थानिकत्वात् गुणस्यानुदात्तद्वयस्थानिकत्वात्स्थानिवत्त्वात्। मदः। मदी हर्षग्लेपनयोरित्यस्मात्

तृतीयामृचमाह :—

अथा ते अन्तमानां विद्याम सुमतीनाम् ।

मा नो अति ख्य आ गहि ॥३॥

अथ । ते । अन्तमानाम् । विद्याम । सुऽमतीनाम् ।

मा । नः । अति । ख्यः । आ । गहि ॥३॥

अथ = सोमपानानन्तरम् इन्द्र ते = तव अन्तमानाम् = अन्तिकतमानामतिशयेन समीपवर्तिनां सुमतीनाम् = शोभनमतियुक्तानां शोभनप्रज्ञानां पुरुषाणां मध्ये स्थित्वा विद्याम । वयं त्वां जानीयाम । यद्वा । सुमतीनाम् = शोभनबुद्धीनां कर्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः—बुद्धिलाभाय त्वां स्मरेमेत्यर्थः । त्वमपि नोऽति माख्यः – अस्मानतिक्रम्यान्येषां त्वत्स्वरूपं मा प्रकथय । किन्त्वागहि = अस्मानेवागच्छ ॥

अथेति निपात आद्युदात्तः । "निपातस्य च" (पा ६।३।१२६) इति दीर्घत्वम् । अन्तमानाम् । अतिशयेनान्तिका इत्यतिशायने तमप् । "तमे तादेश्च" (पा ६।४।१४९।५) इति तादिलोपः । अन्तोऽस्यास्तीत्यन्तिकः समीपः । "अत इनिठनौ" (पा ५।२।११५) इति ठन् । नित्त्वादाद्युदात्तः । दूरोत्कर्षस्य ह्यवसानं नास्ति । सामीप्योत्कर्षस्य पुनर्यो यस्य समीपः स एव तस्यान्त इत्यन्तवत्त्वात्समीपमन्तिकमुच्यते । विद्याम । वेत्तेर्लिङि "यासुट् परस्मैपदेषूदात्तो ङिच्च"(पा ६।४।१०३) इति यासुडुदात्तः । पादादित्वात् "तिङ्ङतिङः"(पा ८।१।२८) इति न निघातः । सुमतीनाम् । मतिशब्दे क्तिन्नन्तेऽपि "मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः" (पा ३।९६) इतीकार उदात्तः । शोभना मतिर्येषां ते सुमतय इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरापवादेन "नञ्सुभ्याम्" (पा ६।२।१७२) इत्युत्तरपदान्तोदात्तः । शोभना मतयः सुमतय इति कर्मधारयेऽप्यव्ययपूर्वपदप्रकृतिस्वरापवादः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वैव । अतो मतुपि ह्रस्वादन्तोदात्ताच्च सुमतिशब्दात्परस्य नामो "नामन्यतरस्याम्" इत्युदात्तत्वम् । ख्यः । "ख्या प्रकथने" इत्यस्य लुङि सिपि "अस्यतिवक्तिख्यातिभ्योऽङ्"

"मदोऽनुपसर्गे" इति सूत्रेण अप् । सच पिदिति "अनुदात्तौ सुप्पितौ" इत्यनुदात्त इति धातुस्वर एवावशिष्यते । ततः परस्य प्रत्ययस्वरस्योदात्तादनुदात्तस्येति स्वरितः ।

(पा. ३।१।५२) इति च्लेरङादेशः। "आतो लोप इटि च" (पा. ६।४।६४) इत्याकारलोपः। "इतश्च" (पा. ३।४।१००) इतीकारलोपो रुत्वविसर्गौ। "न माङ्योगे" (पा. ६।४।७४) इत्यडभावः। गहि। गमेः "बहुलं छन्दसि" (पा. २।४।७३) इति शपो लुकि हेर्ङित्त्वात् "अनुदात्तोपदेश" (पा. ६।४।३७) इति मकारलोपस्य "असिद्धवदत्राभात्" (पा. ६।४।२२) इत्यसिद्धत्वात् "अतो हेः" (पा. ६।४।१०५) इति लुक् न भवति ॥ ३ ॥*

---

* अथ। निपातत्वादाद्युदात्तो "निपाता आद्युदात्ता" इत्यनेन। शेषनिघातेनान्त्यस्यानुदात्तत्वे तस्योदात्तात्परत्वात्स्वरितः। ते। युष्मच्छब्दस्य रूपम्। तच्च "अनुदात्तं सर्वमपादादौ" इत्यधिकारे "तेमयावेकवचनस्य" इति सूत्रेण युष्मच्छब्दस्य षष्ठ्या एकवचनान्तस्य स्थाने विधीयते। एवं चास्यानुदात्तत्वेनैव विधानादनुदात्तत्वम्। अन्तमानाम्। अम गत्यादिषु इत्यस्माद्धातोः "हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्" इत्यौणादिकेन सूत्रेण तनि प्रत्यये "तितुत्रतथसिसुसरकसेषु च" इत्यनेन इडागमप्रतिषेधेऽनुस्वारपरसवर्णयोरन्तशब्दः। तस्मान्मत्वर्थे "अत इनिठनौ" इत्यनेन ठन् "ठस्येकः" इति इकादेशे "यस्येति च" इति अकारलोपे अन्तिकशब्दः। तस्मादतिशयार्थे "अतिशायने तमबिष्ठनौ" इति तमपि प्रत्यये अन्तिकतमेत्यत्र "तमे तादेश्च लोपः" इत्यनेन तिकशब्दस्य लोपे अन्तमशब्दस्तस्माद्बहुवचने षष्ठ्या आमि नुटि दीर्घे च अन्तमानामिति रूपम्। तत्र अन्त इत्यत्र "धातोरि"ति धातुस्वरस्य "आद्युदात्तश्चे"तिप्रत्ययस्वरेण निवृत्तौ प्राप्तायां तदपवादकेन तन्प्रत्ययगतनित्त्वनिमित्तकेन "ञ्नित्यादिर्नित्यम्" इति नित्स्वरेण तन्प्रत्ययान्तस्यादेरुदात्तत्वविधानाच्छेषनिघातेनान्तानुदात्तोऽन्तशब्दः। ततष्ठनि तद्गतनित्त्वनिमित्तवशतोऽन्तिकशब्दोऽप्याद्युदात्त एव। तस्मात्तमपि तमपः पित्त्वेनानुदात्तत्वात्स एवादिस्वर उदात्तो भवति अन्तिकतमशब्दे। स एवच तिकशब्दलोपेऽप्यवतिष्ठते इति अन्तमशब्द आद्युदात्तः। ततष्षष्ठ्या बहुवचने आमि तस्य सुप्त्वेनानुदात्तत्वादादिस्वरोऽनिवृत्तोऽवतिष्ठते। ततो दीर्घः सञ्जायमानोऽनुदात्तमकाराकारस्थाने जायते इति तस्य स्थानिवत्त्वेनानुदात्तत्वम्। एवंचान्तमानां शब्दे आदिरुदात्तोऽवशिष्टाः सर्वेऽचोऽनुदात्ताः। तत्र द्वितीयस्योदात्तात्परत्वात्स्वरितः। तृतीयचतुर्थयोस्तु स्वरितात्परत्वात्प्रचयः स्वरः। विद्याम। विद्धातोर्लिङि उत्तमपुरुषबहुवचने मसि "नित्यं ङितः" इति सकारलोपे "यासुट् परस्मैपदेषूदात्तो ङिच्च" इति यासुडागमे मध्ये शपि तल्लुकिच यासुटो ङित्त्वाद् गुणाभावे "लिङः सलोपोऽनन्त्यस्य" इति यासुटः सकारलोपे विद्याम इति रूपम्। तत्र धातोरन्तस्योदात्तत्वे मसः प्रत्ययस्य "आद्युदात्तश्चे"ति आद्युदात्तस्वरेण बाधनीयेऽत्र यासुटो विशेषविहितेनोदात्तत्वेन प्रत्ययस्वरो धातुस्वरश्चोभौ बाध्येते तस्माद्विद्यामपदे यासुडाकार उदात्तोऽवशिष्टावनुदात्तौ शेषनिघातेन। स्वरप्रक्रियायां प्रायः सर्वत्रोदात्तत्वनिवृत्तिरूपं बाधमभिप्रेत्य बाधोक्तिः। एवं च विद्यामशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्तोऽपि उदात्तात्पर इति स्वरितः। अत्र "तिङ्ङतिङ" इति सर्वानुदात्तत्वं न प्रवर्तते पादादित्वात्। सुमतीनाम्। मनु अवबोधने इत्यस्मात् क्तिनि प्रत्यये तलोपे मतिशब्दः। सुमतिशब्दयोर्बहुव्रीहौ तत आमि नुटि दीर्घे सुमतीनामिति पदम्। तत्र मतिशब्दे धातुस्वरः प्राप्तः, ततोऽपि परत्वात्प्रत्ययस्वर "आद्युदात्तश्चे"ति प्राप्तस्तस्यापवादेन नित्स्वरेण मतिशब्द आद्युदात्तः प्राप्तः परन्तु "मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः" इति सूत्रेण मतिशब्दस्येकार उदात्तः शेषनिघातेनादिरनुदात्तः। सुपदेन बहुव्रीहौ समासस्वरापवादेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वस्य सुपदस्य निपातत्वनिमित्तस्याद्युदात्तस्वरस्य प्राप्तौ तदपवादेन "नञ्सुभ्याम्"

स्क०—अथेत्यानन्तर्ये। अथ सोमपानानन्तरं ते तव अन्तमानाम् अन्तमान् सन्निकृष्टान् विद्याम। जानीयाम। कीदृशान् सुमतीन् त्वद्भक्तिप्रज्ञोपेतान्। अथवा अन्तमानां सुमतीनामिति निर्धारणे षष्ठ्यौ। तव सन्निकृष्टानि सुमतीनि। मन्यतेरर्चतिकर्मत्वान्मतिशब्दः स्तुत्यर्थः। सुस्तुतीनि अत्यन्तोत्कृष्टानि धनानि तानि तेषां वैकदेशं लभेमहि। किञ्च मानो अतिख्यः। अतिपूर्वोऽत्र ख्यातिः सामर्थ्यात्परित्यागेऽतिक्रमे वा। अस्मान् कदापि मा परित्याक्षीः, अतिक्रमीर्वा। किं तर्हि? सर्वदैवावगच्छ। अथवा ख्यातिः प्रथनार्थ एव। न इति कर्मश्रुतेः। अतिश्चोपसर्गः। मास्माननतिख्यः अन्येभ्यः प्रकाशीभूः। अन्यसकाशं मा गमोऽत्समीपमेवागच्छेत्यर्थः॥ ३॥

वे०—संप्रति तव सन्निकृष्टास्त्वयि विद्यमानाः सुमतीर्वयं लभेमहि। सर्वेणाभ्युदयेनायं युक्तोऽस्त्विति मतिः सुमतिः। मास्मानपहायान्यान्द्राक्षीरिहागच्छ॥ ३॥

इति सूत्रेण सुमतिशब्दे उत्तरपदान्त उदात्तः। षष्ठीबहुवचनामः सुप्त्वेनानुदात्तत्वे नामूनिमित्तकदीर्घस्योदात्तमतिशब्देकारस्थानिकतस्या स्थानिवद्भावेनोदात्तत्वे सुमतीनामिति पदे उपान्त्येनोदात्तेन भाव्यं परंतु,"नामन्यतरस्याम्" इत्यनेन नाम उदात्तत्वविधानादत्रोदात्तत्वैव सुमतीनांशब्देऽवशिष्टा अनुदात्ताः शेषनिघातेन। तत्र संहितायां विद्यामशब्दीयस्वरितात्परत्वमिति आद्ययोः प्रचयः। तृतीयस्योदात्तः पर इति अनुदात्त एव। अत्र सुमतिशब्दे कर्मधारयं केचिदिच्छन्ति। तन्मते सुमतिशब्दे समासान्तोदात्तत्वापवादेन "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया कृत्या" इत्यनेनाव्ययपूर्वपदस्य प्रकृतिस्वरत्वे प्राप्ते तदपवादेन "गतिकारकोपपदात्कृद्" इत्यनेन कृदुत्तरपदप्रकृतिस्वरत्वे सुमतिशब्दोऽन्तोदात्तः। अविशिष्टा प्रक्रिया पूर्ववद्। मा। निपातत्वादाद्युदात्तः। नः। "अनुदात्तं सर्वमपादादावि"त्यधिकारे "बहुवचनस्य वस्नसौ" इत्यनेन अस्मच्छब्दस्य द्वितीयाबहुवचनान्तस्य स्थानेऽनुदात्तोनसादेशः। तस्य नस आदेशस्य अतिशब्दावयवेऽति परतः संहितायां सकारस्य रुत्वोत्वयोर्गुणे नो इति रूपम्। तत्र सकारस्य व्यञ्जनत्वेन तत्स्थानिकस्य रोरपि व्यञ्जनतया तत्स्थानिकस्योत्वस्यानुदात्तत्वं स्थानिवत्त्वात्। गुणस्य त्वोकारस्य नकाराकारोकाररूपानुदात्तद्वयस्थानिकतयाऽनुदात्तत्वम्। अत्र पूर्वरूपं तु न प्रकृतिभावस्य विधानात्। अति। निपातत्वादादेरुदात्तत्वे शेषनिघातेनान्त्यस्यानुदात्तत्वे तस्योदात्तात्परत्वात्स्वरितः। ख्यः। ख्या प्रकथने इत्यस्माद्धातोर्लुङि मध्यमपुरुषैकवचने सिपि "इतश्च लोपः परस्मैपदेषु" इतीकारलोपे मध्ये च्लौ तस्य स्थाने सिचि प्राप्ते तदपवादेन "अस्यतिवक्तिख्यातिभ्योऽङ्" इत्यनेनाङि "आतो लोप इटि च" इति धात्वाकारलोपे माङो योगाद् "न माङ्योगे" इत्यडागमाभावे रुत्वविसर्गयोः ख्य इति रूपम्। तत्र धातोः स्वरस्याङा प्रत्ययेन लोपादाङः प्रत्ययस्य "आद्युदात्तश्च" इत्युदात्तत्वेन ख्यःशब्दस्योदात्तत्वं प्राप्तं परन्तु अत्र "तिङ्ङतिङः" इति सूत्रेण निघाते ख्यःशब्दोऽनुदात्तः। आ। निपातत्वादाद्युदात्तः। गहि। गम्धातोर्लोटि मध्यमपुरुषैकवचने सिपि मध्ये शपि "बहुलंछन्दसी"ति शपो लुकि तस्य, "सेर्ह्यपिच्च" इत्यनेन ह्यादेशे तस्यापित्वात् "सार्वधातुकमपिदि"ति ङिद्वद्भावेन "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इति सूत्रेण धातोर्मकारस्य लोपे "असिद्धवदत्राभाद्" इत्यनेन मलोपस्यासिद्धत्वात् "अतो हेः" इति लुकोऽभावे गहि इति रूपम्। तत्र सिप्स्थानिकतया हेरपि स्थानिवत्त्वेनानुदात्तत्वे धातोः स्वरस्यावशेषे प्राप्तं "तिङ्ङतिङः" इत्यनेन सर्वानुदात्तं पदम्। तस्य संहितायामाकारादुदात्तात्परत्वात्प्रचय स्वर उभयोरप्यचोः।

चतुर्थीमृचमाह—

परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम् ।
यस्ते सखिभ्य आ वरम् ॥४॥

परा । इहि । विग्रम् । अस्तृतम् । इन्द्रम् । पृच्छ । विपःऽचितम् ।
यः । ते । सखिऽभ्यः । आ । वरम् ॥४॥

अत्र यजमानं प्रति होता ब्रूते। हे यजमान त्वमिन्द्रं परेहि। इन्द्रस्य समीपे गच्छ। गत्वा च विपश्चितम्=मेधाविनं होतारं मां पृच्छ=असौ होता सम्यक् स्तुतवान्न वेत्येवं प्रश्नं कुरु। य इन्द्रस्ते तव यजमानस्य सखिभ्यः=ऋत्विग्भ्यो वरम्=श्रेष्ठं धनं पुत्रादिकमा=समन्तात्। प्रयच्छतीति शेषः। तादृशमिन्द्रमिति पूर्वत्रान्वयः। पुनरपि कीदृशम्? विग्रम्=मेधाविनम्। अस्तृतम्=अहिंसितम्॥

"विप्र" इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु (निघ. ३।१५) विग्रविपश्चिच्छब्दौ पठितौ। विग्रम्। वृषादित्वादाद्युदात्तः। अस्तृतम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। इन्द्रशब्द "ऋज्रेन्द्राग्र" (उ. २।२९) इत्यादिना रन्। नित्त्वादाद्युदात्तः। सखिभ्यः। "समाने ख्यः स चोदात्तः" (उ. ४।१३८) इति समान उपपदे ख्यातेरिण्। डिदित्यनुवृत्तेस्तस्य डित्त्वाट्टिलोपश्च तत्संनियोगेन यलोपः। उपपदस्योदात्तत्वम्। "समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु" (पा. ६।३।८४) इति सभावः। अतः सखिशब्द आद्युदात्तः। व्रियत इति वरः। "ग्रहवृदृनिश्चिगमश्च" (पा. ३।३।५८) इत्यप्। तस्य पित्त्वात् धातुस्वर एव॥ ४॥*

---

* परा। निपातत्वादाद्युदात्तत्वे शेषनिघातेनान्तानुदात्तः। तस्य संहितायामिहिशब्दीयेकारेऽनुदात्ते परे गुणैकादेशे तस्य स्थानिवत्त्वेनानुदात्तत्वे उदात्तात्परत्वात्स्वरितः। इहि। "इण् गतावि"त्यस्माद्धातोर्लोटि मध्यमपुरुषैकवचने सिपि तस्य "सेर्ह्यपिच्चे"ति ह्यादेशे मध्ये शपि तल्लुकि च हेरपित्त्वान्ङित्त्वे गुणनिषेधे इहीति रूपम्। तत्र धातोरितिधातोः स्वरः प्राप्तः सिपः पित्त्वेनानुदात्तत्वात्तत्स्थानिकह्यादेशस्य स्थानिवद्भावेनानुदात्तत्वात् परन्तु अत्र पराशब्दादतिङन्तात्परत्वात् "तिङ्ङतिङ" इति सर्वानुदात्तत्वम्। तत्राद्यस्य संहितायां पराशब्देनैकादेशे उदात्तात्परत्वात्स्वरितः। द्वितीयस्तु विग्रशब्दावयवोदात्तः पर इति अनुदात्तापरपर्यायः सन्नतरः। विग्रम्। विपूर्वाद् गृणाते"रन्येष्वपि दृश्यत" इति डप्रत्ययः। अपिग्रहणं सूत्रे सर्वोपाधिव्यभिचारार्थमिति डित्त्वेऽपि टिलोपो न भवतीत्यर्थः। वस्तुतस्तु मूलविभुजादित्वात्कप्रत्ययो ज्ञेयः। अत्र कल्पे पदपाठेऽवग्रहाभावः सन्देहादिति

स्क०—आत्मन एवान्तरात्मनः प्रैषः। हे अन्तरात्मन् परागच्छ। कम्? इन्द्रम्। इन्द्रसकाशं गच्छेत्यर्थः। कीदृशम्? विप्रम्। मेधाविनाम। मेधाविनम्। अस्तृतम्। स्तृञ् आच्छादने हिंसायां वा। अनाच्छादितं सर्वप्रकाशम्। अहिंसितं वा। गत्वा च पृच्छ, किम्? विपश्चितम्। एतदपि मेधाविनामैव। विप्रमिति पौनरुक्त्यप्रसङ्गान्नेदमिन्द्रविशेषणम्, किं तर्हि?

विज्ञेयम्। विशेषेण गृणातीति विप्रो मेधावी। तत्र धातोः स्वर आद्ये कल्पे डप्रत्ययेनापहृत इति डप्रत्ययस्याद्युदात्तत्वं प्रशब्दे। ततो विना समासे "गतिकारकोपपदात्कृत्" इति उत्तरपदस्य अन्त उदात्तः प्राप्तः परन्तु वृषादिपाठकल्पनया विप्रशब्दस्याद्युदात्तत्वं बोध्यम्। अन्त्यकल्पे धातोः स्वरो यणाऽपहृत इति विशेषः। शिष्टा प्रक्रिया तु पूर्ववद्। यदि पदपाठेऽवग्रहाकरणं वृषादिपाठकल्पनागौरवं मन्यते तदा "विचिर् पृथग्भावे" इत्यस्मादन्तर्भावितण्यर्थादौणादिको रन्प्रत्ययः कल्पनीयो धातोः कुत्वं च। तदानीं विविनक्ति पदार्थानां विवेकं करोतीति विप्रः पदार्थविवेचको मेधावीत्यर्थः। अत्र नित्त्वादाद्युदात्तत्वं विप्रशब्दस्य। अन्तस्तु शेषनिघातेनानुदात्तः। तस्य पदतादशायामुदात्तात्परत्वाद् "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितः। संहितायांतु अस्तृतंशब्दावयवोदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतरः"। अत्रामि प्रत्यये तस्य सुप्त्वेनानुदात्तत्वात्तेन सह पूर्वस्य विप्रशब्दावयवानुदात्तरेफाकारस्य "अमिपूर्वः" इतिपूर्वरूपैकादेशे स्थानिवत्त्वेनानुदात्तत्वेऽपि पूर्ववदेव स्वरः। अस्तृतम्। स्तृधातोर्निष्ठातप्रत्यये नञा समासेऽमिपूर्वरूपैकादेशे अस्तृतंशब्दः। तत्र धातोः स्वरो निष्ठाप्रत्ययस्वरेण सतिशिष्टत्वान्निवर्त्यते। ततः समासे समासान्ता इत्यन्तोदात्तत्वं प्राप्तं परन्तु तदपवादकेन "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इत्यनेनाव्ययपूर्वपदप्रकृतिस्वरकत्वम्। तेन नञो निपातत्वादाद्युदात्तत्वमेव समासेऽप्यवतिष्ठते। ततोऽमि पूर्वरूपादिप्रक्रिया विप्रशब्दवज्ज्ञेया। एवं चात्र शब्दे आदिरुदात्तो द्वितीयोऽनुदात्तः। तस्योदात्तात्परत्वात्स्वरित "उदात्तादनुदात्तस्य स्वरित" इत्यनेन। तृतीयस्तु स्वरितात्पर इति प्रचितः "स्वरितात्परेषामनुदात्तानाम्" इत्यनेन पदपाठे। संहितायांतु इन्द्रशब्दावयव उदात्तः पर इति सन्नतरत्वम्। इन्द्रम्। इन्देर्धातोः "ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवम्रेरामालाः" इत्यौणादिकेन रन्प्रत्ययो निपातितः। तत्र धातुस्वरस्य निवर्तकप्रत्ययसामान्यस्वरस्य प्रत्ययगतनित्त्वनिबन्धनेन नित्स्वरेण "ञ्नित्यादिर्नित्यम्" इत्यनेनेन्द्रशब्दस्यादिरुदात्तः शेषनिघातेनान्तोऽनुदात्तः। ततोऽमि तस्य सुप्त्वादनुदात्तत्वेन तेन पूर्वस्य "अमि पूर्वः" इति पूर्वरूपैकादेशे एकादेशनिष्पन्नस्यापि उभयानुदात्तस्थानिकत्वेन स्थानिवद्भावेन अनुदात्तत्वात्तस्येन्द्रशब्दावयवप्रथमेकाररूपोदात्तात्परत्वात्स्वरितः। पृच्छ। प्रच्छेर्धातोर्लोटि मध्यमपुरुषैकवचने सिपि तस्य स्थाने "सेर्ह्यपिच्च" इति ह्यादेशे तस्यापित्त्वेन "सार्वधातुकमपित्" इति ङिद्वद्भावविधानात् तस्मिन्परतो "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" इति सूत्रेण प्रच्छेर्धातोः संप्रसारणेन रेफस्थाने ऋकारादेशे परवर्तिनोऽकारस्य "संप्रसारणाच्च" इतिपूर्वरूपे मध्ये शपि "अतो हेः" इति हेर्लुकि पृच्छेतिपदम्। तत्र धातोः स्वरः, सिपः पित्त्वादनुदात्तत्वेन तेन धातुस्वरानिवर्तनात्। संप्रसारणस्य व्यञ्जनस्थानिकतयानुदात्तत्वेन तस्य परवर्तिनाऽकारेण सह पूर्वरूपैकादेशे तस्यानुदात्तोदात्तोभयस्थानिकत्वेन "एकादेश उदात्तेनोदात्तः" इति उदात्तत्वेन पृच्छशब्द आद्युदात्तः प्राप्तः परन्वत्रातिङन्तपदात्परत्वात् "तिङ्ङतिङः" इत्यनेन सर्वानुदात्तत्वम्। तस्य चेन्द्रंशब्दीयस्वरितात्परत्वात्संहितायां प्रचयः स्वर उभयोरचोः "स्वरितात्परेषामनुदात्तानाम्" इत्यनेन। विपश्चितम्। "विप् प्रेरणे" इत्यस्मात्संपदादित्वात्क्विपि विप्शब्दो वाण्या बोधकः, विप्यते प्रेर्यते मनसेति विप् वाक् विपो वाचश्चेतयते इति विप उपपदाच्चितेः

स्तोतृप्रतिनिर्देशः। मेधाविनं स्तोतारम्। कतमोऽसौ पुमानत्यन्तमेधावी स्तोता यस्य त्वं सम्यक् स्तुतिं शृणोषि इत्येतद्गत्वा इन्द्रं पृच्छेत्यर्थः। स किंरोति? इन्द्रं पृच्छेत्युच्यते। यस्ते तव सखिभ्यः सखिस्थानीयेभ्यः पुत्रपौत्रादिभ्यो वा आ वरम्। आ इत्युपसर्गात्, वरं, सखिभ्य इति च कर्मसंप्रदानश्रुतेर्योग्यक्रियाध्याहारः। आदत्ते वरं ददाति अभिलषितं ददातीत्यर्थः॥ ४॥

वे०—स्तोतरितस्त्वमुपगच्छ, गत्वाच मेधाविनमर्हिंसितं शत्रुभिरिन्द्रं पृच्छ, कीदृशः क्व स वर्तते इति कंचन विपश्चितं पृच्छ। य इन्द्रस्तव पुत्रादिभ्यो वरणीयं धनं प्रयच्छति॥ ४॥

क्विपि "तत्पुरुषे कृति बहुलम्", इति विभक्तेरलुकि विपश्चिच्छब्द इति देवराजयज्वा। तत्र "डिप क्षेप" इति चौरादिकस्थाने विप् इतिपाठो बोध्यः। "विपश्यंश्चेतयते" इति क्षीरस्वामी। पृषोदरादित्वात्पश्यते रूपमिति तदर्थः। एवञ्चात्र मते विपूर्वाद् दृश्धातोः क्विप् धातोर्दकारस्य पकारोऽकारश्चकोरस्येति विज्ञेयम्। ततो विपश्-शब्दस्य चित् शब्देन समासः। तत्र विप्धातोः क्विपि क्विपः सर्वापहारेण धातुमात्रस्य शेषा"द्धातोरि"त्यन्त उदात्तः। ततो द्वितीयाबहुवचने शसि शसः सुप्त्वादनुदात्तत्वेन विप इतिपदमाद्युदात्तमेव। अन्त्यस्यानुदात्तस्योदात्तात्पर-त्वात्स्वरितोऽसंहितायाम्। ततश्चिदित्यत्रापि धातुस्वर एव क्विबन्तत्वाद्। ततो विपश्चिदित्यनयोः समासे "समासस्य" इत्यन्तोदात्तः प्राप्तस्तदपवादेन "गतिकारकोपपदात्कृदि"त्यनेन कृदन्तरूपोत्तरपदस्य प्रकृतिस्वरकत्व-बोधनेन प्रकृते चिदित्यस्य स्वरः समासेऽपि भवतीति विपश्चिच्छब्दोऽन्तोदात्तः। शेपनिघातेनाद्ययोरचोरनुदात्त-त्वम्।ततो द्वितीयाया एकवचनस्यामः सुप्त्वेनानुदात्तत्वेन चिदितीकाराऽदात्तात्परत्वेन संहितायां तस्य स्वरितः। द्वितीयव्युत्पत्तिमते तु विशब्दो निपातत्वादाद्युदात्तः। दृश्धातोः पशस्तु धातुस्वरेणान्तोदात्तत्वम्। तयोः समासे तु समासान्तस्वरो "गतिकारकपूर्वपदादिति" वा स्वर इत्यन्तोदात्तत्वम्। चितस्तु स्वरः पूर्ववदेव। ततो विपश्चिदित्यनयोः समासान्तस्वरेण विपश्चिच्छब्दोऽन्तोदात्तः। केवलमस्मिन्पक्षे पदपाठेऽवग्रहानुरोधेन विपस्शब्दस्य सान्तत्वमपि वृषोदरादित्वात् बोध्यम्। अमा साहित्ये स्वरस्तु पूर्वोक्तवदेव। यः। यच्छब्दः "त्यजितनियजिभ्यो डित्" इत्यौणादिकेन सूत्रेण यजधातोरदिना डिता प्रत्ययेन निष्पादितः। तत्र प्रत्ययस्वर "आद्युदात्तश्चे"ति आद्युदात्तः। तेन यच्छब्दोऽन्तोदात्तः,औणादिकेऽव्युत्पत्तिपक्षाश्रयणेतु "फिषोऽन्त" इत्यन्तोदात्तः। ततः प्रथमैकवचने सुप्रत्यये "त्यदादीनामः" इत्यनेन यच्छब्दस्यात्त्वे"तो गुण" इति पररूपे रुत्वविसर्गयोः सतोर्य इति पदम्। तत्र त्यदाद्यत्वस्य व्यञ्जनस्थानिकत्वेन व्यञ्जनस्य "व्यञ्जनमनुदात्तम्" इत्यनुदात्तत्वेन स्थानिवद्भावेन त्यदाद्यकारस्यापि अनुदात्तत्वम्। तेन सह पूर्वाकारस्य पररूपैकादेशे यकाराकार उदात्तस्त्यदाद्यकारोऽनुदात्त इति उदात्तानुदात्तोभयस्थानिकतयैकादेशस्य स्थानिवत्त्वेनोभयस्वरकतया स्वरितत्वप्राप्तौ "एकादेश उदात्तेनोदात्तः", इति उदात्तत्वविधानाऽदात्तः। ते। "अनुदात्तं सर्वमपादादावि"त्यधिकारे "तेमयावेकवचनस्य", इति युष्मच्छब्दस्य षष्ठ्येकवचनान्तस्य स्थानेऽनुदात्ततेआदेशविधानादनुदात्तः। सखिभ्यः। समानशब्दोपपदाद् "ख्या प्रकथने" इत्यस्माद्धातोः "समाने ख्यः स चोदात्तः" इति डित् इण्प्रत्ययो यकारलोपः समानस्य स्थाने जातस्य "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु" इति सकारस्योदात्तत्वं च विधीयते। तेन सखिशब्दो निष्पद्यते। तस्मात्पञ्चमी-बहुवचने भ्यसि रुत्वविसर्गयोः सखिभ्य इति पदम्। तत्र विशेषविधानात्सखिशब्द आद्युदात्तः शेषनिघाते-नान्त्यस्यानुदात्तत्वम्। भ्यसोऽपि सुप्त्वेनानुदात्तता। तत्र खीकारस्योदात्तात्परत्वात्स्वरितो भ्यसोऽकारश्च

पञ्चमीमृचमाह—

उत ब्रु॑वन्तु नो नि॒दो निर॒न्यत॑श्चिदारत।

द॒धा॑ना इन्द्र॒ इद्दुवः॑ ॥५॥

उ॒त। ब्रु॒वन्तु॒। नः॒। नि॒दः॑। निः। अ॒न्यतः॑। चि॒त्। आ॒र॒त।

द॒धा॑नाः। इन्द्रे॑। इत्। दुवः॑ ॥५॥

नोऽस्माकं सम्बन्धिनः। ऋत्विज इति शेषः। ते ब्रुवन्तु। इन्द्रं स्तुवन्तु। उत=अपि च हे निदो=निन्दितारः पुरुषा निरारत=इतो देशान्निर्गच्छत। अन्यतश्चिद्=अन्यस्मादपि देशान्निर्गच्छत। कीदृशा ऋत्विजः? इन्द्रे दुवः=परिचर्यां दधानाः=कुर्वाणाः। इच्छब्दोऽवधारणे। सर्वदा परिचर्यां कुर्वन्त एव तिष्ठन्त्वित्यर्थः॥

निन्दन्तीति निदः। णिदि कुत्सायाम्। क्विपि नुमभावश्छान्दसः। सुपोऽनुदात्तत्वात् धातुस्वरः। आमन्त्रितत्वेऽपि वाक्यान्तरत्वेन स्ववाक्यगतपदादपरत्वान्न निघात इत्याद्युदात्तत्वमेव। अन्यतः। "लिति" (पा. ६।१।१८३) इति प्रत्ययात्पूर्वस्योदात्तत्वम्। चिदित्यपिशब्दार्थे। तेन न केवलमितः। इतो निर्गत्यान्यतोऽपि निर्गच्छतेति गम्यते। स एष धात्वर्थयोः सम्बन्ध आरतेति लुङा द्योत्यते। स हि धातुसम्बन्धाधिकारे विधीयते। आरत। अर्त्तेः "छन्दसि लुङ्लङ्लिट" (पा. ३।४।६) इति लोडर्थे लुङ्। मध्यमबहुवचनस्य तादेशः। "सर्तिशास्त्यर्तिभ्यश्च" (पा. ३।१।५६) इति च्लेरङादेशः। "ऋदृशोऽङि गुणः" (पा. ७।४।१६) इति गुणः। आडागमः। दधानाः। शानचश्चित्त्वात्प्राप्तमन्तोदात्तं बाधित्वा परत्वात् "अभ्यस्तानामादिः" (पा. ६।१।१८७) इत्याद्युदात्तत्वम्। दुवः परिचर्या। "इरज्यति"

स्वरितात्परत्वात्प्रचितः पदावस्थायां, संहितायां तु आकार उदात्तः पर इति सन्नतरः। आ। निपातत्वादाद्युदात्तः। वरम्। वृधातोः "ग्रहवृदृनिश्चिगमश्चे"ति सूत्रेणाप्प्रत्यये धातोर्गुणे वरशब्दः। ततो द्वितीयैकवचनेऽमि "अमि पूर्वं" इति पूर्वरूपैकादेशे वरमिति पदम्। तत्र वरशब्दे धातोरन्त उदात्तः, प्रत्ययः पित्त्वादनुदात्त इति स एव स्वरोऽवशिष्यत इति वरशब्द आद्युदात्तः। अमः प्रत्ययस्य सुप्त्वानुदात्तत्वात्तस्य पूर्ववर्त्तिरेफाकारेणानुदात्तेन पूर्वरूपैकादेशे तस्यानुदात्तस्थानिकतया स्थानिवत्त्वेनानुदात्तत्वम्। एवं वाकार उदात्तः राकार उदात्तात्पर इति स्वरितः।

इत्यादिषु (निघ० ३।५) "दुवस्यति" इति पाठात्। "नब्विषयस्यानिसन्तस्य" (फि. २।३) इत्याद्युदात्तः ॥ ५ ॥* ॥ ७ ॥

॥ प्रथमस्य प्रथमे सप्तमो वर्गः ॥

---

* उत। "एवादीनामन्त" इति फिट्सूत्रेण "निपाता आद्युदात्ता" इत्यपवादेन अन्त उदात्तः शेषनिघातेनादेरनुदात्तत्वम्। ब्रुवन्तु। "ब्रूञ् व्यक्तायां वाची"त्यस्माद्धातोर्लोटि प्रथमपुरुष-बहुवचने परस्मैपदे झौ झस्यान्तादेशे एरुकारे शपि तल्लुकिच ऊकारस्योवङादेशे ब्रुवन्त्विति रूपम्। तत्र धातोः स्वरस्य सतिशिष्टत्वात्प्रत्ययस्वरो निवर्तकः। प्रत्ययस्वरश्चान्तादेशोत्तरं प्रवर्तते। एवं च शेष-निघातेनाद्यन्तावचावनुदात्तौ तत्रादेरचः स्थाने उवङादेशे तस्यापि स्थानिवत्त्वेनानुदात्तत्वं तृतीयस्यतु उदात्ता-त्परत्वात्स्वरित इति प्राप्तावत्रातिङन्तपदात्परत्वात् "तिङ्ङतिङः" इति सूत्रेण सर्वनिघातः। तस्योत-शब्दीयोदात्तात्परत्वादादेः स्वरितः परयोस्तु स्वरितात्परत्वात्प्रचयः। नः। "अनुदात्त सर्वमपादादौ" इत्यधिकारे "बहुवचनस्य वस्नसौ" इत्यनेन अस्मच्छब्दस्य षष्ठीचतुर्थीद्वितीयाबहुवचनान्तस्य स्थाने न-सादेशोऽनुदात्तो विधीयते। ततो न इत्यनुदात्तं पदम्। तत्र संहितायां परस्तान्निदशब्दावयवनकाररूपो हल् पर इति "हशिच" इति सकारस्य रुत्वस्य स्थाने उत्वे गुणे नो इति रूपम्। तत्रोत्वस्य रेफस्थानिकतया "व्यञ्जनमनुदात्तमि"ति रेफस्यानुदात्तत्वेन स्थानिवत्त्वेनानुदात्तत्वम्। ततो गुणैकादेशस्यापि तथैव पूर्वपरानुदात्त-स्थानिकत्वेन स्थानिवत्त्वादनुदात्तत्वम्। तत्रास्य नोकारस्य संहितायां स्वरितात्परत्वेऽपि न प्रचयः परस्तादुदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इत्यनेनानुदात्तापरपर्यायः सन्नतर एव। अत्रैतस्य द्वितीयान्तत्व-षष्ठ्यन्तत्वविषये मतभेदः। उभयथापि समान एव स्वरः। निदः। "णिदि कुत्सायामि"ति धातोः क्विपि नुमभावश्छान्दसः। तत्र धातुस्वरस्य शेषः। जस् प्रत्ययस्तु अनुदात्तः सुप्त्वात्। तस्योदात्तात्परत्वात्स्वरितः पदपाठे। संहितायांतु निःशब्दावयव उदात्तः पर इत्यनुदात्तत्वमेव। अत्र रुत्वोत्वादावपि स एव स्वरः पूर्ववज्ज्ञेयः। भाष्यकारेणास्य सम्बोधनान्तत्वं मत्वा आमन्त्रितत्वात् प्राप्तस्य सर्वानुदात्तत्वस्यात्राभावो वाक्यान्तरत्वादुच्यते यतः "समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः" इति वार्तिके उक्तम्। तदानीं षाष्ठिकेन "आमन्त्रितस्य चे"ति सूत्रेणाद्युदात्तत्वमेवास्य व्यवतिष्ठत इति न स्वरे विशेषः। निः। निपातत्वादुपसर्गत्वाद्वाऽऽद्युदात्तत्वम् "निपाता आद्युदात्ताः" "उपसर्गाश्चाभिवर्जम्" इत्यनेन वा। अन्यतः। नाना-शब्दतो यत्प्रत्ययेन डिता आदेः स्वरस्य ह्रस्वे आदिमनकारस्य लोपेऽन्यशब्दः। नाना पृथग् भवोऽन्य इति तदर्थः। निरुक्तकारः—"अन्यो नानेय" इति तदर्थमाह। अत्र वृत्तिकृत् दुर्गाचार्यस्तु नाना अपत्यं नानेय इति नानेयशब्दस्यार्थमुक्त्वा तदर्थकतामन्यशब्दस्य ब्रवीति, अथवा न आनेयः सतां नानेय इत्यपि व्युत्पत्त्यन्तरं तेन नानेयशब्दस्य प्रदर्शितम्, तद्वशतो नशब्दोपपदादाङ्पूर्वान्नयतेर्वा अन्यपदव्युत्पत्तिर्वर्णनीया। पृषोदरादि-त्वेन शब्दस्वरूपसिद्धिरिति तदर्थः। नानाशब्दो नशब्दतो नाञ प्रत्ययेन पाणिनिना "विनञ्भ्यां नानाञौ न सह" इति सूत्रेण साध्यते। ततः पञ्चम्या एकवचने तस्य "पञ्चम्यास्तसिल्" इति तसिलिति अन्यत इति रूपम्। तत्र नानाशब्दतोऽन्यशब्दस्य सिद्धिपक्षे नशब्दस्य निपातत्वेन आद्युदात्तत्वम्। ततो नाञः प्रत्ययस्य "आद्युदात्तश्चे"ति आद्युदात्तत्वं प्राप्तं परन्तु नाञि प्रत्यये ञकारस्य इत्त्वात्तन्निमित्तकः "ञ्नित्यादिर्नित्यम्" इति स्वरः प्रवर्तते। तेन नानाशब्द आद्युदात्तः शेषनिघातेनान्तोऽनुदात्तस्तस्योदात्तात्परत्वात्स्वरितः। तत्रापि

स्क०—उतशब्दः पदपूरणः। अप्यर्थे समुच्चये वा। उत्तरस्यां यद्वक्ष्यते तदपेक्षः समुच्चयः। अपि ब्रुवन्तु उच्चारयन्तु। किम्? सामर्थ्यादिन्द्रस्य स्तुतीः। इन्द्रं नित्यं स्तुवन्तामित्यर्थः। नः=अस्माकं स्वभूता ऋत्विजः पुत्रादयो वा। निदः। येतु अस्माकं निन्दितारः, ते निरन्यतश्चिदारत चिच्छब्द एवार्थे। अन्यत एव निर्गच्छन्तु। अन्येनैव पथा प्रयान्तु मा इन्द्रं कदाचिदपि तत्त्वतो ज्ञासिषुः। माच स्तौषुरित्यर्थः। दधानाः इन्द्रे इद् दुवः। इच्छब्दः पदपूरणः। इन्द्रे परिचर्यां दधानाः। इन्द्रं परिचरितुमिच्छन्त इत्यर्थः॥ ५॥

॥ इति प्रथमस्य प्रथमे सप्तमो वर्गः॥ ७॥

नकारस्योदात्तत्वे ञ्णिन्निमित्तकवृद्धिनिष्पन्नस्याद्याकारस्य स्थानिवत्त्वेनोदात्तत्वं बोध्यम्। ततो यति प्रत्यये तस्य प्रत्ययसामान्यस्वरे "आद्युदात्तश्च" इति आदेरुदात्तत्वे प्राप्तेऽत्र प्रत्यये तित्त्वकरणेन तन्निमित्तकः "तित्स्वरितम्" इति स्वरितः प्राप्तः परन्तु तस्यापवादेन "यतोऽनावः" इत्यनेन यदन्तस्यादेरुदात्तत्वं विधीयते तेन प्रथमस्वर उदात्तः नाना+यत् इत्यत्र। ङित्वात् द्वितीयस्याकारस्य लोपः। आद्यस्य ह्रस्वस्य स्थानिवत्त्वेनोदात्तत्वं बोध्यम्। एवं चान्यशब्द आद्युदात्तः। अन्यशब्दस्य अव्युत्पन्नप्रातिपदिकत्वमिति मते 'फिषोऽन्त उदात्त" इत्यन्तस्योदात्तत्वे प्राप्ते तदपवादेन 'स्वाङ्गशिटामदन्तानाम्" इति आद्युदात्तत्वं बोध्यम्। सूत्रे शिट्पदेन सर्वनामोच्यते। पृषोदरादित्वान्नानेयशब्दतोऽन्यशब्दसाधनकल्पेऽपि "स्वाङ्गेति" सूत्रेणैवाद्युदात्तत्वं बोध्यम्। ततस्तसिलि तस्य प्रत्ययत्वनिबन्धनस्यादेरुदात्तत्वस्य प्राप्तौ तद्बाधायाल कृतेनेत्सञ्ज्ञकेन लकारेण "लितीति"स्वरप्रवर्तनादन्यतः शब्दे प्रत्ययात्पूर्वस्य न्याकारस्योदात्तत्वं शेषनिघातेनाद्यन्तावचावनुदात्तौ। तत्रान्त्यस्योदात्तात्परत्वात्स्वरितः। चित्। निपातत्वादाद्युदात्त इति प्राप्तं परंतु तदपवादेन "चादयोऽनुदात्ताः" इत्यनेनानुदात्तः। तस्य संहितायां स्वरितात्परत्वात्प्रचयस्वरः। आरत। अर्तेर्धातोर्लुङि मध्यमपुरुषबहुवचने परस्मैपदे थप्रत्यये तस्य "तस्थस्थमिपामि"त्ययेन तादेशे मध्ये च्लौ तस्य "सर्तिशास्त्यर्तिभ्यश्चे"त्यङि "ऋदृशोऽङि गुण" इति ऋकारस्य गुणे रपरत्वे आडागमे वृद्धौ च आरतेति रूपम्। तत्र ऋधातोरन्त उदात्तः, थप्रत्यय "आद्युदात्तश्चे"ति आद्युदात्तः, अङोऽपि प्रत्ययत्वात्तदादिरुदात्तस्तत्र सतिशिष्टत्वेन विकरणस्य बलीयस्त्वे प्राप्तेऽ"न्यत्र विकरणादि"त्युक्त्या प्रत्ययस्वरस्य प्राप्तौ थप्रत्ययस्य "तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोरि"त्यनेन तस्यानुदात्तत्वविधानात् विकरणस्वरशेषे प्राप्ते "आडजादीनाम्" इति सूत्रेण आट उदात्तत्वस्य वचनात्तस्यैव स्वरः शिष्यतेऽन्ये शेषनिघातेनानुदात्ता भवन्ति। तत आटः परवर्तिधातुस्वरेण वृद्ध्येकादेशे तस्योदात्ताडाकारानुदात्तधात्वकारोभयस्थानिकत्वेन स्थानिवत्त्वेनोभयस्वरवत्त्वरूपे स्वरितत्वे प्राप्ते प्रकृते "एकादेश उदात्तेनोदात्तः" इत्यनेनोदात्तत्वमिति आरतपदमाद्युदात्तं प्राप्तं परन्त्वत्रातिङन्तपदात्परत्वेन "तिङ्ङतिङ" इति सर्वनिघातः। तस्य च स्वरितात्परत्वात्प्रचितत्वं सर्वेषाम्। दधानाः। "डुधाञ् धारणपोषणयोरि"त्यस्माद्धातोर्लटि तस्य शानचि मध्ये शपि तस्य श्लौ तन्निमित्तके धातोर्द्वित्वेऽभ्यासकार्ये दधानशब्दः। ततः प्रथमाबहुवचने जसि "प्रथमयोरि"ति पूर्वसवर्णदीर्घैकादेशे रुत्वविसर्गयोर्दधाना इति पदम्। तत्र धातोरन्त उदात्तः "धातोरि"ति सूत्रेण शानचः प्रत्ययत्वेनादेरुदात्तत्वं प्राप्त"माद्युदात्तश्चे"त्यनेन परन्त्वत्र शानचश्चित्करणाच्चित्स्वरः "चित" इति प्राप्तस्तेनान्त्यस्योदात्तत्वम्। अपरेषां सर्वेषां शेषनिघातेनानुदात्तत्वमित्यन्तोदात्तो दधानशब्दः प्राप्तः परन्तु अत्र धातोः द्विरुक्तत्वेन "उभे अभ्यस्तम्" इत्यनेनाभ्यस्तसञ्ज्ञायां तन्निमित्तकः

वे०—अपिच कामं प्रत्यक्षमेवाग्रतः स्थित्वाऽस्मान् निन्दतारो ब्रुवन्तु। निर्गच्छन्तु वान्यत्र। वयं न्विन्द्रे परिचर्यां दधाना न बिभीमः। इदिति पूरणम्। अस्योत्तरा भूयसे निर्वचनाय ॥ ५ ॥

॥ इति प्रथमस्य प्रथमे सप्तमो वर्गः ॥ ७ ॥

षष्ठीमृचमाह—

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः।
स्यामेदिन्द्रस्य शर्मणि ॥६॥

उत। नः। सुऽभगान्। अरिः। वोचेयुः। दस्म। कृष्टयः।
स्याम। इत्। इन्द्रस्य शर्मणि ॥६॥

हे दस्म = शत्रूणामुपक्षयितरिन्द्र त्वदनुग्रहादरिरुत = शत्रवोऽपि नः = अस्मान् सुभगान् = शोभनधनोपेतान्वोचेयुः = उच्यासुः। कृष्टयो = मनुष्या अस्मन्मित्रभूता वदन्तीति किमु वक्तव्यमिति शेषः। ततो धनसंपन्ना वयमिन्द्रस्य शर्मणि = इन्द्रप्रसादलब्धे सुखे स्यामेत् = भवेमैव ॥

"मघम्" इत्यादिष्वष्टाविंशतिसंख्याकेषु (निघ० १।१०) धननामसु "रयि. क्षत्रं भग" इति पठितम्। "मनुष्या" इत्यादिषु पंचविंशतिसंख्याकेषु मनुष्यनामसु (निघ० २।३)

"अभ्यस्तानामादिः" इति सूत्रेण दधानशब्दे आदिरुदात्तः परेषां शेषनिघातः। जसः सुप्त्वादनुदात्तत्वेन तेन सह पूर्वस्याकारस्य दीर्घेऽपि तत्रोभयोरपि स्थानिनोरनुदात्तत्वमेव। एवं च दधानाःशब्दे आदिरुदात्तः। द्वितीय उदात्तात्पर इति स्वरितः "उदात्तादनुदात्तस्य स्वरित" इत्यनेन। तृतीयः स्वरितात्पर इति प्रचितः पदपाठे। संहितायांतु इन्द्रशब्दीय उदात्तः पर इति "उदात्तस्वरितपरस्य सन्नतर" इत्यनेनानुदात्तापरपर्यायः सन्नतरः। इन्द्रे। इन्द्रशब्दो "ऋज्रेन्द्रे" त्याद्यौणादिकेन सूत्रेण रन्प्रत्ययान्तो निपातित इति निदन्तत्वात् "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तः। ततः सप्तम्येकवचने ङौ तस्य सुप्त्वादनुदात्तत्वेन तेन सह पूर्वस्य गुणैकादेशे तस्याप्युभयानुदात्तस्थानिकतया ऽनुदात्तत्वम्। पदे चेकाराद्युदात्तात्परत्वमिति स्वरितस्तस्य। संहितायांतु उदात्तः पर इति पूर्ववत्सन्नतरः। इत्। निपातत्वादाद्युदात्तः। दुवः। दुवस्धातुः कण्ड्वादिः। ततः क्विपि दुवः। तत्र यगन्तात्क्विपि अकारस्या"तोलोप" इत्यनेन लोपो यकारस्य "लोपोव्योर्वली"ति। अत्र "धातोरि"त्यन्त उदात्तः प्राप्तः परन्तु "नब्विषयस्यानिसन्तस्य" इति फिट्सूत्रेणादेरुदात्तत्वम्। अन्त्यस्य शेषनिघातेनानुदात्तत्वं तस्योदात्तात्परत्वात्स्वरितः।

"कृष्टय" इति पठितम्। उत। "एवमादीनामन्तः" (फि. ४।१३) इत्यन्तोदात्तः। सुभगान्। भगशब्दस्य क्रत्वादिषु पाठात् "नञ्सुभ्याम्" (पा० ६।२।१०२) इत्युत्तरपदान्तोदात्तत्वं बाधित्वा "क्रत्वादयश्च" (पा. ६।२।११८) इत्युत्तरपदाद्युदात्तत्वम्। संहितायाम् "दीर्घादटि समानपादे" (पा. ८।३।६) इति नकारस्य रुत्वम्। "भोभगो" (पा. ८।३।१७) इति यत्वम्। "लोपः शाकल्यस्य" (पा. ८।३।१९) इति यलोपः। तस्यासिद्धत्वान्न पुनः सन्धिकार्यम्। "आतोऽटि नित्यम्" (पा. ८।६।३) इत्याकारस्य सानुनासिकता। अरिः। वचनव्यत्ययः। "अच इः" (उ. ४।१४०) इतीप्रत्ययान्तः। प्रत्ययस्वरेणान्तोदात्तः। वोचेयुः। उच्यासुः। "वच परिभाषण" इत्यस्मादाशीर्लिङि झेर्जुसादेशे "लिङ्याशिष्यङ्" (पा. ३।१।८६) इत्यङ्प्रत्यये "वच उम्" (पा. ७।४।२०) इत्युमागमः। गुणः। "किदाशिषि" (पा. ३।४।१०४) इति यासुट्। "छन्दस्युभयथा" (पा. ३।४।११९) इति लिङादेशस्य सार्वधातुकत्वात् "लिङः सलोपोऽनन्त्यस्य" (पा. ७।२।७९) इति सकारलोपः। "अतो येयः" (पा. ७।२।८०) "आद्गुणः" (पा. ६।१।८७)। अङोऽदुपदेशत्वाल्लसार्वधातुकस्वरेण लिङोऽनुदात्तत्वम्। अङ्प्रत्ययस्वर एव शिष्यते। तेन सहेकारस्य गुण "एकादेश उदात्तेनोदात्त" (पा० ८।२।५) इत्युदात्तः। दस्म। "दसु उपक्षय" इत्यस्मादन्तर्भावितण्यर्थात् "इषियुधीन्धिदसिश्याधूसूभ्यो मक्" (उ० १।१५०) पदात्परत्वादामन्त्रितनिघातः। कृष्टयः। "क्तिच्क्तौ च सञ्ज्ञायाम्" (पा० ३।३।१७४) इति क्तिचि मनुष्यनामत्वात् "चितः" (पा० ६।१।१६३) इत्यन्तोदात्तः। स्याम। "अस भुवि"। "श्नसोरल्लोपः" (पा. ६।४।१११) यासुट उदात्तत्वम्। पादादित्वादनिघातः। शर्मणि। "शॄ हिंसायाम्।" हिनस्ति दुःखमिति शर्म। "अन्येभ्योऽपि दृश्यन्ते" (पा. ३।२।७५) इति मनिन्। "नेड्वशि कृति" (पा. ७।२।८) इतीट्प्रतिषेधः। नित्त्वादाद्युदात्तत्वम्॥ ६ ॥*

---

* उत। निपातत्वादाद्युदात्ते प्राप्ते तदपवादेन "एवमादीनामन्तः" इत्यनेन सूत्रेण अन्तस्योदात्तत्वे शेषनिघातेनादेरनुदात्तत्वम्। नः। "अनुदात्तं सर्वमपादादौ" इत्यधिकारस्थेन "बहुवचनस्य वस्नसौ" इत्यनेन सूत्रेण अस्मच्छब्दस्य द्वितीयाबहुवचनान्तस्य स्थाने नसादेशोऽनुदात्तः। तस्योतेत्येतत्पदीयान्तोदात्तात् परत्वाद् "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः संहितायाम्। सुभगान्। भगशब्दो भजधातुतः "पुंसि संज्ञायां घः प्रायेण" इति सूत्रेण घे प्रत्यये "चजोः कु घिण्ण्यतोः" इति कुत्वे निष्पन्नः। ततः सुशब्देन बहुव्रीहौ ततो द्वितीयाबहुवचने शस्, तस्मिन् परतः पूर्वेण पूर्वसवर्णदीर्घैकादेशे "तस्माच्छसो नः पुंसि" इति नकारादेशे सुभगान् इति पदम्। ततः संहितायामकारः पर इति "दीर्घादटि समानपादे" इत्यनेन नकारस्य

स्क०—अपि नोऽस्मान् सुभगान् सुधनान्। अरिः शत्रुपर्यायोऽयमीश्वरनामवा। व्यत्ययेनैकवचनम्। शत्रवोऽपि, ईश्वरा अपि। वोचेयुः। हे दस्म उपक्षयितः शत्रूणां दर्शनीय वा। कृष्टयो मनुष्याः। तादृशं धनमस्मभ्यं देहि येन शत्रवोऽपि ईश्वरा अपि वा सुधनान् ब्रुवन्ति। किमुतान्ये मनुष्या इत्यर्थः। किंच। स्यामेत्। इच्छब्दः पदपूरणोऽयम्। भवेम। तवेन्द्रस्य सम्बन्धिनि शर्मणि सुखे त्वया दत्तेन धनेन सुखिनश्च भवेमेत्यर्थः। अथवा शर्मेतिगृहनाम। मरणोत्तरकालं तवेन्द्रस्य गृहे भवेम। इन्द्रलोकं गच्छेमेत्यर्थः ॥ ६ ॥

रुत्वे "भोभगोरि"ति रोर्यत्वे "लोपः शाकल्यस्ये"ति यलोपे "आतोऽटि नित्यम्" इति रोः पूर्वस्य नित्यमानुनासिक्ये सुभगाँ अरिरिति सन्धानम्। तत्र भगशब्दे धातोरन्त उदात्तो "धातोरि"त्यनेन "आद्युदात्तश्च" इत्यनेन प्रत्ययाद्युदात्तत्वम्। ततः सति शिष्टत्वात्प्रत्ययस्वरो बलवानिति स एव शिष्यते, धातोः स्वरः "अनुदात्तं पदमेकवर्जम्" इति सूत्रेण शेषनिघातेनानुदात्त इति भगशब्दोऽन्तोदात्तः। सुशब्देन बहुव्रीहौ "बहुव्रीहौ प्रकृत्या पूर्वपदम्"इति पूर्वस्य सुशब्दस्य यः स्वरो निपातत्वादाद्युदात्तात्मकस्तस्यैवोक्तसूत्रेण बहुव्रीहौ समासान्तस्वरापवादत्वेन विधानात्सुभगशब्द आद्युदात्तः प्राप्तः परन्तूक्त"बहुव्रीहावि"ति सूत्रापवादेन "नञ्सुभ्याम्" इत्यनेन सोः परस्योत्तरपदस्यान्त उदात्त इति भगशब्दस्यान्तोदात्तता प्राप्ता तां बाधित्वा "क्त्वादयश्च" इत्यनेन सोः परस्य क्त्वाद्यन्यतमरूपोत्तरपदस्याद्युदात्तत्वविधानात् अत्र भगशब्द आद्युदात्त इति सुभगशब्दो मध्योदात्तः शेषनिघातेनाद्यन्तयोरचोरनुदात्तत्वम्। ततो जसः सुप्त्वादनुदात्तत्वेन तेन सह पूर्वस्य पूर्वसवर्णदीर्घैकादेशे एकादेशस्योभयानुदात्तस्थानिकतयाऽनुदात्तत्वं स्थानिवद्भावेनेति तस्योदात्तात्परत्वात्स्वरितः पदपाठे। संहितायां तु अनुनासिकादिशब्दैर्गुणिविधानपक्षे सुभगान्शब्दे गकारोत्तरवर्त्याकारस्थाने आनुनासिक्यवतो विहितस्यापि स्थानिवद्भावेनानुदात्तत्वे पूर्ववत्स्वरितत्वमिति विशेषः। अरिः। ऋ गतौ इत्यस्माद्धातोः "अच इः" इति इप्रत्यये तन्निमित्तके धातोर्गुणे रपरत्वेऽत्र परवर्तिनः सुपः सुरादेशः। अथवा व्यत्ययेन बहुवचनस्थाने एकवचनम्। तत्र धातोः स्वरः प्रत्ययस्वरेण निवर्तित इत्यन्तोदात्तत्वम्। धातोः स्वरस्य शेषनिघातेनानुदात्तत्वम्। वोचेयुः। "वच परिभाषणे" इति धातोराशीर्लिङ् प्रथमपुरुषबहुवचने झिप्रत्यये तस्य "झेर्जुस्" इति जुसादेशे "लिङ्याशिष्यङ्" इति अङ्प्रत्यये "वच उम्" इति उमागमे धात्वकारेण गुणे "किदाशिषि" इति यासुटि "छन्दस्युभयथा" इति सार्वधातुकत्वादपि "लिङः सलोपोऽनन्त्यस्य" इति सकारलोपे "अतो येय" इतीयादेशे गुणे वोचेयुरिति रूपम्। तत्र "धातोरि"त्यन्त उदात्तो धातोः, झिप्रत्ययस्यापि "आद्युदात्तश्च" इति आदेरुदात्तस्तस्य स्थाने जातस्य जुसादेशस्यापि स्थानिवत्त्वेनोदात्तत्वम्। अङोऽपि प्रत्ययत्वेनाद्युदात्तत्वम्। तत्रैतेषां त्रयाणां मध्ये सति शिष्टत्वेनाविकरणत्वेन झिप्रत्ययस्वरस्यैव बलवत्त्वेनेतरनिवर्तकत्वे प्राप्ते तस्य झेः प्रत्ययस्य लस्थानिकसार्वधातुकत्वेन "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्हिङोः" इत्यनेनानुदात्तत्वेनाङः स्वर एवावशिष्यतेऽवशिष्टावनुदात्तौ। तत्रोमागमस्यागमत्वादेवानुदात्तत्वेन पूर्वेण गुणैकादेशे तस्योभयानुदात्तस्थानिकतयाऽनुदात्तत्वमेव। यासुटोऽप्युदात्ततया तत्स्थानिकेयादेशस्याप्युदात्तत्वेन तेन सहाङकारस्य गुणस्तु उदात्तोभयस्थानिक इति "एकादेश उदात्तेनोदात्तः" इत्युदात्तः। एवं च वोचेयुःपदे वोऽनुदात्तश्चे उदात्तो युस्त्वनुदात्तः सन् स्वरिततां गच्छत्युदात्तात्परत्वात्। दस्म। "दसु उपक्षये" इति धातोः "इषियुधीन्धिदसिश्याधूसूभ्यो मगि"ति सूत्रेण मक्प्रत्यये ततः संबोधनप्रथमैकवचने तल्लोपेच दस्मेति पदम्। तत्र धातोः स्वरं मकः प्रत्ययस्य स्वरो निवर्तयति ततः शेषनिघातेन धातोः स्वरस्यानुदात्तत्वे दस्मशब्दोऽन्तोदात्तः प्राप्तः परन्त्वत्र पदात्परत्वादपादादौ

वे०—उत अरिः कृष्टय इत्येकवचनबहुवचनयोर्भिन्नपादस्थयोर्भिन्नमन्त्रस्थयोरिव विरम्याभिधानात् सामानाधिकरण्यं सिध्यति। अपि च अस्मानिन्द्रसमाश्रयणात् सुभगान्सुधनानरिर्विब्रवीतु विब्रुवन्तु वा ऽन्ये मनुष्याः। दर्शनीय अद्यापि वयमिन्द्रस्य स्वभूते सुखे स्यामैव ॥ ६ ॥

सप्तमीमृचमाह—

एमाशुमाशवे भर यज्ञश्रियं नृमादनम्।
पतयन्मन्दयत्सखम् ॥७॥

आ। ईम्। आशुम्। आशवे। भर। यज्ञऽश्रियम्। नृऽमादनम्।
पतयत्। मन्दयत्ऽसखम् ॥७॥

ईमिति निपात इदंशब्दार्थे वर्तते। हे यजमान। आशवे = कृत्स्नसोमयागव्याप्तायेन्द्राय ईमाभर = इमं सोममाहर। कीदृशं सोमम्? आशुम् = सवनत्रयव्याप्तम्।

स्थितत्वादाष्टमिकेना"मन्त्रितस्य चे"त्यनेन सूत्रेण सर्वानुदात्तः। तस्य संहितायां स्वरितात्परत्वात्प्रचयः। कृष्टयः। कृष् धातोः "क्तिच्क्तौ च संज्ञायाम्" इत्यनेन क्तिचि प्रत्यये चित्त्वादन्तोदात्तः। ततो जसि तस्य सुप्त्वादनुदात्तत्वेन तन्निमित्तकेकारस्य गुणोऽवादेशश्च स्थानिवत्त्वादुदात्ताविति कृष्टयःशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्तः सन्नुदात्तात्पर इति स्वरितः। स्याम। "अस् भुवि" इत्यस्माद्धातोर्लिङि उत्तमपुरुषबहुवचने मसि "नित्यं ङित" इत्यनेन मसोऽन्त्यसकारस्य लोपे यासुटि अस्धातोरकारस्य "श्नसोरल्लोपः" इत्यनेन लोपे स्यामेतिपदम्। तत्र मसः प्रत्ययस्योदात्तत्वे प्राप्ते ततोऽपि परेण यासुट उदात्तत्वेन तस्य निवृत्तौ स्यामेतिपदमाद्युदात्तम्। अन्त्यस्य शेषनिघातेनानुदात्तत्वे तस्योदात्तात्परत्वात्स्वरितः। स्यामेत्यस्य सर्वानुदात्तत्वस्य त्वत्र न प्राप्तिः पादादित्वात्पदादपरत्वाच्च। इत्। निपातत्वादाद्युदात्तः। तस्य स्यामेतिपदस्यान्त्याकारेण गुणैकादेशे तस्य अनुदात्तोदात्तोभयस्थानिकतया "एकादेश उदात्तेनोदात्त" इत्युदात्तः संहितायाम्। इन्द्रस्य। इदिधातो"र्ऋज्रेन्द्रे"ति सूत्रेण रन्प्रत्ययान्तत्वेन निपातित इन्द्रशब्दो नित्स्वरेणाद्युदात्तः शेषनिघातेनान्त्यानुदात्तः। ततः षष्ठ्येकवचनङसस्तस्य स्थाने जातस्य स्यादेशस्यानुदात्तत्वं ङसः सुप्त्वादादेशस्य स्थानिवद्भावात्। तत इन्द्रस्येति पदे प्रथम उदात्तो द्वितीयोऽनुदात्तः सन्नुदात्तात्पर इति स्वरितस्तृतीयस्तु स्वरितात्पर इति प्रचितः पदपाठे। संहितायांतु शर्मशब्दीयोदात्तः पर इति स्याकारस्य सन्नतरः। शर्मणि। "शॄ हिंसायाम्" इत्यस्माद् "अन्येभ्योऽपि दृश्यते" इत्यनेन मनिनि प्रत्यये "नेड्वशि कृति" इति इडागमनिषेधे शर्मशब्दो गुणे सति। ततः सप्तम्येकवचने नस्य णत्वे शर्मणीति पदम्। तत्र धातोः स्वरः प्रत्ययस्वरेण निवर्त्तनीयः परन्तु अत्र प्रत्ययस्य नित्त्वेन नित्निमित्तकस्वरेण निदन्तादेरुदात्तत्वबोधनेनादिस्वर एवावशिष्यते। एवं च शर्मणिशब्दे आदिः स्वर उदात्तो द्वितीयोऽनुदात्तः सन्नुदात्तात्पर इति स्वरितः तृतीयस्तु स्वरितात्पर इति प्रचितः।

यज्ञश्रियम् = यज्ञस्य संपद्रूपम्। नृमादनम् = नृणामृत्विग्यजमानानां हर्षहेतुम्। पतयत् = पतयन्तम्। कर्माणि प्राप्नुवन्तम्। मन्दयत्सखम्। य इन्द्रो मन्दयति यजमानान् हर्षयति तस्मिन्निन्द्रे सखिभूतः सोमः। तत्प्रीतिहेतुत्वात्तृप्तिहेतुत्वाद्वा ॥

आशुम्। "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" (उ. १।१) इत्युण्। प्रत्ययस्वरः। आशवे। पूर्ववत्। यज्ञश्रियम् "समासस्येति" (पा० ६।१।२२३) अन्तोदात्तः। माद्यन्तेऽनेनेति मादनः। "करणाधिकरणयोश्च" (पा. ३।३।११७) इति ल्युट्। तस्य लित्त्वात्पूर्व आकार उदात्तः। "गतिकारकोपपदात्कृद्" (पा० ६।२।१३९) इति स एव शिष्यते। पतयत्। पतेरदन्तस्य चौरादिको णिच्। "अतो लोपः" (पा. ६।४।४८)। तस्य स्थानिवत्त्वादुपधाया वृद्ध्यभावः। लटः शत्रादेशः। तस्य "छन्दस्युभयथे" (पा० ३।४।११७) त्यार्द्धधातुकत्वेन शबभावाद् "अदुपदेशाद्" इति निघाताभावेन प्रत्ययाद्युदात्तत्वमेव भवति। आर्द्धधातुकत्वेऽपि "सर्वे विधयश्छन्दसि विकल्प्यन्त" (परि० ३५) इति "णेरनिटि" (पा. ६।४।५१) इति णिलोपाभावः। "सुपां सुलुग्" (पा० ७।१।३९) इत्यमो लुक्। "न लुमता" (पा. १।१।६३) इति प्रत्ययलक्षणनिषेधाद् "उगिदचाम्" (पा ७।१।७०) इति न नुम्। एवं मन्दयच्छब्दोऽन्तोदात्तः। मन्दयतीन्द्रे सखा। "सप्तमी" (पा०२।१।४०) इति योगविभागात्समासः। "तत्पुरुषे तुल्यार्थ" (पा० ६।२।२) इति सप्तमीपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥*

---

* आ। निपातत्वादाद्युदात्तः। ईम्। निपातत्वेऽपि चादित्वादनुदात्तः। तस्य आकारेण पूर्ववर्तिना गुणैकादेशे एकादेशस्योदात्तस्थानिकतया "एकादेश उदात्तेनोदात्तः" इत्युदात्तः संहितायाम्। आशुम्। अशूधातोः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" इति उणादिसूत्रेण उण्प्रत्यये उपधावृद्धौ आशुशब्दः। तत्र "धातोरि"ति धातोरन्त्य उदात्तः, "प्रत्यय" इत्यनुवृत्तौ "आद्युदात्तश्च" इत्यनेन प्रत्ययाद्य उदात्तः, "सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य" इत्यनेन पश्चाच्छिष्टस्य प्रत्ययोदात्तस्वरस्य बलवत्त्वेन तेन धातोः स्वरस्य बाधात् "अनुदात्तं पदमेकवर्जमि"त्यनेन धातुस्वरोऽनुदात्तस्तस्य स्थाने जातस्य वृद्धिरूपस्याकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। ततो द्वितीयैकवचनेऽमि प्रत्यये तस्य सुप्त्वेनानुदात्तत्वेन तन्निमित्तकस्य पूर्वरूपैकादेशस्य चोदात्तानुदात्तस्थानिकत्वेन "एकादेश उदात्तेनोदात्तः" इत्यनेनोदात्तत्वे आशुं पदमन्तोदात्तम्। आशवे। अत्र पूर्ववदाशुशब्दे सिद्धे ततश्चतुर्थ्या एकवचने तस्य सुप्त्वादनुदात्तत्वम्, तन्निमित्तकः पूर्वस्य गुण ओकारस्तत्स्थानिकावादेशश्चोदात्तौ स्थानिवत्त्वात्। तत्र आशवे शब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयस्त्वनुदात्तः सन्स्वरिततां गतः "उदात्तादनुदात्तस्य स्वरितः" इत्यनेन। भर। हृधातोर्लोटि मध्यमपुरुषैकवचने सिपि परस्मैपदे तस्य स्थाने "सेर्ह्यपिच्चे"ति ह्यादेशे मध्ये शपि तन्निमित्तके गुणे रपरत्वे "अतोहेरि"ति हेर्लुकि

स्क०—ई॑शब्द एनमित्यस्यार्थे। एनं सोमम्। आशुम्। क्षिप्रनामैतत्। स्वकार्यकरणेषु क्षिप्रम्। आशवे। तादर्थ्ये चतुर्थ्येषा सर्वार्थे क्षिप्रस्येन्द्रस्यार्थाय आभर आहराध्वर्यो! यज्ञश्रियम्। यज्ञं यः श्रयति स यज्ञश्रीस्तं यज्ञश्रियम्। हविष्ट्वमापन्नमित्यर्थः। नृमादनम्। नरो मनुष्या ऋत्विजस्तदाकारा वा देवाः तेषां मदकरम्। पतयत्। पततिर्गतिकर्मा। द्वितीयैकवचनस्य

हकारस्य "हृग्रहोर्भश्छन्दसि" इत्यनेन भकारादेशे भरेति रूपम्। तत्र धातुस्वरः, प्रत्ययस्य शपः पित्त्वेनानुदात्तत्वात्प्राप्तः, गुणाकारस्यापि स्थानिवत्त्वेनोदात्तत्वमिति आद्युदात्तं पदं प्राप्तं परन्त्वत्र पदात्परत्वादपादादौ स्थितत्वादेकवाक्यगतत्वाच्च "तिङ्ङतिङ" इति सर्वानुदात्तत्वम्। तत्र संहितायां स्वरितात्परत्वात्प्रचयः स्वरः। यज्ञश्रियम्। यजधातो"र्यजयाचयतविच्छप्रच्छरक्षो नङि"ति नङि प्रत्यये श्चुत्वेन नकारस्य ञकारे ज्ञ्योगे ज्ञादेशे यज्ञशब्दः। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च" इति वार्तिकेन श्रिञ्धातोः क्विपि दीर्घे च श्रीशब्दः। ततो यज्ञ + श्रीशब्दयोः षष्ठीतत्पुरुषसमासे ततो द्वितीयैकवचनेऽमि "अचिश्नु" इत्यादिनेयङादेशे यज्ञश्रियमिति रूपम्। तत्र यज्ञशब्दे धातोः स्वरः प्रत्ययस्वरेण निवर्त्यते इति अन्तस्योदात्तत्वं शेषनिघातेनादेरनुदात्तत्वमिति यज्ञशब्दोऽन्तोदात्तः। श्रीरित्यत्र धातुस्वरेणोदात्तत्वम्। समासे "समासस्ये" त्यन्तोदात्तत्वे यज्ञश्रीशब्दस्यान्तोदात्तता शेषनिघातेनावशिष्टयोरचोरनुदात्तता। अमः प्रत्ययस्य सुप्त्वेनानुदात्तता। तन्निमित्तकस्येयङादेशस्योदात्तश्रीकारस्थानिकतयोदात्तत्वं स्थानिवत्त्वात्। एवं च यज्ञश्रियंशब्दे आद्यं स्वरद्वयमनुदात्तं पदपाठे, संहितायां स्वरितात्परत्वादाद्यस्य स्वरस्य प्रचयो द्वितीयस्योदात्तपरत्वादनुदात्तः। तृतीय उदात्तः। चतुर्थोऽनुदात्तः सन् उदात्तात्परत्वात्स्वरितत्वं गतः। नृमादनम्। नीधातोः "नयतेर्डिच्च" इत्यौणादिकेन सूत्रेण ऋप्रत्यये डित्त्वाट्टेर्लोपे नृशब्दः। अथवा नृती गात्रविक्षेपे इत्यस्माद्बाहुलकादप्रत्यये डिति नृशब्दः, मद्धातोः "करणाधिकरणयोश्च" इति ल्युट्प्रत्ययः। ल्युप्रत्यययोः स्थाने "युवोरनाकौ" इत्यनेनानादेशे मदन इति रूपं तत्राकारस्य दीर्घश्छान्दसत्वात्। नृमादनशब्दयोः समासे द्वितीयैकवचनेऽमि पूर्वरूपैकादेशे रूपम्। तत्र नृशब्दे प्रत्ययस्वरेण, उणादीनामव्युत्पत्तिपक्षे प्रातिपदिकस्वरेण वान्तोदात्तत्वम्। मादनेत्यत्र प्रत्ययस्वरापवादकेन "लिती"तिसूत्रेण प्रत्ययात्पूर्वस्योदात्तत्वमिति मकारोत्तरवर्ती आकार उदात्तः। समासे समासान्तोदात्तत्वस्य बाधः "गतिकारकोपपदात्कृदि"त्यनेनेति अस्यैव मादनशब्दस्य स्वरस्य शेषः। अपरेषां शेषनिघातेनानुदात्तता। एवं च नृमादनशब्दे नृशब्दर्कारोऽनुदात्तो माकार उदात्तो दाकारोऽनुदात्तः सन्नुदात्तात्पर इति स्वरितत्वं गतः, नाकारस्तु स्वरितात्पर इति प्रचितः। अमि पूर्वरूपैकादेशे चानुदात्तत्वे पूर्ववत्स्वरित एव। पतयत्। चुरादिगणीयपतधातोर्णिचि धात्वन्ताकारस्य लोपे तस्य स्थानिवत्त्वात्पूर्वस्य दीर्घाभावे ततो लट् तस्य "लटः शतृशानचावि"त्यनेन शतरि "छन्दस्युभयथा" इति आर्द्धधातुकत्वेन शबभावे सार्वधातुकत्वाण्णेरलोपे गुणे पतयदिति रूपम्। परस्य द्वितीयैकवचनस्य "सुपां सुलुगि"ति लुक्। तत्र धातोः स्वरस्य णिचः स्वरस्य च प्रत्ययस्वरेण निवृत्तिरिति यकार उदात्तः पूर्वयोरनुदात्तत्वम्। मन्दयत्सखम्। "मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' इत्यस्माद्धातोर्णिजन्ताच्छतरि गुणे छान्दसत्वादार्द्धधातुकत्वान्मध्ये शबभावे सर्वविधीनां छन्दसि वैकल्पिकत्वेन णेर्लोपाभावे मन्दयच्छब्दः। "समाने ख्यः स चोदात्त" इति औणादिकेन सूत्रेण समानशब्दोपपदात्ख्याधातोरिण्प्रत्यये डिति समानशब्दस्य सभावे सखिशब्दः। तयोः सप्तमीतत्पुरुषसमासे "राजाहःसखिभ्यष्टजि"ति टचि समासान्ते द्वितीयैकवचनेऽमि

छान्दसत्वाल्लुक्। पतयन्तं गच्छन्तम्। इन्द्रं प्रति गन्तारमित्यर्थः। मन्दयत्सखम्। मन्दयतिरर्चतिकर्मा। तानि तानि अभिप्रेतानि स्तोतुः संपादयन् य आत्मनः स्तुतिं कारयति तादृश इन्द्रस्य सखिभूतः ॥ ७ ॥

वे०—आभर एनं क्षिप्रव्यापिनं सोमं क्षिप्रव्यापिन इन्द्राय यः सोमो यज्ञं श्रयति मदयति च मनुष्यान् तं पतयन्तम्। पतयति हि सोमः पातारं मदयति च सखायं पातैव सखेति ॥ ७ ॥

अष्टमीमृचमाह :—

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः।

प्रावो वाजेषु वाजिनम् ॥८॥

अस्य। पीत्वा। शतक्रतो इति शतऽक्रतो। घनः।

वृत्राणाम्। अभवः।

प्र। आवः। वाजेषु वाजिनम् ॥८॥

हे शतक्रतो=बहुकर्मयुक्तेन्द्र त्वमस्य=सोमस्य सम्बन्धिनमंशं पीत्वा वृत्राणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोऽभवः=हन्ताभूः। ततो वाजेषु=संग्रामेषु वाजिनम्=संग्रामवन्तं स्वभक्तम्। प्रावः=प्रकर्षेण रक्षितवानसि ॥

अस्येतीदंशब्देन प्रयोगसमये पुरोदेशस्थः सोमो निर्दिश्यते न तु पूर्वप्रकृतः सोमः परामृश्यते। अतोऽनन्वादेशत्वान्नात्र "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ" (पा० २।४।३२)। इत्यशादेशः। अतो न सर्वानुदात्तत्वम्, किन्तु त्यदाद्यत्वे हलि लोपेऽकारः

मन्दयत्सखमिति पदम्। तत्र मन्दयदित्यत्र धातोर्णिचश्च स्वरयोः शतृप्रत्ययस्वरो निवर्तकः। शपो लोपात् "तास्यनुदात्ते"त्यादिना शतुरनुदात्तत्वं न भवति। तेन मन्दयत्पदमन्तानुदात्तम्। सखिशब्दस्तु प्रातिपदिकस्वरेण प्रत्ययस्वरेण वान्तोदात्तः प्राप्तः परंतु सूत्रे सकारस्योदात्तत्वविधानादाद्युदात्तः। "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या" इत्यनेन पूर्वपदस्य प्रकृतिस्वरत्वेन मन्दयच्छब्दस्य स्वरः समासेऽपि। तेनात्र प्रथमं स्वरद्वयमनुदात्तं तृतीय उदात्तश्चतुर्थपञ्चमस्वरद्वयमनुदात्तम्। तत्र चतुर्थस्योदात्तात्परत्वात्स्वरितः पञ्चमस्य तु स्वरितात्परत्वात्प्रचयः। पूर्वपदप्रकृतिस्वरे निघातेन टचोऽपि स्वरो बाध्यतेऽम्प्रत्ययोऽनुदात्तः पूर्वरूपस्यानुदात्तत्वं स्थानिवत्त्वादिति ज्ञेयम्। संहितायामस्य शब्दस्यादिमस्वरद्वयमध्ये आद्यस्योदात्तात्परत्वात्स्वरितः, द्वितीयस्योदात्तः पर इति अनुदात्तो भवति।

प्रातिपदिकस्वरेणोदात्त इति "अन्तोदात्ताद्" (पा० ६।१।१६९) इत्यनुवृत्तौ "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" (पा. ६।१।१७१) इति विभक्तिरुदात्ता। पीत्वा। पिबतेः क्त्वाप्रत्यये "घुमास्था" (पा० ६।४।६६) इत्यादिनेत्वम्। प्रत्ययस्वरेणोदात्तः। असामर्थ्यान्न परामन्त्रिताङ्गवद्भावः। घनः। "मूर्तौ घनः" (पा. ३।३।७७) इति हन्तेर्धातोः काठिन्येऽप्प्रत्ययः। तदस्यास्तीत्यर्शआदित्वादजन्तः। चित्त्वादन्तोदात्तः। वाजेषु। वृषादित्वादाद्युदात्तः। वाजिनम्। इनिप्रत्ययस्वरः॥ ८॥*

---

* अस्य। "इदि परमैश्वर्ये" इतिधातोः "इन्देः कमिर्नलोपश्च" इति सूत्रेण कमिप्रत्यये नकारलोपे इदंशब्दः। इणो दमगिति केचन। तत्र इण्धातोर्दमकि प्रत्यये इदंशब्दः। इन्धेः कमिन् बाहुलकान्नलोपो धकारस्य दकारश्चेति इदंशब्द इति देवराजयज्वा। ततः षष्ठ्या एकवचने ङस्प्रत्यये त्यदाद्यत्वे पररूपत्वे "टाङसिङसामिनात्स्याः" इति स्यादेशे "हलि लोपः" इतीद्भागस्य लोपे अस्येतिपदम्। तत्र इदंशब्दे धातोः स्वरस्य प्रत्ययस्वरेण निवर्तनादिदंशब्दोऽन्तोदात्तः। शेषनिघातेनादेरनुदात्तत्वम्। ततः षष्ठ्येकवचने त्यदाद्यत्वस्य मकारस्थानिकत्वेन "व्यञ्जनमनुदात्तमि"ति मकारस्यानुदात्तत्वेन स्थानिवत्त्वेनोनुदात्तत्वम्। ततः पररूपस्योदात्तदकाराकारानुदात्तमकाराकारस्थानिकत्वेऽप्युदात्तस्थानिकत्वेन उदात्तत्वम् "एकादेश उदात्तेनोदात्त" इत्यनेन। तत्र षष्ठ्याः प्रत्ययस्य सुप्त्वेनानुदात्तत्वे प्राप्ते तदपवादकेन "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" इत्यनेन सूत्रेण विभक्तेरुदात्तत्वे शेषनिघातेनादेरनुदात्तत्वे अस्येति पदमन्तोदात्तम्। पीत्वा। पिबतेः क्त्वाप्रत्यये "घुमास्थागापाजहातिसां हलि" इतीत्वे रूपम्। तत्र धातोः स्वरः प्रत्ययस्वरेण बलीयसा निवर्त्यते इति तस्य शेषनिघातेनानुदात्तत्वमिति तत्स्थानिकेकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम् इति पीत्वाशब्दोऽन्तोदात्तः। शतक्रतो। दशदशन्शब्दतः स्वार्थे तप्रत्ययः प्रकृतेः शकारादेशश्च "पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्" इति सूत्रेण निपात्यते। कृञ्धातोः "कृञः कतुः" इत्यनेन कतुप्रत्ययेन क्रतुशब्दः। तयोर्बहुव्रीहौ ततः संबोधनैकवचने पूर्वस्य गुणे विभक्तिप्रत्ययलोपे रूपम्। तत्र शतशब्दः प्रत्ययस्वरेण वा फिट्स्वरेण वाऽन्तोदात्तः। क्रतुशब्दश्च प्रत्ययस्वरेणाद्युदात्तः। ततो द्वयोर्बहुव्रीहिसमासे समासत्वादन्तस्योदात्तत्वं प्राप्तं परंतु तदपवादेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वपदस्य प्रकृतिस्वरकत्वे शतक्रतुशब्दे द्वितीय उदात्तः। ततः सम्बोधनप्रथमैकवचने तन्निमित्तकस्योकारस्य गुणस्यानुदात्तस्थानिकतया अनुदात्तत्वेन शतक्रतोशब्दे द्वितीय उदात्तः प्राप्तः, परन्त्वेतस्यामन्त्रितत्वेन षाष्ठिके"नाममन्त्रितस्य चे"तिसूत्रेणाद्युदात्तः प्राप्तस्तथाप्यत्रास्य पदस्य पदात्परत्वात्पादादौ वर्तमानत्वाभावाच्च "आमन्त्रितस्य च" इति आष्टमिकेन सूत्रेण सर्वानुदात्तत्वम्। संहितायामुदात्तात्परत्वादाद्यस्य स्वरस्य स्वरितः, "उदात्तादनुदात्तस्य स्वरित" इत्यनेन। द्वितीयप्रभृतित्रयाणां तु स्वरितात्परत्वात्प्रचयः स्वरः "स्वरितात्संहितायामनुदात्तानाम्" इत्यनेन। घनः। हनधातोरप्प्रत्ययो धातोर्घनादेशश्च "मूर्तौ घन" इति सूत्रेण। तत अर्शआद्यचि पूर्वाकारस्य लोपे घन इतिशब्दे प्रथमैकवचने रुत्वे विसर्गे घन इतिपदम्। तत्र धातोः स्वरः, प्रत्ययस्य पित्त्वेनानुदात्तत्वाद्घनशब्दे। अर्शआद्यचि तस्य चित्त्वेन "चित" इति सूत्रेण घनेति चिदन्तस्यान्त उदात्तः शेषनिघातेनादिरनुदात्तः। वृत्राणाम्। वृतेर्धातोः "स्फायितञ्चिवञ्चिशकिक्षिपि-

स्क०—अस्येति षष्ठी द्वितीयार्थे। षष्ठीश्रुतेर्वैकदेशमिति शेषः। इमं सोमम्, अस्य सोमस्यैकदेशं स्वांशलक्षणम् पीत्वा हे शतक्रतो! शतशब्दो बहुनाम। क्रतुः कर्म प्रज्ञा वा। बहुकर्मन् बहुप्रज्ञ वा। घनः हन्ता। वृत्राणामसराणामन्येषां वा अभवस्त्वं प्रावः प्रकर्षेणारक्षस्त्वम्। वाजेषु। वाज इत्येकवचनान्तं संग्रामनामसु पठितम्। सङ्ग्रामेषु। कम्? वाजिनम्। सङ्ग्रामवन्तं हविर्लक्षणेनान्नेनान्नवन्तं वा। अथवा अभवः प्राव इति लोडर्थे लङ्। हन्ताऽस्मदीयानां शत्रूणां भव, प्रकर्षेण चाव सङ्ग्रामेषु मां वाजिनमिति। आत्मत्राणे संसर्गे वा ब्राह्मणवैश्ययोरपि शस्त्रादानस्मरणात्संभवत्यृषीणामपि सङ्ग्रामः। विशेषेण तु मधुच्छन्दसः क्षत्रियप्रसूतत्वात्। तत्रेदं शत्रुहननमात्मरक्षा चाशास्यते ॥ ८ ॥

वे०—अमुं पीत्वा सोमं शतप्रज्ञ हन्ता शत्रूणाममवः पालय च युद्धेषु युद्धवन्तं स्तोतारम् ॥ ८ ॥

क्षुदिसृपितृपिद्दपिवन्युन्दिश्वितिवृती"त्यादिसूत्रेण रक्प्रत्यये वृत्रशब्दः। ततः षष्ठ्येकवचन आमि नुटि "नामी"ति दीर्घे णत्वे वृत्राणामिति पदम्। तत्र धातोरन्त उदात्तो रकः प्रत्ययस्य "आद्युदात्तश्चे"ति आद्युदात्तस्वरेण सतिशिष्टेन निवर्त्यते इति वृत्रशब्दोऽन्तोदात्तः शेषनिघातेनादेरनुदात्तत्वम्। ततष्षष्ठ्या बहुवचनामः सुप्त्वेन "अनुदात्तौ सुप्पितौ" इत्यनेनानुदात्तत्वात्तन्निमित्तकदीर्घस्य वृत्रशब्दीयोदात्तरेफाकारस्थानिकत्वेन स्थानिवत्त्वेनोदात्तत्वम्। एवं च वृत्राणांशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीय उदात्तात्पर इति स्वरितः। अभवः। भूधातोर्लङि मध्यमैकवचने सिपि मध्ये शपि धातोर्गुणे अवादेशेऽडागमे सिप इकारलोपेरुत्वविसर्गयोरभव इति रूपम्। तत्र धातोः स्वर आगमस्योदात्तेन सतिशिष्टेन निर्वतनीय आसीत् परन्तु अत्र "तिङ्ङतिङः" इतिसूत्रेण सर्वस्यानुदात्तत्वविधानेन सर्वानुदात्तोऽभवःशब्दः। तत्र संहितायां तस्य स्वरितात्परत्वात्सर्वेषां प्रचयः। प्र। निपातत्वादाद्युदात्तः। आवः। अवतेर्धातोर्लङि मध्यमपुरुषैकवचने सिपि इकारलोपे मध्ये शपि आदौ "आडजादीनाम्" इत्यनेन आडागमे "आटश्चे"ति परेण वृद्ध्यादेशे रुत्वविसर्गयोराव इति रूपम्। तत्र धातोः स्वर आडागमोदात्तेन निवर्तनीय आसीत्परन्तु अत्रातिङन्तपदात्परत्वात् "तिङ्ङतिङः" इत्यनेन सर्वानुदात्तत्वम्। संहितायां प्रशब्दाकारेण आवःपदस्याद्याकारेण सवर्णदीर्घैकादेशे एकादेशस्य प्रशब्दीयोदात्तस्थानिकत्वेन "एकादेश उदात्तेनोदात्तः" इत्युदात्तत्वम्। अन्त्यस्य तु वाजेषुशब्दीयवकाररूपहल्परत्वेन रोरुत्वे तस्य व्यञ्जनस्थानिकतया स्थानिवत्त्वादनुदात्तत्वे तस्य पूर्वेण गुणैकादेशे एकादेशस्यात्रोभयानुदात्तस्थानिकतयानुदात्तत्वम्। वाजेषु। "वज गतावि"त्यस्माद्धातो"रकर्तरि च कारके संज्ञायामि"त्यनेन घञि प्रत्यये "अजिव्रज्योश्चे"ति चकारात्कुत्वाभावे वृद्धौ वाजशब्दः। वांधातोर्वा णिचि जुगागमेऽप्रत्यये बाहुलकाद्वाजशब्दः। तत्र धातोः स्वरः प्रत्ययस्वरेण निवर्तनीयः परन्तु प्रत्ययस्य ञित्त्वेन "ञ्नित्यादिर्नित्यम्" इत्यनेन ञिदन्तस्यादेरुदात्तत्वबोधनादाद्युदात्तं वाजपदम्। "कर्षात्वतो घञोऽन्त उदात्त" इत्यनेन घञन्तस्यान्तोदात्तत्वसम्भावने तु वृषादित्वादाद्युदात्तत्वं बोध्यम्। अन्ये कल्पेऽप्रत्ययस्वरेणान्तोदात्तत्वे प्राप्ते वृषादिपाठकल्पनयाऽऽद्युदात्तत्वं बोध्यम्। ततः सप्तमीबहुवचने सुप्रत्यये तन्निमित्तके पूर्वस्याकारस्यैत्वे वाजेषु इतिपदम्। तत्र सुप्रत्ययस्य सुप्त्वेनानुदात्तत्वम्। तन्निमित्तकैकारस्यापि अनुदात्तस्थानिकतयाऽनुदात्तत्वम्। तस्योदात्तात्परत्वात्स्वरितः परस्य तु स्वरितात्परत्वात्प्रचयः। वाजिनम्। पूर्ववद्वाजशब्दाद्व्रजधातुनिष्पन्नान्मत्वर्थे "अत इनिठनौ" इत्यनेनेनिप्रत्ययेऽकारलोपे वाजिशब्दस्ततो द्वितीयैकवचनेऽमि वाजिनमिति पदम्। तत्रेनेः

नवमीमृचमाह :—

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।

धनानामिन्द्र सातये ॥९॥

तम् । त्वा । वाजेषु । वाजिनम् । वाजयामः ।

शतक्रतो इति शतऽक्रतो ।

धनानाम् । इन्द्र । सातये ॥९॥

हे शतक्रतो = बहुकर्मयुक्त यद्वा बहुप्रज्ञानयुक्तेन्द्र धनानां सातये = संभजनार्थं वाजेषु = युद्धेषु वाजिनम् = बलवन्तं त्वा पूर्वमन्त्रोक्तगुणयुक्तं त्वां वाजयामः = अन्नवन्तं कुर्मः ।

"रण" इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु (निघ० २।१७) "पौंस्ये महाधने वाजेऽज्म" इति पठितम् । अष्टाविंशतिसंख्याकेष्वन्ननामसु (निघ० २।७) "अन्धो वाजः पाज" इति पठितम् । "उरु तुवि" इत्यादिषु द्वादशसु बहुनामसु (निघ० ३।१) "शतं सहस्रम्" इति पठितम् ।"आपोऽम्न" इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु (निघ० २।१) "शक्म क्रतुः" इति पठितम् । "केतुः केतः" इत्यादिष्वेकादशसु प्रज्ञानामसु (निघ० ३।९) "क्रतुः, असुः" इति पठितम् । त्वा । "अनुदात्तं सर्वम्" (पा० ८।१।१८) इत्यनुवृत्तौ "त्वामौ द्वितीयाया" (पा० ८।१।२३) इति त्वादेशः । वाजेषु "वज व्रज गतौ" । वाजयति गमयति शरीरनिर्वाहमनेनेति वाजो बलमन्नं वा । ण्यन्तात्करणे घञ् । तत्र ञित्स्वरस्यापवादे "कर्षात्वतः" (पा. ६।१।१५९) इत्यन्तोदात्तत्वे प्राप्ते तस्याप्यपवादत्वेन "वृषादीनां च" (पा. ६।१।२०३) इत्याद्युदात्तत्वम् । वाजयामः । वाजोऽस्यास्तीति वाजवान् । तं कुर्म इत्यर्थे "तत्करोति तदाचष्टे" (पा ३।१।२५) इति णिच् । "इष्ठवण्णौ प्रातिपदिकस्य" (पा. ६।३।१५५।१) इति तस्मिन्परत इष्ठवद्भावाद् "विन्मतोर्लुक्" (पा. ५।३।६५) इति मतुपो लुक् । "टेः" (पा. ६।४।१५५) इत्यकारलोपः ।

प्रत्ययस्य "आद्युदात्तश्च" इत्याद्युदात्तस्वरेण वाजशब्दस्वरे निवर्तिते वाजिशब्दोऽन्तोदात्तः शेषनिघातेनाद्यनुदात्तः । अमः प्रत्ययस्य सुप्त्वेनानुदात्तत्वे वाजिनं पदं मध्योदात्तम् । तत्राद्योऽनुदात्तो द्वितीय उदात्तस्तृतीयस्तूदात्तात्पर इति स्वरितः ।

णिचश्चित्त्वादन्तोदात्तत्वम् । शपः पित्त्वेनानुदात्तत्वम् । लसार्वधातुकस्वरेणाख्यातस्याप्यनुदात्तत्वम् । पादादित्वात् "तिङ्ङतिङः"(पा. ८।१।२८) इति न निघातः । शतक्रतो । आमन्त्रितनिघातः । धनानाम् ।"नब्विषयस्यानिसन्तस्य"(फि. २।३) इत्याद्युदात्तः । सातये ।"उदात्त" इत्यनुवृत्तौ "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" पा. ३।३।९७) इति क्तिन्नुदात्तः ॥ ९ ॥*

---

* तम् । तनुधातो "स्यजितनियजिभ्यो डित्" इत्यनेनोणादिकसूत्रेणाद्प्रत्यये डिति तच्छब्दः । ततो द्वितीयैकवचनेऽमि त्यदाद्यत्वे पररूपे 'ऽमिपूर्व' इतिपूर्वरूपे तमितिपदम् । तत्र तच्छब्दे प्रत्ययस्वरेण,उणादीनामव्युत्पन्नत्वपक्षे प्रातिपदिकस्वरेण वान्तोदात्तत्वम् । द्वितीयैकवचनामः सुप्त्वेनानुदात्तत्वम् । तन्निमित्तकस्य त्यदाद्यत्वस्य दकारस्थानिकत्वेन दकारस्य व्यञ्जनत्वेन व्यञ्जनस्य च 'व्यञ्जनमनुदात्तमि''ति अनुदात्तत्वेन स्थानिवद्भावेनानुदात्तत्वम् । "अतो गुणे" इतिसूत्रेण तस्य तच्छब्दाकारेण पररूपैकादेशे तकाराकारस्योदात्तत्वेन दस्थानिकाकारस्यानुदात्तत्वेनोदात्तानुदात्तोभयस्थानिकस्य स्थानिवत्त्वेन स्वरितत्वमुभयधर्मकत्वरूपं प्राप्तं परंतु "एकादेश उदात्तेनोदात्त" इत्यनेन विशेषशास्त्रेण तस्योदात्तः । ततोऽमा पूर्वरूपैकादेशेऽपि उक्तवदेवोदात्तत्वम् । त्वा । "अनुदात्तं सर्वमपादादावि"त्यधिकारे "त्वामौ द्वितीयायाः" इत्यनेन सूत्रेण युष्मच्छब्दस्य द्वितीयैकवचनान्तस्य स्थाने ऽनुदात्तत्वादेशविधानादनुदात्तः । वाजेषु वाजिनम् । इत्यत्र पूर्वमन्त्रगतवत्स्वरः । भाष्यकृता वजधातोर्ण्यन्तात्करणे घञ् वाजशब्द इत्यभिप्रेयते । ततोऽत्र णिचोऽपि घञा अपहारेण स्वरः पूर्ववदेव । वाजयामः । पूर्वोक्तवाजशब्दात् "तदस्यास्त्यस्मिन्निति" मतुपि ततः "तत्करोति तदाचष्टे" इत्यनेन णिचि इष्ठवद्भावेन 'विन्मतोर्लुगि''तिमतुपो लुकि वाजिधातोर्लटि उत्तमपुरुषबहुवचने मसि मध्ये शपि गुणेऽयादेशे "अतो दीर्घो यञी''ति दीर्घे वाजयाम इतिपदम् । तत्र वाजशब्दस्य स्वरः पूर्ववत् । मतुपः पित्त्वादनुदात्तत्वम्, णिचश्चित्त्वेन णिजन्तस्यान्तोदात्तत्वं "चित" इत्यनेन । शपः पित्त्वादनुदात्तत्वम् । मसः प्रत्ययस्वरेणाद्युदात्तत्वेऽपि प्रकृते तस्य शपः परत्वेन "तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोरि''त्यनेनानुदात्तत्वेन णिच्स्वरस्यैवात्र शेषः । तत्र शब्निमित्तको गुण उदात्तणिच्प्रत्ययेकारस्थानिक इति स्थानिवद्भावादुदात्तस्तत्स्थानिकायादेशस्यापि तथैवोदात्तत्वमिति वाजयामःशब्दे आदिरनुदात्तो द्वितीय उदात्तस्तृतीयचतुर्थावनुदात्तौ । तत्र तृतीयस्योदात्तात्परत्वात्स्वरितश्चतुर्थस्य स्वरितात्परत्वात्प्रचयः । शतक्रतो । अत्र पूर्वमन्त्रगतवत्स्वरः । केवलं संहितायां स्वरितात्परत्वात्सर्वेषामनुदात्तानां प्रचयः स्वरः "स्वरितात्संहितायामनुदात्तानाम्" इत्यनेन । धनानाम् । धिधातोर्नप्रत्ययो धेरिकारस्याकारः पृषोदरादित्वात् धिनोतीति धनम् इति निरुक्तकाराभिमतम् । तत्र धातुस्वरोऽन्त उदात्तः प्रत्ययस्वर "आद्युदात्तश्चे" त्यादिरुदात्तः सतिशिष्टत्वेन प्रत्ययस्वरेणान्तस्योदात्तत्वं धातुस्वरनिवर्तनेन प्राप्तं परंतु "नब्विषयस्यानिसन्तस्य" इत्यनेनादेरुदात्तः शेषनिघातेनान्तस्यानुदात्तत्वम् । ततः षष्ठीबहुवचने आमि नुटि दीर्घे धनानामिति रूपम् । तत्रामः सुप्त्वादनुदात्तत्वं तन्निमित्तकदीर्घस्यानुदात्तस्थानिकतया ऽनुदात्तत्वमिति धनानांशब्द आदिरुदात्तो द्वितीयस्योदात्तात्परत्वात्स्वरितस्तृतीयस्य स्वरितात्परत्वात्प्रचयः । इन्द्र । इन्देर्धातो"ऋज्रेन्द्र" इत्यादिनौणादिकेन सूत्रेण रन्प्रत्यये नित्त्वादाद्युदात्तत्वमिन्द्रशब्दस्य । ततः संबोधनप्रथमाया एकवचने इन्द्रेतिपदम् । तस्य पदात्परत्वेन "आमन्त्रितस्य च" इति आष्टमिकेन सूत्रेण सर्वनिघातः । तस्य च स्वरितात्परत्वादुभयोरपि स्वरयोः प्रचयः । सातये । षणधातोः "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इत्यनेनोदात्तक्तिन्प्रत्ययान्तत्वेन निपातनादन्तोदात्तः सातिशब्दः । ततश्चतुर्थ्येकवचनङेप्रत्ययस्य सुप्त्वादनुदात्तत्वेन तन्निमित्तस्य गुणस्य

स्क०—तच्छब्दः प्रकृतापेक्षः। तं त्वा वाजेषु वाजिनम् वाजो बलं तद्वन्तम्। वाजयामः। वाजयतिरर्चतिकर्मा। स्तुमः। हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा। किमर्थम्? उच्यते। सङ्ग्रामेषु जिगीषितानां धनानां हे इन्द्र सातये दानाय सम्भजनाय वा। लाभायेत्यर्थः ॥ ९ ॥

वे०—तं त्वा युद्धेषु बलिनं स्तुतिभिर्बलिनं कुर्मः शतप्रज्ञ धनानामिन्द्र लाभाय ॥ ९ ॥

दशमीमृचमाह :—

यो रायो३ऽवनिर्महान्त्सुपारः सुन्वतः सखा।

तस्मा इन्द्राय गायत ॥ १० ॥

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा।

तस्मै। इन्द्राय। गायत ॥ १० ॥

यः=इन्द्रो रायो=धनस्यावनी=रक्षकः स्वामी वा तस्मा इन्द्राय गायत। हे ऋत्विजस्तत्प्रीत्यर्थं स्तुतिं कुरुत। कीदृश इन्द्रः? महान्=गुणैरधिकः। सुपारः=सुष्ठु कर्मणः पूरयिता। सुन्वतः=यजमानस्य। सखा=सखिवत्प्रियः ॥

रायः। "ऊडिदंपदाद्यप्पुम्रैद्युभ्य" (पा० ६।१।१७१) इति विभक्तेरुदात्तत्वम्। अवनिः। "अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु चे"त्यस्माद् "अर्तिसृभृधृधम्यम्यश्यवितॄभ्योऽनिः" (उ. २।९७) इत्यनिः। प्रत्ययाद्युदात्तत्वम्। सुपारः। "पॄ पालनपूरणयोः" इत्यस्माण्णिजन्तात् "कर्तरि" इत्यनुवृत्तौ (पा० ३।१।६८) "पचाद्यच्" (पा० ३।१।१३४) "चित" (पा० ६।१।१६३) इत्यन्तोदात्तः। सुन्वतः। "शतुरनुमो नद्यजादी" (पा. ६।१।१७३) इति विभक्तिरुदात्ता। सखा। "समाने ख्यः स चोदात्तः"(उ० ४।१३८) इतीण्प्रत्ययान्तः। तत्संनियोगेन यलोपः। सशब्दस्य चोदात्तः। डित्त्वाट्टिलोपः। तस्मै। "आदिः" इत्यनुवृत्तौ "त्यजितनियजिभ्यो डित्"(उ. १।१३०) इति तनोतेरद्प्रत्ययः। डित्त्वाट्टिलोपे प्रत्ययस्वरेण तच्छब्द उदात्तः। त्यदाद्यत्वम्। "एकादेश उदात्तेनोदात्त" (पा० ८।२।५) इत्युदात्तः। "सावेकाचस्तृतीयादिर्विभक्तिः" (पा० ६।१।१६८) इति विभक्तेरुदात्तत्वप्राप्तौ प्रथमैकवचनेऽवर्णान्तत्वात् "न गोश्वन्साववर्ण" (पा. ६।१।१८२) इति निषेधः। इन्द्राय। इन्द्रशब्दो रन्प्रत्ययान्तो निपातितः। नित्त्वादाद्युदात्तः। "कर्मणा

एकारस्य तत्स्थानिकायादेशस्य चोदात्तस्थानिकत्वेनोदात्तत्वं स्थानिवत्त्वात्। एवं च सातयेशब्द आदिरनुदात्तो द्वितीय उदात्तस्तृतीयोऽनुदात्तोऽपि उदात्तात्पर इति स्वरितः "उदात्तादनुदात्तस्य स्वरित" इत्यनेन ॥

यमभिप्रैति स संप्रदानम्" (पा. १।४।३२) इत्यत्र "क्रियाग्रहणं कर्तव्यम्" (पा. १।४।३२।१) इति वचनाद्दानक्रियया प्राप्यत्वात्सम्प्रदानत्वेन चतुर्थी* ॥ १० ॥ ८ ॥ ॥ २-१ ॥

---

* यः। यज्धातोः "त्यजितनियजिभ्यो डित्" इत्यनेनौणादिकेन सूत्रेणादिप्रत्ययो डित्। डित्त्वाट्टिलोपे यच्छब्दः। तत्र प्रत्ययाद्युदात्तत्वेन यच्छब्दोऽन्तोदात्तः। औणादिकानामव्युत्पन्नत्वमिति पक्षे प्रातिपदिकस्वरेणान्तोदात्तत्वम्। ततः प्रथमैकवचने सुप्रत्यये तन्निमित्तकत्यदाद्यत्वे पररूपे च रुत्वविसर्गयोर्य इति पदम्। तत्र त्यदाद्यत्वस्य दकारस्थानिकतया दकारस्य व्यञ्जनत्वेन व्यञ्जनस्य चानुदात्तत्वविधानात्स्थानिवत्त्वेनानुदात्तत्वम्। पररूपस्योदात्तयकाराकारानुदात्तदस्थानिकाकारोभयस्थानिकतया स्थानिवत्त्वेनोभयधर्मकत्वेन स्वरितत्वे प्राप्ते विशिष्य विहितेन "एकादेश उदात्तेनोदात्तः" इत्यनेनोदात्तत्वम्। एवं च यःपदमुदात्तम्। तस्य रायःशब्दपरत्वे संहितायां तदीयप्रथमैकवचनसुसकारस्य "ससजुषोरुः" इति रुत्वे "हशि च" इत्युत्वे तेन सह यकाराकारस्य गुणे यो इति रूपम्। तत्र उत्वस्य व्यञ्जनस्थानिकत्वेन पूर्ववत्स्थानिवत्त्वेनानुदात्तत्वं यकाराकारेण तस्य गुणादेशोऽपि पूर्ववदेव "एकादेश उदात्तेन" त्यादिसूत्रेणोदात्त इति योशब्द उदात्तः। रायः। "रातेर्डैः" इति उणादिसूत्रेण राधातोर्डैप्रत्यये टिलोपे रैशब्दः। ततः षष्ठ्येकवचनङस्प्रत्यये ऐकारस्यायादेशे रुत्वविसर्गयो राय इति पदम्। तत्र प्रत्ययस्वरेण रैशब्दोऽन्तोदात्तः। षष्ठ्येकवचने तस्य सुप्त्वेनानुदात्तत्वेन धातुस्वरस्यैव शेषे प्राप्तेऽत्र सूत्रम् "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" इति। अनेन रैश दत उत्तरस्य शसादिविभक्तिप्रत्ययस्योदात्तत्वविधानाद्विभक्तेरुदात्तत्वे शेषनिघातेनाद्यस्यानुदात्तत्वमिति रायःपदमन्तोदात्तम्। ततोऽवनिशब्दे परतः संहितायां रायःशब्दीयङस्सकारस्य रुत्वे "अतो रोरप्लुतादप्लुते" इत्यनेनोत्वम्। पूर्वेण यकाराकारेण गुणैकादेशे परेणाकारेण पूर्वरूपे यो इति रूपं भवति। तत्र रुत्वस्य रेफरूपतया रेफस्य व्यञ्जनत्वेन व्यञ्जनस्य च "व्यञ्जनमनुदात्तम्" इत्यनेनानुदात्तत्वोक्तेरनुदात्तत्वात्तत्स्थानिकोकारस्यापि स्थानिवत्त्वेनानुदात्तत्वम्। तेन सह पूर्वस्य रायःशब्दीयान्त्ययकाराकारेणोदात्तेन गुणरूपैकादेशे एकादेशस्य पूर्वोदात्तपरानुदात्तोभयस्थानिकतयोभयविधस्वरकत्वं स्थानिवत्त्वात्प्राप्तं परन्तु "एकादेश उदात्तेनोदात्तः" इत्यनेन एकादेशस्थानी उदात्तश्चेदादेश उदात्त इत्यर्थकेनोदात्तत्वे ततः परवर्त्यवनिशब्दीयानुदात्ताकारेण "एङः पदान्तादति" इत्यनेन पूर्वरूपैकादेशे पूर्ववदेवात्र पूर्वोदात्तपरानुदात्तोभयस्थानिकत्वेन प्राप्तोभयधर्मकस्वरितस्य बाधकेन "एकादेश" इत्यनेनोदात्तत्वे प्राप्ते तद्बाधकेन "स्वरितो वाऽनुदात्ते पदादौ" इत्यनेन स्वरितत्वम्। एतस्य च स्वरितस्य जात्यस्वरितसरूपत्वेन ततः परस्तादुदात्ते परे स्वरितावयवोदात्तानुदात्तयोः स्पष्टं श्रवणं भवति। तच्चैकस्मिन्नुच्चारिते वर्णे सकृत्प्रयत्नेन प्रदर्शयितुमशक्यमित्युक्तविधस्थलेषु तस्य वर्णस्यावृत्तिं कृत्वैकेनावृत्तेनैकस्यापरेणापरस्येति द्वयोः प्रदर्शनं क्रियते। तदर्थमेकाधिकवारमावृत्त्यभिप्रायेणैतादृशस्थलेऽक्षरस्य परस्तादङ्को विलिख्यते स चासौ कम्प इति व्यवह्रियते वैदिकैः। तादृशोऽत्र कम्पोऽपेक्ष्यत इति योकारात्परस्तात्त्र्यङ्को विलिखितः। तस्य च स्वरितोऽर्थः स चोक्तः। अवनिः। अवतेर्धातोः "अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः" इत्यौणादिकेन सूत्रेणानिप्रत्ययः। ततः प्रथमैकवचने सौ रुत्वविसर्गयोरवनिः पदम्। तत्र धातुस्वरं बाधित्वा प्रत्ययस्वरेणावनिशब्दो मध्योदात्तः। आद्यन्तयोः शेषनिघातेनानुदात्तत्वे प्रथम उदात्तः पर इत्यनुदात्त एवावशिष्यते तृतीयस्तूदात्तात्पर इति "उदात्तादनुदात्तस्य स्वरित" इति स्वरितः। महान्। "वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च" इत्युणादिसूत्रेण महधातोरतिप्रत्ययः। ततः प्रथमैकवचने सौ तस्य सर्वनामस्थानसंज्ञकत्वेन महच्छब्दस्य शतृवद्भावेनोगित्त्वनिबन्धन उपधाया "उगिदचा॥मि"ति नुमि "सान्तमहतः

॥ इति प्रथमस्य प्रथमेऽष्टमो वर्गः ॥

संयोगस्ये"ति उपधादीर्घे संयोगान्तलोपे महानिति पदम् । तत्र महच्छब्दे प्रत्ययस्वरेणान्तोदात्तत्वम् । तत्स्थानिक-दीर्घस्यापि स्थानिवत्त्वेनोदात्तत्वमाद्यस्य शेषनिघातेनानुदात्तत्वम् । सुपारः । पॄपालनपूरणयोरित्यस्माण्णि-जन्तात्पचाद्यच् । ततः सुशब्देन समासः । तस्य प्रथमैकवचने रूपम् । तत्र धातोः स्वरस्य णिच्-स्वरेण निवृत्तिरिति अजन्तस्य "चितः" इत्यनेनान्तस्योदात्तत्वम् । ततः सुशब्देन समासे समासान्तस्योदात्त इति सुपारशब्दोऽन्तोदात्तः । तत्र धातोः स्वरस्यानुदात्तत्वेन तस्य स्थाने णिज्निमित्तवृद्धिरूपाकारस्याप्यनुदात्तत्वं स्थानिवत्त्वात् । एवं च सुपारःशब्दे आदी अचावनुदात्तौ अन्त्यस्तूदात्तः । तत्र संहितायामाद्यस्योदात्तात्पर-त्वात्स्वरितत्वं द्वितीयस्योदात्तपरत्वेनानुदात्तत्वम् । सुन्वतः । षुञ्धतोर्लटि तस्य शतरि मध्ये श्नुप्रत्यये "हुश्नुवोः सार्वधातुके" इति यणि सुन्वच्छब्दः । ततः षष्ठ्येकवचने ङस्प्रत्यये सुन्वत इति रूपं रुत्वविसर्गाभ्याम् । तत्र धातोः स्वरः शतृप्रत्ययस्वरेण तस्यापि श्नुप्रत्ययस्वरेण निवृत्तौ मध्योदात्तत्वं शेषनिघातेनाद्यन्तयो-रनुदात्तत्वे तस्मिन्ननुदात्ते परतो यणि श्नुप्रत्ययोकारस्य सञ्जाते "उदात्तस्वरितयोर्यणः स्वरितो वानुदात्तस्य" इति शतृप्रत्ययाकारस्य स्वरितत्वे प्राप्तेऽत्र "शतुरनुमो नद्यजादी" इत्यनेन ततः परस्याः षष्ठ्या विभक्तेरुदात्तत्वे सुन्वतः शब्दोऽन्तोदात्तः । शेषनिघातेनाद्ययोरनुदात्तत्वम् । तत्राद्य उदात्तात्पर इति स्वरितः, पर उदात्तः पर इत्यनुदात्तः संहितायाम् । सखा । समानशब्दे उपपदे ख्यातेरिण्प्रत्ययो डित् समानस्य सादेश उदात्त इत्यर्थकेन "समाने ख्यः स चोदात्त" इति औणादिकेन सूत्रेण इणि प्रत्यये डित्त्वाट्टेर्लोपे तत्सन्नियोगेन यलोपे समानस्य सादेशे सखिशब्दः । ततः प्रथमैकवचने सौ "सख्युरसम्बुद्धौ" इति अनङि उपधाया दीर्घे सुलोपे नकारलोपे रूपं सखेति । तत्र खिशब्दे प्रत्ययस्वरः । समासे समासान्तस्वरेणान्तस्योदात्तत्वे प्राप्तेऽत्र सादेशस्योदात्तत्वेन विधानात्सखिशब्द आद्युदात्तः । ततोऽनङि तस्य स्थानिवत्त्वेनानुदात्तसखिशब्देकारस्थानजत्वेनानुदात्तत्वं तत्स्थानजस्य दीर्घस्यापि तथैवानुदात्तत्वम् । एवं च सखाशब्द आद्युदात्तोऽन्तानुदात्तः । तस्यानुदात्तस्योदात्तात् परत्वात्स्वरितः । तस्मै । तनुधातोः "त्यजितनियजिभ्यो डित्" इत्यनेनादिप्रत्यये डिति डित्त्वाट्टिलोपे तच्छब्दः । ततश्चतुर्थ्येकवचने ङेप्रत्यये तस्मिन् परतस्तच्छब्दस्य त्यदाद्यत्वे पररूपे ङेः स्मायादेशे तस्मै इति रूपम् । तत्र प्रत्ययस्वरेण प्रातिपदिकस्वरेण वा तच्छब्दोऽन्तोदात्तः । त्यदाद्यत्वस्य व्यञ्जनस्थानिकत्वेनानुदात्तत्वं पररूप-स्योदात्तस्थानिकत्वेनोदात्तत्वं स्मायादेशस्य सुप्स्थानिकत्वेनानुदात्तत्वम् । तस्य स्मै इत्यनुदात्तस्यैकारस्य संहितायामिन्द्रशब्दीयेकारः पर इति आयादेशे यलोपः । तस्यायादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम् । तस्य स्मैकारस्य पदतादशायामुदात्तात्परत्वात्स्वरितः । संहितायांतु उदात्तः पर इति "उदात्तः स्वरितपरस्य सन्नतरः" इति अनुदात्तापरपर्यायः सन्नतरः । इन्द्राय । इदिधातो"ऋज्रेन्द्रे"त्यनेन रनि प्रत्यये नित्त्वादाद्युदात्त इन्द्रशब्दः । तस्माच्चतुर्थ्येकवचने ङेप्रत्यये तस्य यादेशे पूर्वस्य दीर्घे इन्द्रायेति पदम् । तत्र ङेप्रत्ययस्य सुप्त्वादनुदात्तत्वम् । तत्स्थानिकयादेशस्यापि स्थानिवत्त्वेनानुदात्तत्वम् । तन्निमित्तकदीर्घोऽप्यनुदात्तस्थानिक इति स्थानिवत्त्वादनु-दात्त एव । एवं चेन्द्रायशब्दे आदिरुदात्तः परौ द्वितीयतृतीयावचावनुदात्तौ । तत्र द्वितीय उदात्तात्पर इति स्वरितस्तृतीयः स्वरितात्पर इति प्रचितः । गायत । गैशब्दे इत्यस्माद्धातोर्लोटि मध्यमपुरुषबहुवचने थ-प्रत्यये तस्य "तस्थस्थमिपां तांतंताम" इत्यनेन तादेशे मध्ये शपि आयादेशे गायतेति रूपम् । तत्र धातुस्वरं बाधित्वा थप्रत्ययस्वरः प्राप्तः शप् त्वनुदात्तः । थप्रत्ययस्थानिकस्य तादेशस्यापि स्थानिवत्त्वेनोदात्तत्वमित्यन्तोदात्तत्वं गायतशब्दे प्राप्तं परंतु अत्र तप्रत्ययस्य सार्वधातुकस्याडुपदेशात्परत्वेन "तास्यनुदात्तेन्ङिदडुपदेशाल्लसार्वधातुक-

इति द्वितीयाऽनुवाके प्रथमं सूक्तम् ॥ २।१ ॥

मनुदात्तमन्विङ्कोः'' इत्यनेन तस्यानुदात्तत्वे धातोः स्वरस्य शेषे गायतपदमाद्युदात्तं प्राप्तं परं त्वत्रातिङन्तपदात्परत्वेन 'तिङ्ङतिङ' इत्यनेन तस्य सर्वानुदात्तत्वम्। तस्य संहितायां स्वरितात्परत्वात्प्रचयः।

